
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2405 विषय न्यायदर्शन

नाव न्यायकौस्तुभ (शब्दपरिच्छेद)

लेखक/लिपीकार महादेव पंडित

पृष्ठ 252 काळ .... पूर्ण/~~अपूर्ण~~

न्याय ५ ३।३५

न्या॰ को॰
१

श्रीगणेशाय नमः ॥ नत्वा सांबशिवं मुकुंदपितरं श्रीकंठसंज्ञं गुरुं रूपः सुस्पष्टं सुधिया विभाव्य च तदुक्तार्थं स
मस्तेह दिशाद्मानवरे विशिष्टविविधव्युत्पत्तिसंपादके गूढार्थप्रतिपत्तये वरधियो कुर्वे प्रबोधं वरं १
अथ शब्दो निरूप्यते अत्रायजो व्यापकजीवकभावसंगत्योपमाननिरूपणानंतरं शाब्दनिरूपणमिति वह
वोवदंति तत्र यद्यपि ज्ञायमानशब्दस्य शाब्दबोधकरणतावादिशाचीनमते स्वरूप्यतस्तस्यासंभवेनोपमा
नस्य शाब्दानुपजीव्यत्वात् तथापि फलद्वारकः स संभवे स वशाब्दबोधे शक्तिग्रहस्य तत्रोपमानस्य हे
तुतया शक्तिग्रहद्वारा शाब्दबोधे उपमानस्योपजीव्यता तानेवेवमुपमितावतिदेशवाक्यार्थज्ञानात्मकोपमा
नस्य हेतुतया तत्र चातिदेशवाक्यात्मकशब्दस्य हेतुतयोपमानद्वारोपमितौ शाब्दस्यापि हेतुतया विपरीत
स्यापि तत्स्य संभवेन शब्दस्योपमाननिरूपणानंतरं निरूपणे नियामकत्वेन संभवतीति वाच्यं यत्प्रमाणफ
लसमानधर्मितावच्छेदककें सत् यत्प्रमाणफले तदुपजीवकंभवतीति तत्तत्प्रमाणनिरूपणानंतरं निरूपण
विषयस्तेति नियमस्यानंतरनिरूपणप्रयोजकत्वोपगमेनोगवयोगवयपदवाच्य इत्याद्युपमितिसमानध

१

र्मितावच्छेदकं कस्य गवयोस्तीत्यादिवाक्यजन्यशाब्दबोधस्य तादृशोपमित्युपजीवकतया गोसदृशो गवयपद
वाच्य इत्यादावतिदेशवाक्यार्थज्ञानात्मकशाब्दबोधासमानधर्मितावच्छेदकत्वं गवयो गवयपदवाच्य इत्याद्युपमिते
स्तादृशशाब्दबोधानुपजीवकतया तद्विपरीतत्वस्यासंभवेनादोषात्। वस्तुतस्तु तत्फलधर्मितावच्छेदकताप्र
योज्यत्वं फलधर्मिताकत्वं प्रमाणस्य तत्प्रमाणान्तरनिरूपणप्रयोजकमित्युपगमान्न दोषः शाब्दबोधधर्मिताव
च्छेदकतायाः शक्तिग्रहात्मकोपमितिधर्मितावच्छेदकतामात्रप्रयोज्यत्वात् उपमितिधर्मितावच्छेदकताया
श्च सादृश्यज्ञानधर्मितावच्छेदकतामात्रप्रयोज्यत्वेनातिदेशवाक्यार्थज्ञानात्मकशाब्दबोधधर्मितावच्छेदक
ताप्रयोज्यत्वात्। एतेन यत्प्रमाणफलसाधुत्वनियमस्य नानन्तरनिरूपणप्रयोजकत्वसंभवः गोसदृशो गवय
पदवाच्यः गवयोस्तीत्यादिसमूहालंबनात्मकातिदेशवाक्यार्थज्ञानमादायोपमितेरपि शाब्दबोधसमानधर्मि
तावच्छेदकत्वसंभवेनोक्तदोषस्य दुर्वारत्वादित्याशंकापि निरस्ता शाब्दज्ञानस्यैव शाब्दबोधकरणतावादि
नवीनमते च शक्तिग्रहात्मकोपमितेरवशाब्दप्रमाणतयोपमानोपजीवकत्वेन च स्वरूपत एवोपजीव्याप

जीवकभावः संभवति। न चोक्तरीत्या यथाशब्दस्योपमानोपजीवकत्वं तथातिदेशवाक्यार्थज्ञानात्मकोपमा
नस्याप्यतिदेशवाक्यज्ञानात्मकशब्दप्रमाणोपजीवकत्वेन तस्यानेतरनिरूपणप्रयोजकत्वासंभव इति वा
च्यं यत्प्रमाणं स्वसमानविषयकं यत्प्रमाणोपजीवकं तत्तदनेतरं निरूप्यमिति नियमोपगमे तत्र शब्दस्य
स्वसमानविषयकोपमानोपजीवकतयोपमानस्य च स्वासमानविषयकशब्दोपजीवकतया दोषात्।
न च स्वसमानविषयकत्वे यदि यत्किंचिद्विषयमादाय तदातिदेशवाक्यज्ञानात्मकशब्दस्योपमानविषयी
भूतगवयपदविषयकत्वेन शब्देऽपि तदुपजीव्यं यदि च यावद्विषयमादाय तदोपमानेऽप्यसंभवितस्योप
मित्यात्मकशब्दमुख्यविशेष्यगवयपदविशेष्यविषयीभूतगवयस्य विशिष्टविषयकत्वादिति वाच्यं। मुख्य
विशेष्यमादाय तद्विलक्षणेनोपमानस्योपमित्यात्मकशब्दमुख्यविशेष्यगवयविशेष्यकत्वेन अतिदे
शवाक्यज्ञानात्मकशब्दस्योपमानमुख्यविशेष्यगवयविशेष्यकत्वेनोक्तदोषाभावात्। यत्तु एवमप्यु
पमानजनकस्य सहकारिसदृशपदवाक्यमित्याकारकज्ञानविषयहस्य शक्तधीकरणतया शब्दप्रमाणस्योपमा

नमुख्यविशेष्यकगवयव्यक्तिमुख्यविशेष्यकतयाउपमानेपित्वसमानमुख्यविशेष्यकशब्दोपजीव
कत्वान्नोक्तरीत्यानिर्वाहः इतितदसत् विशेष्यतायामेकधर्मप्रकारतानिरूपितत्वनिवेशेनसामंजस्या
त्। यत्तुमानसातावच्छेदकधर्मावच्छिन्नोपतोव्यतानिरूपितमुपजीवकत्वमानेतपदाभिधानेनिया
मकंशक्तिपरिच्छित्तिरेवोपमानफलंनतुकारणतापरिच्छित्तिरपीत्युपमानमात्रस्येवशब्दोपजी
व्यताशब्दमात्रस्यवनोपमानोपजीव्यत्वेपदेपदेसोसादेव्यभिचारादितिनकोपिदोषइतितन्नका
रणतापरिच्छित्तेरप्युपमानफलत्वस्योपमानपरिच्छेदेभवस्यायत्तात्। वस्तुतस्तुमानपरिच्छेद
संगतेरनेतराभिधानाव्याप्यत्वस्यानेतराभिधानव्यापकत्वस्यचव्यवस्थापकत्वस्यचव्यवस्था
पनेनसंगतेरनपेक्षाविशेषेपिनक्षतिः अनेतराभिधानेनियामकस्याहेत्वात्मएवं यत्तुउद्देश
कमेपिसंगतिरवबीजमितितदसत् उक्तक्रमेणसंगतेस्तदोजस्तासंभवेस्वतंत्रहस्पतिन्यायेनेउ
पाएवतन्नियामकत्वादिसेवतत्वात् तत्रोपोपदेशःशब्दः अत्रामप्रभृतवाक्यार्थयथार्थज्ञानेवास्त

स्योपदेशः तज्जन्योपदेशः विशिष्टजन्यत्वं च विशेष्यस्याव्यावर्त्तकतया विशेषणजन्यत्वपर्यवसन्ने
तथा च प्रकृतवाक्यार्थयथार्थज्ञानजन्यशब्दत्वं लक्षणं फलितं अत एवैतदनुसारिणा मणिकृता
पि प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणमित्युक्तं अस्यार्थः प्रयोगहेतुभूतो यः पदार्थतत्त्वं
ज्ञानं प्रमारूपार्थज्ञानं प्रकृतवाक्यार्थयथार्थज्ञानं तज्जन्यत्वं तथा चोक्त एवार्थः अत्र तु बोधयि
षापूर्वककाकलावच्छिन्नवकृवाक्यार्थयथार्थज्ञानस्य हेतुत्वमिति प्राचां मते पयसा सिंचतीत्या
दौ वकृयथार्थवाक्यार्थज्ञानजन्यतया लक्षणसमन्वयः वह्निना सिंचतीत्यादौ तु वाक्यार्थज्ञानस्या
यथार्थत्वान्नातिप्रसंगः प्रत्येकपदार्थावांतरवाक्यार्थतत्त्वज्ञानजन्यत्वमादायोक्तातिप्रसंगवा
दस्य वारणाय भूतांतं ज्ञानविशेषणं महावाक्यार्थभ्रममादायातिप्रसंगवारणाय तत्त्वपदं नचै
वमपि वह्निना सिंचतीत्यादौ प्रत्येकपदार्थावांतरवाक्यार्थज्ञानयोर्यथार्थत्वेन वाक्यार्थमहावाक्या
र्थज्ञानद्वारा तज्जन्यत्वमादायातिप्रसंगो स्त्वेवेति वाच्यं एतदर्थमेव भूतांतस्योपादानात् । तदुपाद

नेभ्रमाभावितिध्यात्वयोनुसारेणेतरासहकारेणप्रयोगहेतुतादृशज्ञानजन्यत्वलाभेनोक्तज्ञानयोर्वास्मा
र्थमहावाक्यार्थज्ञानसहकारेणैवप्रवृत्तवाक्यहेतुतयानतिप्रसंगात् । यत्वेवंपयसासिंचेतीत्यादावसं
भवः तत्रापिस्वरूपयोग्यत्वविशिष्टस्यकपदार्थवेतरवाक्यार्थज्ञानसहकारेणैवमहावाक्यार्थतज्ज्ञानस्यप्र
योगहेतुत्वादितिस्वेतरोसन्नेतरासहकारेणेतिवाच्यमितितदसत् । यस्मिन्सतियदभावोवश्यमभा
वस्तस्यैवतस्यसहकारितयास्वजनकस्वरूपयोग्यत्वस्यसहकारित्वाभावेनोक्तदोषाभावात् वस्तु
तस्तुघटःकर्मत्वमानयनेष्टसाधनत्वमित्यादिस्वरूपयोग्यनिराकांक्षवाक्यस्यघटकर्मकानयनादिरूपवि
षयेप्रामाण्यवारणायप्रयोगहेतुभूतत्वेज्ञानविशेषणंतत्त्वेवप्रयोगहेतुर्यस्यतत्त्वेवहुव्रीहिसंबंधस्य
विषयतेतिस्वजन्यज्ञानसमानविषयकत्वंपर्यवसन्नंतथाचस्वजन्यज्ञानसमानविषयकार्थप्र
माजनकत्वंनिराकांक्षादित्याद्ववातेलक्षणार्थः फलितः यत्तुवर्णत्वेनशाब्दप्रमासंप्रतिस्वरूपयोग्यतया
शाब्दप्रमास्वरूपयोग्यमात्रस्यलक्ष्यतयानिराकांक्षादेरपिलक्ष्यतयातद्वारणार्थंकृतयानोक्तविशेषण

न्या॰कौ॰
४

सार्थकं। नन्वेवमपि ध्वन्यात्मकशाब्दवारणाय तदावश्यकमिति वाच्यं। शाब्दत्वस्यानेवर्णत्वेनिवेशेप
वद्वारणसंभवात् वर्णत्वजातेः सुखादिजातिवदप्रामाणिकतया शाब्दत्वेनैव शाब्दप्रमास्वरूपयोग्य
तयाध्वनेरपि लक्ष्यत्वस्य समुचितत्वाच्च। तितदसत्। घटः कर्मत्वमित्यादिनिराकांक्षवाक्यस्य शाब्दत्व
रूपेण घटकर्मत्वादिविषयकप्रमास्वरूपयोग्यत्वेपि प्रमात्वनियतधर्मावच्छिन्नतत्तदर्थविषयक
प्रमानिष्ठकार्यतानिरूपितस्वरूपयोग्यतायाएव लक्ष्यतावच्छेदककोटिप्रविष्टतत्तदर्थघटितप्रमा
णत्वरूपतया निराकांक्षादेरलक्ष्यतया तद्वारकविशेषणस्यावश्यकत्वात् यदपि घटः कर्मत्वमित्या
दिवाक्यस्य प्रमात्वनियतकर्मत्वादिविषयकघटादिप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति स्वरूपयो
ग्यत्वात् लक्ष्यत्वमेवेति तदप्यसत्। तत्तदर्थबोधे परस्परसाकांक्षतत्तदर्थोपस्थापकपदत्वेनैव स्व
रूपयोग्यत्वात्। ननु नव्यनये वाक्यवत्त्वे वाक्यार्थज्ञाने स्याहेतुतया तल्लक्षणसंभवस्तथाहि। वाक्यत्व
स्य जनकतावच्छेदकत्वे घटकादिवाक्यस्य लेकृमयावाक्यार्थज्ञानाघटितसामग्र्येवाक्यवाक्यस्यापि निर्बाहे
वाक्यव्यभिचारः न चैवं तत्रवाक्यार्थबोधघटितपार्थक्येन वाक्यत्वस्य वाक्यार्थवत्पायज्ञानजनकतावच्छेदकत्वान्नदोषइतिवाच्यं

४

तत्र वक्तृवाक्यार्थयथार्थज्ञानस्यान्यथासिद्धेर्दुर्वारत्वात्। क्रमोत्पन्नवर्णसमुदायपर्याप्तमवाक्यत्वावच्छिन्न
स्य कस्यचिदपेक्षणेनुपलसावाक्यत्वस्य जन्यतावच्छेदकत्वासंभवाच्चेति चेन्न तल्लक्षणस्य जन्यपदस्य प्रयोग्य
परतया वाक्यार्थज्ञानस्य वाक्यहेतुत्वाभावेपि तत्प्रयोजकत्वे नानुपपत्तेरभावात्। एतत्तु स्वतस्यानुगम
नेदं लक्षणमननुगतमिति दोषोद्भावनं तदसत् प्रमात्वघटिततल्लक्षणस्याप्यननुगमे लक्षणाननुगम
स्यादोषत्वात्। यद्दिच प्रत्यक्षपरिच्छेदोक्तरीत्या प्रमात्वमनुगतमेवेति विभाव्यते तथापि न क्षतिः स्वज
न्यज्ञानसमानविषयकत्वार्थप्रमाप्रयोज्यत्वसंबंधेन वाक्यविशिष्टशब्दत्वस्य किंचिद्धर्मविशिष्टशब्द
स्यैवानानुगतस्य लक्षणत्वसंभवात्। लक्ष्यतावच्छेदकं चात्र प्रमाणशब्दत्वं। प्रत्यक्षादावव्याप्तिवारणा
य शब्दत्वनिवेशः। एवं च संस्कारादावतिप्रसंगवारणाय लक्षणे शब्दत्वनिवेशः। न चावेकस्येव शब्दपद
स्य सत्त्वात्कथं लक्ष्यलक्षणयोः शब्दत्वत्प्रामरतीवा च्ये शब्दपदानैरर्थक्ये न तत्प्रामरसंभवात्। एतत्तु काका
हिगोन्याकन्यायेन मध्यस्थशब्दपदस्योभयत्र संबंधेनैवतत्प्रामाण्यपरम् न त्वपर्थकमिति तदसत् उद्देश्यवि

धेयोपस्थापकपदयोः पौर्वापर्यरूपाकांक्षायाः उद्देश्यविधेयभावप्रयोजकतया एकपदोपस्थाप्यशाब्द-
तस्योभयत्र संबंधासंभवात्। यत्तु प्रयोगहेतुभूतत्वेन ज्ञानं विशेषणं किंतु उत्क्रांतिप्रसंगवारणाय स्वा-
तंत्र्येण च निविष्टं अर्थपदस्य च प्रकृतवाक्यार्थपरतया न वन्हिनेत्यादावतिप्रसंगस्तत्र प्रयोगसामग्री
सहकृतत्वं भूधातोः प्राप्त्यर्थकतया सहकार्यसहकारिभावसंबंधरूपप्राप्तेरेवात्र विवक्षणात्
तथा च प्रयोगपदस्य शाब्दपरतया भूतांतेन शाब्दसामग्रीजन्यत्वं लब्धं तच्च न संस्कारादाविति ना-
तिप्रसंगः इति लक्षणशाब्दत्वेन निविष्टमित्युक्तेः मिश्रैस्तत्त्विंस्य लघुभूतशाब्दत्वनिवेशो नैवोपपत्तेः
शाब्दसामग्रीजन्यस्य गुरोर्निवेशानौचित्यात् नवीनास्तु शाब्दो गुण इत्यादिप्रत्यक्षकारणस्यातोदृश-
र्थबाधोपस्थितिकाकांक्षादिरहितस्य वाक्यस्य वारणाय प्रमासामान्यबोधकशब्दस्य शाब्दप्रमारूपवि-
शेषपरतया आवश्यकतया शाब्दप्रमाकरणत्वरूपलक्षणतावच्छेदकत्वासंभवेन चेत्लक्ष्यतावच्छेदक-
कोटौ शाब्दपदांतरपूरणं विनैव प्रत्यक्षादिव्यावृत्ते लक्ष्यतावच्छेदकत्वासंभवेन इति लक्षण एव शाब्द-

त्वनिवेशो न तु लक्ष्येपीति प्राञ्चः अत्र ज्ञायमानशब्दस्य करणतामते तादृशशब्दत्वमेव लक्षणं शाब्दज्ञा
नस्य करणमते तादृशशब्दज्ञानत्वं लक्षणं बोध्यं एवं लक्ष्यतावच्छेदकमपि प्रमाणशाब्दत्वं प्रमाणशब्दज्ञान
त्वं वा मतभेदेन बोध्यं यद्वा आप्तोपदेशः शब्दः आप्नोति स्वप्रकारविशेष्यत्वयाप्तमातीति आप्तः यथार्थः
उपदेशः शाब्दबोधः तथा च सयस्मादिति विग्रहस्य तादृशबोधकरणत्वं शाब्दप्रमाकरणत्वपर्यव
सन्ने लक्षणे प्रयोगहेतुभूतेत्यादिमणिकारोक्तस्याप्युक्त एवार्थः प्रयोगहेतुभूतोपस्थापितत्वं ज्ञान
स्येति समासात्तत्तानांते शाब्दप्रमापरं ते देव जन्यत्वस्येति बहुव्रीहिपरत्वेन शब्दश्रवणेन शाब्दप्रमाकरणत्वे
समुदितलक्षणवाक्यार्थः प्रत्यक्षादिप्रमाणातिप्रसंगवारणाय प्रमोपाशाब्दत्वनिवेशः शाब्दपदस्य च
लक्ष्यतावच्छेदके एवं निवेशः लक्ष्यतावच्छेदकेनिविष्टप्रमाणत्वं च प्रमाणस्य व्यवहारविषयत्वं न तु प्रमा
करणत्वं तेन लक्ष्यतावच्छेदकलक्षणयोर्नाभेदः शाब्दत्वं शब्दस्यामीस्यतु नवसिद्धो जातिविशेषः य
तु आम्नाय यथार्थः उपदेशः शब्दज्ञानजन्यत्वव्याप्यशशाविषयकवृत्तिजातिमान्बोधः शाब्दविषयकेति

उपमितिवारणायसत्यस्तात्इतिविग्रहः तथाचतादृशबोधकरणत्वमेवलक्षणमितितदसत्
गौरवात् । उपदर्शितरीत्याकारणतापरिच्छेत्तोरपिउपमितित्वेनोपमितिवारणासंभवाच्च । एतेन
जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिमत्त्वेसतिपदविषयकत्वव्यभिचारिजाति
मदनुभवत्वंशाब्दत्वंतदवच्छिन्नप्रमाकरणत्वेलक्षणंसत्यंतमनुमित्यादिवारणायउपमितिवा
रणायजातिमदित्यंतसत्तादिकमादायासंभववारणायसत्यंतेनुभवत्वाव्यापकेति अनुमिति
त्वस्यापिईश्वरीयपदज्ञानजन्यत्वाव्यभिचारणात्प्रसंगवारणायजन्येतीत्यपिपरास्तं । जन्य
पदज्ञानजन्यत्वाव्यभिचारिजातिमत्त्वेनवानुमित्यादिवारणेश्यन्यत्वात् तन्निवेशगौरवाच्च । किंचा
नुमितौज्ञानत्वेनैवलिंगज्ञानस्यलिंगज्ञानस्यकरणतयाजन्यपदज्ञानस्यज्ञानत्वेनानुमितौस्व
रूपयोग्यतयाप्रसक्तत्वात्तन्निवेशेप्यनुमितिवारणासंभवः नचजन्यपदज्ञानत्वेनतज्जन्यत्वंनिवेश्य
नोक्तदोषइतिवाच्यं । तथासतिशाब्दबोधेपिवर्णज्ञानत्वेनज्ञानत्वेनैववापदज्ञानस्यकरणतयाप्र

वृत्त्वस्यापि जन्यपदविशिष्टबुद्धिनिष्ठतादृशजन्यत्वव्यभिचारेणासंभवात्। अपि च परोक्षत्वमात्रेऽपि
जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकत्वेन शाब्दबोधे तच्छून्यत्वाभावोदसंभवः। न च परोक्षजा
तिरेवाप्रामाणिकीति वाच्यं बाधाभावादिजन्यतावच्छेदकतया तत्सिद्धेः अन्यथानुमितित्वशाब्दत्वादीनां
तथात्वे बध्यतावच्छेदकत्वेनैककारणतापत्तेः न चानुभवत्वे न सांकर्यान्न परोक्षत्वे जातिरिति वाच्यं।
भ्रमत्वप्रमात्वातिरिक्तानुभवत्वजातावेवमानाभावात्। अपि च वह्न्याद्यनुमित्साविशिष्टवह्न्याद्यनुमितिसाम
ग्र्याः प्रत्यक्षशाब्दादौ प्रतिबन्धकतया प्रत्यक्षत्वादेस्तत्प्रतिबध्यतावच्छेदकत्वे गौरवेणानुमित्यन्यप्रत्य
क्षशाब्दादिवृत्तिवैजात्यस्यैव तादृशसामग्र्याभावजन्यतावच्छेदकत्वमुपेयते तादृशवैजात्येन सांक
र्यान्न परोक्षत्वे जातिरिति चेन्न तादृशवैजात्यस्येश्वरसाधारणतया नित्यसाधारण्येन जन्यतावच्छेद
कत्वासंभवात्। न चेश्वरज्ञानव्यावृत्तमेव तदुपेयते इति वाच्यं तथा सति प्रत्यक्षत्वजात्या सांकर्येण वैजा
त्यस्यैवासिद्धिप्रसंगात्। न च नित्यसाधारण्येऽपि कार्यतावच्छेदकत्वे बाधकाभाव इति वाच्यं इतद्बाधकस्या

अत्रास्माभिर्विस्तरेण प्रपंचितत्वात् । यत्तु नव्यैः कृतं शाब्देच्छाविशिष्टशाब्दसामग्रीकाले समानविषयकोपमी
तिभानस्यानुमितेश्चानुदयेन तद्वारणाय प्रतिबंधकताद्वयमपेक्ष्यते लाघवेन प्रत्यक्षानुमितिसाधारणीमे
कां जातिं स्वीकृत्य तदवच्छिन्नं प्रति तस्या एकमेव प्रतिबंधकत्वं कल्प्यते लाघवात् एवं च तादृशजात्यासांक
र्येण परास्तत्वस्य जातित्वेन संभवतीति तदसत् वह्निमान् पर्वतो घटवानित्याद्यनुमितौ व्यभिचारवारणाय
पर्वतो वह्न्या निरूपितत्ववत्त्वादिविधेयताया एवानुमितित्वव्याप्यत्वाय तादृशसामग्रीप्रतिबध्यतावच्छेदकत्व
याविधेयतायाश्च प्रत्यक्षावृत्तितया प्रत्यक्षस्थले स्वतंत्रप्रतिबंधकत्वस्यावश्यकतया तादृशजातौ मा
नाभावात् न चैतदनुरोधेन विधेयतायाः प्रत्यक्षसाधारण्याभ्युपगमानुद्वेष इति वाच्यं । परामर्शादिनियम्या
याः तस्याः प्रत्यक्षसाधारण्यस्यासिद्धांतविरुद्धत्वात् । न च वह्निशाब्देच्छाविशिष्टवह्निशाब्दसामग्रीकाले
वह्निमान् पर्वतो घटवानित्याद्यनुमितेरप्यनंगीकारान्नोक्तव्यभिचार इति वाच्यं भिन्नविषयेनुमितिसा
मग्र्या बलवत्त्वस्य सिद्धांतसिद्धतया तादृशानंगीकारासंभवादित्यलं पल्लवेन । ननु शाब्दो न प्रमाणं तस्य

तत्त्वेमानाभावात्। न चैवं शब्दश्रवणानंतरं शाब्दबोधासिद्ध्या प्रत्यक्षसाधनानुपपत्तिरिति वाच्यं। पदार्थोपस्थितिसा
पदार्थतासंसर्गावगाहिमानसोपनीतभानेनैव तदुपपत्तेरिति चेन्न शाब्दयामीसाकारकशाब्द
त्वावच्छिन्नावगाहिसर्वसिद्धानुव्यवसायेन शाब्दत्वजातिसिद्धौ तदवच्छिन्नकरणतया शब्दस्य प्र
माणत्वावेदकत्वात्। अथोक्तानुव्यवसायबलाच्छाब्दत्वसिद्धावपि तस्य मानसत्वव्याप्यत्वोपगमेन
तदवच्छिन्नकरणस्य शब्दस्य प्रत्यक्षप्रमाणत्वमेव। न च शाब्दत्वस्य मानसत्वव्याप्यत्वेपि पदजन्यप
दार्थोपस्थितिसाध्यस्य काले तदवच्छिन्नापत्तिवारणाय तदवच्छिन्नं प्रति पदजन्यपदार्थोपस्थितिःसा
दैहेतुत्वस्यावश्यकत्वे शाब्दत्वस्य मानसत्वव्याप्यत्वेमानाभावइतिवाच्यं।। शाब्दत्वस्य मानसत्वे वि
रहत्वे शाब्दसामग्रीकाले मानसवारणाय मानसत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रतिबंधकत्वं
कल्पनीयं शाब्दत्वस्य मानसत्वव्याप्यत्वमते तु तत्तन्मानसोत्पत्तावितापसात्तदकल्पनेन लाघवं
मिति लाघवेन शाब्दत्वस्य मानसत्वव्याप्यत्वसिद्धेर्दुर्वारत्वादिति चेन्नाभिन्नविषयकत्वाख्यपादिसा

मग्री काले शाब्दान्यमानसस्य वारणाय तत्तत्तादृशसामग्र्याः प्रतिबंधकत्वस्य सर्वसिद्धतया शाब्दत्वस्य मा
नसत्वव्याप्यत्वव्याप्यत्वे तादृशसामग्रीकाले शाब्दबोधानुपपत्तेः तादृशसामग्र्याः शाब्दान्यमानसत्व
मेव प्रतिबध्यतावच्छेदकं वाच्यमिति तत्र शाब्दान्यत्वनिवेशप्रयुक्तगौरवस्य तस्य मानसत्वस्य चमि
थो विशेष्यविशेषणभावे विनिगमनाविरहप्रयुक्तप्रतिबंधकताधिक्यप्रयुक्तगौरवस्य च दुर्वारत्वा
त्। एतेन शब्दोक्तमानसं प्रति शाब्दसामग्रीप्रतिबंधकत्वाकल्पनप्रयुक्तलाघवमपि परास्तं भिन्न
विषये कचाक्षुषादिसामग्र्यभावरूपकारणबलात्तत्शाब्दसामग्रीकाले शाब्दान्यमानसवारणाय शा
ब्दान्यमानसत्वावच्छिन्नं प्रति शाब्दसामग्रीप्रतिबंधकताकल्पनस्यावश्यकत्वात्। परं तु तत्सति बध्य
तावच्छेदककोटौ शाब्दान्यत्वस्याधिकस्य निवेशाद्विपरीतमेव गौरवं। अधिकं अनुमानप्रामाण्यव्यव
स्थापने ज्ञाक्तरीत्यानुसंधेयमिति दिक्। अत्र वैशेषिकाः शब्दस्य प्रमाणत्वसिद्धावपि न प्रमाणांतरत्वं
अनुमान एवांतर्भावसंभवात्। तथाहि घटमानयेत्यादिपदानि तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञा

२ स्वविशेषणतया॥

स६

न च पूर्वं कारणीभूताकांक्षादिमत्पदकदंबत्वात् घटमानयेत्यादिपदकदंबवदित्यनुमानेन संसर्गज्ञानसि
द्धौ ज्ञानीयावच्छेदकतया पदार्थसंसर्गसिद्धिः संभवतीति शाब्दो न पृथक् प्रमाणं। अथ रजतज्ञानत्वानपेक्षि
तिज्ञानास्कंदित्वावारणाय पुरोवर्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानस्यैव प्रवर्तकत्वं प्रवर्तक
ज्ञाने नानुमानात् सिध्यतीति प्रवर्तकज्ञानसंपत्त्यर्थं शाब्दप्रामाण्यमावश्यकं। न च पुरोवर्तिनि रज
तज्ञानयनार्थिप्रवृत्त्युपरोधस्तज्ज्ञानस्यानुपादाने प्रसक्तस्य विघटनाय चेष्टसाधनत्वकृतिसाध्यत्वज्ञान
विघटनाहेतुत्वेति न प्रवृत्त्युपरोधेन शाब्दप्रामाण्यमिति वाच्यं॥ रजतानयनमिष्टसाधनं कृतिसाध्यं चे
ति ज्ञानस्येदंत्वेन पुरोवर्तिरूपोपादाने प्रसक्तस्य सत्त्वेऽपि पुरोवर्तिनि रजतत्वविपरीतज्ञानदशायां न स्य च
रजतानयनार्थिप्रवृत्तिरपि तु रजताद्दाने तत्र रजतत्वनिश्चयसंसर्गे वेसनुभवानुसारेण तज्ज्ञानस्या
पि तत्र स्वातंत्र्येण हेतुत्वात्। न चैवमपि न प्रवर्तकज्ञानसंपत्तिः इदं रजतमिति शाब्दजन्यज्ञानस्य रज
तप्रकारकत्वादिति वाच्यं। तत्र रजतविशेषणताप्रत्यस्य रजतत्वस्यापि धर्मिविशेषणतया भानोपग

मेसामंजस्यादित्तिचेन्नलाघवेनात्र रजतत्वमिति ज्ञानस्य प्रवर्त्तकत्वानुरोधेन च पुरोवर्त्तीष्टता
वच्छेदकवैशिष्ट्यावगाहिज्ञानत्वेनैव प्रवर्त्तकतया साध्यस्य ज्ञाने पदस्य प्रमापरत्वे न प्रमात्वघटक
तया प्रवृत्तेस्तत्साध्यस्तत्वात्तु। नचानुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेनानुमानात्तस्मा
रित्तपदार्थत्वेनैव रजतादिसंसर्गः सिद्धान्ततु रजतत्वादिना तत्संसर्गइतितत्सिद्धयेशाब्दप्रामाण्यमा
वश्यकमितिवाच्यं। रजतादिपदश्रवणेन रजतत्वादिना रजतादेरुपस्थितावितरबाधबलाद्विशेष
रूपेणानुमितौभानसंभवात्तल्लाघवज्ञानेतरबाधसत्त्वे व्यापकतानवच्छेदकरूपेणाप्ति व्यापकमा
नस्य सर्वसिद्धत्वात्। यद्वा रजतादिश्रवणेन रजताद्युपस्थितौ एतद्वाक्यघटकपदस्मारितारजता
नयनादयः पदार्था एतद्वाक्यतात्पर्यविषयमिथःसंसर्गवन्तः आकांक्षादिमदेतद्वाक्यघटकपदस्मा
रितत्वात् घटेन जलमाहरेत्यादिवाक्यघटकपदस्मारितार्थवदित्यनुमानाद्विशेषरूपेण संसर्गसि
द्धिः। यत्तु शाब्दबोधे घटकर्मत्वाद्योराधाराधेयभावादिः संसर्गमर्यादया भासतइतिसंसर्गतारूप

विलक्षणविषयताशालित्वं तस्य अनुमितौ तु पदार्थस्य संसर्गविशेषणतयैव साध्यघटकतया संबंधस्य
विशेषणतयानवगाहनाद्विषयताशालित्वमिति शाब्दबोधस्यानुमितिवैलक्षण्येन विलक्षणप्रतीतिनिर्वा
हाय शब्दप्रामाण्यमावश्यकमिति तदसत् पक्षधर्मिणि अर्थयाहृशसंबंधेन यदर्थप्रकारकप्रतीतिर्नैया
यिकानामपि मता विशिष्य तस्मिन्नर्पिताहृशसंबंधेन तत्साध्यकानुमितेरुपगमेनादोषात्। अथोपद
र्शितरीत्या चैत्रो घटमानयतीत्यादौ कर्मत्वानयनवृत्ति चैत्रे पुआधेयत्वनिरूपकत्वानुकूलत्वाश्रयत्व
संसर्गैर्घटकर्मत्वानयनवृत्तीनां समूहालंबनानुमितेः कर्मत्वे घटीयमानयने सकर्मके वृत्तिरानयनी
याचैत्रे वृत्तिमानित्याकारिकायाः संभवेऽपि घटकर्मकानयनानुकूलवृत्तिमांश्चैत्र इत्याकारकविशिष्ट
वाक्यार्थबोधासंभवेन तादृशवाक्यार्थबोधाय शाब्दस्य प्रमाणान्तरत्वमावश्यकमिति चेन्न। तत्र खल्वेकपा
तस्यायेन विशेष्ये विशेषणमिति रीत्या तादृशवाक्यार्थबोधोपगमे मयापि घटकर्मत्वानयनवृत्तिचै
त्राणां समूहालंबनोपस्थित्या सहतैव विशिष्ये विशेषणमिति रीत्या चैत्रो घटकर्मकानयनेहसनुमितेः

या·को·
७

न

या

राजपुरप्रवेशन्यायेन विशिष्टस्य वैशिष्ट्यमिति शास्यात तदुपगमेन प्रथमं कर्मता घटोपार स्यतुमितेस्त
तथानयने घटकर्मकेन तत्तः इति घटकर्मकानयनवती तत श्चैत्रो घटकर्मकानयनानुकूलकृतिमानि
त्यनुमितेरुपगमेनादोषात् । यत्तु घटमानये सादौ कर्मत्वादावाधेयतासंबंधेन घटादावनुमितिनेसंभव
ति एवं घटो नास्तीत्यादावभावेनुयोगितया घटादेरनुमितिन्न संभवति रैत्यनियामकसंबंधस्याभाव
प्रतियोगितानवच्छेदकतया तत्संबंधावच्छिन्नप्रतियोगिताप्रसिद्धात संबंधस्य व्यापकत्वाघटक
तयात्तसंबंधेन कर्मत्वादौ घटादेर्भानासंभवेन शाब्दस्य प्रामाण्यात्तरस्वभावरूपकमित्तन्नैरुस्यनिया
मकसंबंधस्य प्रतियोगितानवच्छेदकत्वेपि साध्यतावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यघ
टितव्याप्तौ तत्संबंधावच्छिन्नप्रतियोगितोपनिवेशनेरुस्यनियामकसंबंधस्यापि व्यापकताघटक
त्वसंभवात् तदृत्त्यनियामकसंबंधस्याप्यभावप्रतियोगितावच्छेदकत्वेबाधकाभावेन साध्यतावच्छेद
कसंबंधावच्छिन्नप्रतियोगितानिवेशपितस्य व्याप्तेर्नाघटकत्वसंभवात् । अथ घटादृत्त्यदिशादेः पर

क

ति ५

७

थैकदेशोपदार्थविशेषणतापन्ने। न्यत्वादौ पंचम्यंतार्थप्रतियोगिकत्वादेर्भानेनानुमानान्निर्वाह इति अनुमि
तोपसंस्य मुख्यविशेष्यतया भानात्। नचान्यत्वादिरूपपक्षस्य धर्मितिविशेषणतयानभाने धर्मिप
क्षकतत्साध्यकानुमितौ तत्तद्वत्ताबोधसमानाकारानुमितिनिर्वाह इति वाच्यं। शाब्दादृमितिअन्य
त्वादेर्धर्मितावच्छेदकस्य भानात् अनुमानस्य च पक्षतावच्छेदकावच्छिन्न एव साध्यभासकत्तयात त
त्त्वाहशाभानान्निर्वाहादिति चेन्न एकदेशोपदार्थान्तरान्वयस्यव्याप्यनभ्युपगमेन घटादन्यरस्याहैअन्य
त्वादिविशिष्ट एवान्यत्वादि घटितसंबंधेन घटप्रतियोगिकत्वादेरन्वयोपायगमेन धर्मिविशेषणतापन्ने
न्यत्वादौ साक्षात्संबंधेन तत्प्रकारकभानस्यानभ्युपगमात्। यत्तु मणिकारानुसारिभिस्तत्के योग्यता संश
यकालेपि शाब्दबोधोनुभवसिद्धः तदानीं च योग्यताघटितो हेतो निर्णयासंभवेनानुमितिर्न संभवति
लिंगतावच्छेदकांशे लिंगांशे वा संशयोपस्थापकपरामर्शस्यानुमितिजनकत्वात् तदंशे निर्णयात्मकपरामर्श
स्यैवानुमितिजनकत्वादिति शाब्दस्य प्रमितिविशेषस्वीकारस्यावश्यकत्वात् तदनुरोधेन शब्दस्य प्रमा

णोत्तरत्वस्वीकार आवश्यकः न च योग्यतासंशयस्य ग्राह्यसंशयमपर्यवसन्नतया तस्य चानुमित्यनुगु
णतया ग्राह्यसंशयाजन्यसंशयभेदस्यैवानुमित्यां यथ्रिकनिश्चयत्वघटकतया योग्यतांशे संशयात्म
कादपि परामर्शान्नानुमित्यनुपपत्तिरिति वाच्यं गौरवात् ग्राह्यसंशयाजन्यसंशयभेदस्यानुमितिज
नकतावच्छेदककोटिनिविष्टनिश्चयत्वघटकत्वे सर्वत्र निश्चितस्वव्याप्तिकसंदिग्धसाध्यरूपलिंग
कात्त्वन्हिव्याप्यवन्हिमान्नेवेत्साधारणकपरामर्शादनुमित्यापत्तेश्च। न तु लिंगतावच्छेदकाविष
यकस्य साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानस्यानुमितिहेतुत्वोपगमे न लिंगतावच्छेदकांशे संश
यत्वस्याकिंचित्करतया संदिग्धयोग्यताघटितधर्मावच्छिन्नलिंगकपरामर्शादप्यनुमितिसंभवति
एवं बाधाभावरूपयोग्यतायाः संशये बाधाभावत्वेन तन्निश्चयासंभवेऽपि व्याप्यत्वेन तन्निश्चयसंभवे
न योग्यताहेतुत्वाप्यनुमितिः संभवतीति चेन्नैवं। हेतुतावच्छेदकस्य पक्षसत्त्वांशे संदेहे पक्षेऽपि हेतुताव
च्छेदकविशिष्टस्यापि सावर्जितसंशयेन व्याप्यतावच्छेदकविशिष्टवत्तानिश्चयं विनाव्याप्यत्वपुरस्कारे

णापि पक्षे व्याप्यनिश्चयासंभवात् विरोधिनिश्चयासत्वेन व्याप्यवत्तत्त्वबुद्धेर्व्याप्यसामान्याभावस्य भाने बाध
काभावात् अत एव पर्वतो यत्नेतोऽप्ययं धूमो ह्रलीपटलो वेति संदेहे ह्रदत्वेतरस्यालोकादेर्निश्चयकालेऽपि न
वह्न्यनुमितिः न चैवमयमालोको धूमो वा भवतु यथापि वह्निव्याप्य इति संशयस्थले कथमनुमितिरिति
वाच्यं। तत्र व्याप्यतावच्छेदकतया वर्गत्तान्यतरत्वादिना पक्षे धूमादिनिश्चयानन्तरमेवानुमितेरुपगमा
दिति न दोषः सत्ता योग्यता यास्तु ह्रदितरहेतोर्वा संदेहे त्रनिश्चयासंभवेऽपि तन्निश्चयदशायां तत्रापि ह्रदे महेतु
ताकावच्छाभ्युपेयनिश्चयविषयत्वात्पर्यं लिंगकपरामर्षादेवशाच्च समानाकारानुमितिसंभवेनानुमा
नांतर्भावसंभवेऽशरस्य प्रमाणांतरत्वासिद्धेः अथ तत्तास्वयं ह्रदत्तया बुबोधयिषितत्वे तथा च कर्मत्वादि
कमाधेयत्वादिना घटादिमत्ता तेन घटादिमत्तया बुबोधयिषितत्वादिरूपाकारकानुमान एवांतर्भावो वाच्यः।
स च न संभवति तेन संबंधेन घटादिहृन्यस्यापि तेन संबंधेन घटादिमत्तया बुबोधयिषितत्वेन तत्रोक्त
हेतोर्व्यभिचारादिति चेन्न। व्यभिचाराप्रतिसंधानदशायां भ्रमात्मकोक्तलिंगकपरामर्षसत्वे प्रतिसंधानद

ज्ञायांच्चत्वमाधनधीनत्वादिरूपविशेषणावछिन्नोक्तलिंगकप्रमात्मकपरामर्षादनुमितिसंभवादितिव
देति। अत्रनैयायिकाः व्याप्त्यादिप्रतिसंधानविरहदशायामपिशाब्दबोधस्यानुभाविकतयातदानी
मनुमितिसामग्र्यभावेनानुमित्यसंभवात्तशाब्दस्यप्रमाणांतरत्वमावश्यकं। यदिचशाब्दस्यप्रमाणां
तरत्वेसर्वत्रशाब्दबोधजनकसामग्र्यंतरकल्पनेगौरवमितिसर्वत्रशाब्दबोधस्थलेव्याप्त्यादिप्रति
संधानकल्पनमेवसम्यक्तथासतिक्लृप्तसामग्र्यैवोपपत्तौसामग्र्यंतराकल्पनेनलाघवादिति
विभाव्यतेतथापिनक्षतिः चैत्रवाक्यादयमर्थःस्मृतइत्यादिव्यवहारविषयतयाशाब्दास्यविलक्षण
नुभवस्वीकारस्यावश्यकतयात्तत्करणतयाशाब्दस्यप्रमाणांतरत्वमिविनान्यंलापसंकत्वात्। नच
तत्रस्मृधातोरनुमितित्वार्थकतयानविलक्षणानुभवसिद्धिः कुतस्तत्करणतयाशाब्दस्यप्रमाणांतरत्व
मितिवाच्यं। तथासतिपर्वतोवह्निमानित्याद्यनुमित्यनंतरंपर्वतेवह्निरनुमितइत्यादिव्यवहारव
त्पर्वतेवह्निःस्मृतइत्यादिव्यवहारापत्तेः नचेशाब्दहेतुकानुमितेःस्मृधात्वर्थत्वोपगमान्नोक्तापत्तिरिति

वाच्यं। तथापि यत्र शाब्दहेतुनाकांक्षाकांक्षापदज्ञाकत्वमनुमितं तत्राकांक्षाकांक्षापदज्ञाकत्वमनुमित
मितिव्यवहारवदाकांक्षाकांक्षापदज्ञाकत्वेऽनुमितमिति व्यवहारस्यैवोरत्वात्। न च स्मारितत्वसंबंधेन शाब्द
हेतुकानुमितेः श्रुधात्वेऽर्थत्वान्नोक्तदोषः उक्तस्थले समवायेन शाब्दस्य हेतुत्वादिति वाच्यं। एवमप्याकांक्षा
दिज्ञानविरहदशायां यत्र स्मारितत्वसंबंधेन शाब्दहेतुकानुमितिस्तत्र श्रुतत्वव्यवहारस्योद्धतुमशक
त्वात्। न च न व्याप्तिकसिद्धशाब्दसामग्रीसमवधानाव्यवहितोत्तरानुमितेः श्रुधात्वेऽर्थत्वान्न दोष इति वाच्यं।
तादृशसामग्र्याः प्रतिबंधानेतादृशव्यवहारानुपपत्तेः अनेनैतायाः शब्दार्थादिभेदस्य न सामग्र्या अनु
गमेन श्रुधातुशक्तिग्रहानुपपत्तेश्च। एतेन श्रुधातोः श्रावणप्रत्यक्षमेवार्थः श्रुपशब्दरसादौ कर्मप्रत्य
यस्य प्रतिपत्यनुबंधिविषयतार्थकत्वेऽपि चैत्रवाक्यादयमर्थः श्रुत इत्यादौ व्यापारानुबंधिविषयत्वेऽर्थः।
उव्यत्ते उक्तइत्यादौ तादृशविषयतायाः अपि कर्मप्रत्ययार्थत्वस्य क्लृप्तत्वात् एवं च श्रावणप्रत्यक्षीयशाब्द
लिंगकानुमित्यात्मकव्यापारविषयतायाः अर्थत्वे नैव चैत्रवाक्यादयमर्थः श्रुत इत्यादिव्यवहारोपपत्तौ न

तदनुरोधेन शाब्दाख्यविलक्षणानुभवसिद्धिरिति न शाब्दस्य प्रमाणांतरत्वं अत एवात्मा वारे श्रोतव्य
इति श्रुत्यनुरोधेन श्रुधातोः शाब्दानुभवार्थकत्वमपि नाशंकनीयं तत्राप्युक्तरीत्येवोपपत्तेरित्यपि परा
स्तं। आकांक्षादिज्ञानाभावकालीनशाब्दलिंगानुमितिमादाय तद्विषये श्रुत इति व्यवहारापत्तेः किंच
श्रुधातोः श्रावणप्रत्यक्षमात्रार्थकत्वे चैत्रवाक्याच्छ्रुतोयमर्थ इत्यादौ हेतुपंचम्यनुपपत्तिः श्रावण
प्रत्यक्षे वाक्यस्य विषयतया हेतुत्वेपि घटात् दृष्टो घट इत्यादिप्रयोगवारणाय विषयत्वेन हेतुताति
रिक्ताया हेतुताया एव हेतुपंचम्यर्थतया तस्या वाक्ये ऽसत्त्वात्। न चैकमेव प्रत्यक्षार्थघटकज्ञाने हेतुपं
चम्यर्थान्वयः वाक्यपदलक्ष्यवाक्यज्ञानस्यानुमित्यात्मकतादृशज्ञाने हेतुत्वादिति वाच्यं तादृशज्ञाने
हेतुपंचम्यर्थान्वयोपगमेऽनुमितिरूपतादृशज्ञाने व्याप्तिज्ञानादेर्हेतुतया व्याप्त्यादेः श्रुत इत्यादिव्यव
हारस्य दुर्वारत्वात्। तस्मात् शाब्दाख्यविलक्षणानुभवस्य श्रुधात्वर्थत्वमावश्यकं। यत्तु शाब्दाख्यविल
क्षणानुभवस्य श्रुधात्वर्थत्वेपि न तत्करणतया शब्दस्य प्रमाणांतरत्वं शाब्दत्वस्यानुमितित्वव्याप्यत्वोप

गमेनानुमानएवोत्तमौवात्।नचशाब्दबोधेनुमितित्वसत्वेमानाभावेनशाब्दत्वस्यानुमितित्वव्याप्यत्वेन
संभवतीतिवाच्यं।विरुद्धत्वमतेसमानविषयकप्रत्यक्षसामग्रीकालेतादृशशाब्दबोधवारणायतत्रता
दृशसामग्र्याः प्रतिबंधकत्वांतरंकल्पनीयमितिगौरवंव्याप्यत्वमतेतुतादृशसामग्र्याअनुमितिस्य
लोपहेतुसामग्रीप्रतिबंधकतयैवोपपत्तौनतत्कल्पनमितिलाघवत्तर्कसहकृतानुमानस्यैव
तत्रमानत्वात्।अथशाब्दत्वानुमितित्वप्रकारकेच्छयोः इच्छगुत्तेजकत्वानुरोधेनप्रतिप्रबंधकभेद
स्यावश्यकतयानेकृतप्रतिबंधकतयोपपत्तेः नैवकैवच्छाद्वयस्योत्तेजकतात्वपगुत्तेजकत्व
मेवासिद्धमितिवाच्यं तथासतिशाब्दत्वप्रकारकेच्छाकालेप्रतिबंधकतादृशसामग्रीसत्वेऽससांशा
द्धसामग्र्यांशाब्दान्यानुमित्यापत्तेरितिचेन्नयादृशविषयविषयेषु समानविषयकप्रत्यक्षसामग्रीका
लेशाब्दत्वप्रकारकेच्छाबलात्तत्तादृशशाब्दबोधतादृशानेतरविषयेषुइच्छोत्तेजकत्वानुरोधेनप्रति
बंधकताभेदाभावेनशाब्दबोधप्रतिबंधकत्वांतराकल्पनप्रयुक्तलाघवस्यानपायात्।एवंविरुद्धत्वे

मत्ते एकस्मिन्नेव विषये शाब्दानुमित्योस्सामग्रीसत्त्वे अनुमित्सापत्तिवारणायानुमित्तौ शाब्दसामग्र्याः
प्रतिबंधकत्वांतरकल्पने गौरवं व्याप्यत्वमनेनात्तातत्र शाब्दत्वस्यानुमितेरत्वस्य स्यशापसोक्तापत्त्यभावेन
तद्कल्पनेल्लाघवमिति लाघवसत्त्वेन तत्सहकृतानुमाननमिति शाब्दाबाधेमितित्वसत्त्वमानेन । अ
थशाब्दत्वस्यानुमितित्वव्याप्यत्वे शाब्दसामग्र्या व्याप्त्यादिज्ञानघटितत्वयागुरुशरीरत्वेन भिन्नवि
षयकप्रत्यक्षादौ शाब्दसामग्रीप्रतिबंधकतायामवच्छेदकगौरवं लिंगादिभेदेन एकैकविषय एव
न्यायमतायेक्षपाञ्शाब्दसामग्रीबाहुल्येन प्रतिबंधकताबाहुल्यंचेति चेन्न । अन्वयव्यतिरेकि लिंग
कानुमित्योस्सामग्रीभेदेपि एकजातीयत्ववत व्याप्त्यादिज्ञाने निरपेक्षपदज्ञानादि घटितसामग्र्याः
शाब्दानुभवजनकत्वेपि तस्यानुमितिजातीयत्वाविरोधेन व्याप्त्यादिज्ञाने शाब्दसामग्री घटकत्व
स्यास्माभिरप्यनुपगमोत्तेनच व्याप्त्यादिज्ञानं विनाशाब्दस्थलेकानुमित्युपगमेतत्त्वे व्याप्त्यादिज्ञान
स्यानुमितिहेतुतायां व्यभिचार इति वाच्यं अन्वयव्यतिरेकव्याप्तिज्ञानयोः परस्परजन्यानुमितौ वि

वशाब्दत्वस्यानुमितित्वव्याप्यत्वेपिव्याप्त्यादिज्ञानाव्यवहितोत्तरत्वस्यतत्कार्यतावच्छेदकत्वेनैवतस्यनि
रासंसंभवात् नच शाब्दजनकस्यआकांक्षादिज्ञानस्यजन्यस्यवच्छेदककोटावनुमितित्वस्योपवेशोक
र्येतादृशसामग्रीजन्यज्ञानस्यानुमितित्वमितिवाच्यंअनुमितित्वावच्छिन्नंप्रत्यभावज्ञानतस्यकरणत्वपा
शाब्दसामग्र्याअभावेज्ञानरूपानुमितित्वावच्छिन्नकरणत्वकाकांक्षाज्ञानेघटितत्वतयातज्जन्यबोधस्या
नुमितित्वसंभवात् अप्रसिद्धिकालेशाब्दबोधोदयेनतत्रपक्षतायाअनुमितिहेतुत्वेव्यभिचारइति
तद्वारणायशाब्दान्योनुमितित्वमेवतज्जन्यतावच्छेदकंवाच्यमितिशाब्दत्वस्यानुमितित्वव्याप्यत्वेत
त्रशाब्दान्यत्वनिवेशप्रयुक्तागौरवेणवीरमिति।न्वेन्नपक्षतायालिंगविशेषनियंत्रितत्वपातल्लिं
गकानुमितौतत्तल्लिंगकेच्छाविरहविशिष्टसिषाधयिषाभावस्यहेतुत्वपोभयलिंगकपरामर्शजन्यसिद्धिका
लीनान्यलिंगकेच्छाधीनानुमितौव्यभिचारवारणायतत्तल्लिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टान्य
त्वस्यजन्यतावच्छेदकत्वावश्यकत्वेतयासिद्धिकालीनशाब्दानुमितौव्यभिचाराभावात् नचव्याप्त्यादिज्ञाना

जन्यशाब्दोऽनुमितित्वोपगमेऽपसिद्धांतत्वइतिवाच्यं। पक्षतायाअजन्येनुमितित्वोपगंतॄणामस्माकंव्याप्त्या
दिज्ञानाजन्येप्यनुमितित्वोपगमेऽपसिद्धांताभावादिति न च वैशेषिकैरुक्तेतदसंतमसत्तुव्याप्त्यादिज्ञा
ननिरपेक्षशाब्दसामग्रीतोनुमितित्वोहत्वशाब्दत्वस्यानुमितित्वव्याप्यत्वस्वीकारोविनिगमनाविर
हेणपदज्ञानादिनिरपेक्षानुमितिसामग्रीतः शाब्दबोधस्वीकृतस्यानुमितित्वस्यशाब्दत्वव्याप्यत्वापत्तेः
दुरुद्धरत्वात्। न च शाब्दत्वस्यानुमितित्वव्याप्यत्वेउक्तलाघववदनुमितित्वस्यशाब्दत्वव्याप्यत्वेलाघवा
भावेविनिगमनाविरहइतिवाच्यं। समानविषयकप्रत्यक्षसामग्र्यास्ताद्दशानुमितिंप्रतिप्रतिबं
धकत्वांतरत्तकल्पनेताद्दशशाब्दबोधंप्रतिक्लृप्तप्रतिबंधकतयैवोपपत्तेरितिलाघवस्यसंभवात्।
न चानुमितिजनकव्याप्त्यादिज्ञानजन्यतावच्छेदककोटौशाब्दत्वस्यानिवेशात्कथंताद्दशसामग्रीजे
न्यज्ञानस्यशाब्दत्वमितिवाच्यंपदज्ञानस्यशाब्दबोधेयद्विषयकत्वमनिवेश्यज्ञानत्वादिनाकारण
तासंभवेनलिंगज्ञानस्यलिंगविषयकत्वमनिवेश्यज्ञानत्वादिनानुमितिकरणत्वेनानुमितिसामग्री

जन्यतावच्छेदककोटौ शाब्दत्वनिवेशासंभवात् न चाकांक्षादिसत्त्वे विनानुमित्यात्मकशाब्दबोधोपग
मे तत्राकांक्षादिज्ञानस्य शाब्दबोधहेतुतायां व्यभिचार इति वाच्यं। एकैकविधशाब्दबोधप्रयोजकानुपूर्वी
विशेषरूपाकांक्षादीनाम् अननुगततया परस्परजन्यशाब्दबोधे व्यभिचारवारणाय तज्ज्ञानजन्यताव
च्छेदककोटावव्यवहितोत्तरत्वनिवेशस्यावश्यकतया तत्र व्यभिचाराभावात्। न च योग्यताया एकपदार्थे
ऽपरपदार्थवत्त्वरूपाया अननुगतत्वेन तज्ज्ञानजन्यतावच्छेदके व्यवहितोत्तरत्वनिवेशस्यानावश्यकतया
तद्धेतुतायां व्यभिचारो दुर्वार इति वाच्यं। बाधनिश्चयाभावस्यैकस्य हेतुत्वे एव निर्वाहे शाब्दबोधे न व्यभ
ते योग्यताज्ञानहेतुताया एवाभावात्। तदंगीकृतैर्भिः प्राचीनैरनुमितावपि संशयसाधारणविशेषण
संसर्गज्ञानहेतुतांगीकारेण योग्यताज्ञानस्यानुमितौ तन्मते व्यभिचाराभावाच्च न चानुमितित्वस्य शाब्द
त्वव्याप्यत्वे अनुमिनोमीत्यनुव्यवसायस्थलेऽपि शृणोमीत्यनुव्यवसायापत्तिरिति वाच्यं। शाब्दत्वस्यानुमितित्व
व्याप्यत्वेऽपि शृणोमीत्यनुव्यवसायस्थलेऽनुमिनोमीत्यनुव्यवसायस्य दुर्वारत्वात्। न चानुमितित्वप्रकारता

न्या॰ कौ॰
१८

निरूपितविशेष्यतासंबंधेन साक्षात्कारं प्रति शाब्दबोधभेदस्य हेतुत्वोपगमात्रोक्तापत्तिरिति वाच्यं शाब्द
त्वप्रकारतानिरूपितविशेष्यतासंबंधेन साक्षात्कारं प्रति अनुमितिभेदस्य हेतुतया पूर्वोक्तापत्तिवारणस्य म
माप्यसुवचत्वात्। न चानुमितित्वस्य शाब्दत्वव्याप्यत्वे पदज्ञानघटितसमानविषयकशाब्दबोधसामग्रीकाले
तादृशसामग्रीजन्यशाब्दबोधो जायतामितीच्छासत्त्वे तादृशसामग्र्यजन्यशाब्दात्मकानुमितिवारणाय तादृ
शसामग्र्यास्तत्र प्रतिबंधकत्वकल्पनाधिक्यमिति वाच्यं। शाब्दत्वस्यानुमितित्वव्याप्यत्वेपि व्याप्त्यादिज्ञानघ
टितसमानविषयकानुमितिसामग्रीकाले तादृशसामग्रीजन्यानुमितिर्जायतामितीच्छासत्त्वे तादृशसामग्र्यज
न्यानुमित्यात्मकशाब्दबोधवारणाय तत्र तादृशसामग्र्याः प्रतिबंधकत्वकल्पनाधिक्यात्। न च तत्र तादृश
शाब्दबोधस्यापि स्वीकारक्षतिविरह इति वाच्यं। तन्मतेप्युक्तस्थले तादृशानुमितेरपि स्वीकारक्षतिविरहात्
न चैवं तत्रानुमिनोमीत्यनुव्यवसायापत्तिरिति वाच्यं। तन्मतेपि तत्र शाब्दबोधस्वीकारे शृणोमीत्यनुव्य
वसायपमेदुर्वारत्वात् समाधानस्याप्युभयमतेतुल्यत्वात्। वस्तुतस्तु। शाब्दबोधोत्तरं नानुमिनोमीत्यनुव्यवसा

१८

येनज्ञाप्यत्वेस्यानुमितित्वव्याप्यत्वसंभवे विनाचैतत्तस्य व्याप्त्यादिज्ञानघटितसामग्रीजन्यानुमितित्वावच्छिन्ना
वविषयकत्वान्नदोष इति वाच्यं व्याप्त्यादिप्रतिसंधानविरहदशायामपि तत्स्यात्तस्य तद्विषयकत्वासंभवात्
केचित्तु। ज्ञाप्यत्वस्य अनुमितित्वव्याप्यत्वे वह्निव्याप्यसामान्यभाववि शिष्टविशेष्यकवह्निज्ञाप्यबोधानुपप
त्तेः तद्विशिष्टवह्निव्याप्यवत्ताबोधासंभवेनानुमित्यसंभवादित्याहुः तदसत्। उक्तरीत्या परामर्शनिरपेक्षा
या एव सामग्र्या अनुमितिजनकत्वोपगमेनोक्तानुपपत्तेः संभवादिति दिक्। अत्र प्राचीनमीमांसकाः भवेत्त
त्करीत्या शाब्दस्य स्वतंत्रप्रमाणत्वं तथापि तन्न शाब्दमात्रस्य किंतु तद्विशेषस्य तथाहि घटमानयेत्यादिलौकि
कवाक्यश्रवणानन्तरं अयं वक्ता आधेयतासंसर्गककर्मत्वादिविषयकघटादिविशिष्टज्ञानवान् आधेयता
संसर्गेण कर्मत्वादिसाकांक्षपदकदंबज्ञाने तज्जन्यप्रमाघजन्यपदकांतस्य योग्यत्वात् यो यत्संसर्गकयत्सा
कांक्षपदज्ञानजन्यप्रमाघजन्यवाक्यप्रयोक्ता स तत्संसर्गकतद्विषयकविशिष्टज्ञानवान् घटमानयेति
वाक्यप्रयोक्ता कर्मत्वविषयकपटविशिष्टज्ञानवानेवमित्यनुमानेन मूलत्वात्तत्कर्मत्वादिकमाधेयत्वेया

घटचक्षुस्तेन संसर्गेण स्वविषयकघटत्वविशिष्टज्ञानवदुत्पदस्मादित्वात घटादिनिष्टकरणत्वादिवदित्य
नुमानात् घटत्या कर्मत्वेऽस्त्वनुमितौ सत्यामनन्तरं घटीयाकर्मत्वेत्यादिशाब्दबोध इति लौकिकशाब्दमात्र
मनुवादकं न तु प्रमाणं वैदिकशाब्दमात्रं तु प्रमाणं वेदस्यानित्यत्वा वक्तुरभावेन तत्र वक्तृयथार्थकानुमाना
संभवेन तन्मूलकोपदर्शितानुमानासंभवेनोपदर्शितरीत्यानुवादकत्वासंभवात् गृहीतग्राहित्वमनुभव
करणत्वमनुवादकत्वं गृहीतग्राहितरानुभवकरणत्वं च प्रमाणत्वमिति विवेक इति वदन्ति तदसत् लौ
घवेन प्रमाकरणत्वस्यैव प्रमाणत्वरूपत्तया लौकिकवाक्यजन्यशाब्दबोधस्य पूर्वमनुमानेन शाब्दसमाना
कारस्तानोत्पादेऽपि तस्य प्रमाणत्वसंभवात्। एतेन शाब्दसामग्रीसंपादकया लौकिकवाक्यजन्यशाब्द
बोधपूर्वं तत्समानाकारज्ञानमात्रस्य कमिति लौकिकवाक्यमनुवादकं वैदिकवाक्यं तु तदनावश्यकतया
तत्प्रमाणं। तथा हि कश्चिच्छाब्दप्रमा कश्चिन्नेति नियमनिर्वाहाय शाब्दप्रमायां किंचित्कारणमुपेयं तच्च वक्ता
केवेदसाधारणं यथार्थतात्पर्यकत्वं तच्च शाब्दबोधनिरूपितज्ञाननिष्टकारणतायां विषयतयावच्छेदकं

शाब्दबोधनिरूपितकरणतावच्छेदकज्ञानविशिष्टकरणस्य शब्दस्य शाब्दबोधे जननीयसहकारित्वे
सति स्वस्य जनकत्वात् यत् यज्ज्ञाननिरूपितकरणतावच्छेदकज्ञानविशिष्टकरणस्य तज्ज्ञाने जननीय
सहकारित्वे सति स्वस्य जनकं भवति तत् तज्ज्ञाननिरूपितज्ञाननिष्ठकारणतायां विषयतयावच्छेदकं
यथा व्याप्तिः शब्दशक्तिश्चेत्यनुमानेन यथार्थतात्पर्यकत्वज्ञानस्य शाब्दबोधहेतुत्वे सिद्धे आश्रमरूपावम
वेंद्रियसंनिकर्षव्यभिचारवारणाय सत्यंतं। तत्तद्घटकविशिष्टेन लिंगपरामर्षव्यभिचारनिरासः
परामर्षस्य विशिष्टसहकारित्वात् यस्मिन् सति यदभावो कार्याभावस्तस्यैव तत्सहकारित्वेन परामृष्य
माणलिंगत्वेनानुमितिकरणतया परामर्षे विशिष्टलिंगसत्वे परामर्षाभावस्यासंभवात् न दोषः हिमानरूद
त्वादिसादौ परामृष्यमाणलिंगसत्वेपि व्याप्त्यभावेन प्रमानुमित्यभावाद्व्याप्ते दृष्टांतत्वसंगतिः व्याप्तिपक्ष
तावल्लिंगत्वेन सामानुमितिकरणत्वात्। यत्तु एवमपि सल्लिंगपरामर्षे व्यभिचारो दुर्वारः परामृष्यमाणलिंगत्वे
पि सल्लिंगपरामर्षाभावसंभवादिति तन्न विशेष्ये विशेष्यवति विशिष्टाभावस्य विशेष्यविशेषणाभावपर्यवसानेन

परामृष्यमाणलिंगसत्त्वेसल्लिंगपरामर्षाभावस्यलिंगेव्याप्तिपक्षधर्मत्वरूपसत्त्वाभावपर्यवसानात्बाधा
भावादौव्यभिचारवारणायविशेष्यम् तच्चतात्पर्यंचेदकपिंजलानालभेतेत्यादौलाघवादित्तर्केनिर्णीति
त्वविशिष्टकपिंजलपदार्थपरंबहुवचनोतंकपिंजलपदार्थपरंबहुवचनोतंकपिंजलपदमिति
सामान्यतःकपिंजलपदमितिसामान्यतःकपिंजलपदार्थत्वादिनातद्बुद्धितमेवोपयुज्यतेसामान्य
रूपेणनिर्णयेपितत्रपदार्थानांनियतत्वेनविशेषरूपेणतात्पर्यासंदेहात्लोकेतुघटमानयेत्यादौपद
विशिष्टकर्मतापरंद्वितीयान्तंघटपदमितिविशेषतःघटत्वादिनातद्बुद्धितमेवोपयुज्यतेतत्रपदार्था
नाममनियतत्वेनसामान्यरूपेणनिर्णयेविशेषरूपेणतात्पर्यसंदेहसंभवात्।एवंचलौकेविशेषतो
यथार्थतात्पर्यनिर्णयानुरोधेनशाब्दबोधःपूर्वंविशेषतःएकपदार्थेऽपरपदार्थनिर्णयस्यावश्यकत्वेपा
लौकिकवाक्यस्यानुवादकत्वेवैदिकस्यतुप्रमाणत्वं।ननुकोऽयंलाघवतर्कोयन्मूलकंवेदवाक्यस्यप्रमा
णत्वमितिचेत्।अत्रकेचित्कपिंजलानालभेतेत्यादौबहुवचनस्यपार्थक्यकपिंजलपरत्वेयावदालंभ

नस्यानाश्यतया। नत्वनुष्ठानलक्षणाप्रामाण्यापत्तिः। शाब्दानुष्ठानयावसरत्वेचाननुगमापत्तिरिति किंचिल
रत्वावच्छेदकत्वेत्रित्वपरत्वमेवकल्प्यतेचतुष्ट्वादिप्रकारकचतुष्ट्यादिप्रत्यक्षेत्रित्वादिसहितेकत्वसाक्षात्का
रस्यहेतुतयाचतुष्ट्वादिविशिष्टचतुष्ट्यापेक्षयात्रित्वविशिष्टत्रित्वस्यप्रथमोपस्थितत्वेनतस्यैवलाघ
वतर्कत्वेनचातिरिक्तबहुत्वहेतुत्रित्वादिहस्वबोद्धेवत्वत्वजातेरवबहुवचनशक्यतावच्छेदकतयाते
नरूपेणचतुष्ट्यादेरपिप्रथमोपस्थितत्वसंभवतीतिवाच्यंबहुत्वत्वेचातिरिक्तत्रित्वत्वादिकमेवब
हुवचनशक्यतावच्छेदकमितिसांप्रदायात्। अथतथापित्रित्वस्योत्कटीसाप्रथमोपस्थितत्वेचतुष्ट्वादि
प्रकारकचतुष्ट्यादिप्रत्यक्षेएकत्वचतुष्ट्यादिप्रत्यक्षेचद्वित्वद्व्यादिप्रत्यक्षस्यवाहेतुत्वसंभवेनत्रि
त्वादिसहितेकत्वप्रत्यक्षस्याहेतुत्वादितिचेदेवमपिबहुत्वसंख्यायास्त्रित्वादिक्रमेणैवगणनयाग
णनाक्रमेणत्रित्वस्यप्रथमोपस्थितत्वेनप्रथमसार्गेमानाभावेनत्रित्वेचतुष्ट्वादौफलतौल्येनचतुष्ट्वाद
रनुपयोगेनतस्यलाघवतर्कत्वसंभवात्। नचचतुष्ट्वादौफलंप्रमाणाभावात्अन्यथानुपपत्त्यैवतत्के

त्येन प्रवृत्तेनुपपन्नभावात् । न चैतादृशप्रथमोपस्थितत्वस्य लाघवतर्कत्वेमानाभाव इति वाच्यं ।
तथा सति हि वौत्तप्रथमोपस्थितत्वस्यापि प्रथमोपस्थितत्वमात्रस्य वा लाघवतर्कत्वेन स्यात् । किं ब
हुना वैदे लाघवतर्कादिरूपन्यायगम्यमेव तात्पर्यं वेदजन्यशाब्दबोधे नियामकं तत्त्वे न्यदित्यस्याप्य
सिद्धिप्रसंगात् । न चानादिमीमांसकपरंपरया तथा व्यवहारेण तत्सिद्धिरिति वाच्यं प्रवृत्तेपु तुल्यत्वात् ।
अनादिमीमांसकपरंपरया तर्कत्वेन व्यवहारविषयत्वस्यैव तर्कत्वात् अत एव समानप्रकारक
त्वसमानविशेष्यकत्वयोस्तौल्येपि शास्त्रे हृतं समानविशेष्यकत्वस्यैव लाघवतर्कत्वोक्तिस्संगच्छ
ते तत्रैव शास्त्रे वृत्तां तथा व्यवहारादित्याहुः । अन्ये तु मा हिंस्यात्सर्वा भूतानीति श्रुत्या हिंसायाऽदृष्ट
साधनत्वबोधने श्वेतं छागमालभेतेति श्रुत्या श्वेतछागालंभने बलवदनिष्टाजनकत्वविशिष्टेष्टसा
धनत्वलक्षणविध्यर्थबोधने बाधापत्तिरिति वैधेतरहिंसायाऽदुरदृष्टजनकत्वे मा हिंस्यादिति श्रुत्या
बोध्यते इत्युपेयं तथा च वैधत्वस्यानुगतस्याभावेन तत्तद्व्यक्तित्वेन तत्तद्धिंसाव्यक्तिभेदकूटस्यैव दुर

दृष्टजनकतावच्छेदककोटौ निवेशनं कपिंजलानालभेतेत्यत्र बहुवचनस्य चतुष्ट्वाद्यर्थकत्वे हिंसाभे
दचतुष्टयादिनिवेशगौरवायेसाभेदत्रयनिवेशलाघवात् त्रित्वमेव बहुवचनस्यार्थः। यत्तु वैधेतरहिं
सात्वेन न दुरदृष्टजनकत्वं किंतु वस्त्कसद्वैधेतरहिंसावृत्ति वैजात्यविशेषं स्वीकृत्य विजातीयहिंसा
त्वेनेति नोक्तरीत्या गौरवावकाशः तत्र भेदस्यावच्छेदककोटावनिवेशादिति तदसत् विजातीयहिं
सात्वेन दुरदृष्टजनकत्वेपि माहिंस्यादिति श्रुतेस्तादृशजनकताबोधकत्वे वैधहिंसायामपि तादृश
वैजात्यसंदेहेन निष्कंपप्रवृत्त्यनुपपत्तिरिति वैधेतरहिंसा दुरदृष्टजनिकेत्याकारकबोधजनकत्व
मेवाभ्युपेयमिति हिंसाचतुष्टयादिभेदस्य जनकतावच्छेदककोटिनिवेशप्रयुक्तगौरवाभावेपि तादृश
बोधस्य तादृशभेदचतुष्टयादिविषयकत्वकल्पनप्रयुक्तगौरवस्य दुरुद्धरत्वात्। एतेन वैधेतरहिंसा
त्वेन दुरदृष्टजनकत्वे तावद्भेदकूटनिवेशगौरवापत्त्या लाघवाद् वैधहिंसायास्तत्तद्व्यक्तित्वेनैव दुर
दृष्टजनकत्वं कल्प्यत इति न भेदचतुष्टयादेर्जनकतावच्छेदककोटिनिवेशप्रयुक्तगौरवावकाश इति प

रास्तां। तावतापि उक्तगौरवस्य दुर्वारत्वात्। न च तत्तद्व्यक्तित्वेन जननतामेव मा हिंस्यादिति श्रुतिर्बोधयतीति वा
च्यं तथा सति वैधहिंसाया अपि तत्तद्व्यक्तित्वेन संदेहे न तत्र निषेधप्रवृत्त्यनुपपत्तेः द्वेषप्रतिबन्धक निः
षेधापधायकत्वनिश्चयस्यैव हेतुतया वैधहिंसायामपि तत्तद्व्यक्तित्वसंदेहेन द्वेषानुत्पादप्रसंगाच्चे
त्याहुः तदसत् उद्दुपाद्यारुणमेत्रेरित्यादौ बहुवचनस्य त्रित्वपरत्वानुपपत्तेः न च तत्र बहुवच
नस्य त्रित्वपरत्वेऽसंदिग्धमिति वाच्यं। तथा पित्र्यादुपकरणे ब्राह्मणान् भोजयेदिति वेदस्य बहुवचन
स्य त्रित्वपरत्वानुपपत्तेः दुर्वारत्वात् न च तत्रापि तत्संदेहः पितृकार्ये त्रीणित्यादि वचनैकवाक्य
तया तत्परत्वनिर्णयात् केचित्तु कपिंजलानालभेतेत्यत्र बहुवचनस्य चतुष्ट्वादिपरत्वे चतुष्ट
यादिव्यक्तिषु तात्पर्यग्राहकाज्ञानात् शाब्दबोधविषयत्वेकल्पने गौरवं त्रित्वपरत्वे तु तस्यैव तत्केल्पने
नैलाघवमिति बहुवचनस्य त्रित्वपरत्वमित्याहुः अपरे तु चतुष्ट्वादिके परत्वे कल्पने च तु ष्टयाद्या
लंभनस्य परहेतुत्वे कल्पने तज्जन्य कल्पिकापूर्वादि कल्पने च गौरवात् त्रित्व एव विधेस्तात्पर्यमित्यसे

चेच्चतुष्टयाद्यालंभनस्थलेतद्यकेरनंगत्वेनतद्यवधानात्कर्मवैगुण्यमित्याहुः ननुकपिंजलानाल
भेतेत्यत्रत्रित्वस्यपर्याप्तिसंबंधेनान्वयःसमवायेनवानाद्यः छेदनस्यप्रत्येकपर्याप्तत्वात्त्रित्वपर्याप्त्य
धिकरणकपिंजलकर्मकच्छेदनस्याप्रसिद्धत्वात् न द्वितीयः तथा सत्येककपिंजलच्छेदनेपित्रित्वरू
पतापत्तेः एकस्यापित्रित्वसमवायित्वात्। यत्तुत्रित्वस्यपर्याप्तिसंबंधेनैवान्वयः छेदनत्वरूपेणनिखि
लच्छेदनस्यत्रित्वपर्याप्त्यधिकरणकर्मकत्वसंभवेनोक्तदोषाभावादितितन्न। तथा सत्येककपिंज
लच्छेदनेपिचरितार्थत्वसंसर्गात् कुत्रचिन्मातकपिंजलत्रयच्छेदनस्यकपिंजलत्रयकर्मकत्वसं
भवादितिचेत् अत्रवदंति कपिंजलानालभेतेत्यत्र नतावत्कपिंजलकर्मकच्छेदनबोधः संभवति
विजातीयावयवविभागानुकूलव्यापारात्मकच्छेदनस्यकपिंजलकर्मकत्वासंभवात् किंतुकपिं
जलपदस्यकपिंजलावयवेलक्षणोपगमेनकपिंजलावयवकर्मकच्छेदनबोधोभ्युपेयः बहुव
चनार्थत्रित्वंचनकपिंजलावयवेन्वेति एककपिंजलस्यावयवत्रयच्छेदनेनैनहेतत्स्यतापत्तेः

किंतुकपिंजलएवत्रित्वस्यसमवायेनान्वयः नचकपिंजलस्यपदार्थतावच्छेदकत्वेनतत्रकथंसंख्या
न्वयइतिवाच्यं।धान्यस्यग्रहसंपन्नोव्रीहिरित्यादौजातावेकवचनदर्शनेनकुत्रचित्पदार्थतावच्छेदके
पिसुप्विभक्त्यर्थसंख्यान्वयस्योपगमात्।एवंचतादृशत्रित्वसमवायिकपिंजलत्रयस्यप्रत्येकं
प्रत्येकान्वयत्वेनान्वयः तादृशवाक्यस्यप्रत्येकक्रमेणप्रत्येकान्वयबोधेतादृशत्रित्वपर्याप्त्यधिकरणक
पिंजलान्वयएवसाकांक्षत्वेनत्वेकमात्रव्यक्तेरन्वयइतिनातिप्रसंगःसंभवनापिः एतेनकपिंजल

प

चतुष्टयच्छेदनेपिकपिंजलत्रयच्छेदनस्यजातत्वात्कपिंजलचतुष्टयच्छेदनेकर्मसांगतापत्तिः नचक
पिंजलत्रयच्छेदनानंतरंकपिंजलांतरच्छेदनेकपिंजलत्रयच्छेदनाव्यवहितोत्तरकर्माभावेनकर्मणि
जनंगत्वावधानान्नोक्तदोषइतिवाच्यं।एककालेपिकपिंजलचतुष्टयच्छेदनस्यसंभवेऽनंगत्वव्यवधा
नासंभवात्।किंचपरास्तेतादृशवाक्यस्यप्रत्येकक्रमेणकपिंजलत्रयेपान्वयएवसाकांक्षतानचचतुष्ट
यस्यान्वयोऽस्त्यनुपगमादितितस्मादुक्तरीत्यावेदवाक्यस्यैवप्रमाणत्वेनतुलौकिकवाक्यस्येतिनिष्कृष्टम्

तिप्रभाकरमतमप्ययास्तं प्रमाणत्वस्य प्रमाकरणत्वरूपत्तया यथार्थतात्पर्यनिश्चयानुरोधेन शाब्दबो
धस्तं चेत्तत्समानाकारानुभवसत्त्वेपि लौकिकवाक्यस्य प्रमाणत्वे बाधकाभावात् । तत्ता यद्वनेकपदार्थैः पर
पदार्थविषत्वरूपयोग्यताप्रमायाः संशयनिश्चयसाधारणरूपेण शाब्दप्रमाप्रयोजकत्वसंभवेन यथार्थतात्प
र्यनिश्चयस्य गौरवेण शाब्दप्रमाप्रयोजकत्वाभावाच्च । वेदार्थनियतत्वज्ञानस्य विशेषतत्तात्पर्यसंदेहप्र
तिप्रतिबंधकत्वस्यावश्यकतयास्वातंत्र्येण प्रतिबंधकत्वांतरस्य चागौरवेण मानाभावेन च्चाभावेन वैदिक
वाक्यपि सामान्यतत्तात्पर्यज्ञानसत्वे विशेषतत्तात्पर्यसंदेहसंभवात्तत्रापि विशेषरूपेण पदार्थतिवेस्य [?]
विशेषरूपेण यथार्थतात्पर्यज्ञानहेतुत्वस्यैवावश्यकतया लौकिकनामवैदिकवाक्यस्याप्यनुवादकत्व
स्य व्रह्मणोपि दुर्वारत्वात् इति हृत्तं पल्लवितेन । नन्वेवं घटः कर्मत्वमानयनं इत्यादितो घटमानयेत्या
दाविव शाब्दबोधापत्तिरिति चेन्न आकांक्षाज्ञानस्य शाब्दे शाब्दबोधजनने सहकारित्वात् । आकांक्षा चा
नुपूर्वीविशेषएवअनुगतापादुर्वचत्वात् तथा च याद्दशायाद्दशानुपूर्वीतायाद्दशान्वयबोधस्तत्तस्माद

शानुपूर्वीज्ञाने हेतुरिति फलितं। नन्वेवं घटमित्यादिस्थले कर्मताविशेष्यकाधेयतासंसर्गावच्छिन्नघ
टप्रकारताकशाब्दबोधावच्छिन्नं प्रति घटपदोत्तराम्पदज्ञानत्वादिना हेतुतेति पर्यवसितं तच्च न संभव
ति कलशमानयेत्यादिस्थलीयतादृशबोधे व्यभिचारात्। न च घटार्थपरोत्तराम्पदज्ञानत्वादिना हेतुता
न दोष इति वाच्यं। तथापि घटमानयेत्यादिस्थले व्यभिचारात्। न च घटार्थकपदोत्तरकर्मतार्थकविभ
क्तिज्ञानत्वादिनैव तत्र हेतुत्वमतो नोक्तव्यभिचार इति वाच्यं। यत्र घटमित्यत्र घटपदान्न घटस्मृतिः
किंतु कलशोस्तीत्यादिकलशपदात्तु एवं द्वितीयातोपि न कर्मत्वस्य स्मृतिः किंतु पटस्यानयनमित्यादि
ति चेदत्र केचित् तादृशशाब्दबोधावच्छिन्नं प्रति वृत्त्या घटोपस्थापकनामोत्तरकर्मत्वोपस्थापकविभ
क्तिज्ञानत्वादिना हेतुतान्नोक्तदोषः यद्यप्यवश्यात्मा कर्मत्वोपस्थापकत्वस्य निवेशो घटस्यानयने घटाय
स्पृहयतीत्यादौ कर्मत्वे घटान्वयबोधानंस्यात् षष्ठीचतुर्थ्योः कर्मतायां शक्तिविरहात् तद्वत्स्यात्तथात्वनिवेशो
च घटादानयत्यादौ पंचम्याः कर्मत्वलक्षणयापि कर्मत्वे घटान्वयबोधप्रसंगस्तथापि शक्तिनिरूढलक्षणान्य

तरहस्याकर्मत्वोपस्थापकत्वोप्रवेशान्न दोषः। नन्वतादृशशाब्दत्वावच्छिन्नं प्रति घटोपस्थापकनामोत्तर
कर्मत्वोपस्थापकविभक्तिज्ञानत्वेन कर्मत्वोपस्थापकविभक्तिप्राग्वर्त्तिघटोपस्थापकनामज्ञानत्वेन च हेतु
त्वमित्यत्र विनिगमनाविरह इति वाच्यं विनिगमनाविरहेण तादृशहेतुताद्वयांगीकारात्। वस्तुतस्तु। कर्मता
विशेष्यकशाब्दत्वावच्छिन्नं प्रत्येव कर्मत्वोपस्थापकविभक्तिप्राग्वर्त्तिनामज्ञानत्वेन हेतुत्वे घटपटकलशा
दिपदसाधारण्येन लाघवात्। तत्राधेयतासंबंधावच्छिन्नप्रकारत्वे कार्यताघटकसंबंधः स्वजन्यस्मृति
विषयत्वे च कारणताघटकसंबंधः एवमाधेयत्वसंबंधावच्छिन्नघटप्रकारताकशाब्दत्वावच्छिन्नं प्रत्येव
घोपस्थापकनामोत्तरविभक्तिज्ञानत्वेन न हेतुत्वं घटं घटेनेत्यादिस्थले कलशद्वितीयादिसाधारण्येन लाघवात्
अत्रापि कार्यताघटकसंबंधो विशेष्यताकारणताघटकश्च स्वजन्यस्मृतिविषयत्वे एतेन यत्र घटमानयेक
ल्यास्यानयनमित्येवंरूपं घटपदोत्तरविभक्त्या कर्मत्वे कलशपदाच्च घटस्मरतिन तु घटपदषष्ठीपरा
म्पां घटकर्मत्वे तत्र कर्मताविशेष्यकघटप्रकारकशाब्दबोधप्रसंग इत्यपि परास्तं अयोग्यक्रमेण हेतुतायाम

पियत्वात् तदंशे साध्ये घटकर्मत्वप्रकारेण तदवच्छेदेन घटकर्मत्वोपस्थितावस्तित्वादिप्रकारकस्तद्विशेष्यका
न्वयबोधस्तत्र व्यभिचारो दुर्वारः नेत्ररसा घटोपत्वेन कर्मत्वोपस्थितिसजन्यत्वस्यापि कार्यतावच्छेदकेनि
केष्यान्योक्त व्यभिचार इति वाच्यं तथा सति द्वितीयान्तघटपदतत्पदाभ्यां जनिततस्यादृशशाब्दबोधस्यासं
ग्रहापत्तेरिति चेन्न कर्मतोद्देश्यक घटविधेयकान्वयबोधत्वावच्छिन्नं प्रत्येवोक्तरूपेण हेतुत्वस्य वाच्यत
योक्तदोषाभावात् तदादिपदजन्यतादृशशाब्दबोधस्य स्थले हि कर्मत्वांशे न घटस्य विधेयत्वे वह्निमत्पर्वतो
द्व्यमित्याद्यनुमितौ पर्वते वह्निरिव किंतु घटीयकर्मत्वांशे इस्तित्वादेव यत्रत्वातंत्र्मणरस्याद्युपाप
स्थितौ परस्परमन्वयबोधस्तत्रैवोद्देश्यविधेयभावस्यानुभवात् न च यत्रान्योन्यस्थलीयशाब्दबोधव्यभि
चारः तत्रोक्तकारणबाधे नान्वयबोधानुपगमात् असंसर्गाग्रहादेव तत्र घटस्याद्युपपत्तेः तत्तच्छाब्द
बोधान्यत्वेवा कार्यतावच्छेदके तु प्रवेश्यं अन्तरा व विपरीतस्तुप्रन्नास्य घटः कर्मत्वमित्यादिवाक्याद्दृष्टान्वयबो
धस्वीकारेपि न तत्र व्यभिचारः सुप्तपुरुषीयशाब्दबोधत्वस्यैव कार्यतावच्छेदकत्वादित्याहुस्तत्र्न्यायग्रघगर्भ

कपदानुत्तरवर्त्तिनि एवाम्पदास्योत्तरवर्त्तित्वसंबंधेन घटपदवत्ताभ्रमेण कर्मत्वादिस्मरणस्य घटीयं कर्मत्वमित्य
न्वयबोधस्तत्र घटोपस्थापकनामोत्तरवर्त्तिन्याः कर्मत्वोपस्थापकविभक्तेर्ज्ञानविरहेण व्यभिचारस्तादवस्था
त्तन्नेवाव्यवहितोत्तरत्वसंबंधेन घटोपस्थापकनामप्रकारककर्मत्वोपस्थापकविभक्तिविशेष्यकज्ञानत्वे
नैव कर्मतादृशकघटविधेयकान्वयबोधहेतुत्वोपगमान्नोक्तव्यभिचारावकाश इति वाच्यं । तथा सत्यव्य
वहितोत्तरत्वसंबंधेन वाच्यवत्समयमित्यादिज्ञानादपि घटीयं कर्मत्वमित्यन्वयबोधापत्तेः । तस्यापि वाच्य
त्वादिरूपेण घटोपस्थापकनामाव्यवगाहित्वात् । न च तादृशसंबंधेन घटोपस्थापकतामत्वावच्छिन्नप्रका
रताककर्मत्वाद्युपस्थापकविभक्तित्वावच्छिन्नविशेष्यताकज्ञानत्वेनैव हेतुत्वं तत्र वाच्यमिति वाच्यं । घट
मित्याद्यानुपूर्वीज्ञानविधुराणामपि तादृशसंबंधेन घटोपस्थापकनामोत्तरकर्मत्वोपस्थापकविभक्तिर
स्तीत्यादिज्ञानवतां घटीयं कर्मत्वमित्यन्वयबोधापत्तेः घटादिपदस्य घटोपस्थापकनामत्वेऽपि[illegible]यादेः ॥
कर्मत्वोपस्थापकविभक्तित्वोमज्ञानेनापि घटमित्यानुपूर्वीज्ञानमात्रात् घटीयं कर्मत्वमित्यनुभवस्य सर्वसि

दुत्वेन व्यभिचारणाद्वक्ष्यमाणत्वात्। अतोऽव्यवहितघटमित्यानुपूर्वीज्ञानजन्यघटाद्युपस्थितिविशिष्टायां कर्मता-
विशेष्यकघटाद्यन्वयबुद्धौ स्वाश्रयोऽव्यघटाद्युपस्थितिसंबंधेन घटमित्यानुपूर्वीज्ञानत्वेन कारणता। एवं
कलशमित्यानुपूर्वीज्ञानजन्यघटाद्युपस्थितिविशिष्टायां कर्मताविशेष्यकघटाद्यन्वयबुद्धावपि तादृशो-
पस्थितिसंबंधेन कलशमित्यानुपूर्वीज्ञानत्वेनेति रीत्या प्रत्येकमेवानुपूर्वीज्ञानस्य कारणत्वं वक्तव्यं॥
वैशिष्ट्यं चैकक्षणावच्छेदेनैकात्मवृत्तित्वं। एवं च घटविशिष्टकर्मताबोधकतदादिपदेनापि घटोपस्थितौ जनि-
तायां घटीयकर्मत्वमित्याद्यन्वयबुद्धावपि न व्यभिचारः। तत्तद्बोधे उक्तरीत्या तादृशतादृगानुपूर्वीज्ञाना-
त्वेनापि हेतुत्वांतरकल्पनात् तत एव तत्र तादृशबोधोपपत्तिः। घटकर्मत्वमित्यादिनिराकांक्षवाक्यस्थले च
शक्तिज्ञानाद्यात्मकसामान्यसामग्र्याः सत्वेऽपि घटकलशमित्याद्याकारकान्वयबोधानापत्तिः। अत एव पक्ष-
पवतिष्ठते घटरसादिस्थलेऽपि झटिति यावद्विशेषसामग्रीविरहादेवनान्वयबोधः। ननु तद्धर्मप्रकारान्तमनुसन्त-
यः उद्देश्यतावच्छेदकविधेययोरैकस्थलेऽभेदेनोद्देश्यविधेययोरेकस्यत्वे चाभेदेनान्वयबोधस्यालीक-

तया तद्देतर्भावेन तत्तदानुपूर्वीज्ञानस्य हेतुत्वोत्तराकल्पनात् अत एव पद्येष्वेवागच्छतीत्यत्रैव पञ्चतिथे
त्रागच्छतीत्यादौ पाककर्तृत्वविशिष्टचैत्रेऽगतिमत्त्वस्यान्वयबोधस्तादृशानुपूर्व्यं तद्भावेण तथाविधान्व
यबोधं प्रति हेतुत्वाभावात् आख्यातार्थकृत्यादेरुद्देश्यतावच्छेदकविधयाऽन्वयबोधस्योदाहरणवाक्या
द्यत्रैवाप्रसक्तेस्तयायोपरश्छतिसज्ञातेत्यादिस्थल एव इष्टापत्तेर्न तद्व्यापकीभूतज्ञानवानित्याद्यन्वय
बोधये न तत्तत्तादृशानुपूर्व्यं तद्भावेण हेतुत्वकल्पना तत्रान्वयबोधानुपपत्तिरित्यादिकमन्यत्र विस्तरः
एवमानयपतिघापयति इत्यादौ धात्वाख्यातयोरन्वयस्थले घानयतीत्यानुपूर्वीज्ञानमानयनाद्युप
स्थितिविशिष्टत्वादिविशेषकानयनादिप्रकारकान्वयबोधे आनयतीत्याद्यानुपूर्वीज्ञानत्वेन प्रसक्त
रूपेण स्वप्रयोज्यानयनाद्युपस्थितिसंबंधेन कारणत्वशेयं न तु स्वस्याघेत्रो विषयत्वादिसंबंधेनानयना
दि विधयकान्वयबोधसामान्ये प्रसेवानयनापनोपस्थापकधातूत्तरत्वस्य पस्थापकप्रसयस्त्रानत्वेन का
रणत्वमिति मतमादरणीयं ॥ यत्रानयनार्थकधातूत्तरत्वं सिनि एवेति पत्तरत्वम्त्र मादानयनीया

त्पत्तिरित्यन्वयबोधस्तत्र व्यभिचारप्रसंगात्। न चाव्यवहितोत्तरत्वसंबंधेनानयनोपस्थापकधातुप्रका
रकत्वस्य सुपस्थापकप्रत्ययविशेष्यकज्ञानत्वेनैव तादृशान्वयबोधे कारणत्वान्नोक्तव्यभिचार इति वाच्यं।
प्रमेयत्वादिप्रकारेणापि तादृशधातुप्रकारकज्ञानादन्वयबोधापत्तेः न चेष्टसुपस्थापकाख्यातत्वाद्यव
च्छिन्नविशेष्यताकानयनोपस्थापकधातुत्वावच्छिन्नप्रकारताशालिज्ञानत्वेन तादृशान्वयबोधे कारण
त्वोक्तौ नोक्तोपपत्तिरिति वाच्यं। आनुपूर्वीविशेषस्याग्रहे तावन्मात्रादप्यन्वयबोधापत्तेः इष्टापत्तौ चानु
भवविरोधात्। धातुत्वाख्यातत्वाग्रहेपि घटमानयतीत्यानुपूर्वीविशेषज्ञानमात्रादपि घटकर्मकान
यनानुकूलकृतिमानित्यन्वयबोधोत्पत्त्या व्यभिचाराच्च। तादृशानुपूर्वीविशेषस्य च निश्चय एव हेतुः
तस्य संदेहे व्यतिरेकनिश्चये वान्वयबोधानुदयात्। एवंमग्रेपि द्वितीयाद्यर्थकर्मत्वादिकारकाणां धा
त्वर्थानयनादिक्रियायामन्वयबोधस्थले तु आनयतिप्रापयतीत्यादिप्रत्यकानुपूर्वीज्ञानजन्यानयनो
पस्थितिविशिष्टआनयनविशेष्यकघटकर्मत्वादिप्रकारकान्वयबोधे आनयतिप्रापयतीत्यादिप्रत्ये

कानुपूर्वीज्ञानत्वेन हेतुत्वं एवं घटं कलशमित्यादिप्रत्येकानुपूर्वीज्ञानजन्यघटकर्मत्वोपस्थितिविशिष्टे
आनयनेविशेष्यकघटकर्मत्वादिप्रकारकान्वयबोधेपिप्रत्येकं घटं कलशमित्यानुपूर्वीज्ञानत्वेन हेतु
त्वेबोध्यं अतो घटमानयतीत्यत्र वानयतिघटमित्यत्राप्यानयनेधर्मिणि घटकर्मत्वस्यान्वयबोधः
आनयति घटस्येत्यादौ घटमानयनमित्यादौ चनतादृशोन्वयबोधः उक्तहेतुद्वयस्याभावात् घटमित्या
दिकर्मपदं विनानयतीत्यादिक्रियापदेनतादृशक्रियापदं विना च घटमित्यादिकर्मपदेन तु नित्यसा
नयनविशेष्यकघटकर्मत्वादिप्रकारकान्वयबोधस्यालीकत्वापत्तिदापत्तेरसंभवात् एवं क्रियाकार
कांतरस्थलेपितत्रक्रियाकारकपदांतर्भावेण हेतुताद्वयं बोध्यं केचित्तु घटमानयतीत्यानुपूर्वीज्ञान
व्यवहितोत्तरानयनविशेष्यकघटकर्मत्वान्वयबोधं प्रतितादृशानुपूर्वीज्ञानत्वेन हेतुत्वमेवमानयति
घटमित्यानुपूर्वीज्ञानस्यापुत्तरीत्या हेतुत्वमपरं वक्तव्यमित्याहुस्तदसत् घटमित्यस्यानयतीत्यस्य च
द्वयोः पौर्वापर्यस्य संदेहे तन्निश्चयं तदंशे भ्रमत्वस्य संदेहे हृदशायां वा घटमानयतीत्यानुपूर्वीज्ञानात्तादृशा

न्या॰ कौ॰
२६

न्वयबोधानुत्पत्तिप्रसंगात् यादृशानुपूर्वीज्ञानस्य हेतुत्वं तत्र विषयत्वस्यापेक्षितत्वात् तादृशानुपूर्व्यं
शे भ्रमत्वज्ञानाभावस्यापि शाब्दधीहेतुत्वात्। एवं घटं पटं चानयतीत्यादावानयनविशेष्यकघटकर्मत्वा
दिप्रकारकान्वयबोधोपपत्त्यर्थं तत्र सामग्र्यन्तरकल्पने महागौरवप्रसंगश्चेति दिक्। वस्तुतस्तु क्रिया
कारकोभयोत्तरभावेणापि क्रियापदस्य कारकपदस्य च पृथक् हेतुत्वद्वयेन कल्पनीयेनाम विभक्त्यो
र्धात्वाख्यातयोश्चोत्तरभावेण क्लृप्तहेतुत्वादेव क्रियायां कारकस्यान्वयबोधसंभवात्। घटमित्याद्यानु
पूर्वीज्ञानाव्यवहितोत्तरानयनादिक्रियाविशेष्यकघटकर्मत्वादिप्रकारकान्वयबोधप्रति तादृशा
नुपूर्वीविशेष्यकतात्पर्यादिज्ञानहेतुत्वस्यावश्यकतया तत एव विशिष्टान्वयबोधसंभवात्। न च
घटमानेत्यादितोऽपि सति तादृशतात्पर्यग्रहे तादृशान्वयबोधापत्तिरिति वाच्यं। आनयतीत्यानु
पूर्वीज्ञानाव्यवहितोत्तरतादृशान्वयबोधरूपस्य तद्विशेषस्य सामग्रीविरहादेव तत्रापत्त्यसंभवादिति
सारं। अपायमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ राजकोपपुरुषबोधे तात्पर्यदशायां राज्ञः पुरु

घटस्याद्यानुपूर्वीज्ञानात्तादृशबोधोदयेन तत्र तादृशानुवृत्तिपूर्वीज्ञानहेतुत्वस्य क्लृप्ततया राजकीयपुत्रबोधे ता-
त्पर्ये दशायां पुत्रो राज्ञ इत्याद्यनुपूर्वीज्ञानात्तादृशबोधोदये न पुत्रो राजः इत्यानुपूर्वीज्ञानस्य राजकीयपुत्रबोध-
प्युक्तरीत्यादिहेतुत्वस्य क्लृप्ततया तादृशबोधे नियामकाभावः आनुपूर्वीरूपकोशापानिश्चयस्य विशेष-
णनियामकत्वासंभवादिति चेन्न तादृशतात्पर्यज्ञानस्यैव तत्र नियामकत्वात्। अथैवमपि घटमानये-
त्यादितः शाब्दबोधानंतरं द्वितीयक्षणे पुनस्तादृशशाब्दसमानाकारशाब्दापत्तिः सामग्र्याः सत्त्वादिति चे-
न्न शाब्दबोधद्वयेच्छाविरहविशिष्टसमानाकारशाब्दबोधस्य शाब्दबोधे प्रतिबंधकत्वादेवोक्तपसनवे-
कारात्। तादृशशाब्दद्वयेच्छासत्त्वे शाब्दद्वयस्योसस्यो विवादाभावात्तादृशेच्छाविरहवैशिष्ट्यस्य प्रतिबं-
धकतावच्छेदककोटौ प्रवेशः वस्तुतस्तु उक्तप्रतिबंधकत्वे मानाभावः प्रथमशाब्दबोधक्षणे तज्जनक-
पदज्ञानजन्यपदार्थोपस्थित्यादीनामन्यतमविनाशेन तादृशकारणविरहादेवाविरलक्रमोत्पन्नशाब्द-
बोधधारायाः अप्रसंभवात् अंतरा पदज्ञानजन्यपदार्थोपस्थित्युत्पादस्यत्ते पूर्वान्वयबोधस्य तादृश।

पदार्थोपस्थितिकाले विनाशात् तदुत्तरमन्वयबोधांतरस्य सर्वमतेऽवावश्यकत्वात् यत्र प्रथमशाब्दबो
धजनकपदार्थोपस्थितिरेवाकांक्षादिविघटिणी तत्र विनश्यदवस्थतादशासमूहालंबनपदार्थोपस्थि
तितस्मात् तादशशाब्दबोधद्वितीयक्षणे पुनस्तादशशाब्दबोधस्त्विष्यत एव शाब्दबोधानंतरमेकशाब्दबोधा
पगमेऽनुभवविरोधविरहात् शाब्दबोधधारायाएवानुभवविरुद्धत्वादित्यवसारं अथातथापि घटः
कर्मत्वमित्यादौ शाब्दबोधवारणाय घटमानयेत्यादावनुपूर्वीनिश्चयहेतुत्वकल्पनापेक्षया घटः कर्मत्व
मित्याद्यानुपूर्वीज्ञानाभावहेतुतापेक्षयाता दृशानुपूर्वीनिश्चयहेतुत्व एव लाघवादित्यलमधिकेन
ननु वह्निना सिंचतीत्यादौ सेकत्व वह्निकरणकत्वसाधययोग्यतानिर्णयदशायामपि सेके वह्निकरण
कत्वादिशाब्दबोधापत्तिस्तदानीमुक्ताकांक्षाज्ञानघटितशाब्दत्वसामग्र्याः सत्त्वादिति चेन्न शाब्दबोधे योग्य
ताज्ञानस्यापि हेतुत्वोपगमात् योग्यता च तद्धर्मावच्छिन्नविशेष्यकतत्संसर्गकतद्धर्मावच्छिन्नप्रकारक
शाब्दबोधे तद्धर्मावच्छिन्नस्य तेन संसर्गेण तद्धर्मावच्छिन्नवत्त्वं एवं च सेकानवह्निकरणकत्वसाधययोग्यता

निर्णयकाले सेकत्वावच्छिन्ने वह्निकरणकत्वत्वावच्छिन्नावगाहिनस्सेको वह्निकरणक इत्याद्याकारक
स्यायोग्यताज्ञानस्यानुत्पत्तेर्नोक्तशाब्दबोधापत्तिः तस्याश्च संशयसाधारणज्ञानमात्रमेव हेतुः सर्वत्र शा
ब्दबोधात्पूर्वं योग्यताया निर्णेतुमशक्यत्वात्। ननु विशिष्टबुद्धिसामान्यबाधनिश्चयाभावस्य हेतुतायाः क्लृ
प्तत्वात्तयैवायोग्यतानिर्णयदशायां शाब्दबोधानुत्पादनिर्वाहेण शाब्दबोधे योग्यताज्ञानत्वेन हेतुतायां
मानाभावः अथ प्रत्यक्षस्थलीयबाधनिर्णयप्रतिबंधकतायामिच्छायाउत्तेजकत्वानुरोधेन चाक्षुषत्वा
देरेव प्रतिबध्यतावच्छेदकतया परोक्षस्थले इच्छाविरहमनिवेश्य पृथगेव बाधनिर्णयस्य प्रतिबंधक
त्वं वाच्यं। तत्र च न परोक्षत्वजातेः प्रतिबध्यतावच्छेदकत्वं संभवति तत्र मानाभावात् अपि तु प्रत्यक्षान्यज्ञा
नत्वस्यैव तत्त्वे च गुरुशरीरमित्यनुमितित्वशाब्दत्वयोरेव तत्त्वमुपेयमिति तयोरेव बाधनिर्णयाभावजन्य
तावच्छेदकत्वं वाच्यं तथा च लाघवात् शाब्दत्वावच्छिन्ने योग्यताज्ञानहेतुत्वमेव सम्यक् बाधनिर्णयाभावहेतु
त्वे निर्णयत्वप्रवेशेन गौरवात् न च योग्यताज्ञानस्य संशयसाधारणहेतुतायामप्रामाण्यं निर्णयस्यैवोत्तेज

कतयागौरवमेवेति वाच्यं। योग्यताज्ञानस्याहेतुत्वे प्रत्यक्षादौ शाब्दसामग्रीप्रतिबंधकतायां ग्राह्याभाव
तद्व्याप्यतद्वद्धर्मदर्शनाभावकूटस्य निवेशनीयतया गौरवं तद्धेतुत्वे च योग्यताज्ञानस्यैक
स्यैव निवेशनीयतया लाघवमिति तद्धेतुत्वस्यैवोचितत्वात्। न च तद्धेतुत्वेपि सामग्रीप्रतिबंधकतायां
तस्यांतर्भावान्नोक्तरीत्या लाघवमिति वाच्यं। तथा सति योग्यताज्ञानस्य काले शाब्दबोधेतरस्य कल्पकार
णसत्त्वे तन्मते शाब्दबोधे जायमाने प्रत्यक्षाद्युत्पादापत्तेरिति चेन्न परामर्शस्यैव जातः एवैव वस्थापितत्वात्
किंच योग्यताज्ञानहेतुत्वेपि तत्संदेहानंतरक्षणे आप्तवादितायोग्यतानिश्चये तदुत्तरक्षणे विनश्यदव
स्थयोग्यतासंदेहात् शाब्दबोधवारणाय तत्रायोग्यतानिश्चयाभावस्य हेतुतायाश्चावश्यकत्वमिति चेद
त्र केचित् योग्यताज्ञानस्य शाब्दधीहेतुत्वे पक्षःकरणकत्वाभाववत्सेकौपाद्वृत्तिरिसाधाकारिकायां विशेष्य
विशेषणमिति रीत्या मानसादिबुद्धौ ययसांसिंवति साधारणकशाब्दसामग्र्याः प्रतिबंधकत्वाकल्पने
नैव लाघवं। तथाहि तादृशसामग्रीकाले संकल्पाद्यवच्छिन्नविशेष्यकपक्षःकरणकत्वप्रकारयोग्यताज्ञान॰

पस्य तादृशमानसविपरीतज्ञानस्य सत्तायामावश्यकत्वेन विपरीतज्ञानोत्तरप्रत्यक्षनिर्णयहेतुभूतविशे
षदर्शनस्य विरहेणैव न तादृशमानसापत्तिसंभवेत् सेको न पयःकरणक इत्यादिप्रत्यक्षजनकीभूतसेक
त्वावच्छिन्नविशेष्यकपयःकरणकत्वादिप्रकारकोपदर्शितशाब्दसामग्र्येव नास्ति। न च संशयविशेषदर्श
नस्याहेतुतया योग्यतासंदेहघटितोपदर्शितशाब्दसामग्रीदशायां सेकत्वावच्छिन्नविशेष्यकपयःकरण
कत्वाभावप्रकारकसंशयवारणायोपदर्शितशाब्दसामग्रीप्रतिबंधकत्वकल्पनमावश्यकमेवेति वाच्यं।
सेकत्वावच्छिन्नविशेष्यकपयःकरणकत्वादिप्रकारकमानसे तादृशशाब्दसामग्रीप्रतिबंधकतायाऽभ
यसिद्धतया सेकत्वादिविशेष्ये पयःकरणकत्वाभानासंभवेन पयःकरणकत्वाभावप्रकारकमानसेऽ
पदर्शितसामग्रीप्रतिबंधकत्वाभावेऽपि तादृशसामग्रीकाले संशयापत्त्यसंभवात् न च विपरीतज्ञानोत्तर
प्रत्यक्षनिर्णये विशेषदर्शनस्य हेतुत्व एवोक्तरीत्या लाघवं संभवति तत्र वचनमानमिति वाच्यं। उपदर्शि
तलाघवबलेनैवास्यापि सिद्धेः मास्तु वा विपरीतज्ञानोत्तरप्रत्यक्षनिर्णये विशेषदर्शनं हेतुस्तथापि योग्यता

ज्ञानहेतुतामतेयोग्यताज्ञानाभावप्रकारकात्मविशेष्यकमानसप्रत्यक्षे शाब्दसामग्रीप्रतिबंधकत्वा
कल्पनेप्रयुक्तलाघवं दुर्वारमेव ज्ञानाभावविशिष्टबुद्धेः स्वरूपसत्ज्ञानस्य प्रतिबंधकतायाः सव
सिद्धत्वादित्याहुः। अन्ये तु। परशस्तु वह्निमानित्यादिकविवाक्यादितो बाधितार्थस्याप्याहार्ययोग्यताज्ञानादप्य
न्वयबोधोत्पत्तेरनुभविकतया बाधनिर्णयस्य न शाब्दबोधप्रतिबंधकत्वं नैव बाधितत्वेनावधारितेऽ
प्यर्थे शाब्दात्प्रवृत्तिप्रसंग इति वाच्यं। बलवत्ता बाधेन तत्र शाब्दबोधेऽप्रमाण्यज्ञापनेनाप्रवृत्त्युपपत्तेः
तदुक्तं खंडनकारैः अर्थेनासत्यपि स्वार्थं ज्ञानं शाब्दः करोति हि प्रमा बाधाऽप्रमा तत्र स्थितः प्रामाण्य
निर्णय इति अस्यार्थः अर्थेनासत्यपि बाधितत्वेनावधारितेपि अर्थविषये हि निश्चये न शाब्दः ज्ञानं
करोति स्ववृद्धितीय हि शब्द एवेवकारार्थः नन्वेवं तत्र प्रवृत्त्यापत्तिः तज्जनकत्वे विशिष्टज्ञानस्य सत्वादत
आह। प्रमेत्यादि तत्र बाधितार्थे प्रमा बाध्याप्रमया अयोग्यताप्रमया बाध्याऽप्रमात्वेन ख्याप्या अप्रमात्र
मात्मिके शाब्दबुद्धिरेव भवतीति शेषः तावतापि किं जातमत आह अत इति प्रवृत्तिप्रयोजक इति शेषः तथा

चप्रवृत्तिप्रयोजकप्रामाण्यनिर्णयाभावान्न तत्र प्रवृत्तिरिति भावः। नन्वेवं योग्यताज्ञानहेतुत्वमप्यफलं बाध
निर्णयदशायां शाब्दधीधारणाय वक्तव्यस्वीकारादिति वाच्यं। बाधनिर्णयदशायामपि बुभुत्सितस्यैव कार्यस्या
न्वयबोधानलवबुभुत्सितस्य स्यनुभवस्य योग्यताज्ञानहेतुतामन्तरेण निर्वाहात् योग्यताज्ञानहेतुत्वे आहार्य
योग्यताधीनिर्वाहकत्तयावबुभुत्सोपगमात्। नच शाब्दबोध एवाहार्यः सौक्रियतां तावत्तेवबुभुत्सोपयोग
संभवे किं योग्यताज्ञानस्य हेतुत्वेनेति वाच्यं। परोक्षं ज्ञानमनाहार्यमेवेति सिद्धान्तविरोधात् तथा सति शा
ब्देच्छाविरहविशिष्टबाधनिर्णयाद्यभावस्य हेतुतायाउपगंतव्यतया गौरवप्रसंगाच्च। न च तत्र तत्र शाब्द
बोधहेतुतयाभिमतावाकार्थगोचराहार्यमानसप्रत्यक्षादेव शाब्दबोधकार्योपपत्तेः शाब्दबोधोऽप्रामाणि
क इति वाच्यं (श्रुतायमर्थ इत्यनुभवस्य प्रत्यक्षेणानिर्वाहात् त्वाद्जन्यवाक्यार्थविषयकबोधस्य वाक्यविरो
षादिबोधजनकत्वाच्च। अन्यथा बाधितार्थककविवाक्यादेराकांक्षादेरनुपयोगप्रसंगादिति प्राहुः। अपरे
तु यत्र यत्र विषये योग्यताज्ञानघटितशाब्दबोधसामग्रीदशायां कदापि कस्यचिद्बाधनिर्णयो न जातस्तत्र

६०

बाधावताता दृशायां शाब्दबोधवारणाय योग्यताज्ञानं हेतुस्तेवोच्चिताउक्तलाघवादिस्याकुरिति दिक्। अधि
कमन्यत्र बोध्यं विस्तरभयादत्र नोक्तं। गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादौ गिरिरग्निमान्देवदत्तेकर्तृकं
भोजनमित्यादि शाब्दबोधवारणायासत्तेरपि शाब्दबोधहेतुत्वमुपेयं। अथ केयमासत्तिर्यदभावादुक्तस्थ
ले नोक्तरीत्या शाब्दबोध इति चेदत्र केचित् एकपदार्थोपस्थित्यव्यवधानेनापरपदार्थोपस्थितिरास
त्तिः उक्तस्थले चोच्चारणक्रमेण पदार्थोपस्थित्या गिरिर्यदग्निमदाद्युपस्थितेरव्यवधानाभावान्नासत्तिः न
चैवं गिरिरग्निमानित्यादावव्यासत्त्यनुपपत्तिः तत्र पदज्ञानेनार्थोपस्थित्यव्यवधानादिति वाच्यं। यत्राग्नि
मुपस्थितिरेवाग्निमत्पदविषयिणी तत्रैवासत्तेरुपगमात् अन्यत्रासत्तिभ्रमेणैव शाब्दबोधोपगमात् ए
वेत्युक्ते तत्स्वप्रयुक्तान्वयबोधानुकूलक्षणव्यवधानाभाव एवाव्यवधानं उक्तस्थले च परक्षणानक्षणस्वप्रयु
क्तान्वयबोधानुकूलत्वान्न दोषः अत एवैकाष्टैः स्थाल्यामोदनं पचतीत्यादौ काष्टकरणकत्वपाकाद्युपस्थित्योः
स्थाल्याद्युपस्थितिक्षणेन व्यवधानेपि न क्षतिः तस्य प्रयुक्तान्वयबोधानुकूलत्वात् यत्र च गिरिर्भुक्तमित्या

दौ भुक्तेपदार्थोपस्थितौ गिरिपदस्य तदर्थस्य वा पुनर्भाने तत्रासत्तिरेव। ननु गिरिर्भुक्तमित्यादौ निर्युपस्थितस
निमनुपस्थितो युगपदवस्थानाभावात्पदार्थोपस्थितिरूपकारणविरहादेव न शाब्दबोधापत्तिर्न च यत्र
कैमिकोपस्थितेनंतरं समूहालंबनेनतावसदस्मरणात्समूहालंबनेन तादृर्थोपस्थितिस्तत्र शाब्दबोधापत्तिरि
ति वाच्यं तत्र समूहालंबनोपस्थितेः स्वात्मकार्थांतरोपस्थित्यव्यवधानसत्वेनासत्तिसत्वादासत्तिहेतुतया
पत्तिर्वाहेणेष्टापत्तेरेव शरणीकरणीयत्वादिति चेन्न भेदघटितानाव्यवधानस्यैवासत्तिघटकतया समूहा
लंबनोपस्थितेरासत्तित्ववारणायेवासत्तेर्हेतुत्वोपगमे सावरुपकत्वादित्याहुस्तदसत्तदुक्तासत्तेः स्वरू
पसत्या हेतुत्वे ज्ञातत्वापावानावः। आसत्तिभ्रमेण शाब्दबोधानुपपत्तेः नोत्यः उपस्थित्तीनामनुपस्थिता
वपि शाब्दबोधस्यानुभविकत्वात्॥ वस्तुतस्तु निरुक्तासत्तेः शाब्दबोधापयोगित्वे मानाभावः गिर्यग्निम
तोरन्वयतात्पर्यज्ञानाभावादेव तयोरन्वयबोधानुदयात् तत्सत्वे चेष्टापत्तेः। अतएव श्लोकादौ तात्पर्यग्राह
कतया योजनाया उपयोगः। यत्र च प्रकारांतरेण तात्पर्यग्रहस्तत्र योजनां विनैव शाब्दबोधः एतेन तत्त

पदयोरव्यवधानमेवासत्तिः तस्माच्च ज्ञानमेव शाब्दबोधजनकं व्यवहितानामपि पदानामव्यवधानक्र
मेण शाब्दबोधानक्रमेण शाब्दबोधात् अत्रापि ग्रहतान्वयबोधानुकूललक्षणानंतरं तत्वे निवेश
नीयं अतोनेकावृत्तेः स्यात्मामोदनेपचतीत्यादावनुपपत्तिः मौलिनाऽव्यवधानेन लिखितानां पदानामा
सत्तिभ्रमादिव शाब्दबोधः स्वस्यापि स्वाव्यवहितत्वादेकपदोपस्थाप्ययोः द्युतिवर्तमानत्वयोः परस्पर
मन्वयबोधः अथवा तत्रासत्तिज्ञानस्य हेतुत्वेनैकाल्पत्वप्रयोजनाभावात् कुलकादौ च योजनावाक्या
देव शाब्दबोधः अत एव तत्र योजनाया अप्युपयोग इत्यपि परास्तं। तात्पर्यग्रहणेन निर्वाहे निरुक्ता
सत्तेरपि हेतुत्वे मानाभावात्। अन्ये वदंति। पदवृत्तिज्ञानजन्यपदार्थोपस्थितिरेवासत्तिः सा च स्वरूप
सत्येवोपयुक्ता आगृहीतवृत्तिकस्य पदज्ञानादिसत्वेपि शाब्दबोधानुदयात्। सा च स्मृतिरूपा ग्राह्या
तत्र वृत्तिज्ञानस्य बोधकविधया हेतुत्वात् तेन शक्तिलिंगकानुमानजन्यानुमित्यात्मकपदार्थोपस्थि
तेन शाब्दबोधः नैव च व मवांतरनामार्थबोधस्यासंग्रहेण घटमानयेत्यादाववांतरवाक्यार्थबोधपूर्वक

महावाक्यार्थबोधानुपपत्तिरिति वाच्यं। तत्र नयनाद्युपस्थापकचरमपदज्ञानस्यैव घटादिपदविषयक
समूहालंबनरूपतायोगमेन तज्जन्यानयनादिस्मृतेश्च घटादिविषयकसमूहालंबनत्वायोगमेन च विशि
ष्य विशेषणमिति रीत्यैव शाब्दबोधोपगमेनावांतरवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधानुपपत्तेरिति
दिगमात्। एवं सर्वत्र खलेकपोतन्यायेनैव शा
ब्दबोधः। यत्तु अवांतरवाक्यार्थबोधस्यापि महावाक्यार्थबोधहेतुत्वाय तत्रावांतरवाक्यार्थबोधस्तत्र विशि
ष्टस्य वैशिष्ट्यमिति रीत्या महावाक्यार्थबोधः यत्र च स नास्ति तत्रोक्तस्मृतितो विशेष्ये विशेषणमिति रीत्या
बोधः एवं च क्वचिद्गजपुरप्रवेशन्यायेन क्वचिच्च खलेकपोतन्यायेन शाब्दबोध इति मतं तदसत्। उक्तरी
त्या सर्वत्रोक्तस्मृतिरूपैकविधसामग्र्यैव निर्वाहे अवांतरवाक्यार्थबोधस्य महावाक्यार्थबोधहेतुत्वमाना
भावात् क्वचित् स्मृतिघटितत्वेन क्वचिच्चावांतरवाक्यार्थबोधघटितत्वेन महावाक्यार्थबोधसामग्र्या भे
देन समानविषयकानुमित्यादौ महावाक्यार्थविषयकशाब्दसामग्रीप्रतिबंधकताधिक्यप्रसंगाच्चेनैव

विनिगमनाविरहः सर्वत्रावांतरवाक्यार्थबोधरूपैकसामग्र्येव निर्वाहोपगमादित्ति वाच्यं अवांतर
वाक्यार्थबोधानुरोधेनोक्तस्मृतिरूपसामग्रीकल्पनावश्यकत्वस्यैव विनिगमकत्वादिति। अथ पद
वृत्तिज्ञानजन्यपदार्थोपस्थितित्वेन शाब्दबोधहेतुत्वे यत्र द्वारकर्मकपिधानतात्पर्येण द्वारमित्ये
वोक्तं तत्र तादृशबोधानुपपत्तिः पदवृत्तिज्ञानजन्यपिधानोपस्थितेरभावादिति चेन्न तत्रोक्ततात्पर्या
नुरोधेन पिधेहीत्यादिपदाध्याहारकल्पनात् यत्र च न तादृशपदाध्याहारसामग्री तत्र मानसस्यैव ता
दृशबोधस्योपगमे शाब्दबोधस्यानुपगमात् गुरुत्वस्तु पदार्थोपस्थितिमात्रं शाब्दबोधजनकं न तु
पदवृत्तिज्ञानजन्यत्वे हेतुतावच्छेदकं गौरवान्मानाभावाच्च एवं चोक्तस्थले पिधानाद्यर्थाध्याहारादेव
तादृशबोधोपपत्तौ न पदाध्याहारः कल्पनीयो मानाभावात् न च घटादिपदादाश्रयत्वादिसंबंधे
नोपस्थितानामाकाशादीनां शाब्दबोधवारणाय पदवृत्तिज्ञानजन्यत्वस्य पदार्थोपस्थितिजनकताया
मवच्छेदकत्वमावश्यकमिति वाच्यं। तत्र तात्पर्यविरहेण तादृशशाब्दबोधे इष्टापत्तेः अन्यथा तात्पर्यग्रहभा

वादेव शाब्दबोधाभावोपपत्तेः। अथैवं यत्र द्वारकर्मत्वपिधानादीनां सर्वेषामेवार्थानां प्रकारान्तरेणैवो
पस्थितिर्नेतु प्रसक्तवाक्यार्थघटकार्थोपस्थापकस्य कस्यापि ज्ञानमस्ति तत्रापि द्वारकर्मकपिधानादि
शाब्दबोधप्रसंगः। यत्तु पत्र प्रसक्तवाक्यार्थघटकानां द्वारकर्मत्वपिधानादीनां सर्वेषामेव लाक्षणिकपदा
दुपस्थितिस्तत्र न्यायमतेपि लाक्षणिकपदस्यानुभावकतया न शाब्दबोधः तदुपपत्तये च तत्तद्वि
शिष्टार्थबोधे शक्तिज्ञानजन्यतत्तद्विशिष्टार्थप्रकारकतावच्छेदकधर्मावच्छिन्नोपस्थितित्वेन हेतुताव
श्यमुपेया एवं च तादृशकारणविरहादेव नोक्तस्थले शाब्दबोधप्रसंग इति तत्र दसत्। सर्वलाक्षणिकस्थ
ले शाब्दबोधस्येष्टत्वात्। लाक्षणिकेनानुभावकमिति नियमे मानाभावात्। अत एव धूमादिस्थले हेतु
वाहकोधूमपदस्य धूमज्ञाने पंचम्याश्च ज्ञाप्यत्वे लाक्षणिकत्वेपि शाब्दबोध इति चेन्मैवं न्यायमतर
वास्माभिरपि पदवृत्तिज्ञानजन्यपदार्थोपस्थितित्वेन हेतुतामुपगम्यैव सर्वपदाश्रवेण शाब्दप्रसंगवार
णात्। न चैवं सर्वपदाध्याहार आवश्यक इति वाच्यं प्रसक्तवाक्यार्थशाब्दबोधप्रयोजकसामग्र्यां पदवृत्तिज्ञा

नजन्ययकिंचित्पदार्थोपस्थितेः इतरपदार्थानां चोपस्थितिसामान्यस्य निवेशने सर्वपदाध्याहारं विनैव नि
र्वाहादिति वदंति तन्न। निराकांक्षपदजन्यपदार्थोपस्थितिकाले शाब्दबोधवारणाय साकांक्षतयातत्तस
दावगाहिज्ञानस्येह तु तौ यास्तत्रावश्यकतया पदाध्याहारस्यावश्यकत्वात्। किंच तदुद्देश्यकतद्विधेयका
न्वयबोधे तदुपकस्यापकपदोत्तरत्वेन तदुपस्थापकपदानुसंधानस्य नियामकतदाद्वारकमेवासेपि
धानादिविधेयकशाब्दबोधानुरोधेन द्वारमित्यादिपदोत्तरत्वेन पिधानाद्युपस्थापकपदानुसंधान
मावश्यक। अतएवोद्देश्यवाचकपदविधेयवाचकपदविधेययोः पौर्वापर्यरूपाकांक्षायाअप्युपयोगः
न चोद्देश्यविधेयभावेन शाब्दबोधानुरोधेन पदाध्याहारकल्पनेपि विशेष्यकल्पनं विशेषणभावमा
त्रेण शाब्दबोधस्यार्थाध्याहारोद्देश्योपपत्तेर्नेतत्र पदाध्याहारापेक्षेति वाच्यं। अनुमितेरुद्देश्यविधेय
भावानिरूपकस्य शाब्दबोधस्याप्रामाणिकत्वात्। अन्यथा तादृशशाब्दबोधोपगमे तद्दीपसामग्र्या ज्ञानोत्त
रं प्रतिपत्तिबंधकतायाजाधिक्यप्रसंगात्। यत्तु पदज्ञानजन्यपदार्थोपस्थितिजन्यशाब्दबोधेउद्देश्य

वाचकपदविधेयवाचकपदयोः पौर्वापर्येणानुसंधानं उद्देश्यविधेयभावनियामकं अर्थाध्याहारा
धीनशाब्दबोधे चतात्पर्यविशेषज्ञानं नियामकमित्ति न्न तथासत्येकविधबोधस्यैव सामग्रीसत्ति
वेधकतारूढः पूर्वापरभावापन्नपदविषयकज्ञानजन्ययोरुद्देश्यविधेयोपस्थित्योरेतन्मतेप्यकल्पनि
वेशनीयतया क्लृप्तत्वासंभवात् भेदासत्के सर्वेषां पदानुपस्थितौ विवसर्वेषां पदानुपस्थितावपि शाब्द
बोधो जायते अर्थ जरति न्यायस्यैवानुपगमात् । अत एव परस्पतः स्येनमारुयद्धेषा शाब्दं चक्षण्वतः
सुरविक्षेपशाब्दं चक्षे नोस्थो धावतीति धीरि सुलेसंग छते जत्रेहेषाश्रवणखुरविक्षेपशब्दश्रवणा
भ्याम्श्वेत धावनयोरनुमिसासकोपस्थितेः एवं च पदज्ञानजन्यार्थोपस्थितिविशिष्टशाब्दबोधेतादृ
शोपस्थितित्वेन पदज्ञानाजन्यार्थोपस्थितिविशिष्टशाब्दबोधे चतादृशोपस्थितित्वेन हेतुताए कापद
ज्ञानजन्यपावदर्थोपस्थितिघटितापराचतदजन्ययावदर्थोपस्थितिघटितशाब्दसामग्री द्विधा
पदज्ञानजन्ययत्किंचिदर्थोपस्थितितदजन्यार्थोपस्थितिघटिताचसामग्रीनास्त्येवेति केषांचिन्मतात्

केषांचिच्च प्रकारांतरेणोपस्थितौ न शाब्दबोध इत्याहुस्तदपि न पश्यत इत्यादौ कथं चेदनुमानादि
त एवञ्चेतोऽध्याधावतो स्यादितिबोध्यमिति नोहे द्वितीयसामग्रीकल्पने मानाभावात् तादृशबोधानंतरशा
ब्दयामीत्याद्यनुव्यवसायस्यासिद्धत्वादिति दिक्। ननु नानार्थकसैंधवादिपदस्य लेपनेकपदार्थलवण
तुरगादिनानार्थोपस्थितिस्तत्र सर्वेषामेव शाब्दबोधापत्तिराकांक्षाज्ञानादिघटितशाब्दबोधसामग्री
सत्वादिति चेन्न तात्पर्यनिर्णयस्यापि शाब्दबोधसामान्यहेतुत्वमापन्नार्यतात्पर्यनिर्णयस्तस्यैव शाब्दबो
धोदयनोक्तापत्त्यसंभवात् न च स्वरूपसत्तात्पर्यमेव शाब्दबोधे हेतुरस्त्विति वाच्यं तथा सति तात्प
र्याविषयस्य तात्पर्यभ्रमेण शाब्दबोधानुपपत्तेः नन्वेवमपि नानार्थकस्थले तात्पर्यनिर्णयहेतुत्वेऽपि
शाब्दसामान्ये तस्य हेतुत्वे मानाभाव इति चेदत्राहुः लवणादिशक्तेन नानार्थकसैंधवादिपदस्य लव
णादितात्पर्यज्ञानस्य हेतुत्वे कल्पनीये सैंधवादिपदजन्यलवणादिशाब्दत्वस्य कार्यतावच्छेदकत्वे गौर
वेण सैंधवादिपदजन्यलवणादिशाब्दत्वमेव कार्यतावच्छेदकं लाघवात् तत्स्थलेऽपपायाल्लिभ्रमेण वा

घटादिपदजन्यत्वस्यादिशाब्दबोधसाधारणत्वमिति तत्रापि तत्कारणत्वं निर्वक्तव्यं एवं यत्र शक्तिभ्रमे
ण सैंधवादिपदेन न घटादेर्योग्युपस्थापनं तत्र तेनैव घटादितात्पर्यज्ञानस्यापि कारणत्वे सिद्धे एवं लक्षणा
स्थले शक्तिलक्षणाभ्यां नानात्वलक्ष्यार्थयोरुपस्थितौ लक्ष्यार्थस्यैव शाब्दबोधो न तु शक्यार्थस्येति नियम
निर्वाहाय लक्षणयैव नानालक्ष्यार्थोपस्थितावेकस्यैव लक्ष्यार्थस्य शाब्दबोधनिर्वाहाय च तात्पर्य
निर्णयहेतुत्वमावश्यकमिति सर्वत्र शाब्दबोधे तस्य हेतुत्वसिद्धिरत एव तात्पर्यानुपपत्तिर्लक्षणाबीजम
मिति प्राचीनोक्तिः संगच्छते इति। तात्पर्यं च तत्प्रतीतीच्छयोच्चरितत्वमनुच्चरितत्वे च तात्पर्यत्वे मौनिश्लोकादि
साधारणं तत्र पदज्ञानानुकूललिप्यादिव्यापारमादाय तात्पर्यनिर्वाहः न च यत्र सैंधवपदाल्लवणप्रती
तिर्भवतु तुरगादिपदार्थस्य प्रतीतिर्भवत्विति समूहालम्बनेच्छया सैंधवपदमुच्चारितं तत्र द्विवृत्ते
र्वा तत्र सैंधवपदस्योभयतात्पर्यकत्वाद्युगपदुभयशाब्दबोधापत्तिर्दुर्वारेति वाच्यं। तदिच्छाविच्छि
न्नस्य जन्यत्वप्रकारकत्वेनेच्छाया विशेषणीयत्वात्। न च यत्रैकपुरुषस्यैव तदर्थप्रतीतिच्छायाय

स्यदमुच्चारितं तात्विकं वा तत्रान्यपुरुषस्यापि तदर्थशाब्दबोधापत्तिरिति वाच्यं तत्रान्यपुरुषस्य शा
ब्दबोधाभावे तात्पर्यस्य पुरुषभेदनियंत्रितत्वाभ्युपगमेनापत्त्यभावात्। न च शुकादिवाक्यात्कथं
शाब्दबोधस्तत्र तात्पर्याभावादिति वाच्यं। तत्र तात्पर्यभ्रमादेव शाब्दबोधात्। विशेषदर्शिनो तु पदार्थो
पस्थितिमूलकमानसबोध एवोत्पद्यते न तु शाब्दबोध इत्युपगमात्। न चैतत्पापि मूर्खपठ्यमानवे
दात्तशाब्दबोधानुपपत्तिः तत्र मूर्खस्य तज्ज्ञानाभावेन निरुक्ततात्पर्याभावादिति वाच्यं तत्र पदमूर्ख
पठ्यमानवेदस्वरोच्चरित्तवेदपौरभेदभ्रमेण निरुक्ततात्पर्यभ्रमसत्त्वाच्छाब्दबोधः। तादृशभ्रमा
सत्वे च वेदत्वसामान्यलक्षणयेश्वरोच्चरितवेदज्ञानादेव शाब्दबोध इत्यभ्युपगमात्। न कपिंज
लानालभेतस्यादौ च तुष्ट्यादौ प्रतीतौ छायायत्राधुनिकेन बकुवचनमुच्चारितं तत्र बकुवचनादे
श्च तुल्यादौ तात्पर्येण तस्य शाब्दबोधापत्तिरिति वाच्यं। वेदत्वेन ज्ञायमानवाक्यजन्यशाब्दबोधेन्या
यगम्यतात्पर्यनिर्णयस्य हेतुत्वोपगमात्। न्यायगम्यं तात्पर्यं च न च चतुष्ट्यादौ तस्याबेदपर्यवसानात्। न्या

यत्त्वलाघवज्ञानादिरूपः तत्र बहुवचनस्य सामान्यतो बहुत्वग्राहकप्रमाणेन बहुवचनस्य त्रित्वपर
त्वे लाघवमित्याकारकलाघवज्ञानसहकृतेन त्रित्वपरं त्वेपरिछिद्यते इति तच्च तात्पर्यग्राहकगम्यं कपिंजल
• चतुर्थ्याद्यालंभनस्यैवेदार्थत्वेऽधिकाणां त्रीणामधिककार्यकारणाभावस्य चैकत्वेनायोगौरवेण
त्रित्वपरत्वेलाघवनिर्वाहः । अपि च प्रागवोक्तेन नु सैंधवादिपदजन्यलवणाद्यर्थविषयकशाब्दबोधे
सैंधवादिपदधर्मिकलवणादितात्पर्यनिर्णयस्य हेतुत्वेऽपि घटादर्शनेलवणानयनादितात्पर्यस्यात्
घटं पश्यसैंधवमानयेत्यादिवाक्यात् । लवणदर्शनादिबाधापत्तिर्दैवोराल्लवणदर्शनाभावेऽपि योरेव
सैंधवादिपदतात्पर्यनिर्णयसत्त्वात् । न चैवं लवणदर्शनाद्योः परस्परमन्वयबोधे तदर्थकपदयोर
कवाक्यतापि माथविषयत्वरूपसमभिव्याहारज्ञानस्यापि हेतुतया तदभावान्नोक्तापत्तिरिति वाच्यम् ।
तादृशहेतुत्वे मानाभावात् । तादृशहेतुतामते पि लवणभक्षणतुरगानयनचेतासपकात्सैंधवंक
ल्वयतीत्यादिवाक्यात्तुणभक्षणलवणानयनाद्योरन्वयबोधस्य दुर्वारत्वात् अन्यनचैतत्प्राक्षिततदर्थ

शाब्दबोधे तदर्थान्वितत्वतदर्थतात्पर्यनिर्णयस्य हेतुत्वान्नोक्तदोष इति वाच्यं सत्यासत्ति एकपदार्थान्विता
परपदार्थस्य वाक्यार्थत्वापातात् तस्य शाब्दबोधात्पूर्वमप्रतीतावपि तात्पर्यनिर्णयस्यैवासंभवात् अथ
पदार्थत्वेन पदार्थद्वयविषयकस्य संबंधस्य पदसमभिव्याहृतापरपदार्थान्वितस्वार्थपरमित्याकारक
स्य सामान्यत एकपदार्थविशेषितान्यापरपदार्थमवगाहमानस्य संबंधपदं पदार्थान्तरान्वितं तुरगा
दिपरमित्याकारकस्य वा तात्पर्यनिर्णयस्य हेतुत्वोपगमान्न दोष इति चेन्न सैंधवं कल्पतीसादेस्तुर
गानयनान्वयबोधानुरोधेन तादृशतात्पर्यनिर्णयस्यावश्यकत्वापात्तद्बलेन तुरगभक्षणान्व
यबोधापत्तेर्दुर्वारत्वात् तुरगान्वयबोधस्येव तुरगस्य भक्षणान्वयबोधेपि तादृशतात्पर्यज्ञानस्य हे
तुत्वात् न च तुरगभक्षणान्वयबोधे कल्पितपदमितरपदार्थान्वितभक्षणपरमित्येतादृशतात्पर्यनि
र्णयस्याधिकस्य हेतुत्वान्न दोष इति वाच्यं लवणभक्षणान्वयबोधेपि तादृशतात्पर्यनिर्णयस्य हेतुत
यातदनुरोधेन तस्यावश्यकत्वापातहेतुतयोक्तापत्तिवारणसंभवादिति चेन्मैवं कर्मत्वादिविशेष

तानिरूपितत्वाधेयत्वादिसांसर्गिकविषयतानिरूपितलवणादिप्रकारताशालिशाब्दबोधे तादृशप्रकारता
शालीप्रतीतिर्भवति साकारकनिर्णयस्य हेतोरनुपगमेन तादृशज्ञानस्य विशिष्टपदार्थद्वयावगाहित्वे
ऽपि विषयतांशे एवं तत्तत्पदार्थप्रकारकतया एकपदार्थेऽपरपदार्थप्रकारकत्वेन चावगाहनेऽवगाहि
तया शाब्दबोधात्पूर्वं तत्संभवात् । केचित्तु तात्पर्यज्ञानेन हेतुः नानार्थस्थले तात्पर्यविषयस्यैव शाब्दबो
धनियमस्थल एकतत्पदार्थशाब्दबोधेऽन्यतत्पदार्थतात्पर्यज्ञानस्य प्रतिबंधकतयोपपादनीयः एवं
च लक्ष्यार्थतात्पर्यज्ञानदशायां मुख्यार्थस्य शाब्दबोधासंभवेन लक्षणावृत्तेः कल्पनमिति संगच्छते अत
एव तात्पर्यज्ञानविरहदशायां शाब्दबोधोदयेऽपि न क्षतिरित्याहुः तदसत् तात्पर्यज्ञानस्य प्रतिबंधकत्वे उ
भयत्र तत्सत्वे ज्ञानस्य प्रतिबंधकत्वे उभयत्र तत्सत्वेऽनुभवसिद्धस्योभयशाब्दबोधस्यानुपपत्ते एक
तात्पर्यज्ञानप्रतिबंधकतायामपरतात्पर्यज्ञानस्योत्तेजकत्वाभ्युपगमे तु एकत्र तात्पर्यज्ञानमपरपदा
र्थोपस्थितिं प्रत्येव प्रतिबंधकं एवं च नानार्थस्थले तात्पर्यविषयस्योपस्थितिकल्पनालाघवमुभयत्रैता

तात्पर्यग्रहस्थले च एकतात्पर्यग्रहेणाशेषस्यैवार्थस्योपस्थितस्य शाब्दबोध इत्याहुः । तदप्यसत् । यत्रैकप
दार्थोपस्थितिसमनंतरं तदुत्पत्तिकाले वा परपदार्थतात्पर्यज्ञानं तत्र तात्पर्याविषयस्यापि शाब्दबोधापत्तेः
लक्षणास्थले यत्र प्रथमत एव लक्ष्यार्थतात्पर्यज्ञानं तत्र शक्यार्थोपस्थितेरसत्वेन शक्यसंबंधात्मकल
क्षणाग्रहासंभवाच्च । अत्रेदं बोध्यं सैंधवमानयेत्यादौ लवणतुरगादिनानार्थे यत्र तात्पर्यग्रहस्तत्र
द्वितीयार्थे शाब्दबोधः प्राचीनमते आवृत्त्यैव सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति व्युत्पत्तेः ।
तदनंगीकर्तृनव्यमते चावृत्तिं विनैवैकदा नानार्थबोधस्तत्र मतद्वयस्याप्याशयभेदं वर्णयंत्य
भियुक्ताः तत्र प्राचामयमाशयः नानार्थप्रत्यायनेच्छया नानार्थादिशब्दविषयकैकानुसंधानेन नैकार्थ
प्रत्यायकत्वप्रकारिका वक्तुरिच्छा न संभवति सकृदुच्चरितेत्यादिनियमबलेनैतत्समानार्थकपदो
तरानुसंधानासमवहितस्यैकपदानुसंधानस्य नानात्वावबोधकत्वनिश्चयेन तत्र तादृशप्रत्यायक
त्वस्य बाधात्तन्नव्यतादृशनियमे मानाभावादिति वाच्यं । तथा सति एकपदानुसंधानेप्युपपन्ना नानार्थबो

धकत्वस्य दुर्वारत्वात् तत्र वाक्यभेदव्यवहारानुपपत्तेः वाक्यजन्यशाब्दबोधभेदस्यैव वाक्यभेदव्यवहा
रकप्रयोजकत्वात्। एवं चेच्छागर्भतात्पर्याभावान्न नानार्थकशब्दात् युगपदनेकार्थप्रतीतिः एकानुसंधा
नेत्तभावेणानेकार्थप्रत्यायनेच्छागर्भतुतात्पर्यमाहृत्यैकमोपन्ने नानार्थबाधेनापि चारितार्थ्यं भवतीति
तत्राहृस्यैवार्थोत्तरबोधः ननु सकृदुच्चरितः सादिनियमो न संभवति घटो घटा इत्यादावेकघटपदानु
संधानादप्यनेकघटादिबोधोदयेन व्यभिचारात्। परन्तु तत्रैकशेषणसरूपपदोत्तरलोपान्तप्रतिसंधा
नादेव नाना घटादिबोधः तथा च तत्र पदानुसंधाने समानार्थकपदानुसंधानासमवहितत्वस्य रूपवि
शेषणमेव नास्तीति नोक्तनियमे व्यभिचारः अत एवैकशेषानुशासनस्यापि सार्थकत्वं अन्यथा एके
नपदेनानेकघटादिबोधसंभवेनैकघटादिपदप्रयोगाप्रसक्त्या सरूपपदोत्तरलोपविधायकतदनु
शासनवैयर्थ्यापत्तेरिति तदसत्। एवमपि घटावानयेत्यादितः आनयनं कृत्यादेरेकेन आङ्पूर्वनीधातु
रूपपदेन बोधनेन व्यभिचारस्य दुर्वारत्वात्। न च प्रातिपदिकरूपपदमेतदभिप्रेत्य तथा नियमे न दोष इति

वाच्यं। तथा सति घटपटं चानयेत्यादौ एकेनापि क्रियापदेन नानानयनादिबोधनसंभवेन प्राचां तत्र वृत्ति
स्वीकारविरोधात्। अत एवैकपदानुसंधानेन नानावृत्तिविषयबोधकत्वे नियमस्वीकारे ऽपि न निर्वाहः
उक्तस्थले घटपटानयनयोरेकशक्त्येवोपस्थापनेन नानावृत्तिस्वीकारविरोधात्। न चानेकवाक्यार्थबोध
कत्वाभावनियमाभिप्रेतः घटं वानयेत्यादौ घटद्वयानयनरूपवाक्यार्थस्यैकात्। घटपटं चानये
त्यादौ घटानयनपटानयनादिरूपवाक्यार्थस्य भेदादावृत्तिस्वीकार इति वाच्यं। पदार्थभेदे तद्वृत्ति
वाक्यार्थभेदस्यावश्यकत्वे तथा घटौ वानयेत्यादौ वाक्यार्थैकस्यासंभवात्। न चैकपदानुसंधानजन्य
बोधे तदर्थविशेषणेकविषयत्वाकत्वाभावनियमः घटौ वानयेत्यादौ वाक्यजन्यबोधे च घटद्वयत्वा
वच्छिन्नघटद्वयादिविषयतातदानयनत्वावच्छिन्नानयनद्वयादिविषयताया भिन्नत्वेन घटपटं चा
नयेत्यादौ वाक्यजन्यसमूहालंबनबोधे घटानयनत्वपटानयनत्वादिविशिष्टधर्मावच्छिन्नविषयता
यावच्छेदकभेदाद्विषयताभेदेति न दोष इति वाच्यं। घटं वानयेत्यादिना वाक्यजन्यबोधे एकघटानयनविष

यतायाऽपरघटानयनविषयताभेदत्वान्नयने घटकर्मत्वे बाधिते तदानयननिष्ठविषयतायास्त्व
दानयनवृत्तितद्घटकर्मकत्वावच्छिन्नतद्घटनयननिष्ठविषयताभेदेन तद्बोधस्य तद्वृत्तिधर्मावच्छिन्न
तन्निष्ठविषयताकत्वेन भ्रमत्वप्रसंगात् तत्र विषयताभेदस्यावश्यकत्वात्तादृशनियमेपि व्यभिचा
रादिति चेन्नैवं एकपदानुसंधानजन्यबोधे एकविषयतानिरूपिततदर्थविषयताद्वयाभावनिय
मोपगमेऽनुपपत्त्यभावात् तद्घटवानयघटपटवानयेत्यादावानयभेदेन तद्विषयताभेदेपि नेत्थम्
यविषयतानिरूपिताऽऽनयनत्वस्य प्रकारतारूपविषयता एकैवोपेयते विषयभेदविरहात् तद्घटं पटं
चानयेति वाक्यान्न समूहालंबनबोधसंभवः घटानयने पटानयने मिलितसमूहालंबनबोधे तत्त
दानयनविषयतानिरूपितानयनत्वविषयताया अपि भेदात्समूहालंबनबोधस्य प्रत्येकज्ञानोत्पादक
सामग्रीसमुदायाधीनतया प्रत्येकज्ञानीयविषयताद्वयनियामकत्वे शाब्दे विषयताद्वयसंभवात्तत्रापि तत्त
त्वारस्या क्रमेणानेकार्थबोधस्वीकारः नन्वेवमेकशेषानुशासनमफलं घटावित्यादौ द्वित्वघटत्वाद्युपेके

कविशेषणीयैकैकविषयतानानिरूपितनानाघटादिविषयताशालिबोधस्यैकेनापि घटादिपदेनज-
ननेनसंभवादिति चेन्न तदनुशासनवैफल्यस्य दुर्वारत्वादिति। नवीनानां त्वयमाशयः बोधस्येच्छायां वि-
रोधित्वेमानाभावः विरोधित्वे वा तस्यैकेनापि घटादिपदेन जननसंभवादिति चेन्न तदनुशासन-
वैफल्यस्य दुर्वारत्वे न सार्वत्रिकत्वमिति एतत्पदविषयकमनुसंधानमेतत्पदस्यार्थद्वये बोधयतु एतत्पद-
मर्थद्वयविषयकैकबोधं जनयत्वितिसाकारिकानानार्थादिस्थलेद्वविषयकैकानुसंधानेनैकार्थमसा-
पकत्वप्रकारिकावक्तुरिच्छा घटवित्समवस्येव तद्धल्लानानार्थादिस्थले एकदा नैकार्थबोधो दुर्वारः नेच-
तादृश्येप्यसत्वेपि सकृदुच्चरितस्यादिति नियमभंगभयान्नोक्तबोधाभ्युपगमस्संभवतीति वाच्यं। साम-
ग्रीसत्वे नियमभंगस्याकिंचित्करत्वात्। किंच कस्यार्थस्य प्रथमं बोधः कस्य वा पश्चादित्यत्र विनिगम-
काभावेनावश्याकैकमिकबोधोपगमासंभवेनयुगपन्नानार्थबोधोपगम एव वा चितः नचैवं तत्रवा-
क्यभेदव्यवहारानुपपत्तिः वाक्यजन्यशाब्दबोधस्यैव वाक्यभेदप्रयोजकत्वादिति वाच्यं। नानार्थभेद-

स्यैववाक्यभेदप्रयोजकत्वात्। न चैवं सति एतन्मते तलं घटत्वपटत्वैसादावपि वाक्यभेदो न स्यात्तत्रप
टपदादिविशिष्टस्य तदुत्तलोद्बोधकार्यस्य मानात्। किं चैवं सति घटपटावानयेत्यादावपि वाक्यभेदापत्तिः
घटमानय पटं चेत्यादाविव तत्रापि घटानयनपटानयनरूपवाक्यार्थभेदात्। न चेष्टापत्तिरिति वाच्यं।
तथा सति एकवाक्ये घटकयोरेव पदयोस्समासप्रयोजकसामर्थ्यास्वीकारेण तत्र घटपदावितिघटप
टयोस्समासानुपपत्तेरिति तदसत्। अर्थनिष्ठस्वप्रयोज्यविषयतयोः साक्षात्परंपरासाधारणनिरूप्य
निरूपकभावविरहस्यैव वाक्यार्थभेदत्वात्। घटपटावानयेत्यादिवाक्यजन्यबोधीयानयनादिनि
ष्ठविषयतानामानयत्वादिनिष्ठप्रकारतानिरूपितत्वेन परंपरया निरूप्यनिरूपकभावः। घटमा
नय पटं चेत्यादिवाक्यजन्यसमूहालंबनबोधीयानयत्वादिप्रकारतायां विशेष्यताभेदेन भेदोप
गमात् निरूपितानानयनादिनिष्ठविषयतानां परंपरयापि निरूप्यनिरूपकभावविरह इत्यदो
षः। तथा च निरूप्यनिरूपकभावस्वरूपविषयताद्वयशालिबोधपरवाक्यैकवाक्यभेदः। जनतादृशो चैवाके

एकत्वमित्तिपर्यवसितं। नन्वेवं सहस्तुत्वरितनइत्तिनियमेमानाभावइतिवाच्यं इष्टापत्तेरितिदिक्
अत्र स्वस्यानस्यस्य पुनरनुसंधानमावृत्तिः निकटस्थस्यैकदेशानुसंधानमनुषंगः दूर
स्थस्यानुसंधानमनुवृत्तिः साच सिंहावलोकनमंडूकप्लुतिगंगाप्रवाहवदिति त्रिधा आरस्यानुषं
गानुवृत्तिसाधारणं च अकृतपदस्य पुनरनुसंधानं तु अकृतपदानुसंधानमध्याहार इति ध्येयं।
इत्थंच नवकृत्रभिप्रायघटिततात्पर्यस्य शाब्दबोधप्रयोजकत्वस्वीकृते वेदे वक्त्रभावेन तात्पर्य
निर्वाहायातींद्रियवेदार्थदर्शी वेदवक्ता सर्वज्ञः परमेश्वरोपि सिद्ध्यति जीवानामसर्वज्ञत्वात्
योगिनां सर्वज्ञत्वेपि योगादिविभुपदार्थकवेदमश्रुत्वा योगाभ्यासानुपपत्तेः सर्गादावयोगिनः
सर्वज्ञस्य योगवच्चकुरत्नरूपस्वीकारणीयत्वात्। अतएव वेदस्यापौरुषेयत्वमपि भारतादिवत्।
अत्र मीमांसकाः वक्त्रभिप्रायघटिततात्पर्यस्य शाब्दबोधप्रयोजकत्वेपि न तदनुरोधेनेश्वर
सिद्धिः अध्यापकतात्पर्येणैव तन्निर्वाहात् अध्यापकानामसर्वज्ञत्वेपि पूर्वपूर्वाध्यापकोच्चारण

त्तदीयमात्सर्यं सहस्रताद्दादेव तदर्थज्ञानं। न च मध्या। प्रलयेनाध्यापकपरंपराया विच्छेदात्सर्गादौ तात्पर्य
संभवेन्नश्वरस्वीकारआवश्यक इति वाच्यं। प्रलये मानाभावेनाध्यापकपरंपराया अविच्छेदात् तस्मा
न्वेदस्यापौरुषेयत्वमिति चेद् वेदस्यापौरुषेयत्वमेवेति वदंति तत्तदसत्। कालत्वकल्पान्तान्याद्वृत्तित्वेटस्मा
गभाव: कार्यद्रव्यानाधाराधार: अभावेऽवात्तदेकाशीरस्यभाववदित्यनुमानेनातीतप्रलयसिद्धे:
एवमेव घटध्वंसं पक्षीकृत्य स्वभाविप्रलयोऽपि साधनीय:। एवमेककालीनास्सर्वे परमाणव: कार्य
द्रव्यशून्या: आरंभकत्वात्। नष्टपवनारंभकपरमाणुवत् ब्रह्मांडं संततिरसंतेतद्विघ्वंसे संतति
त्वात् मदीयसंततिवदित्याद्यनुमानादपि तत्सिद्धि: संदेव सौम्येदमग्र आसीत् धाता यथापूर्वमक
ल्पयदित्यादया: श्रुतय: सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकां कल्पक्षये पुनस्तानि कल्पादौ
विसृजाम्यहमित्याद्या: स्मृतयोऽपि प्रलये मानं प्रकृतिमूलकारणत्वात् परमाणुरतोऽस्माकं सोख्यानामपि
वातिरिक्तप्रकृतस्य नैंगीकारेऽपि न क्षति:। एवं वेदस्यापौरुषेयत्वे तस्मात्तत्पक्षे तपानान्येवारो वेदो अना

सां·कौ
४२

येतत्कृचः सामानि जज्ञिरे इत्यादिश्रुतिविरोधश्चान्यश्रुतिराविर्भावपरेति वाच्यं। मुख्यत्वेबाध
काभावात्। तस्माद्वेदः पौरुषेय एव ननु किमिदं वेदत्वं पौरुषेयत्वे चेति चेदुच्यते मंत्रब्राह्मण
त्वमतरत्वेअतत एव मंत्रब्राह्मणयोर्वेदनामधेयमिति प्राचीनगाथा। मिमंत्रो हि त्रिविधो ऋक् यजुश्च
तत्र नियतवर्णपादाक्षरजनियतवर्णपदं यजुः यत्र ऋचां बाहुल्यं स ऋग्वेदः यत्र च यजुषां
बाहुल्यं स यजुर्वेदः ऋग्यजुषोर्विवक्षया गानप्राधान्येन सामवेदः त्रिगदायजुर्विज्ञेयः स्वि
लममलतपदेऋक् यजुर्वा एते मंत्रप्रपंचाः ब्राह्मणं तु विधिरर्थवादोनुवादश्च तत्र विधिश्चो
दनाअर्थवादः स्तुतिर्निंदापरकृतिः पुराकल्पश्चानुवादः सम्प्रयोजनं पुनर्वचनं एते ब्राह्म
णप्रपंचाः मंत्रब्राह्मणे च प्रत्येकमादौ कर्मकांडं शेषे ब्रह्मकांडं कर्मकांडस्य प्रवृत्तिलक्षणध
र्मतात्पर्यं ब्रह्मकांडस्य तु निवृत्तिलक्षणता इदं सर्वस्य सर्व एव शाखा इति सहस्रशाखस्यापि वेद
स्यापूर्वतात्पर्यं पौरुषेयत्वं च स्वतंत्रपुरुषप्रणीतत्वे तस्य सर्वसमानानुपूर्वीकवाक्यसमानजन्यत्व

प्रतिपाद्यवाक्यार्थज्ञानवज्जन्यजातीयत्वे भारतादौ अध्यापकप्रणीतत्वव्यवहारवारणाय जन्यो
त्पज्ञानविशेषणं प्रथमान्ते वेदभारतादौ वेदव्यासादिप्रणीतत्वव्यवहारनिर्वाहाय जातिघट
नमिति मणिकारानुयायिनो नव्यास्तु शब्दत्वादौपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रतीत्यविष
यार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानजन्यप्रमाणशब्दत्वं वेदत्वे अत्र शब्दत्वाद्युपजीव्य
प्रमाणं तदुभयभिन्नप्रमाणजन्यप्रमितिविषयार्थकं यत्तदन्यत्वे सतीति सत्यन्तार्थः । अस्ति वे
दलक्षणं स्वर्गकामो यजेतेत्यादि वेदे तदर्थस्य स्वर्गादिसाधनत्वविशिष्टयागादिरूपस्यान्यो
किकस्वर्गादिघटितत्वेन शब्दत्वादौपजीविप्रमाणातिरिक्तेन प्रत्यक्षप्रमाणादिना ऽग्रहणान्नाति
रिक्तप्रमाणविषयार्थकत्वं किंतु घटोऽस्तीत्यादिलौकिकवाक्यस्य च तदन्यत्वस्य एवं वेदलक्षणकव्याद
जन्यपदार्थज्ञानवेदार्थशब्दबोधरूपं तन्मन्यपस्मृतिपुराणादितदन्यप्रमाणशब्दत्वस्य च त
त्र सत्त्वेन लक्षणसमन्वयसंभवात् अत्र घटोऽस्तीत्यादिलौकिकवाक्यस्य दृष्टार्थकस्मृतिपुराणादिवा

केच्चातिप्रसंगवारणाय सत्यंतं निवेशः शाब्दोपजीविप्रमाणातिरिक्ते नवेदापासकशब्दप्रमाणेन
शाब्दभिन्न न च यागः स्वर्गसाधनं स्वर्गसाधनत्तावच्छेदकरूपवत्वादित्यनुमानादिना साध्याप्र
सिद्धिसंपादकशाब्दोपजीविप्रमाणेन वेदार्थस्य ग्रहणदर्शनेभव इति शाब्दप्रमाणभेदस्य शाब्दोप
जीविप्रमाणभेदस्य च सत्यंतार्थभेदप्रतियोगिकोटिप्रविष्टत्वमन्यत्वप्रतियोगिप्रमाणविशेषणत
या निवेशः न च पदज्ञानस्य शाब्दकरणतामते शब्दातिरिक्तत्वस्य प्रमाणे विशेषणत्वमप्यसंभवतात्
दवस्थमिति वाच्यं। तन्मते शाब्दपदस्य शाब्दज्ञानपरतया दोषात् अत्र शाब्दोपजीविप्रमाणत्वेश
ब्दप्रमाणप्रयोज्यप्रमितिकरणत्वेन तु शब्दप्रमाणप्रयोज्यत्वे सति प्रमितिकरणत्वं तथा सति च
क्षुरादेर्लिपिदर्शनादिजन्यादृष्टद्वारा शाब्दोपदानादिकर्तव्यताबोधकशाब्दप्रयोज्यत्वतदतिरिक्तत्वेना
व्यावर्तनानित्यस्य श्रवणादेरव्यावर्तनात् दुहितापकेन घटोऽस्तीत्यादिलौकिकवाक्यातिप्रसंगा
त्। अथ चक्षुरादेरदृष्टद्वारा शाब्दोपजीवित्वे चाक्षुषादिज्ञानस्यापि शाब्दप्रयोज्यत्वेनावश्यकतयाजन्य

मात्रस्यादृष्टाधीनतयाश्रावणप्रत्यक्षस्यापितत्वेन तत्तद्द्वारकशब्दाधीनादृष्टोपजीवितया प्रमाणमा
त्रमेव शब्दप्रयोज्यप्रमितिकरणमिति तदप्रमाणप्रसिद्धिरित्यदृष्टद्वारकत्वविशेषणस्योपजीवि
तायामवश्यंप्रवेशनीयतया प्रमितिकरणेपि शब्दोपजीवित्वविशेषणे सम्भवति चेन्न शब्दसह
कृतेनप्रत्यक्षमितिजन्यतेतत्वस्य शब्दोपजीविप्रमाणपदेन विवक्षणीयतयादृष्टद्वारकत्वविशे
षणं विनैवास्माकं निर्वाहात् न हि चक्षुरादेनाप्रत्यक्षादिजनने शब्दस्य सहकारिता चक्षुरादिस
त्वेतज्ञानकादृष्टजनके शब्दस्यावश्यकतया चक्षुरादेःप्रतित्स्यनुपपधायकतायांशब्दप्रतिर
काप्रयोज्यत्वात् वस्तुतस्तु स्वतःशब्दोपजीविभिन्नत्वप्रवेशे शब्दजन्यस्वर्गाद्युपस्थितिसहकृतेन
चक्षुरादिप्रमाणजन्यवेदार्थगोचरानयनीतभानमादायासंभवः प्रतिज्ञोपुरुषैव्यापिकाभयसिद्ध
त्वविशेषणोपादानेनोपनीतभानात्मकप्रमितिवारणेपि तानेमानेलिंगस्यानुमितिकरणतापत्त
योगाद्दोस्वर्गसाधनत्वाद्यनुमापकेलिंगस्यस्वतःशब्दानुपजीवकत्वेनसानेकरणतामतेप्यव्या

त्तिघटकपदार्थानां विशकलितानामुपस्थित्या विशेष्यविशेषणमित्यादिरीत्या परामर्षघटानुमिति
स्तदनुरोधेन व्याप्तिघटकाभावादिज्ञानस्य कारणताया उपगंतव्यत्तया तस्य च साध्याविषयक
त्वस्वतः शाब्दानुपजीवकत्वेन तज्जन्यत्वे तादृशगोचरानुमितिमादायासंभावोद्धारः प्रमारूप
फला द्वारा शाब्दोपजीवितात्लाभार्थकत्वे च च प्रथमप्रमाणपदसार्थकता शाब्दप्रामाण फलशाब्द
स्योपजीव्यत्वे विस्वस्य स्वासहकारितया न शाब्दप्रमाणे शाब्दस्य सहकारित्तेति शाब्दस्य सहका
रित्ते तिशाब्दस्य न निरुक्ते शाब्दोपजीवित्वमिति न प्रथमशाब्दपदवैयर्थ्यं। ननु चक्षुरादिना घटा
स्तित्वादिरूपलौकिकवाक्यार्थज्ञानजननेपि कुत्रचिद्विशेषणज्ञानद्वारा विशेषेण बोधकश
ब्दस्य सहकारितया चक्षुरादिरपि प्रापरा: फलद्वारा शाब्दोपजीवित्वमस्त्येवेति तादृशचक्षुरादि
मात्राटहितार्थकत्ते किकवांमेतिव्याप्तिरुद्धारः। न च घजन्यप्रमितिसामान्ये शाब्दप्रयोज्यत्व तत्वस्य
शाब्दोपजीवित्वेन विवक्षणान्नोक्तातिव्याप्तिरिति वाच्यं तथा सति मनः शरीरादिजन्यप्रमिते

सामान्यचाक्षुषप्रयोज्यत्वाभावेन मनःशरीरादौ नाशङ्क्यानुपपत्तिर्विप्रमाणत्वापात जन्यचाक्षुषप्रमितिविषया
केत्वादेरस्येत्यसंभवापत्तेः । अथ द्वितीयप्रमाणपदेनासाधारणप्रमाणस्य विवक्षणान्नायं दोषः चक्षु
रादौ निरुक्तशब्दोपनीतवृत्तिविरहेऽपि तज्जन्यचाक्षुषप्रमितिविषयार्थकत्वादेस्तत्र वेदार्थोपनीतलभानमा
दायनासंभवः असाधारणप्रमाणप्रयोज्यविषयतायाश्च यं विशेषणत्वोपगमात्तु ज्ञानलक्षणाया मा
नसः प्रत्यासत्तितयोपनीतत्वे दार्थे निष्ठचाक्षुषादिविषयताऽपि असाधारणप्रमाणम् । तच्चक्षुराद्य
प्रयोज्यत्वात् सामान्यलक्षणाया बहिरिन्द्रियप्रत्यासत्तित्वस्य जन्यज्ञानसमानविषयकत्वेन प्रमिते
विशेषणीयतया न सामान्यलक्षणाजन्यवेदार्थगोचरचाक्षुषादिप्रमामादाय संभवः । अत एव या
गादिरूपवेदार्थैकदेशस्य लौकिकप्रमाणागम्यत्वेऽपि न दोषः स्वर्गत्वाद्यप्रकारकस्य लौकिकप्रमा
णजन्ययागत्वादिप्रकारकबोधस्य स्वर्गसाधनं याग इत्यादिवेदजन्यबोधीयविषयतावच्छेदकत्वरूपतत्
समानविषयकत्वाभावात् याग इत्यादिज्ञानीययागादिविषयतायाः स्वर्गसाधनं याग इत्यादिज्ञा

नीयविषयतातोभेदात्तन्नच प्रमित्यविषयार्थकत्वमितस्य प्रमितिविषयान्यार्थकत्वमित्येवार्थः त
थाचालौकिकस्वर्गादिरूपार्थबाधकत्वेनैव वेदलक्षणगमेनासंभवइतिवाच्यं। स्वर्गादेरपिस्वर्गत्वादि
नानुमानादिरूपलौकिकप्रमाणगम्यत्वादितिचेन्न स्वर्गसाधनतानुमापकयागविशेषत्वादिरू
पलिंगास्यकानुमानजन्यगुणत्वाद्यनुमितेस्तत्कारणकप्रमितिसामान्यांतर्गतायाः शब्दाद्यजीवि
ताविरहेणतादृशानुमानग्राह्यार्थकतायावेदेसत्वाद्दसंभवस्य दुर्वारत्वादितिचेन्मैवं शब्दस्य ह
कारणत्वयेनस्वजन्यज्ञानसमानविषयकप्रमितिर्जन्यतेतदन्यप्रमाणगम्यार्थकंयत्वंतेगम्यत्व
निवेशेनोक्तदोषाभावात् गुणत्वाद्यनुमितेर्वेदजन्यज्ञानसमानविषयकताभावात्समानविषय त
कानुमित्यादेश्चोक्तानुमानादिनाजननेशब्दस्यसहकारितानियमाद्दुर्दस्य लेडुक्तानुमानादेः श
ब्दोपजीवित्वात्सत्तेः अत एव चक्षुरादिजन्यस्वदार्थगोचरानीतभानप्रमाद्यापिनासंभवस्तत्किंच
क्षुरादेरप्युक्तरीत्यावेदस्यस्वपदेनोपादानेशब्दोपजीवित्वात्सतेः नचायादृशाचक्षुरादिव्यक्त्यारोव

जन्यविशेषणज्ञानसहकारेणैव यादृशवाक्यार्थज्ञानं जनितं तादृशावच्छुराद्विमात्रगृहीतार्थकतादृशाद्
ष्टार्थकवाक्येतिव्याप्तिर्दुर्वारैवेति वाच्यं। तादृशवाक्यजनकवक्तृवाक्यार्थज्ञानस्यापि शब्दप्रयोज्यत्वेन
तस्याशब्दजन्यवाक्यार्थज्ञानेजन्यत्वदलाभावेनैवोक्तातिव्याप्त्यभावात् तच्छब्दजन्यपदस्य शब्दप्रयो
ज्यार्थकत्वपाप्रत्यक्षरूपवक्तृवाक्यार्थज्ञानस्य शब्दजन्यत्वेपि नाब्दोधीन विशेषणज्ञानेनजन्यत्वे
नशब्दप्रयोज्यत्वात्। चेन्नः शब्दापत्तरसादेशाब्दघटितवाक्यार्थबोधकवाक्ये वाक्यार्थप्रत्यक्षजन्ये
पेतद्दलाभावादेव नातिव्याप्तिः वक्तुः सत्वेनाभावात् तच्छब्दरूपविशेषणज्ञानं विना तादृशवाक्यार्थज्ञाना
संभवेन प्रमाणमात्रेण तादृशवाक्यार्थप्रमिति जनने तच्छब्दस्य सहकारितया तादृशवाक्यार्थशाब्दोपजी
व्यप्रमाणमात्रप्रयोज्यत्वेन तद्दलसत्वात्। परंतु शब्दजन्यवाक्यार्थज्ञानोपजीवित्वस्य शाब्दोपजीव्यत्वेन त
द्विलक्षणतादृशवाक्यानातिव्याप्तिः न चैत्रवाक्यादप्रमाणोज्ञात इत्यादिशब्दजन्यवाक्यार्थज्ञानघटि
तार्थकवाक्येतिव्याप्तिरिति वाच्यं। चैत्रवाक्यजन्यार्थबोधं विनापि जन्यत्वे चैत्रवाक्यजन्यत्वरूपसामान्यस्या

नात्तेन रूपेण चैत्रवाक्याजन्यबोधभ्रमेण तादृशवाक्यार्थज्ञानोत्पादेन तद्वारणादिति मिश्रैरुक्ते तन्न
चारुशाब्दजन्यवाक्यार्थज्ञानपर्यंतोपजीवितानि चैत्रश्चैतद्वाक्यार्थज्ञाने विनैव शाब्दजन्यतादृशवा
क्यार्थज्ञानोत्पादेन घटकविशेषकलितस्वर्गादिपदार्थोपस्थितितो वेदार्थगोचरानुमानेऽसंभवेनासंभ
वापत्तेः शाब्दजन्यवाक्यार्थज्ञाने त्वस्य शाब्दवृत्तिज्ञानजन्यज्ञानार्थकत्वेनासंभववारणेऽपि शाब्दत्वजा
तिविशिष्टघटितार्थकवाक्येऽतिव्याप्त्यईश्वरत्वात् तादृशवाक्यार्थज्ञाने शाब्दत्वजातिग्रहस्यापेक्षणी
यत्वपातादृशजातिमत्तः शाब्दवृत्तिज्ञानजन्यशाब्दबोधस्यैवज्ञानापेक्षानियमात् व्याप्तिविनाभू
त्वभूतभ्रमस्य ज्ञानेनेजातेरग्रहणात्तादृशपिस्वजन्यज्ञानसमानविषयकज्ञानजनकशाब्दज्ञान
जन्यज्ञानोपजीवितायाविवक्षणान्नोक्तदोषावकाशः शाब्दत्वजातिविशिष्टघटितस्याख्यातोपमय
इत्यादिवाक्यार्थस्यतादृशवाक्यजन्यज्ञानाविषयकज्ञानसमानविषयकज्ञानजनकोपद्येस्त्रीत्या
दिवाक्यजन्यशाब्दज्ञानमात्रे शाब्दत्वेनग्रहीतास्यिग्रहसंभवात्तादृशवाक्यार्थग्राहकप्रमाणस्यसमान

विषयकज्ञानजनकशब्दानुपजीवित्वात् समानविषयकत्वेन तद्विषयविषयकत्वेयेव तु तदीयविष-
यतावत्त्वं अतः स्वर्गकामो यजेतेत्यादिवाक्यजन्यबोधे यादृशी विषयता तद्विलक्षणविषयताशालि-
बोधजनक किंचिद्वाक्यापत्त्यापि तत्स्वर्गादिसाधनत्वबोधकानुमानग्राह्यत्वेपि नादृशवेदस्य नासं-
भवत्ति तदपि न सम्यक् शाब्दत्वविशिष्टघटितयादृशवाक्यार्थघटकयत्किंचिदर्थघटितार्थवाक्या-
र्थविषयकशाब्दबोधे शाब्दत्वेनाहो वैव तादृशवाक्यार्थज्ञानेनत्राप्तिव्याप्तेर्दुर्वारत्वात् अत्र शाब्द-
प्रयोज्यप्रमितिकरणभिन्नकरणकत्वेन शाब्दाप्रयोज्यप्रमितेरुपादाने विशेषेनेन नासिकास्य-
र्शवदनुचितमिति शब्दाप्रयुज्यत्वे नैव तादृशप्रमितिर्निवेश्या प्रयोजनत्वे जन्यव्यावर्तनमिति शाब्द-
बोधान्यत्वमपि विशेषणमुपादेयं अन्यथा वेदजन्यशाब्दप्रमितिमादाय असंभवापत्तेः अत एव दृष्ट-
घटकशब्द पदोपादाना विरोधः। जन्यसाधारणप्रमोत्पन्नत्वनिवेशात्तु शाब्दबोधान्यत्वं न दृष्टपदं नि-
वेशं प्रयोज्यत्वं साधारणमेवाभिमतं एतत्तल्लाभाय दृष्टघटकशब्दपदोपादानमिति वाच्यं तथा दोषपो

अत्वेन प्रमितेरुपादानेईश्वरप्रमितेरप्यजन्यत्वमात्रघात्वेनैवरार्थस्य तद्विषयतयोःसंभवः
जन्यत्वेन प्रमितेर्विशेषणे तु परमते जन्यत्वस्याव्यावर्तकत्वमात्रद्वित्व धर्मस्य गुरुतयाभावप्रति
योगितानवच्छेदकत्वेन तदवच्छिन्नप्रतियोगिताकत्वघटकभेदाप्रसिद्धिरिति वाच्यं शाब्द
प्रयोज्यत्वस्य शाब्दाभावाप्रयुक्तप्रागभावप्रतियोगितावच्छेदकस्य निवेशनीयतया तस्य च शाब्दाभावप्र
तियोगीश्वरज्ञानेऽभावत्वात् यद्वा उभयमतसिद्धत्वेन प्रमितिविशेषणं तच्च नैयायिकासिद्धशा
ब्दादिपदार्थान्तरप्रमितेर्व्यावर्तकमिति तद्घटितभेदप्रतियोगितावच्छेदकस्य न धर्मान्तरसमनियत
त्वं एवं च वेदार्थगोचरयोगजधर्मप्रमितेस्तन्मूलकोपनीतभानस्य च व्यावृत्तिः नच योगजधर्मा
धीनप्रमितेर्योगविष्णुपदेशाकशाब्दप्रयोज्यतयोभयमतसिद्धत्वविशेषणमंतरेणापि व्यावृत्तिः
सम्भवतीति वाच्यं जन्यमात्रस्यैवादृष्टजन्यतयादृष्टचप्रवर्तकविधिवाक्यापेक्षयाजन्यप्रमिति
मात्रस्यैव शाब्दप्रयोज्यत्वमित्यदृष्टाद्वारकोपनीतकतया एव निवेशनीयतया योगाधीनप्रमितेरप्य

विशेषणं विनाव्याप्त्यसंभवात् एवं स्वर्गादिपदार्थघटकदुःखासंभेदसुखादीनां विशेषंखण्डविषय
ताशालिज्ञानमूलकशाब्दमानसविशिष्टविषयकोपनीतभानं तादृशसाध्यप्रसिद्ध्यादिमूलकानुमि
तिश्चोभयवादिसिद्धत्वविशेषणेन व्यावर्त्तते प्रमेयत्वादिसामान्यलक्षणाजन्यवेदार्थगोचरप्रमि
तेरुभयसिद्धत्वविशेषणेन वारणेपि स्वजन्यज्ञानसमानाकारकत्वेप्रमितिविशेषणमुपादेयं अन्य
था यागादेर्विषयकलितदुःखासंभेदसुखादेश्च शब्दानुपजीविप्रमितिविषयत्वापत्तेः।
स्वजन्यज्ञानसमानाकारकत्वं च स्वजन्यज्ञानीयविषयितावत्त्वमेव एतस्य प्रमितिविशेषणत्वे च
स्वजन्यज्ञानसमानाकारशब्दानुपजीविप्रमितिकत्वमेव भेदप्रतियोगितावच्छेदकतया निवेश्यं
ने तु तादृशप्रमितिविषयबाधकत्वरूपतादृशप्रमितिविषयार्थकत्वपर्यन्तेन प्रयोजनाभावात्।
वेत्तत्तत्स्वजन्यज्ञानसमानाकारकत्वेन प्रमितिनिवेशेपि तु तादृशप्रमितिविषयार्थक
त्वं तादृशप्रमितिविषयबोधकत्वं तद्वत्तादृशप्रमितिनिरूपितविषयताशालिबोधजनकत्व

न्या॰कौ॰
४८

रूपं निवेश्यत्वं लौकिकार्थगोचरप्रमितेर्येन तद्वद् जन्यज्ञानीयविषयतावत्त्वरूपं तादृशज्ञानसमा
नाकारत्वं तच्छब्दस्य च च तादृशप्रमितिनिरूपितविषयताशालिबोधजनकत्वं प्रमितिवेदस्या
तत्पात्वेन सामंजस्यात् विशिष्टविषयकशाब्दादिज्ञाने विषकलितत्वप्रदार्थविषयतायाअप्र
माणिकत्वयालौकिकप्रमाणजन्यज्ञानीयसुखदुःखासंभेदादिनिरूपितविशिष्टत्वे विषयता
यावेदजन्यज्ञानेऽभावात् अन्यथा शाब्दानुपजीविप्रमितिशब्दजन्यज्ञानयोः समानाकारकत्व
स्यैव पुरीत्येन निवेशापह्नस्यानिस्तारात् तेन च स्वर्गकामोपजेनेत्यादिवेदवाक्येनापि तात्पर्यविषयप्र
णस्वर्गादिपदलक्षणोपस्थितौदनादिघटितौदनकामकार्यत्वविशिष्टपाकादिरूपलौकिक
प्रमाणग्राह्यार्थग्रहाद्देवपि शाब्दानुपजीविप्रमितिविषयार्थकाव्यत्वं दुर्घटमिति वाच्यं।
तादृशप्रमितिसमानाकारप्रतीतिपरत्वस्यैव निवेशनीयत्वतयात्तात्पर्यप्रमाधीनेबोधमादाया
नुपपत्तिविरहात् तादृशप्रमितिसमानाकारप्रतीतिपरत्वं च तादृशप्रमितेर्योविषयतातद्दृशि

इप्रवृत्तीति विषयकेष्टयोऽव्यभिचरितत्वं चेत्तन्न लौकिकवाक्यार्थविषयकसमूहालंबने वेदार्थबोधस्य चेदता
त्पर्यविषयत्वेऽपि न दोषः नन्वेवं निरुक्तात्पर्यकलौकिकवाक्ये ति व्याप्तिः प्रमाणशब्दत्वरूपविशेषदल
स्य सत्तात्पर्यकशब्दत्वरूपतया तद्विरहेणातिव्याप्तिविरहात् नन्वेवं निरुक्तात्पर्यके मत्स्योऽव्यभिचरित
वेदैनेप्याप्तिकनयेऽव्याप्तिः तादृशशब्दजातीयत्वस्य तत्समानानुपूर्वीकत्वरूपस्य विवक्षणे न तत्सं
ग्रहादव्याप्तिर्भावात् नन्वेवमलौकिकवेदार्थमात्रपरत्वात् स्तिकपदघटितमोदनकामः पचेतेत्यादि
वाक्यमादाय तादृशवाक्यसामान्येऽतिव्याप्तिरिति वाच्यं तस्य शब्दजन्यवाक्यार्थज्ञानजन्यत्तमा वेदसे
मानार्थकस्मृतिवद्धारणात् वेदसमानार्थकवेदविपरीतानुपूर्वीक ~~स्वरूपस्य~~ शुकादिवाक्यवारणाय
तिवेशानीयेनादृष्टजनकार्यपेन कर्मत्वविशेषणेनापि तद्धारणसंभवात् नन्वेवं तादृशनिवेशने
वेदार्थकास्मदादिवाक्येवारणसंभवेन सत्वेत्तदलंपर्यमिति वाच्यं दृष्टार्थकभारतपुराणान्तर्गत
दृष्टार्थकवाक्येवारकतया तस्य सार्थकत्वात् भारतादिघटकपन्नस्य विधि बोधितत्वेनादृष्टजनकतया

क्तविशेषणस्य तत्साधारण्येन तेन तद्वारणासंभवात् अथ दृष्टार्थके आयुर्वेदे व्याप्तिस्तत्र संसंतवि
रहादिति चेन्न तस्य मीमांसकैर्वेदत्वानभ्युपगमे नोभयमतसिद्धवेदस्यैव च लक्ष्यतया तत्रेव्या
प्तेनवकाशात् एवं दृष्टार्थकमंत्राणामपि लक्ष्यतानंगीकारान्न तत्रापि व्याप्तिराशंक्या विदसमा
नार्थकस्मृतिभारतादिवाक्ये तिव्याप्तिश्च शब्दजन्यत्वादिविशेषणदलेन वारणीया। तत्र शब्दजन्य
त्वे शब्दप्रयोज्यत्वे तेन वेदप्रयोज्यस्मृत्यादेः तद्वाक्यार्थज्ञानजन्यस्य स्मृत्यादेर्नातिव्याप्तिः जन्य
पौरुषेयोक्तदोषस्यापि वारणासंभवाच्च। यद्यपि न्यायमते जन्यवाक्यार्थज्ञानजन्यत्वनिवेशेन
वसामंजस्यं अस्मदादिपुरुषेश्वरितवेदस्यास्मदादिवाक्यार्थज्ञानजन्यत्वेपि जन्यज्ञानाजन्यश्वरो
च्चरितवेदजातीयत्वमादाय लक्षणसमन्वयात् शब्दहेतार्थप्रतीत्याप्यस्मदादेर्वेदोच्चारणसंभ
रु वात्संग्रहाय वाक्यार्थज्ञाने शब्दजन्यत्वनिवेशोपि तादृशवाक्यार्थज्ञानाजन्यजातीयत्वनिवेशस्या
वश्यकत्वात् तथापि मीमांसकमते ज्ञानजन्यत्वस्याव्यावर्तकतया जन्यवाक्यार्थज्ञानजन्यत्वस्या

भावप्रत्तियोगिताऽनवच्छेदकत्वेन तदवच्छिन्नभेदरूपस्य तादृशाबाध्यार्थज्ञानाजन्यत्वस्याप्रसिद्धिरिति ज्ञाने
शब्दजन्यत्वविशेषणं न च शाब्दजन्यत्वं यदि शाब्दप्रयोज्यत्वे तदाजन्यत्ववत्तदपि परमते ज्ञाने व्यावर्त्तकं
अदृष्टजनकप्रवृत्तिजनकविधिवाक्यस्य ज्ञानमात्रएव प्रयोजकत्वादिति वाच्यं। अदृष्टद्वारके शाब्द
प्रयोज्यत्वे तदाजन्यत्ववत्त्वस्य वत्तिवशानीयत्वात् शाब्दाप्रयोज्यत्वस्य शाब्दप्रयोज्यज्ञानमात्राजन्यत्वस्य
वाविशेषणत्वे ध्वंसरूपकालोपाधिद्वारा ईश्वरोच्चरितवेदपि शाब्दोत्तरस्य प्रयोजकत्वात् तत्का
लीनपुरुषांतरीयशाब्दप्रयोज्यज्ञानस्य कालोपाधिविधया जनकत्वात् तत्रासंभवरतिवा सोऽर्थज्ञाना
पादानत्तादृशज्ञानाजन्यत्वं च यथाश्रुते यद्यपि व्यावर्त्त्यसंभसाधव्यावर्त्त कं परम तेत्तेषां वर्ण
मात्रस्यैव नित्यतया बाध्यार्थज्ञानाजन्यत्वात् तत्याप्तितादृशज्ञानाजन्यत्वं तादृशज्ञानाजन्योच्चारणकत्वं
परमतेपि वाक्योच्चारणस्य कंठाद्यभिघातरूपस्य बाध्यार्थज्ञानजन्यतया स्मसासादिप्यारत्नेरुके विशेष
णासंभवात् न च तादृशोच्चारणकत्वं तादृशोच्चारणजन्यत्वं तादृशोच्चारणं व्यंग्यत्वं वा प्रथमे परमते

वेदऽसिद्धिः द्वितीये न्यायमते सदोषः तन्मते उच्चारणस्य शाब्दजनकस्य शाब्दव्यंजकत्वादिति वाच्यं।
न्यायमतेप्युच्चारणस्य व्यक्तिविशेषसंपादनेन व्यंजकतया तद्योग्यताया एव विवक्षितत्वात्। अथ चातत
दृशानां तज्जन्यत्वे तादृशज्ञानाप्रयोज्यानुपूर्वीकत्वे प्रयोज्यत्वे जन्यतावच्छेदकसाधारण्ये स्म साधानुपू
र्व्या न्यायमते तादृशवाक्यार्थज्ञानजन्यतावच्छेदकतया परमते च तज्ज न्यतयाप्तस योज्यत्वस
व्याहतमिति न स्मृतावतिप्रसंगः नचानुपूर्व्या अतिरिक्तपदार्थरूपाया न्यायमतेऽप्रसिद्धिः एकवर्णनि
ष्ठापरवर्णध्वंसकालीनत्वात्मककमरूपायाः परमते प्रसिद्धिः विशेष्यनिवेशासंभव इति वाच्यं। उभ
यानुगमकप्रसिद्धरूपस्यापि एकनिष्ठापरध्वंसकालीनत्वात्मकत्वशाब्दरत्तित्वोभयाभाववत्ता
दिरूपस्य कथं विनिवेचनसंभवेन तेन रूपेणैव द्विविधानुपूर्वीनिवेशात् यतु तादृशवाक्यार्थज्ञान
जन्यतयानैयायिकसिद्धभिन्नत्वविवक्षणान्न दोष इति तन्न जन्यज्ञानजन्यतयानैयायिकमतसि
द्धभिन्नत्वनिवेशनेनैवानतिप्रसंगे विशेषणांतरवैयर्थ्यात् नच विशेषणांतरपरित्यागे जन्यत्वस्य

ज्ञानेऽव्यावर्त्तकताप्रसंग इति विशेषणं तदुपादानमावश्यकमिति वाच्यं ज्ञानेऽजन्यत्वस्याव्यावर्त्तकत्वेपि
नैयायिकसिद्धज्ञानजन्यत्वप्रकारिकायामपि जन्यज्ञानजन्यत्वावच्छिन्नप्रकारकत्वासत्वेन तदव
च्छिन्नप्रकारकत्वासत्वेन तदवच्छिन्नप्रकारकनैयायिकसिद्धविषयत्वस्य लघुतदेकदेशासमानिय
तत्वासंभवेन तदवच्छिन्नप्रतियोगिताकभेदप्रसिद्ध्यसंभवात्। अथोक्तविशेषणेन वाक्यार्थज्ञाना
धीनेयदुच्चारणं तादृशस्मृत्यादिवारणेपि वाक्यार्थमिश्रलाघुनाश्चरन्यायेनैकेनविदुच्चरितस्मृत्यादा
वतिव्याप्तिः तादृशवाक्यार्थज्ञानाजन्याहत्यानुपूर्वीमत्वं तिवशेनऽसंभवः वेदवाक्यनिष्ठानुपूर्वीवि
शेषावच्छिन्नानां केषांचिदाद्यानां तादृशवाक्यार्थज्ञानाजन्यत्वेनतदानुपूर्वीणां तादृशवाक्यार्थ
ज्ञानाजन्यत्वानुपपत्तेरिति चेन्न तादृशानुपूर्वीमदादिव्यक्तेर्वाक्यार्थज्ञानाजन्यतात दानु
पूर्वीमत्वविवक्षया सामंजस्यात् मीमांसकमते वेदानुपूर्वीमदादिव्यक्तेरभावान्नैयायिकमते चादि
वेदव्यक्तीनां जन्यज्ञानाजन्यतया तस्याथानुपूर्वीणामेव तादृशपदेनोपादानसंभवात् वाक्यार्थज्ञान

अस्मत्त्वे च तज्जन्योच्चारणकत्वादिरूपं बोध्यमिति दिक् । पौरुषेयत्वे च सजातीयोच्चारणानपेक्षयोच्चरितजाती
यत्वं अत्र निष्कृष्टार्थेन विवक्षितः । तज्जातीयत्वं च न गर्भे भेदविवक्षितं तथा च सजातीयोच्चारणानपेक्षोच्चार
णजन्यवृत्ति जातिमत्त्वे पर्यवसितं यथाश्रुते इदानींतनास्मदादिवेदोच्चारणस्य जातीयोच्चारणापेक्षत्वे
न तादृशोच्चारणानपेक्षोच्चारणमाद्यवेदोच्चारणमेव तज्जन्यजातीयत्वस्याद्यवेदे । संभवेनाव्याप्त्याप
त्तेरिति दिगिति मिश्रास्तु । प्राञ्चस्तु पौरुषेयत्वानुमाने वेदत्वावच्छिन्नस्य न पक्षत्वं वेदस्यादौ हेतुगतत्वस्य उ
वैचेत्वात् किंतु स्वर्गकामो यजेतेत्यादिके विशेषस्यैव पक्षत्वेतावतैव पौरुषेयत्वेन सिद्धेः । न चैवं सर्ववेदक
र्तृत्वमीश्वरेण सिध्यतीति वाच्यं । तत्तद्वाक्यकर्तृकत्वानुमाने एककर्तृकत्वस्यैव तु लाघवेनापरता
पि कर्तृत्वे कल्पनया सर्वामुक्तकर्तृकत्वसिद्धौ ईश्वरस्य सकलवेदकर्तृत्वसिद्धेः । न च एककस्यापि च:
पक्षत्वे केगेतरेषु हेतौ संदिग्धव्यभिचारकत्वापत्तिरिति वाच्यं । क्षितिपक्षके ईश्वरसाधकसकर्तृक
त्वानुमाने अंकुरादिषु संदिग्धव्यभिचारकत्वापत्तेन च पक्षे पक्षसमे वा व्यभिचारो न दोषायेति न तत्र

सन्दिग्धव्यभिचारकत्वं दोष इति वाच्यं प्रवृत्तेऽपि तुल्यत्वात् तथा हि त्रैवर्णिकसाधारणाधर्मजनकाभावप्रति
योगिध्ययनत्वविषयत्वरूपेण वेदत्वेन सर्वेषां पक्षत्वमेवोक्तानुमाने वेदाध्ययनसामान्याभावस्य च पाप
जनकत्वेन तस्याः सामान्याभावव्यक्तेरेकस्याः प्रतियोगिकुक्षौ मात्रेऽध्ययनमतोऽनेन रूपेण सर्वकुक्षिसं
ग्रहः न च वेदत्वज्ञाने वेदाध्ययनाभावे पापजनकत्वबाधः वेदाध्ययनाभावे पापजनकत्वबोधे च वे
दत्वसाननिमित्तान्योन्याश्रय इति वाच्यं तत्र हि नैतादृशावेदत्वमादाय वेदाध्ययनाभावसामान्यप्रयोजके किंत्व
दृष्टजनकेश्वरवाक्यत्वरूपवेदत्वमादाय ईश्वरानङ्गीकर्तृमीमांसकमते नित्यानुपूर्वीकवाक्यत्वरूप
वेदत्वमादायेत्यन्योन्याश्रयाभावात् नैवं वेदत्वेन रूपेण वेदस्यैकपक्षत्वमित्यपि वाच्यं उक्तरूपेणाः
प्रसक्तसाधारण्येऽपि उभयमतसाधारण्याभावात् उभयमतसाधारणपक्षतावच्छेदकावच्छिन्नस्यैव वि
वादविषयत्वात् उभयमतसाधारणपक्षतावच्छेदकं विना तदवच्छिन्ने विप्रतिपत्तेरसंभवाच्च शेषं पत्व
वेदिसाकुः अन्ये तु वेदत्वेन परिभाषितत्वं अभियुक्तानां परिभाषाविशेषरूपसंकेतसंबंधेन वेदपदव

त्वपर्यवसितत्वेदत्वं अथवा खंडाद्याधि विशेषरूपं वा वेदत्वमुक्तानुमाने पक्षतावच्छेदकमिति वदंती
ति संक्षेपः अधिकं मस्मत्कृतेश्वरवादे द्रष्टव्यं न च वेदस्यापौरुषेयत्वे स्वयंभूरेष भगवान्वेदो गीतस्त्वया
पुरा शिवाद्या ऋषिपर्यंताः स्मर्तारोस्य न कारका इति स्मृतिविरोध इति वाच्यं श्रुतिस्मृत्योर्विरोधे श्रु
तिरेव गरीयसीति न्यायेन स्मृतिप्रतिपाद्यत्वस्यास्मदाद्यनुभूतजन्मत्वरूपत्वपाऽविरोधात्
न चैतथापि शब्दस्यानित्यतया वेदभारतादौ जन्यत्वघटितनिरुक्तपौरुषेयत्वं न संभवतीति वाच्यं।
उत्पन्नो गकारः विनष्टो गकार इत्यादिप्रतीत्या शब्दस्यानित्यत्वतया तत्समूहस्य वेदादेः सुतरामनित्य
त्वात्। अत्र मीमांसकाः लाघवात् ककारादयो वर्णा नित्या एकैका एव उत्पत्तिविनाशप्रत्ययस्त्वाग
नुपलब्ध्योपलभ्यमानत्वप्रागुपलब्धानुपलभ्यमानत्वरूपदोषाद्भ्रम एव। न च वर्णानां नित्यत्वे घ
टपदत्वादिकं दुर्वचं आनुपूर्व्यवहितोत्तरत्वस्यानित्यस्यऽसंभवादिति वाच्यं घस्य नानात्वेतरमव्यवधानेन
दसाने भवतीत्यभिप्रायविषयत्वसंबंधेन घवत्त्वस्यैव घटपदत्वात् तच्च काद्युच्चरिते च घटपदेऽपि

क्षकस्येश्वरस्य वाभिप्रायमादाय तत्संभवात्। अपि सर्वेषां ककारादीनामेकत्वे तारतारतरमंदमंदतरा
दिविलक्षणप्रत्ययानुपपत्तिः न चैकस्यामेव ककारादिव्यक्तौ तारत्वतारतरत्वमंदत्वमंदत्वमंदत
रत्वादिना नाधर्मस्वीकारान्नोक्तानुपपत्तिरिति वाच्यं। तारत्वादेस्तत्तव्यक्तिवृत्तित्वे जातित्वानुपपत्तेः
न चैवं सम्मतेऽपि तारत्वादेर्जातित्वमसिद्धं कत्वादिना संकरप्रसंगादिति वाच्यं। कत्वादिव्याप्यनानाता
रत्वादेरुपगमात्। न च तारत्वादिकं वा नानाकत्वादिकं वेत्यत्र विनिगमनाविरह इति वाच्यं। कत्वादि
नानात्वे तारमंदसाधारणककाराद्यनुगतप्रत्ययानुपपत्तेरिति चेन्न तारत्वादिः कत्वादिव्याप्यना
नाजातित्वे ककरादिसाधारणतारादाकारानुगतप्रत्ययानुपपत्तेः न च तत्तदसिद्धिः अनुभवायत्त
धात्। न च नानातारत्वादेः स्वाश्रयसजातीयसाक्षात्कारप्रतिबंधकतावच्छेदकशब्दवृत्तिजाति
त्वादिनानुगमात्तारादावनुगतप्रत्ययोपपत्तिरिति वाच्यं तादृशप्रतिबंधकतावच्छेदकत्वस्योप
पस्थितावपि तादृशानुगतप्रत्ययोत्पत्तेः एतस्यापि स्वस्वघटितत्वेनाननुगतत्वाच्च तस्मात्तारत्व

तारतरत्वादिकमनुगतत्वात्तादृशघवाच्यककारगकारादिसाधारणमखण्डोपाधिः तच्च सर्वमेक
स्यामेव ककारादिव्यक्तौ वर्त्तत इति न तादृशप्रत्ययानुपपत्तिः अथवा तारत्वे तारतरत्वादिकं वायुनि
ष्ठैव जातिः तच्च दोषविशेषवशात् शब्दनिष्ठतयाभासते तदर्पणनिष्ठतया मुखादिरिवात त्वापि तारा
द्युत्पत्तिनियमाय वायुनिष्ठवैलक्षण्यस्यावश्यकत्तया तस्यैव लाघवेन तारत्वतारतरत्वादिरू
पत्तया उचित्त्वात् न च तस्य वायुधर्मत्वे श्रोत्रेन्द्रियेण कथं तद्ग्रहः कर्णशष्कुल्यवच्छिन्नस्य गगनस्यो
पनीतत्तस्य श्रोत्रेण भानाभ्युपगमे तारत्वे स्पर्शामी स्सनुव्यवसायापत्तिः तारत्वं स्पर्शाणामी स्सनु[illegible] व्यव
सायानुपपत्तिश्चेति वाच्यं वायुनिष्ठधर्मोत्तरस्य श्रोत्रायोग्यत्वेपि तारत्वादेस्तद्योग्यत्व[illegible] स्वीका
रात् योग्यतायाः फलबलकल्प्यत्वात् तस्य श्रोत्रेण वायुनिष्ठतारत्वादिप्रत्यक्षाभ्युपगमे श्रोत्रसंयु
क्तसमवायेऽतिरिक्तप्रत्यासत्तित्वकल्पनापत्तिरिति वाच्यं अप्रत्यासन्नस्यैव तारत्वादेः श्रोत्रेण ग्र
हात् वक्ष्यमाणक्रमेण विलक्षणवायुसंयोगस्य तारत्वादिव्यंजकत्तयैवातिप्रसंगविरहात् न नु तथापि

कारगकारादौ नो नित्यत्वे ककाराद्यकसाक्षात्कारदशायां गकारादिसर्वशब्दसाक्षात्कारापत्तेः सर्वेषामे
वशब्दानां सर्वदाकर्णशष्कुल्यवच्छेदेन सत्वादिति चेन्न। न्यायनये वर्णानां प्रतिनियतजन्यजन्यत्वाभ्युगमेन
ककारादुत्पादकविलक्षणवायुसंयोगस्यैवास्मन्मते वर्णानां प्रतिनियतजन्यजनकत्वाभ्युपगमेन ककाा
रादिसाक्षात्कारजनकतयातद्विरहादेव युगपदेव सर्वशब्दोपलब्धसंभवात् नु केनचप्रमेघातस्य तत्वि
लक्षणवायुत्क्रियासंपादकत्वोपायपुज्यते। नन्वन्यायेनयेपत्रावच्छेदकतासंबंधेन ककाराद्युत्पत्ति
स्तत्रसमवायसंबंधेन विलक्षणवायुसंयोगस्तिसामानाधिकरण्यप्रत्यासत्त्या वायुसंयोगानां ककारा
दिहेतुत्वमतो न कर्णान्तरे ककाराद्युत्पत्तिः तत्पुरुषीयशब्दे लौकिकसाक्षात्कारं प्रति तत्पुरुषीयकर्ण
वच्छिन्नत्वाश्च समवायस्यावच्छिन्नता संबंधेन तत्पुरुषीयकर्णस्य वा विषयनिष्ठतया हेतुत्वमतो न
तत्पुरुषीयकर्णवच्छेदेतास्यत्रचास्यपुरुषान्तरेण ग्रहणं भवन्मते चेत्तत्तद्विलक्षणवायुसंयोगानां कका
रादिसाक्षात्कारं प्रतिकयाप्रत्यासत्त्या हेतुत्वं अन्यवहितत्त्वपूर्ववर्तितामात्रेण हेतुत्वे युगपत्सर्वशब्दोपल

ध्येतुर्वैरित्वात् सर्वदैवावश्यं यत्किंचित्कर्णावच्छेदेन तत्तद्विलक्षणवायुसंयोगसत्वात् कर्णस्य ज्ञाना
नवच्छेदकत्वात् तथा यत्कर्णावच्छेदेन ककारादिसाक्षात्कारस्तत्र विलक्षणवायुसंयोग इति क्रमेण हेतुत्वा
संभवात्। न च स्वीयकर्णावच्छिन्नविलक्षणवायुसंयोगस्य फलबलकल्प्यतया ककारादिसाक्षात्कार
दशायामेव तस्यात्मनि सत्वान्नातिप्रसंग इति वाच्यं। आत्मनो विभुत्वादेकस्य पुरुषस्य कर्णावच्छेदेन
विलक्षणवायोः संयोगदशायां सर्वेषामेव पुरुषाणामात्मनि तदवच्छेदेन विलक्षणवायोः संयोगस्या
वश्यकत्वेनातिप्रसंगतादवस्थ्यात् न हि संयोगनिष्ठवैलक्षण्यं जनकतावच्छेदकं कर्मजन्यतावच्छेदक
संयोगजन्यतावच्छेदकजात्योर्नानात्वापत्तेः। अपि तु वायुनिष्ठमेवेति चेन्न ममापि तत्तद्वायुसंयोगा
नां शरीरनिष्ठतया ककारादिसाक्षात्कारहेतुत्वात् न चैवं हस्तावच्छेदेन विलक्षणवायोः संयो
गस्य सत्वेपि ककारादिसाक्षात्कारापत्तिरिति वाच्यं कर्णावच्छिन्नविलक्षणवायुसंयोगत्वेन हेतुत्वा
त्पुरुषांतरीयकर्णो न पुरुषांतरीयशरीरनिष्ठसंयोगावच्छेदकः विलक्षणवायुसंयोगस्य फल

कल्प्यत्तया ककारादिसाक्षात्कारदशायामेव तस्य शरीरे सत्वेन हस्ताद्यवच्छिन्नसंयोगस्य हेतुत्वेपि क्षतिवि
रहाच्च । इत्थं च श्रोत्रसमवायादेरपि न प्रसारसक्तिस्तत्तद्विलक्षणवायुसंयोगानां श्रवणे ककारस्यावश्य
कल्पत्वेनैवानतिप्रसंगात् । न च तथापि न्याये तेषां विलक्षणवायुसंयोगानां ककारादिकमेव समवायेन का
र्यतावच्छेदकं भवन्विति चेत् ककारादिविषयकसाक्षात्कारत्वमित्ति महागौरवं स्याद्यनयेऽनेन ककारादि
कल्पने तत्सुखीय शब्दसाक्षात्कारे प्रति तत्सुखी यच्छ्रोत्रसमवायादेर्हेतुत्वकल्पनं च फलमुख
मिति वाच्यं । व्यक्तिकल्पनास्य लोफलमुखगौरवस्यापि दोषत्वात्त्वमापि लौकिकविषयतासंबंधेन
ककारादिव्यक्तेरैकैकत्तया ककारादिकत्वावार विशेषाच्च । न च तथापि लौकिकविषयत्वस्य स्व
रूपसंबंधात्मकस्याननुगतत्तया कार्यतावच्छेदकतानियामकसंबंधत्वे गौरवमिति वाच्यं । समवा
यवत्त् लौकिकविषयत्वस्याप्येकत्वात् तत्त्वापि समवायस्यैकत्वेन समवायसंबंधावच्छिन्नाधारत्वस्ये
वप्रतिव्यक्तिभिन्नतया स्वरूपसंबंधात्मकस्य कार्यतावच्छेदकतानियामकसंबंधत्वेनाननुगम

गौरवस्य सत्वाच्च न चैतथापि तत्तकत्वादिरूपेण कादिव्यक्तेरवच्छेदिकाभावे न येन तु स्वरूपकांतेः
त्वादिव्यक्तिरिति लाघवमिति वाच्यं ममापि स्वरूपतः कादिव्यक्तेरवच्छेदकत्वात् । न च ज्ञासमितिरिक्त
पदार्थस्य किंचिद्धर्मप्रकारेणैव भानमिति कथं कादिव्यक्तेः स्वरूपतोवच्छेदकत्वमिति वाच्यं कादि
व्यक्तेः स्वरूपतोवच्छेदकत्वेपि कार्यकारणभावग्रहे कत्वादिरूपेण भानात् नहि ज्ञासतिरिक्तपदा
र्थस्य किंचिद्रूपेण भानवत् किंचिद्रूपेणावच्छेदकत्वमित्यपि नियमोस्ति मानाभावात् । अपत्तथा
पित्तवल्लौकिककविषयतयाकव्यक्तेरवावच्छेदिका लौकिककविषयतयाकत्वं वेत्यत्र विनिगमका
भावात् कार्यकारणभावद्वयापत्तिः न च कत्वस्यावच्छेदकत्वेपि विलक्षणवायुसंयोगाभावद
शायां कत्वसाक्षात्कारसाक्षात्कारापत्त्या कारव्यक्तेरवच्छेदकत्वावश्यकत्वमेव विनिगमकमिति वा
च्यं एवं सति विलक्षणवायुसंयोगाभावदशायां कत्वसाक्षात्कारात् कत्वापेक्षत्वस्यावच्छेदकत्वावश्य
कत्वादिति चेन्न ककाराविषयककत्वसाक्षात्कारस्यालीकतया कत्वसाक्षात्कारसामग्रीविरहादेव

तदानीं कत्वसाक्षात्कारासंभवेन कत्वस्यानवच्छेदकत्वात् कोलाहलस्थले कत्वविषयकस्यापि
साक्षात्कारस्यासत्वेन कव्यक्तेरवच्छेदकत्वस्य चावश्यकत्वादिति चेदत्र वदन्ति तदसत्त्वे वर्णानां प्रतिनिय
तव्यंजकव्यंग्यतैकावच्छेदेन समानदेशत्वे सति समानेंद्रियग्राह्यत्वात् घटे कत्वपरिमाणवदि
त्यनुमानेन वर्णानां प्रतिनियतव्यंजकव्यंग्यत्वाभावसिद्धौ ककारगकारादीनां नित्यत्वे ककाराद्य
कसाक्षात्कारदशायां गकारादिसर्ववर्णस्वसाक्षात्कारापत्तेर्भ्रमेणापि दुरुद्धरत्वात् तदनुवर्णानां प्रति
नियतव्यंजकव्यंग्यतैकावच्छेदेन समानदेशत्वे सति समानेंद्रियग्राह्यत्वात् घटे कत्वपरिमाण
वदित्यत्र किं नाम प्रतिनियतव्यंजकव्यंग्यत्वेन तावत्तद्विषयकसाक्षात्कारजनकजन्यसाक्षात्का
रविषयत्वं तथा सति तथाविधविषयत्वाभावस्य प्रकृते साध्यतायां घटे कत्वघटत्वैकप्रत्यक्ष
विषयकसाक्षात्काराजनकं यत्तद्वेकत्वविषयकसाक्षात्कारजनकं एकत्वविषयकतज्ज्ञानतज्जन्य
साक्षात्कारविषयत्वस्य सत्त्वेन तथाविधसाध्यासत्वाद्व्यभिचार इति चेन्न। स्वविषयकसाक्षात्काराज

नकजन्यसाक्षात्कारविषयत्वत्तत्केत्वे सति तद्विषयकसाक्षात्काराजनकजन्यसाक्षात्कारविषयीभूत
यपत्स्वत्तद्भिन्नत्वस्य प्रकृतानुमाने साध्यत्वेनानुपपत्त्यभावात् । स्वपदं भेदप्रतियोगिपरं तथा च यत्त्रा
एकावच्छेदेन यत्समानदेशत्वे सति तद्ग्राहकेन्द्रियग्राह्यं भवति तत्तत्स्वविषयकसाक्षात्काराजनक
जन्यसाक्षात्कारविषयत्त्वत्वे सति तद्विषयकसाक्षात्काराजनकजन्यसाक्षात्कारविषयीभूतं
यपत्स्वत्तद्भेदकूटवद्भवतीति सामान्यमुखी व्याप्तिः अनुमानप्रयोगस्तु खकारविषयकसाक्षा
त्काराजनकजन्यसाक्षात्कारविषयीभूतं यपत्स्वत्तद्भेदकूटवत् एकावच्छेदेन खसमानदेशत्वे स
ति खग्राहकेन्द्रियग्राह्यत्वात् घटे रूपपरिमाणवदित्यादिक्रमेण बोध्यः अत्राजनकत्वे फलानुपधा
नरूपं ग्राह्यं अतः खकारविषयकसाक्षात्काराजनकवायुसंयोगस्य ककारविषयकसाक्षात्कार
स्वरूपयोग्यत्वेऽपि न मीमांसकेन प्रसिद्धसाधनावकाशः तत्र कपं तन्न यतस्तथाविधस्वरूपयोग्य
त्वमिति तु नाशंकनीयं पाकदावित्त्व विजातीयवायुसंयोगाभावात् ककारखकारविषयकसमूहालम्बनज

नेन तत्र तथाविधस्वरूपयोग्यत्वसंभवात् एवं च नैयायिकेन यद्बाधवारणाय स्वविषयकसाक्षा
त्कारविषयत्वस्य पक्षतावच्छेदककोटौ निवेशः अन्यथा एकैकमात्रविषयकसाक्षात्कारजनकस्य ए
कैकमात्रविषयकसाक्षात्काररूपफलानुपधायकतया बाधवारणस्यासंभवात्। न चैवं सत्यपि उ
पदर्शितसामान्यव्याप्तौ घटत्वैकपक्षमादाय निरुक्तहेतुशालिनि घटैकत्वे व्यभिचारः तन्नैक
त्रविषयकसाक्षात्कारानुपधायकीभूतं यत्तत् एकत्वग्रहप्रतिबंधकदोषादिकालीनएकरूपफलाज्ञा
नरूपकारणं तज्जन्यसाक्षात्कारविषयत्वस्य एकरूपत्वे सत्त्वेन एकरूपत्वग्रहप्रतिबंधकदोषादिस
मवधानकालीनं यत् एकत्वसमानरूपकारणं तज्जन्यसाक्षात्कारविषयत्वस्य एकत्वे सत्त्वेन च निरुक्तसा
ध्यासत्त्वादिति वाच्यं। तत्तत्साक्षात्कारजनके तत्साक्षात्कारानुपधायकं यत्तद्विषयकसाक्षा प्रतिबं
धकासमवहितत्वस्यापि निवेशनीयत्वादिति तथा च यत्र एकावच्छेदेन यत्समानदेशत्वे सति यद्ग्राहके
द्विषयत्वं तत्त्वाविषयकसाक्षात्कारानुपधायकं यत्तत् तद्विषयकसाक्षात्कारप्रतिबंधकासमवहित

कारणतन्निष्ठफलोपधायकतानिरूपकसाक्षात्कारविषयतत्केत्वे सति तद्विषयकसाक्षात्कारानु
पधायके यत्तत्तद्विषयकसाक्षात्कारप्रतिबंधकासमवहितकारणतन्निष्ठफलोपधायकतानिरू
पकसाक्षात्कारविषयोश्वतेयघस्वं तत्तद्रूपकूटत्वरूपवत्तीतिसामान्यमुखव्याप्तिनिष्कर्षः अत्र तत्पावि
धकारणनिष्ठफलोपधायकतानिरूपकत्वनिवेशात् घटरूपैकपाकादिसाक्षात्कारानुपधायके
यद्दितरकारणासमवहितात्ममनःसंयोगादिकं तदीयत्वरूपयोग्यतामादायतत्पावित्थैकरूपका
दौनितत्कारस्पराव्यंजकव्यंग्यत्वसत्त्वेपि न क्षतिः विभिन्नकालीनपाकजैकघटवृत्तिगंधद्वये एक
गंधविषयकसाक्षात्कारानुपधायकापरगंधजन्यसाक्षात्कारविषये व्यभिचारवारणायैकावच्छे
दनेतिः स्वावच्छेदककालानवच्छिन्नतत्कारणघस्वं तत्तद्रूपकूटत्वतात्पर्यकं नातः परन्तु येशावस्पव्याप्य
वृत्तित्वेपि हेतुः स्वरूपासिद्धः केचित्तु व्याप्यवृत्तेरपि प्रतीतिबलात् कालावच्छेदकत्वाभ्युपगमे सति
विरहात् एकावच्छेदेनैस्य एककालावच्छिन्नत्वे सतीति पर्याप्तार्थ एव समीचीन इत्याहुः एवं च वि

भिन्नसंस्थानविशेषणंयोगोत्वाश्वत्वयोर्व्यभिचारवारणाय समानदेशत्वे सतीति विशेषणं समा
ननियताधिकरणत्वार्थकं नातः एककालावच्छिन्नयोरेकरूपेन प्रतियोगिकशाखासंयोगवृक्षसंयो
गयोः श्येन रूपैकदेशवृत्तित्वेपि व्यभिचारः नचैवमपि एककालावच्छिन्नरूपेन चरणद्वयावच्छिन्न
रूपेन वृक्षसंयोगयोर्व्यभिचारः तन्नपरस्परविषयकसाक्षात्काराजनकपरस्परावच्छेदकावच्छि
न्नसंनिकर्षजन्यसाक्षात्कारविषयत्वेन निरूक्तसाध्यासत्त्वादिति वाच्यं विभिन्नदेशानवच्छिन्नत्व
स्यापि निवेशनीयत्वात् । नचैवं संप्रति समनियताधिकरणतार्थकं समानदेशत्वे विशेषणं व्यर्थं उप
दर्शितरूपेन प्रतियोगिकशाखावृक्षसंयोगयोः शाखाद्यवयववृक्षाद्यवयवरूपपरस्परविभिन्नाव
च्छेदकावच्छिन्नत्वेन तथाविधानवच्छिन्नत्वेन तथाविधानवच्छिन्नत्वविशेषणेनैव वारणसंभ
वादिति वाच्यं । एवमपि घटावधिकघटकुम्भवृत्तिद्विपृथक्त्वपटावधिकघटकुम्भवृत्तिद्विपृथक्त्वयोरे
ककालावच्छिन्नयोः स्वत्वावधिस्थानव्यंग्ययोर्व्यभिचारवारणाय तदुपादानस्यावश्यकत्वात् । नचैवप

स्पधरमिश्रदत्तेपदर्शितस्यलव्यावृत्तिविरोधः तावत्ताक्षात्तेरभावात्। तद्रूपस्यापलक्षणपरत्वा
द्वा अत्रविभिन्नदेशानवच्छिन्नत्वं स्वभिन्नदेशावच्छिन्नत्वाभयसंबंधावच्छिन्नप्रतियोगिताकयत्किंचि
द्देशाभाववत्वं अतोनविभिन्नदेशानवच्छिन्नत्वस्य दुर्वचत्वापत्तिरिति। अत्रपक्षतावच्छेदकसामा
नाधिकरण्येनैवसाध्यसिद्धेःरूदेहेरपत्वा नचैवायिकनयेविभिन्नदेशावच्छिन्नत्वकारविषयकसा
क्षात्कारविषयककारहोत्ताभोगासिद्धिः तन्मतेसमानदेशावच्छिन्नतयाविधवर्णद्वयमादायैवपक्षे
हेतुमत्त्वसंभवादिति। एककालावच्छिन्नयोःकिंचिद्देशानवच्छिन्नयोरेकघटवृत्तिरसगंधयोर्व्य
भिचारवारणायसमनिंद्रिययोग्यत्वादितितद्ग्राहकेंद्रियजन्यलौकिकसाक्षात्कारविषयत्वादित्यर्थः
नात्तस्तुरुषीयापेक्षाबुद्धिजन्यद्वित्वप्रत्यक्षंप्रतितत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वप्रत्यक्षंप्रति
तत्पुरुषीयापेक्षाबुद्धेर्हेतुत्वेपिक्षतिः नचैवमपिस्वस्यावच्छिन्नत्वानव्योगयोर्घटत्वस्यैकरूपकही
घत्वयोर्व्यभिचारइतिवाच्यं हस्तत्वविततत्वादिरूपदीर्घत्वव्याप्यजातिपुरस्कारेणदीर्घत्व

गृहेः वधित्वानस्येहेतुपादौ धर्मत्वरूपेण दीर्घत्वेग्रहेश्च वधितानस्येहेतुत्वानस्युपगमेनानुपपत्त्यभा
वादिति। अथ वर्णाः प्रतिनियतव्यंजकव्यंग्याः स्वग्राहकेंद्रियाग्राह्यत्वेलौकिकसाक्षात्कारविषयत्वतदा
श्रयकत्वात् घटरसगंधवदिति सत्प्रतिपक्षसत्वान्नोक्तरीत्यावर्णानां प्रतिनियतव्यंजकव्यंग्यत्वा
भावसिद्धिः संभवति पूर्वोपदर्शितसाध्यस्यमतेयोग्यवात्रसाध्यपक्षोपि पूर्वोक्तवदेवं तेन नासत्प्रति
पक्षानुपपत्तिरितिचेन्नसमहत्वालेव नसाक्षात्कारविषययोगंधयोर्व्यभिचारेण सत्प्रतिपक्षास
भवात्। वस्कातेस्क वर्णानामुक्तरीत्यानित्यत्वे घटादिनामपि नित्यत्वापत्तिः तत्रापि एकजातीया
नां सर्वेषां घटानामेकत्वस्य नित्यत्वस्य च लाघवेन वक्तुं शक्यत्वात् तत्तद्वयवसंयोगादिरूप
प्रति नियतव्यंजकव्यंग्यत्वस्य तत्राभ्युपगमेनैकघटादिसाक्षात्कारदशायां नसकलघटादि
साक्षात्कारापत्तिर्नैवासर्वदोपलंभापत्तिः उत्पादादिमत्वप्रत्यभिज्ञाव्यवस्थेल इव त्रमत्वस्य सुव
चेन्नातत्त्रापातनाशत्वेनतत्संभवेतन्नाशत्वेनकार्यकारणभावात्तकपालनाशेनघटनाशस्य

उपारत्तया घटस्य नित्यत्वासंभवाः। न च जन्यत्वादिनाशवारणाय स्वप्रतियोगिजन्यत्वस्य नाशकत्ता
वच्छेदकसंबंधेन तया घटादेर्नित्यत्वे स्वप्रतियोगिजन्यत्वविरहादेव न नाश इति वाच्यं। लाघवात्
स्वप्रतियोगिसमवेतत्वस्यैव नाशकत्तावच्छेदकसंबंधत्वात्। अनंतघटादिकल्पनागौरवं
स्य च फलमुखत्वेनादोषत्वात्। संसर्गेन ध्वंसत्वेन नाश्यनाशकभावांतरादेव जन्यत्वादेरपि विनाशापत्
त्तेः। अनंतत्वस्थले स्वप्रतियोगिजन्यत्वस्य नाशकत्तावच्छेदकसंबंधत्वकल्पनामपेक्ष्यातिरत्नेक
नाश्यनाशकभावकल्पनायां पुंस्त्वे चात्यादिति चेन्न। व्यक्तिकल्पनास्थले फलमुखगौरवस्यापि
दोषत्वात् तुल्ययुक्त्या कपालिकादेरपि नित्यत्वस्य सुवचत्वापातात्। तन्नासेन घटादिनाशापत्त्य
संभवाच्च। किं चैवमपि सुखादीनां नित्यत्वैकत्वयोरापत्तिर्दुर्वारा तत्समवायिनोऽपि नित्यत्वयोक
ऽपि सात् तत्र नाशायसंसंभवादिति दिक्। तस्माद्गुणानामनित्यत्वसिद्धेवदनित्यत्वमूलत्ववनि
हितः। कुमारः। अपमास्मकध्वंसाप्रतियोगित्वरूपं नित्यत्वं वेदस्यैतथापि परतंत्रपुरुषपरंपरा

धीनतयाप्रवाहाविच्छेदरूपेनित्यत्वे बाधकाभावः एवं च नित्यत्वेन निर्दोषत्वात् यत् च वेदप्रामाण्यसिद्धौ
सर्वेषां वेदवक्तरि ईश्वरे प्रमाणाभावेनोक्तदिशा वेदस्य पौरुषेयत्वासिद्धिरिति चेन्न स्मृत्याचारानु
मितवेदानामुच्छेददर्शनेन तद्दृष्टान्तेन सर्ववेदा उच्छिद्यन्ते वेदत्वात् स्मृत्याचारानुमितवेदव
दित्यनुमानेन सर्ववेदानामुच्छेदसिद्धेः सजातीयध्वंससमव्यापकप्रागभावप्रतियोगित्वरूपप्र
वाहाविच्छेदस्यासंभवात् स्यादेतत् स्मृत्याचारानुमितवेदानामुच्छेद एवासिद्धस्तेषां नित्यानुमे
यत्वात् प्रवाहाविच्छेदोपि सर्ववेदानां तुल्यरूपतासाध्यकालीनोपाधिर्वा व्यापकाध्ययनविषयत्वान
वच्छिन्नत्वं तत्र सर्ववेदाध्ययनविषयेषु उत्सन्नवेदाध्ययनाविषयत्वनित्यानुमेयवेदस्यास्ति
अनुमानं च विवादपदमष्टकाबोधिका स्मृतिः स्पष्टानुभवजनकवेदमूला अविगीतमहा
जनपरिगृहीतस्मृतित्वात् प्रत्यक्षवेदमूलकस्मृतिवत् अत्र प्रत्यक्षवेदमूलकस्मृतावे
तः सिद्धसाधनवारणाय विवादपदमिति तदर्थस्तु इदानीं प्रत्यक्षवेदामूलकत्वे सति पुंप

रक्तपुत्राकृर्णंदघर्यथाशातरइतिन्यायमूलकस्मृतावंशतोबाधवारणायपूर्वंबोधकेतिव
स्कृतोविवादपदत्वेउभयवादिसिद्धान्यतरकोटिकान्यत्वंएवंचसापमूलकस्मृतेरप्येनेनैव
वारणं।पूर्वंबोधकत्वेनदेयमवेहेतावविगीतपदंसंक्रांतोप्ययंयेहस्तिमोवद्ध्वारसादि
त्नोभमूलकस्मृतौव्यभिचारवारणायतेच्चप्रमाणपदंप्रागुक्तन्यायमूलकस्मृतौव्यभिचारवारणा
यमहाजनेत्यादितच्चलौकिकप्रमाणाविषयार्थकवेदएवंव्यभिचारवारणायस्मृतौतित
च्चस्मृतित्वेनप्रसिद्धार्थकंवेस्तैतोमन्वादिप्रणीतत्वेमेवस्मृतित्वेएवंचलोभमूलकस्मृतौव्य
भिचारवारणायाविगीतत्वविनदेयंसाध्येवेदमूलत्वेस्वजन्यानुभवेद्वारावेदजन्यत्वपरादोला
नादिव्यवहितस्यकुविंदादेरिवस्मृतौवपित्तानादिव्यवहितस्यवेदस्यजनकत्वान्नबाधसंभाव
नातादृशजनकत्वेचात्रतस्याप्यस्यनसंभवतीतिपक्षधर्मताबलान्नित्यानुमेयप्रत्यक्षवेद
सिद्धिः।अध्ययनविषयवेदत्वस्यसार्वादिकाध्ययनविषयत्वव्याप्यत्वेनैव्यापकाभावादध्य

भावादध्ययनविषयत्वस्य तत्रासंभवात् अथ यथा भीनिनाम्लेच्छादिकं हत्वा लिप्यादिनाऽध्ययनं प्रतिपाद्य
ते तथेश्वरेणापि स्वाभिप्रायस्थापि वेदः स्मृतिकर्त्रे मन्वादिके ऋषिभ्यो लिप्यादिना प्रतिपाद्यतेऽनेन्तरं
वैतेस्तस्मादर्थप्रतीत्या स्मृतयः प्रणीयन्त इति कदाप्यध्ययनविषयत्वाभावेपि वेदस्मृतिप्रणयनं
संभवतीति न पक्षधर्मताबलादपि नित्यानुमेयवेदसिद्धिसंभव इति चेन्न वेदस्योच्चारणाद्यभि
व्यक्तानुपूर्वीमत्त्वे तच्छन्दत्वाभ्यां द्विविधत्वात् तत्रानुपूर्वीकल्पने गौरवेनाद्यविधायासंभवेन
द्वितीयविधायामेव पर्यवसानेन म्लेच्छादिवैषम्यात् ननु चेत्तर्हि तस्यानुपूर्वीहीनस्य कथं
बोधकतासंभवः आनुपूर्वीमत्त्वेन ज्ञानस्य शाब्दबोधसामग्रीघटकत्वात् अन्यथा नदी दिननरा
राजेसस्यापि विशेषणबोधकतापत्तेरिति। वाच्यं तदर्थज्ञापकत्वेन ज्ञानघटितसामग्र्या एव प्र
वृत्ते शाब्दबोधजनकत्वोपगमेन स्मृत्यनुभावकत्वेन ज्ञानादिव वेदादर्थप्रतीतिसंभवेन बोध
कतासंभवात् न चैवं स्मृत्यर्थबोधकत्वेन वेदानुमितौ स्मृत्यर्थस्य विषयतया तद्बोधकवेदस्यानुवा

दकतापत्तिरितिवाच्यं कार्येण कारणानुमाने कारणकारणतावच्छेदकातिरिक्तस्य व्याप्तिज्ञानविषय
यापकतावच्छेदकस्य विशेषणत्वेपि न विषयत्वमिति तत्सिद्धांतात् पाकहेतो मानसप्रत्यक्षापांपाक
स्य ज्ञानांतरोपनीतस्य संनिज्ञाने सज्ञापाश्च ज्ञानांतरोपनीतायाविशेषणत्वेपि न विषयत्वमिति
तैरंगीकारात् न च विशेषणत्वस्य विषयतात्मकत्वेन विषयत्वाभावे कथं विशेषणत्वमिति वाच्यं
विशेषणत्वस्य भासमानधर्मताकत्वरूपतया ज्ञानांतरोपनीतस्य संसर्गत्तिपाधर्मत्वभानेन तद्विशे
षणत्वस्य ज्ञानेन तद्विशिष्टज्ञानत्वस्य च संभवात् न च ज्ञानांतरोनीतस्य वेदार्थस्यानुमितिविषयत्वे
पि ज्ञानांतरमादाय वेदस्यानुवादकतापत्तिरिति वाच्यं वेदार्थग्राहकस्य ज्ञानांतरस्य स्मृतिजन्य
तया प्रमाणांतरत्वाभावेन प्रमाणांतरागृहीतार्थग्राहकत्वरूपानुवादकत्वाभावात् अर्थकदाप्य
पठितस्य वेदत्वेन संभवति उत्पत्तेरभिव्यक्तेर्मोनिष्कौकवदनप्रायाघाततोपाविगमासंभवात्
अनुपूर्वीहि न वर्णमात्रस्यैव निरूपकत्वात् न वानुपूर्वीसहितस्यैव वेदस्यानुमानान्नदोष इति वाच्यं

तस्यानानात्वेन विशिष्यज्ञानासंभवादिति चेन्न हस्तकरादिपदानां घटमानयकलशमानय नय घट
मित्यादीनां च प्रत्येकं व्यभिचारेण शाब्दबोधे पदानां तात्पर्याणां चानुपूर्वीज्ञानस्य हेतुत्वात् किंतु तत्तदर्थ
बोधकत्वेन ज्ञानमेव तत्र हेतुः तच्च प्रकृते सम्यगस्ति तदर्थमेव च कश्चिद्गुणस्वरूपक्रमविशेषणामुपयोगः
अत एव हस्तमानयेत्यादौ शकारसंदेहे किं यकारेण वा तत्स्तकरादिसंदेहेपि शाब्दबोधः अत एव द
ष्टं चात्र वह्निलिंगमिति शब्दात् सनीतेन धूमेनालोकेन वा वह्नेरनुमाने ननु तदर्थज्ञापकत्वेन ज्ञा
नात्पदार्थोपस्थितिमात्रे नन्वेतत्तु वाक्यार्थबोधः नामत्वविभक्तित्वादिना ज्ञानं विना कांक्षादिज्ञा
नासंभवेन नतदसंभवात्तन्न च तदर्थज्ञापकत्वेन ज्ञानं हेतुत्वाम तेजाकांक्षादिज्ञानस्य नतत्त्वे हेतुते
ति वाच्यं तथा सति घटः कर्मत्वमानयनं कृतिरित्यादितो कांक्षावाक्यादपि घटकर्मकानयनकृ
तिबोधकत्वेन ज्ञानेपि घटमानयेत्यादिवाक्यादिव शाब्दबोधापत्तेः एवं च कर्मत्वाद्युपस्थापकवि
भक्त्यादिमत्त्वेनोपस्थितिं ज्ञानं विना तदर्थस्थापकत्वज्ञानमात्रात् कथं शाब्दबोधः नन्वेवमुरामान

पत्यादौ शक्यारादिसंदेहे कथं शाब्दबोध इति वाच्यं। तत्रापि सामान्यतस्तथाज्ञानसत्वात् अननुगमे
न तत्तद्विभक्त्यादिमद्विशेषज्ञानत्वादिना हेतुत्वासंभवादिति चेन्न घटः कर्मत्वमित्याद्यबाधितविरोधि
पदाजन्याउपस्थितित्वादिनैव तत्र हेतुत्वात् वस्तुतस्तु नानापदजन्यपदार्थोपस्थितिसाय तत्र शाब्द
बोधस्तत्रैवानुपूर्वीज्ञानस्य हेतुतया तद्विनाप्यनुमितेरेव शाब्दबोधे बाधकाभावः न चानु
पूर्वीज्ञानघटितसामग्र्या अन्यत्र शाब्दबोधजनकत्वेन क्लृप्ततया अत्राभावे कथं शाब्दबोध इ
ति वाच्यं अत्र तदर्थज्ञापकत्वेन ज्ञानघटितताया धर्मिग्राहकमानसिद्धया विलक्षणसामग्र्या
एव शाब्दबोधजनकत्वोपगमात् न च क्लृप्तसामग्र्यभावेपि विलक्षणसामग्र्यंतरेण कथं का
र्योत्पत्तिरदृष्टगोचरत्वादिति वाच्यं। तथा सति तत्त्वघटादिकार्यकर्तुः शरीरापेक्षया जनकज
नकेदृष्टत्वपाहितत्वादिकार्ये ईश्वरस्याशरीरिणः शरीरापेक्षां विनैव जनकत्वस्यानुपपत्तेः कार्य
वैलक्षण्यात् सामग्रीवैलक्षण्याभ्युपगमे प्रकृतेप्यदोषात्। एवं च नित्यानुमेयवेदस्यस्तेवणपिदविभ

त्वादिविशेषघटितत्वेनाज्ञातस्याखंडस्य वाक्यार्थानुभावकत्वं तत्र पदार्थस्मानिपोवाक्यार्थः । अस्त्वेवास
खंडस्यैव वाक्यार्थानुभावकत्वमखंडत्वेस्याकमाग्रहाभावात् न च तत्पानुपूर्व्या नानात्वात् विशिष्टानि
श्चय कथं शाब्दबोध इति वाच्यं । अत्र विलक्षणाया एव सामग्र्याः स्वीकारात् न च क्लृप्तहेतुं विना न सोनुभा
वक इति वाच्यं तस्यासिद्धावाश्रयासिद्धेः सिद्धौ च बाधः । तेन विनैव सर्वानुपपत्तिपरिहारे तद्धर्मग्राहके
मानेन तदनुभावकत्वसिद्धेः अत एव स्फोटनिंदाभ्यां कल्पितत्वविधिनिषेधकवाक्यात्तदर्थप्रतीत्सपद
त्तिनिर्वृत्तौ अन्यथा विधिनिषेधकानां नानाविधत्वेन विशेषानुमानासंभवान्न ततोर्थधीः स्यात् एवं मं
गलाद्याचारस्य विगीतशिष्टाचारत्वेन कर्तव्यतामनुमाय सा कर्तव्यता वेदबोधिता अलौकिकाविगीत
शिष्टाचारकर्तव्यतात्वादिति वेदानुमानं मंगलमाचरेदित्यादिविशेषाकारेण तु न वेदानुमानं
तद्व्याप्यत्वाभावात् न चास्त्वप्रत्यक्षवेदानुमानं प्रत्यक्षत्वे उच्छेदानुपपत्तेः प्रत्यक्षशाखावत् नस्वर
कोः कोर्थः का पङ्क्ति हकारस्ते वेदरूपमेव वाक्यमनुमेयमिति तन्मते नानावेदकल्पने गौरवात् समन्वादिस्मृ

ति मूलं हीनानेकविधं दृष्टमिति कथमाधुनिकोनेकवेदमनुमिनुयात् न च स्मृत्यर्थबोधको वेदः स्मृतिसदृश
एवानुमेयः स्मृतेर्नानाविधत्वात् तस्य च प्रदेशादावनुष्ठितत्वे च वेदं लोके श्रोत्रग्रहणार्हत्वापादनं शब्द
त्वे वाक्यत्वमर्थबोधकत्वादिस्तु शिष्टस्मृत्याचाराभ्यां चानुमितिवेदार्थबोधपत्तौ तिरूर्वपूर्वमानुमितवेद
त्वेनोत्तरस्मृत्याचाराविति नो घटते परात्तं तं च प्रमाणमूलकस्यात्तस्माद्वेदस्य नित्यानुपपत्यसेन तत्
छेद इति। अत्रोच्यते उच्छिन्नवेदादर्थप्रतीत्यस्मृत्याचारयोः समपत्तेः सामग्र्यन्तरकल्पने मानाभावात्
अत एव नाश्रयासिद्धिर्नवा बाधः स्मृत्याचारानुमितस्य तस्यास्माभिरभ्युपगमात् न च तस्मात्कथं बो
धः अनुष्ठीसाहित्यात् न च तत्र मानाभावः यदि स वेदोऽननुष्ठेयविरहितस्यात्तदानुनेभावकस्यादि
ति तर्कसहकृतानुमानस्य च मानत्वात् एवं च स्मृत्याचारयोर्वेदजन्यानुभवमूलकत्वानुनामेदव
पक्षधर्मतावलात्प्रसक्तवेदमूलकत्वसिद्धिः अन्यथानुभावकत्वाभावेन तत्स्मृत्वानुपपत्तेः
तस्मात्स्मृत्याचारानुमितो वेदः प्रत्यक्षाध्ययनविषयः वेदत्वात् संमतवत् उच्छेदस्त्वाधुनिकानाम हरहर

प्रचीयमानशक्तिकत्वात् स्तुतिनिंदावाक्याभ्यां च प्रवृत्तिनिवृत्तिपराभ्यां प्रवृत्तिनिवृत्तिहेतुरर्थः कल्प
ते यत्तु निधायकं निषेधकं च वाक्यं गौरवादुक्तदोषाच्च। यत्रार्थवादादेव तदर्थावगमस्तत्रैव न तत्कल्पना
पि यथा तत्र रात्रिसत्रं स्तुतरात्रिसत्र सहस्रां यो ऽश्वमेधेन यजत इत्यादौ न च तत्साध्यापन्नविषयत्वे वक्तुमिमेधा
विनिर्धारणसंभवेन कथमुच्छेद इति वाच्यं एकस्य सकलशाखाध्ययने सामर्थ्याभावात् एकेन वापरेणा
पि तदनध्ययने शाखोच्छेदसंभवात् शाखाभ्यात्वस्य च प्रत्यक्षशाखात्वस्यापि सा वैदिकाध्ययनेवि
षयत्वव्याप्यत्वे मानाभावात् न च हस्तशाखात्वं दोव्यासादिनां सत्वात् कथमुच्छेद इति वाच्यं अध्ययना
भावस्यैवोच्छेदपदार्थत्वात् अथ शाखोच्छेदे वर्णपदवाक्यहानिशंकया प्रसह्य वेदादपि वाक्यप्रयो
गयोगयोरनिश्चये वैदिकव्यवहारमात्रविलोपापत्तिरिति चेन्न श्रूयमाणवेदस्यैव महाजनपरि
ग्रहेण तन्मूलकानुष्ठानसंभवात् एतेन सर्ववेदोच्छिन्नशाखाबोधितांगकलापस्य देहेन सर्ववेदानभ्यास
प्रसंग इति निरस्तं सति वानेकशाखाबोधिते तत्कर्मणि कर्तव्यताबोधिकामन्वादिस्मृतेः एकाल्के

संभावितमेतावताहन्नामनाश्वासमाशंकैव तैस्तत्स्मृतिप्रणयनात् तत्र च स्मृत्याचारयोर्महाजनपरिग्र
हादेव प्रामाण्यमस्तु किं वेदेनेति वाच्यं प्रलये स्मृत्याचारयोरुभयोरेवोच्छेदात् सर्गादौ नित्यसर्वज्ञे
श्वरप्रणीतवेदमूलकत्वस्य स्मृत्याचारयोरावश्यकत्वात् अन्यथा मूलाभावेनांधपरंपरापात्तप्र
संगात् मन्वादीनां तदानीन्तनानां द्विपदर्शित्वे वेदुपायश्रवणाद्यभावात् पूर्वसर्गसिद्धसार्वज्ञ्यकल्पनेऽप्र
तिसर्गं तेषामानन्त्यापत्त्या कल्पने च गौरवे एकस्यैव नित्यसर्वज्ञस्य कल्पनौचित्यात् नन्वेवमीश्व
रप्रणीताः स्मृतय एव सन्त्विति वाच्यमासां मन्वादिप्रणीतत्वेन वेदमूलकत्वेन स्मृतित्वे च स्मृतेः
तदुक्तं प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयत इति अत्र विधानमेवान्यत्वं न त्वानुपूर्वीभेदः तत्र दृष्ट
विशेषे तत्तदानुपूर्व्या एव जनकत्वे नानुपूर्वीभेदात्संभवात् तस्मात् पूर्वप्रत्यक्षवेदमूलत्वेन स्मृत्या
चारौ अग्रेन कालक्रमेणापुराणापबलम्लेच्छाद्याग्रहणधारणादिशंकरहरहरपचीयमानत्वात् तदध्य
यनविच्छेदनशाखोच्छेदात् स्मृत्याचाराभ्यामेव कर्तव्यतामधिगम्य प्रवृत्तिः न च तथापि स्मृतिरेवास्तु

वेदमूलो मंगलाचारस्त्विष्टाचारादेव घटलिप्यादिसंप्रदायवदिति वाच्यं। बहुव्यापारघटितत्स्यात्तत्तद
चारस्यगुरुत्वेन मंगलमात्रे रहितस्यादिवामस्यैव लघ्वेनकल्पनात्। न च मंगलादिपदशक्तिग्रह
र्थमाचारजावेष्टकइति वाच्यं स्वर्गादिपदवद्बाध्यादवेतदुपपत्तेः अत एव वचनमात्रायत्तत्वं प्रवृत्ति
तौत्रे च परोक्षकाणामाचारापेक्षेति न च प्रत्यक्षासिद्धा उच्छेदेतिसंभवाविंतरइति वाच्यं प्रलयपनाहरासीन्
तन्निरासीदित्यादिश्रुत्यनुगृहीतानामनुमानानामप्रमाणतायाः एवमेव व्यवस्थापनात्तत्स्यादुपदर्शि
तरीत्येश्वरकर्तृकत्वेन वेदप्रामाण्यसिद्धौ बाधकाभावेन वेदपौरुषेयतासिद्धिरविकलेतिवृत्तमतिश
यविस्तरेण। सोयं शब्दो द्विविधः विधिरर्थवादश्च विधित्वे च प्रवर्तनाप्रकारलिङादिघटितत्वे प्रवर्तना
त्वे च प्रवृत्त्यनुकूलव्यापारत्वे प्रवृत्तिजनकज्ञानविषयत्वपर्यवसन्ना। इत्थं च प्रवर्तनालिङर्थत्व
स्य सर्वसंमतत्वात्प्रवृत्तिसाध्यत्वे बलवदनिष्टाननुबन्धित्वे च लिङर्थः समुद्रपारगमनादौ कलंजभ
क्षणादौ चैत्यवंदनादौ च प्रवृत्त्यनुपपत्तेः तत्र तथापि ज्ञानस्यैव प्रवर्तकत्वात् पुष्पवन्तादिपदस्य सूर्यचंद्र

घोरिव लिङः शक्तिग्रहे कशक्तेरुपगमान्नैकदा लिङः शक्तित्वबोधकत्वानुपपत्तिः अथ इति साध्यत्वे लिङो न
शक्तिः लाघवेन साध्यतासंबंधेन इति प्रकारकस्यान्वयस्यैव प्रवृत्तिजनकत्वोपगमेनाख्यातत्वेनाख्यात
सामान्यशक्त्योपस्थापिताया कृतेः साध्यत्वे लिङो न शक्तिः लाघवेन साध्यतासंबंधेन तासंबंधेन पाका
दावन्वयोपगमेन वच्यत्वादौ प्रवृत्तिसमवायहेतुत्व साध्यतासंबन्धेनान्वयाभावेन प्रवृत्तेसमवायत्वेति चेन्न
आख्यातत्वेस्यैकस्यानुगतस्याभावेन तत्तत्स्वादेरेव शक्ततावच्छेदकतया लिङः सावच्छिन्नस्य इति सा
ध्यत्वस्यावच्छिन्ने एव शक्तिकल्पनात् न च लिङः सावच्छिन्नस्यापि लाघवादुक्तित्वमेव शक्ततावच्छेदक
मास्तामिति वाच्यं पदानि यन्नियतोपस्थितेः इति साध्यत्वेन पदात् यादृशधर्मप्रकारेण नियतोप
स्थितिस्तादृशधर्मस्यैव तत्पदशक्यतावच्छेदकतयानुभवानुरोधेन लिङः इति साध्यत्वस्यावच्छिन्ने श
क्तिकल्पने गौरवस्याकिंचित्करत्वात् अन्यथा वेदस्वर्गपदादेरपि सुरधर्मावच्छिन्ने शक्तिविरूपापत्तेः
पचति इति साध्याख्यातसामान्यशक्त्युपस्थाप्यकृतेर्धात्वर्थविशेष्यत्वेनैवान्वयस्यानुभवसिद्धत्वेन तयापचेत्तिस्या

दोतस्याधात्वर्थविशेषणतयान्वयासंभवात्। न च सुखत्तिभेदाश्रवणान्न दोष इति वाच्यं। सुखत्तिभेदा
स्यशक्तिभेदनिर्वाह्यतया शक्तिभेदस्यावश्यकत्वेतु कृतौसा कृतिसाध्यत्वत्वावच्छिन्नएवतदाविसात्प्र
थमास्तु कृतिसाध्यत्वे लिङः शक्तिः कृतिसाध्ये प्रवृत्तिवारणं तु कृतिसाध्यत्वज्ञानस्य प्रवृत्तिहेतुत्वकल्प
नादेवसुलभं। न च प्रवर्तकज्ञानस्य विधिजन्यत्वनियमनिर्वाहाय लिङः स्तत्र शक्तिरावश्यकीति वाच्यं।
लिङः शक्त्यंगीकारेपि तादृशनियमानिर्वाहात्। तथाहि इदानींतनकृतिसाध्ये कालांतरीयकृतिसाध्यभावि
यौवराज्यादाविदानींतनकृतिसाध्यताज्ञानदशायामपि कालांतरीयकृतिसाध्यताज्ञानसत्वात्प्रवृत्त्या
पत्तिः। एवं स्वकृतिसाध्यहेतुमधादिपुरुषांतरीयकृतिसाध्यसमुद्रलंघनादौ स्वकृतिसाध्यताज्ञानद

सा

शायामपि स्वमधादिपुरुषांतरीयकृतिसाध्यताज्ञानात्प्रवृत्त्यापत्तिरिति तत्तत्कालीनतत्तत्पुरुषीयप्रवृ
त्तिप्रति तत्तत्कालीनतत्तत्पुरुषीयकृतिसाध्यताज्ञानस्यैव हेतुत्वं वाच्यं। तथा च तादृशज्ञानस्य न विधि
जन्यत्वं तत्तत्कालीनतत्तत्पुरुषीयत्वेन कृतिसाध्यत्वे लिङः शक्त्यभावादिति चेन्न प्रवर्तकज्ञानस्य विधिप्रयो

न्या॰कौ॰
६५

ऽन्यत्वनियमनिर्वाहायैव लिङः स्तत्रशक्तिकल्पनात् विधिना सामान्यतः कृतिसाध्यत्वे बोधिते अनुमानादि
नाप्रवर्त्तकस्य तत्तत्कालीनतत्तत्पुरुषीयकृतिसाध्यताज्ञानस्य संभवात्। वस्तुतस्तु। एतद्विशेषयोरितिया
येन सामान्यतः प्रवृत्तौ कृतिसाध्यताज्ञानत्वेन केवलकृतिसाध्यताज्ञाने हेतुत्वस्याप्यावश्यकतया के
वलकृतिसाध्यताज्ञानस्यापि प्रवृत्तिजनकत्वे ऽप्रवर्त्तकज्ञानस्य विधित्वन्यत्वनियमनिर्वाहायैव
लिङः कृतिसाध्यत्वशक्तिरावश्यकीति सारं। तच्च कृतिसाध्यत्वादिज्ञानं चिकीर्षाद्वारा प्रवृत्तिजन
कं। प्रवृत्तिजनकमुपायविषयकं ज्ञानं चिकीर्षाद्वारकमिति नियमात् प्रवृत्तजनके उपायज्ञाने व्य
भिचारवारणाय प्रवृत्तिजनकमिति फलज्ञाने उपादानप्रसक्तव्यभिचारवारणायोपायविषय
कमिति उपायत्वं च साध्यताव्यापकविषयताशालित्वमतो मोक्षस्य तत्र व्यभिचारः अत एव मणिकृ
तापि ज्ञानस्य प्रवृत्तौ जन्यायाश्चिकीर्षातिरिक्तं न कर्त्तव्यमस्तीति ग्रंथेन तथैवोक्तं। अत्र चिकीर्षाति
रिक्तं न कर्त्तव्यमस्तीत्यस्य चिकीर्षाद्वारकत्वमेवार्थः न तु चिकीर्षातिरिक्ताद्वारकत्वे अनुपयोगात् चि

कीर्षाद्वारकत्वसिद्धेश्च चिकीर्षाजनककृतिसाध्यतादिज्ञानस्य प्रवर्त्तकत्वसिद्धेः मिश्रास्तु फलज्ञानस्येति सा
क्षादसाधनस्यापायविषयस्य चेत्यर्थः तत्र प्रवृत्तिविषयस्य स्वक्षफलज्ञाने चेत्र व्यभिचारः प्रवृत्तिं प्रति
उपादानप्रत्यक्षस्य हेतुतया तत्र व्यभिचारात् साक्षादसाधनत्वेऽपि फलज्ञानस्य प्रवृत्तिहेतुत्वेन यत
त्र व्यभिचारवारणायोपायविषयस्येति विशेषणीयमिति तस्याशयः नन्विदमसंगतं चिकीर्षातिरि
क्तेन कर्त्तव्यत्वस्य चिकीर्षातिरिक्तव्यापारकत्वे वा चिकीर्षाद्वारकत्वं व्यापार इति चार्थः । आद्ये उ
पादानप्रत्यक्षस्य प्रवृत्तिं प्रति साक्षात्साधनस्य निर्व्यापारतया चिकीर्षातिरिक्तव्यापारकत्वमस्त्येवेति
व्यभिचाराभावात् साक्षादसाधनस्येति व्यर्थं द्वितीयफलज्ञानं फलेच्छा इष्टसाधनताज्ञाने चिकीर्षामि
का उपायेच्छा ततः प्रवृत्तिरिति प्रणाल्या चिकीर्षाद्वारकं व्यापारो भवत्येवेति तद्वारणाय उपायविषयस्ये
त्युपादानमनर्थकं फलज्ञानस्य प्रवृत्तिं प्रति हेतुत्ववादिना चिकीर्षायाश्च द्वारकं व्यापारत्वोपगमात् ॥
अत्र उपादानप्रत्यक्षस्य निर्व्यापारकत्वादेव चिकीर्षारूपनियतव्यापारकत्वात्तत्र व्यभिचारवारणाय

साक्षादसाधनेन तस्य सार्थकत्वसंभवस्य वा तथात्वे कतरार्थे क्रियमाणेऽन्यतरपदवैयर्थ्यमेवेति कथमे
तत्संग्रहमुभयत्र पाक्षारत्रुटि तिङन्तेषु । चिकीर्षाविरहरूपं व्यापारं स्वस्य स्वसमानविशेष्यकचिकीर्षा
विरहरूपव्यापारस्येत्येवार्थः उपादानप्रत्यक्षस्य च व्यापारकृतया चिकीर्षाविरहरूपव्यापारकत्वाभावात् साक्षादसा
धनत्वमिति फलतोनस्य चिकीर्षाविरहव्यापारकत्वेपि स्वसमानविशेष्यकचिकीर्षाव्यापारकत्वाभावान्न व्यभि
चारवारणाय उपायविषयस्येति सार्थकमिति यद्वा चिकीर्षातिरिक्तव्यापारकत्वमेव तदर्थः । न चैवं
नैयायिकनये चिकीर्षाविषयसाधनतया उपादानप्रत्यक्षस्य उपादानेच्छाव्यापारकत्वोपगमात् चि
कीर्षातिरिक्तउपादानेच्छाव्यापारकत्वात् तत्र व्यभिचारवारणाय साक्षादसाधनत्वस्येति न वक्तव्य उपा
दानेच्छाव्यापारकत्वोपगममात्रं चिकीर्षातिरिक्त साक्षादसाधनत्वमस्त्वेवेति कथं व्यभिचारवारणमिति
वाच्यं । उपादानप्रत्यक्षस्य कालेऽपरेण अभावेन तस्य स्वातंत्र्येणापि हेतुत्वोपगमात् इत्थं च तत्र [illegible] साक्षा
दसाधनत्वे सति न [illegible] तस्य व्यापके चिकीर्षातिरिक्तत्व [illegible] व्या

पाराजनकत्वमिति। ज्ञस्मिन्कल्प्य मूलार्थः पूर्वकल्पे तु स्वसमानविशेष्यकचिकीर्षाव्यापारकत्वं तादृशज्ञा
नत्वव्यापकमिति मूलार्थः। वैशेष्यं च ...न फलस्य कदाचिदुपायत्वेपि न दोष इति दिक्। तिव दंति तच्चिकीर्षास्व
समानविशेष्यकत्वं प्रवेश्य फलज्ञानेव्यभिचारे वारणाय विशेषणान्तरोपादानस्य वैयर्थ्यान्न। एवं उपादा
नप्रसक्तस्य उपादाने व्यापारकत्वे प्रमाणाभावेन च द्वितीयकल्पोऽसंगततरो नेति वस्तुतस्तु अन्वया
सिद्ध अन्वयव्यतिरेकाभ्यामेव कृतिसाध्यत्वादिज्ञानस्य चिकीर्षाद्वारा प्रवृत्तिजनकत्वमिति सा तादृश
प्रवृत्तिसाध्यतादिज्ञानस्य चिकीर्षाप्रवृत्त्योर्हेतुत्वे मानाभावः कृतिसाध्यतादिज्ञानकाले चिकीर्षाप्रवृत्त्यो
रौरणस्य तत्र प्रवृत्तौ साध्यतादिज्ञानाभावस्य हेतुत्वेनैव निर्वाहात्। न च यादृशप्रकारिका सा तत्प्रकारक
ज्ञानसाध्येति नियमवत्त्वात् चिकीर्षाप्रति कृतिसाध्यताज्ञानस्य हेतुत्वसिद्धौ चिकीर्षाद्वारा कृतिसाध्यता
ज्ञानस्य प्रवृत्तिहेतुत्वसिद्धिरिति वाच्यं। कृतिसाध्यत्वेन पाकमिच्छामीति चिकीर्षानुभवेन तस्याः कृतिसा
ध्यत्वप्रकारकत्वं कृतिसाध्यपाकादिक्रियाविशेष्यकेच्छात्वेनैवोक्तेः पुंसां कृतिसाध्यत्वप्रकारकपाकादिविशे

ष्यकज्ञानस्य हेतुत्वसिद्धावपि तत्र बलवदनिष्टाननुबंधित्वप्रकारकज्ञानस्येष्टसाधनत्वप्रकारकज्ञान
स्य च हेतुतायास्तथाप्यसिद्धेरिति चेन्न बलवदनिष्टसाध्यत्वाज्ञानाभावादेस्तत्त्वेन तत्र हेतुत्वे तदवच्छेदकगौरवाप
त्तेः बलवदनिष्टसाध्यत्वाज्ञानादेरेव तत्त्वे तत्र हेतुतायाउचितत्वात् किंचिज्जनकीभूतज्ञानं विघटयत एव
ज्ञानस्य प्रतिबंधकत्वमिति नियमबलात्तु बलवदनिष्टसाध्यताज्ञानहेतुतासिद्धिः तादृशनियमाप
त्तेर्यत्प्रतिबंधकज्ञानं भवति तत्तज्जनकज्ञानविघटकमिति यथा व्यभिचारज्ञानमनुमि
तिप्रतिबंधकं सद्भवति तदनुमितिजनकव्याप्तिज्ञानविघटकमिति भवतीति एवं च तादृश
नियमेन बलवदिष्टस्य साध्यताज्ञानादेश्चिकीर्षाप्रतिबंधकज्ञानत्वेन हेतुता चिकीर्षाजनकज्ञानविघटकत्व
साधने पक्षधर्मताबलात् बलवदनिष्टसाध्यताज्ञानादेरेव चिकीर्षाजनकत्वसिद्धिः यद्यपि जनकज्ञान
विघटकत्वेऽन्यथासिद्धत्वपाततदभावस्याहेतुत्वात्स्वरूपासिद्धिर्दृष्टांतासिद्धिश्च तथापि प्रतिबंधकत्वं
हि न कारणीभूताभावप्रतियोगित्वं किंतु प्रयोजकीभूताभावप्रतियोगित्वं प्रयोजकत्वं च कारणतत्कारणसा

धारणमित्यस्य दोषः हेतौ ज्ञाने पदोपादाने च विषयांतरसंचारादौ व्यभिचारवारणाय साध्येसौ॰ न पदं च

स्वरूपकथनेन तु साध्यं प्रविष्टं प्रयोजनाभावात्। व्यापकेऽर्थविशेषणत्वस्यादोषत्वात्। विघटकत्वं च प्र

तिबंधकत्वं। ननु तथापि बाधसिध्यादौ व्यभिचारः न चेत् व्याहत्तप्रतिबंधकताहेतौ निवेशनीयेति वाच्यं।

हेत्वसाध्यताज्ञाने व्यभिचारज्ञानाभावयोरपि बाधाभाववत्त्ये वत्तिकीर्षानुमित्सा प्रयोजकतयास्त

स्मात्सिद्धिदशायां सिध्याद्युपत्तेरिति चेन्मैवं याद्दशज्ञाने संशयनिश्चयसाधारणज्ञाने स्वेन यत्र प्रतिबं

धकं तत्तज्ज्ञानेकोभूतज्ञाने विघटपदेवप्रतिबंधकमिति नियमः बाधसिध्यादेः संशयसाधारणज्ञान

त्वेनाप्रतिबंधकत्वान्न तत्र व्यभिचारः नापि सिद्धत्वज्ञाने संशयसाधारणज्ञानत्वेनेच्छाप्रतिबंधकत्व

संशयपीछादर्शनादिति न तत्रापि व्यभिचारः न च सिद्धत्वे संशयवत्कुविति त्वव्यायासस साध्ये नेच्छेति सि

द्धत्वज्ञानस्य संशयसाधारणज्ञानत्वेन तत्र प्रतिबंधकत्वात् निश्चयस्याहेतुतया साध्यासत्त्वाद्व्यभिचा

रोस्त्येवेति वाच्यं। तत्रापि बलवदनिष्टानुबंधित्वनिश्चयविघटकतया साध्यसत्त्वात्। नन्वेवं हेत्वसाध्यता

संशयोपि न प्रतिबंधक इति स्वरूपासिद्धिरिति वाच्यं। तस्य प्रवृत्तिमात्राप्रतिबंधकत्वेपि निष्कंपप्रवृत्तौ तत्
थात्वात्। न चैवं निष्कंपप्रवृत्तौ तस्य हेतुत्वासिद्धावपि प्रवृत्तिमात्रे हेतुत्वेन सिद्धमिति वाच्यं। यद्वि
शेषयोरिति न्यायेन प्रवृत्तिसामान्ये तस्य हेतुत्वसिद्धेः। न च तात्पर्यसंशयः शाब्दप्रतिबंधके व्यभि
चारः मणिकारनये तात्पर्यनिश्चयस्य शाब्दबुद्धावहेतुत्वादिति वाच्यं। प्रतिबध्यसमानविशेष्य
कत्वस्य ज्ञानविशेषणत्वेनादोषात्। मिश्रास्तु जनकेति मणिप्रतीकमादाय साक्षादविरोधिनरति
शेषः तेन बाधप्रतिरोधादौ न व्यभिचारः साहुस्तेषामयमाशयः यत्कार्यं प्रति साक्षादविरोधित्वज्ञा
नेत्तत्कार्यजनकीभूतज्ञानस्य चेत्प्रतिबंधकत्वमिति नियमः तथा च बाधादेः साक्षादविरोधित्वा
भावादेव हेत्वभावान्न व्यभिचार इति। न चैवमपि हृत्स्यसाध्यताज्ञाने चिकीर्षासाक्षादविरोधि
त्वेन हेतुत्वाच्चिकीर्षाजनकज्ञानविरोधित्वसाधने स्वरूपासिद्धिः परैः हृत्स्यसाध्यताज्ञानस्य चि
कीर्षां प्रति साक्षादेव विरोधित्वांगीकारात्तेन च ज्ञानमात्रातिरिक्तकार्यविरोधित्वमेव साक्षादविरोधि

त्वेन तथा च बाधादौ ज्ञानातिरिक्तकार्यविरोधित्वरूपसाक्षाद्विरोधित्वाभावान्न व्यभिचारः न वा ह्रदस्य
साध्यताज्ञाने स्वरूपासिद्धिः तत्र ज्ञानातिरिक्तत्वाविरोधित्वसत्वादिति वाच्यं । अनैकान्तिकज्ञानवेदिति
दृष्टान्तस्य साधनताविकलत्वापत्तेः अनैकान्तिकज्ञाने ज्ञानातिरिक्तकार्यविरोधित्वाभावादिति चेद
त्रोच्यते । दोषपदस्य ज्ञानस्येच्छस्य दोषपदत्वयोः इत्थं च साक्षाद्विरोधित्वं प्रतिज्ञानस्य प्रतिबंधक
ताजनकज्ञानविघटकत्वेनैवेति नियमः पर्यवस्यति साक्षाद्विरोधित्वं च स्वविषयविरुद्धविषयाव
गाहिज्ञानभिन्नत्वं । तथा च यज्ज्ञाने ~~तत्कार्यजनकज्ञानविघटकत्वेनैवेति नियमः पर्यवस्यति साक्षा~~
~~द्विरोधित्वे च स्वविषयविरुद्ध~~ स्वविषयविरुद्धनिष्ठप्रकारतावच्छिन्नज्ञाननिष्ठप्रतिबध्यताभिन्नय
त्कार्यप्रतिबध्यतानिरूपितप्रतिबंधकताकं भवति तज्ज्ञानं तत्कार्यजनकीभूतज्ञानविरोधि भवतीत्येव
नियमः एवं च बाधादौ न व्यभिचारः तत्र स्वविषयविरुद्धप्रकारतावच्छिन्नज्ञाननिष्ठप्रतिबध्यताभि
न्नप्रतिबध्यतानिरूपितप्रतिबंधकत्वाभावात् न चा स्वरूपासिद्धिः ह्रदस्य साध्यताज्ञानतादृशप्रतिबध्यता

नचादृष्टांतस्यसाधनवैकल्यंतादृशाविरुद्धप्रकारतावछिन्नज्ञा
तन्निरूपितप्रतिबंधकताश्रयत्वात् स्वविषयविरुद्धत्वेनग्राह्याभावावगाहितयाग्राह्या
नेनिष्टप्रतिबध्यतानिरूपितप्रतिबंधकतास्वत्वात् प्रतिबध्यतायाः प्रकारतासंबंधेनावछे
भावव्याप्यावगाहितयावायास्वनिष्टप्रतिबंधकतातन्निरूपितधूमत्वादिविरुद्धत्वस्यवन्ह्यादौसत्वात्तत्ता
दकत्तापर्याप्त्यधिकरणंयत्त्वंतेनव्यभिचारज्ञानविषयप्रतिबध्यतानिरूपितप्रतिबंधक
दृशाविरुद्धनिष्टप्रकारतावछिन्नज्ञाननिष्टप्रतिबध्यताभिन्नकारणीभूताभावप्रतियोगित्वं
ताभावान्नदृष्टांतस्यसाधनवैकल्यमितिनचैवंप्रतिबंधकत्वेहेतुत्वादितिचेन्नप्रतिबंधकत्वे
तथाचदृष्टांतासिद्धिःअनुमितिप्रतिव्यभिचारज्ञानाभावस्याग्राह्याभावावगाहितयाग्राह्याभावव्या
स्यान्नफलानुत्पत्तिनियमसत्वस्यग्राह्यत्वात्तथाचयज्ज्ञानेनतत्कार्यानुत्पत्तिप्रयोजकंभवति
प्यावगाहितयावायास्वनिष्टप्रतिबंधकतानिरूपिततत्तद्ज्ञानाश्रयेतज्ज्ञानप्रयुक्तएवतत्त
तत्तत्कार्यजनकीभूतज्ञानविरोधिभवतीतिनियमस्यप्रयोजनकंचएवं

लाभावद्वृत्तिप्रतीतिसाक्षिकःस्वरूपसंबंधविशेषःनचत्तथापिसिद्ध्यवच्छेदकधर्मदर्शनादेर्व्यभिचार
इतिवाच्यं।तत्तद्भिन्नवृत्तित्वविशिष्टतत्ताकार्यानुत्पत्तिप्रयोजकत्वस्यैवनिवेशादितिदिक्अत्रेदंविसं
साक्षादविरोधित्वस्यप्रतिबंधकताविशेषणतयानिवेशेनैवबाधादौव्यभिचारवारणसंभवेसाक्षा
द्विरोधित्वंप्रतिसुकाद्विरोधित्वस्यप्रतिबध्यताविशेषणतानुपगमइतिसाध्यताज्ञानस्यचिकी
र्षाप्रवृत्तिहेतुत्वोपपादनप्रसंगेऽभ्युक्तंवातस्यप्रतिबध्यज्ञानविशेषणत्वंतथापितस्यनस्वविष
यविरोध्यवगाहिज्ञानभिन्नत्वरूपत्वंतत्रज्ञानत्वांशनिवेशस्यव्यर्थत्वात्किंतुस्वविषयविरोध्य
वगाहिभिन्नत्वरूपत्वमेवतथाचहृदसाध्यताज्ञानपक्षकोपदर्शितानुमानेस्वरूपासिद्धिर्दुर्वाराचि
कीर्षापाः हृदसाध्यताज्ञानविषयविरुद्धिसाध्यतावगाहित्वेनहृदसाध्यताज्ञानेस्वविषय
विरोध्यवगाहिभिन्नत्वनिरूपितज्ञाननिष्ठप्रतिबध्यकतारूपहेत्वारभावात्किंचैवंसतिवस्तुतोऽसि
द्धहृदधीरस्याहेतुरित्यादिप्रदर्शकेनासिद्धत्वज्ञानमुपक्रम्यनचतत्रेच्छाहेतुसिद्धत्वज्ञानस्यतत्विरोधि
छा

न्या. कौ.
७०

तापत्तेः अनेकसामान्यमिति न्यायात् न च बाधव्यापकः इच्छायामसिद्धविषयतया सिद्धत्वज्ञानस्य विषय
विरोधाभावादिस्थले तन्न निश्चये यस्या संगतिः तत्र विषयविरोधाभावादिस्थलस्य बाधादेरिव सामा
न्यप्रतिबंधकताभावादिस्वार्थकल्पनात् इत्यात् सामानाधिकरण्यविरोधित्वस्य प्रतिबंधकज्ञानविशेषणत्वाल्ला
भात् न च तत्र विषयविरोधाभावादिस्थलस्य निश्चयत्वेन प्रतिबंधकत्वविरहादिति दोषः तथा च सं
शयसाधारणज्ञानत्वेन प्रतिबंधकत्वे अनैकान्तज्ञानविघटकतया व्याप्यमिति यत्र पूर्वोपदर्शिता
स्मृदोसानिष्टेनरूपस्य तात्पर्यमिति वाच्यं तथा सत्युपदर्शितनियमे सामानाधिकरण्यविरोधित्वस्येव
निश्चयाभावे सामानाधिकरण्यविरोधिन इत्यनेनोपदर्शितनिश्चये यस्यायमनन्तरं येन विरोधे पूर्वापरयोर्वि
रोधस्य पदे दोषो दुरुद्धर एव इति। किं च वह्निसाध्यतादिज्ञानस्य विशिष्टबोधप्रवेशे हेतुत्वे महानसीयपाकादि
गोचरस्य विशिष्टपदादौ वह्निसाध्यताभावे वा व्याकरणसाधारणतानुमितिसामग्र्याः प्रतिबंधकत्वेन कल्प
त इति लाघवे विशिष्टपदादि सामग्री कल्पना कत्वादिधर्मिता वच्छेदकवह्निसाध्यतादिप्रकारकज्ञानस्या

७

वच्छेदकतयातस्यबाधमुद्रयाताहशानुमितिप्रतिबंधकत्वेनबाधाभावघटितानुमितिसामग्र्याश्चि
कीर्षादिसामग्र्याश्चयुगपन्मिलनासंभवात्। इत्यसाध्यत्वादिप्रकारकज्ञानस्यतत्रप्रतिबंधकतामते
चतादृशज्ञानाभावघटितचिकीर्षादिसामग्र्यास्तादृशानुमितिसामग्र्याश्चमिलनसंभवेनोक्तप्रतिबं
धकत्वकल्पनेमहागौरवापत्तिः अथइतिसाध्यत्वादित्रयस्यलिङर्थत्वेनकलंजभक्षणादौ
लिङर्थाभावबोधकत्वानुपपत्तिः कलंजभक्षणादौ इतिसाध्यत्वेष्टसाधनत्वयोरभावात्तत्सत्वात्
एवंश्येनेनाभिचरन्यजेतेत्यत्रधात्वर्थश्येनयागेलिङर्थान्वयसंभवः श्येनस्यनरकानुकूलवद
निष्टानुबंधित्वाभावमात्रबोधनात्। द्वितीये योग्यतयाबलवदनिष्टाननुबंधित्वान्वयासंभवेन
इतिसाध्यत्वेष्टसाधनत्वयोरेवान्वयांगीकारादितिसंप्रदायः वस्तुतस्तु इष्टसाधनमात्रेलिङर्थः
इतिसाध्यत्वेनलिङर्थः तस्यलिङर्थत्वाभावेपि इतराख्यातसामान्यार्थतयालिङोपितदर्थकत्वेन
पचेतेत्यादौ इतेः पाकानुकूलकृतिमानित्यावश्यकतयातुल्यवित्तिवेद्यतयार्थस्याकदाचिदपि इतिसाध्य

ताभावात्। नचप्रसक्ते तुल्यवित्तिवेद्यतयाभानोपगमेपि परोक्षतदनुपगमान्नोक्तरीत्या इति सा-
ध्यताभाने संभवतीति वाच्यं। तथापि साध्यतासंबंधेन कृतिप्रकारकज्ञानस्यैव लाघवेन प्रवर्त्त-
कतयाख्यातसामान्यार्थकृतेः साध्यतासंबंधेनैव क्रियायां विधिवाक्यजन्यज्ञाने भानेन प्रवर्त्तक-
ज्ञानसंपत्तेः। नचेच्छायाः स्वप्रकारप्रकारकज्ञानजन्यत्वेन चिकीर्षायां कृतिसाध्यत्वप्रकारकज्ञान-
हेतुत्वस्यावश्यकत्वेन तद्द्वारा प्रवृत्तावपि तदावश्यकमिति वाच्यं। साध्यतासंबंधेन कृतिप्रकारक-
क्रियेच्छाया एव चिकीर्षात्वात्। नचपचतीत्यादेराख्यातार्थकृतेः क्रियाविशेष्यतयैव भानमिति
व्युत्पत्तेः कृततया पचेतेत्यादौ तस्याः क्रियाविशेषणतयाभानासंभव इति वाच्यं। व्युत्पत्तिवैचित्र्ये-
णतदुपपत्तेः। नचव्युत्पत्तिभेदस्य शक्तिभेदनिर्वाह्यतया शक्तिभेद आवश्यक इति वाच्यं। शक्त्य-
भेदेपि व्युत्पत्तिभेदे बाधकाभावात्। अतएव प्राचीनैराख्यातसामान्यार्थकृतेः शक्तिभेदं विनैव
व्युत्पत्तिभेदेन कर्तृप्रत्ययस्थले क्रियाविशेष्यतयाभाने कर्मप्रत्ययस्थले च क्रियाविशेषणतया

भावनामुपेयते। तत्र लिङः प्रत्ययात् कृतिसाध्यत्वावच्छिन्नस्य नियतोपस्थितेरनुभवसिद्धतया तत्र
लिङः शक्तिरावश्यकीति वाच्यं। तादृशानुभवे विवादात्। एवं बलवदनिष्टाननुबन्धित्वमपि न लिङ-
र्थः वन्ध्यायास साध्यके भेषिवद्भूतरदुःखस्यापि जायमानत्वेन तत्र प्रवृत्त्यनुपपत्तेः। तत् ज्ञानस्य प्रव-
र्तकत्वात्। अल्पदुःखस्यापि कुतश्चिद्द्वेषवत्त्वेनानुगतत्वानतिप्रसक्तेः बलवत्त्वस्य दुर्वचत्वाच्च। एवं
बलवदनिष्टाननुबन्धित्वस्य बलवद्द्वेषविषयदुःखाननुबन्धित्वमात्ररूपस्य ज्ञानेन प्रवर्तके
कालीनतरीयपुरुषीय बलवद्द्वेषविषयदुःखाननुबन्धित्वज्ञानेऽपि एतत्कालीनोऽपि एतत्कालीन
एतत्पुरुषीयतादृशद्वेषविषयदुःखाननुबन्धित्वज्ञानेन प्रवृत्त्युत्पादादस्तु तत्कालीनतत्पुरुषी-
यप्रवृत्तिं प्रति तत्कालीनतत्पुरुषीयबलवद्द्वेषविषयदुःखाननुबन्धित्वज्ञानस्यैव हेतुत्वेनान्य-
तथा यत्कालेऽपि पुरुषस्य कापि न तादृशद्वेषसत्त्वाप्रसिद्ध्या तज्ज्ञानासम्भवेन प्रवृत्त्यनुपपत्तेः प्र-
वर्तकज्ञानविषयस्यैव लिङर्थतया लिङो नानाशक्तिकल्पनापत्तेश्च। न चैवं कलञ्जभक्षणादौ प्र

या कौ
७२

हेत्वापत्तिरितिवाच्यं। तेनाचरमप्रवृत्तौ तत्तदाचरबलवद्द्वेषस्य प्रतिबंधकत्वेनाक्लापत्त्यभावात् अन्त
एवांतरालिकश्रमे यस्य बलवान्द्वेषस्स ज्योतिष्टोमे हि न प्रवर्तते अन्यस्तु प्रवर्तत एवेत्युपपद्यते।
अपि वेन कलंजभक्षणे यदि सादोनञ्ज्ञोलिङर्थाभावे बोधनानुपपत्तिः कलंजभक्षणादेरसाधि
ष्टसाधनत्वेन तदभावस्य नञा बोधनासंभवादिति चेन्न तत्र नञ्जोस्त्याः स्वार्थग्राहकतया नि
ष्टसाधनत्वस्यैव निरुढलक्षणया लिङर्थत्वात्। न चेष्टत्वोपदर्शिततरीत्या सामग्री प्रतिबंधकत्वे कल्प
नप्रयुक्तलाघवेनैव कृतिसाध्यत्वादिप्रकारकज्ञानस्य प्रवृत्तिहेतुत्वसिद्धिरितिवाच्यं। इच्छाया हेतु
त्वेकल्प्ये उत्तेजकत्वाभावेन स्थलांतरस्वतंत्रप्रतिबंधकतयैवोपपत्तौ समाप्ति तादृशसामग्री प्रतिबं
धकत्वकल्पनेन लाघवासंभवात् तस्मादिष्टसाधनत्वमात्रस्य लिङर्थत्वे दोषाभावात्स एव लि
ङर्थः एतेन कृतिसाध्यत्वादित्रयस्य लिङर्थत्वेन कलंजं भक्षयेदित्यादिनिषेधस्थले एकलिङभि
हितानां कृतिसाध्यत्वादित्रयाणां मध्ये कृतिसाध्यत्वेष्टसाधनत्वयोर्बाधात् सर्वं कलंजभक्षणादावेकस्य बलवदनिष्ट

ननु वैधत्वांशस्य नञर्थेऽन्वयेन केलिङः प्रसक्त्याभिहितेष्टसाधनत्वे वैशिष्ट्यकल्पनापत्तिः एवं
तस्यैवांशस्य विधिस्थले धात्वर्थान्वयितया क्रमस्य निषेधस्थले नञर्थान्वयेन तत्कल्पनापत्तिः ए
वं नपचेदित्यादौ नञर्थस्य प्रथमं तत्पदार्थे दृष्टान्वयस्य प्रसक्तत्वात् धात्वर्थान्वये न तत्कल्पनापत्तिरिति
दूषणोद्भावनं परास्तं निषेधस्थले नञस्तात्पर्यग्राहकत्वेन निरर्थकत्वात् अत्र प्राचीनमहादनुपाधि
नो मीमांसकाभिधेयविध्यर्थः तथाहि प्रवृत्तिर्द्विविधा स्वेच्छाधीना पराधीना च तत्र स्वेच्छाधीन
प्रवृत्तौ स्वेष्टसाधनताज्ञानं परप्रयोज्यप्रवृत्तौ परनिष्ठप्रवर्त्तनाज्ञानं च हेतुः अनिच्छतोपि पुत्रादेः
राजाज्ञादितः पित्रादिशिरश्छेदादौ प्रवृत्तिदर्शनेन राजा मां प्रवर्त्तयते रसाधाकारस्य ज्ञानस्यान्वयव्य
तिरेकानुविधानात्तत्प्रवर्त्तनात्वेनात्र प्रवृत्तिजनकत्वमतिरिक्तं कल्प्यते इति तत् एवं च स्वर्गकामो
यजेतेत्यादिविधिप्रयोज्ययागादिगोचरप्रवृत्तेरपि विधिरूपपरप्रयोज्यतया विधिनिष्ठाप्रवर्त्तना
ज्ञानस्य हेतुत्वमवश्यमुपेयं तत्र तस्यैव कारणत्वेनेक्षणीयात्तदन्तरेणान्यथा पालिङः ~~पदैसंस~~

मी॰ कौ॰
७३

निष्ठत्वं लिङः एतेन संभवतीति अभिधायां लिङः निष्ठत्वे लिङः प्रत्ययं चावश्यकं आज्ञादिरूपायाराज्ञादि
चेतनं निष्ठायाः प्रवर्तनायाश्चेतने लिङः संभवात् इयमभिधा शाब्दभावनापदवाच्यापि भावनाया
शाब्दभावनार्थभावनाभेदे न हि विधात्वं पभावनायां हि विध्यभावनांशत्रयवतीति भाट्टसंप्रदायवि
रोधः त्रिविधत्वस्य वांशत्रयरूपत्वादिति चेन्न भावनाज्ञाने किं भाव्यं केन भाव्यं कथं भाव्यमित्याकां
क्षोदयेन कर्मकरणेतिकर्तव्यतेतिततत्रितयाकांक्षास्थापकत्वस्य वांशत्रयवत्स्वरूपत्वात् नैव भाव
नाज्ञानोत्तरं तादृशाकांक्षोदये मानाभावः इति वाच्यं तथा सति लिङ्पदज्ञानजन्यार्थभावनाज्ञानानं
तरं यागादिगोचरार्थभावनाविशेष्यकस्वर्गादिफलकत्वप्रकारकबोधस्यानुभवसिद्धस्यापलापा
पत्तेः नचैवं फलाकांक्षासिद्धावपि करणाद्याकांक्षासिद्धेर्वेति वाच्यं कार्याकांक्षायाः कारणाकांक्षानि
यतत्वेन तस्या अपि सिद्धेः अत एवेतिकर्तव्यताकांक्षापि सिद्धा करणाकांक्षायाः करणाकांक्षायास्तन्नि
यतत्वात् अत एव विधिवादे पक्षधरमिश्रैरप्युक्तं अन्यथा स्वर्गादिफलं न भावयेत् तस्येतरन्नियतपायो

नत्वादितिअत्रस्वर्गादिफलंनभावयेदित्यस्यविधिनास्वर्गादिफलकत्वेनाप्यभावनान्बोध्येतेत्यर्थक
तयातस्यैतत्त्वित्तयाधीनत्वादित्यस्यचस्वर्गादिफलकत्वादिप्रकारकबोधस्यतादृशाकांक्षात्रयाधीनत्वा
दित्यर्थकत्वमोक्तार्थलाभात् नतुलिङ्‌पदादर्थभावनोपस्थितौतदुत्तरंनिरुक्ताकांक्षात्रयमभवतीत्युक्तेमतसं
गतेभट्टमतेअभिधायाएवलिङ्पदवाच्यत्वेनततःफलानुकूलव्यापाररूपार्थभावनोपस्थितेरसंभवा
तएवमभिधायाःशब्दभावनात्वाभावेनतस्याःशब्दभावनात्वाभिधानमप्यसंगतमितिचेन्नतेषांनिरु
क्तव्यापारस्याख्यातसामान्यार्थत्वेनलिङ्पदस्यापिशक्यतयाभिधायाःशब्दभावनात्वोपगमेनचोक्तासंगत्य
भावात् तदुक्तंभट्टपादैःअभिधाभावनामाहुरन्यामेवलिङादयः।अर्थात्मभावनात्वन्यासर्वाख्यातस्यगो
चरइतिअत्राभिधाभावनामितिसप्तम्यभिधोपत्तइत्यभिधाशब्दस्तस्मिन्शब्दभावनामित्यर्थः अन्यासर्वभावना
तोभिन्नाआहुःस्वशक्त्योपस्थापयेतिअर्थात्मभावनेतिअत्रार्थोधात्वर्थोयागादिःअर्पितत्वादात्मावाआत्म
त्वंजनकत्वरूपविषयित्वंवृत्तित्वंवाएवंचयागादिविषयीणांआत्मवृत्तिर्वाभावनाअपात्मभावनेत्यर्थ

द्यर्थो बोध्यः अत्राभिधारूपशाब्दभावनातोभिन्नासा वाख्यातस्य गोचर इत्यस्य सर्वाख्यातशक्येर्थः।
अथोक्ताकांक्षात्रयसहकारेणार्थभावनाकार्यं करणेति कर्त्तव्यताएतत्त्रितयान्विता लिङ्पदेन बो-
ध्यमइत्युक्तमसंगतं अर्थभावनायाः कर्मादीनां विशिष्यापरिचयादितिचेन्न तस्याः स्वर्गादिकं कर्मया-
गादिकं करणं प्रयाजादिसहकार्यं वेति कर्त्तव्यतेति प्रसिद्धत्वात् एवं शाब्दभावनापि कर्म करणेति क-
र्तव्यतेतत्त्रितयान्विता लिङाभिधीयते लिङ्शब्दात्तत्शाब्दभावनोपस्थितासत्यां अस्याः किं भाव्यं किं
करणं केति कर्त्तव्यतेत्साकारं क्षे जिज्ञासारूपाकांक्षोदयात् अस्याश्च भाव्यायायागादिप्रवृत्तिः करणं लिङ्श-
ब्दनिरूपितशक्तिज्ञानं वायुर्वैक्षेपिष्ठादेवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिंगम-
यतीत्यादिस्तुत्यर्थवादः सहकार्यं वेति कर्त्तव्यतेति न भाव्याद्यपरिचयः तदुक्तं भट्टपादैः लिङोभिधा से-
व च शाब्दभावनाभाव्या च तस्याः पुरुषप्रवृत्तिः संबंधबोधः करणं तदीयप्ररोचना चांगतयोपयुज्यते इति
अत्र लिङोभिधेयस्य स्वलिङ्वृत्तिरभिधेसर्थः वृत्तित्वं च स्वरूपसंबंधेन तस्य समवायानंगीकारात् शाब्दभाव

नेसस्यशब्दनिष्ठाभावनेसर्थः शब्दनिष्ठाभावनाशब्दभावनेतिव्युत्पत्तेः भाव्यस्यस्वफलमित्यर्थः संबं
धबोधइत्यस्यशक्तिज्ञानमित्यर्थः तदीयमित्यस्यशब्दभावनीयमित्यर्थः प्ररोचनेनेतस्यवायुर्वैक्षेपिष्ठादे
वतेत्यादिस्तुत्यर्थवादइत्यर्थः अंगतयेत्यस्यसहकारितयेत्यर्थः तदयंभट्टमतनिष्कर्षः स्वर्गकामोय
जेतेत्यादौ लिङ्गआख्यातत्वसामान्यशक्त्यार्थभावनोपस्थाप्यतेतदुत्तरंतत्रकर्मकरणेतिकर्तव्यता
कांक्षोपदर्शितिजिज्ञासासु पाजायेतेततः स्वर्गकर्मिकायागकरणिकाप्रयाजादीतिकर्तव्यताकास्वर्ग
कामकर्तृकाभावनेत्याकारकार्थभावनाविशेष्यकबोधपर्यवसायीस्वर्गकामः प्रयाजादिसहकृते
नयागेनस्वर्गंभावयेदित्याकारकोबोधः अत्रयागकारणकत्वंनयागनिष्ठकरणतानिरूपकत्वंया
गेर्थभावनाकरणत्वाभावात् किंतुयागनिष्ठविषयतानिरूपकत्वंरूपपारिभाषिकंतत्रविषयत्वंचा
त्रजन्यत्वंयद्वायागजन्यफलप्रयोजकत्वंप्रकृतेयागकरणकत्ववत्त्वंतत्स्वर्गोयस्यसत्त्वंतुकूलव्यापा
रसम्बन्धेनवात्रस्वर्गकर्मिकार्थभावनात्त्रयागकरणकत्वंचयोगघटितत्वमेवपि एतादृशकत्वंमात्र

७५

यागस्य संसर्गमर्यादया भासते न तु प्रकारतया तदुपस्थापकपदाभावात् तादृशपदकल्पने गौरवात्
न चात्र श्यनादेः कथं शाब्दबोधे सहकृतत्वरूपेतिकर्त्तव्यताकत्वसंबंधेन भाने तद्बोधकशब्दाभावादि
ति वाच्यं दर्शितसहकार्यकाङ्क्षायाः प्रकारान्तरेणानिवृत्तस्वरस्यपाद्यनुपपत्त्या श्यनादिपदाध्याहारेणै
व तादृशबोधोपपादनात् एवं व्युत्पत्तिवैचित्र्येण कामनाविशेषणत्वेनोपस्थितस्यापि स्वर्गस्य फलो
द्देश्यतासंबंधेनात्र यागकरणकभावनायामन्वयो बोध्यः एवं लिङ्गालिङ्त्वावच्छिन्ननिरूपितविशेष्यतात्म
शाब्दभावनायामुपस्थितौ किं भाव्यं केन भावयेत् कथं भावयेदित्याकारकजिज्ञासारूपाकांक्षा जायते ततः
पुरुषप्रवृत्तिकर्मिका लिङ्शक्तिग्रहकरणिका स्तावकार्थवादेतिकर्त्तव्यताका विधिनिष्ठा शाब्दभाव
नेत्याकारकशब्दभावनाविशेष्यकबोधपर्यवसायी विधिः स्तावकार्थवादसहकृतेन लिङ्शक्तिग्र
हेण पुरुषप्रवृत्तिं भावयेदित्याकारको बोधः अत्र विधिवाक्यात् तादृशार्थबोधकपदं श्रूयते तदर्थकप
दकल्पनयैव बोध उपपादनीयः ततः स्वर्गफलिका यागकरणिका प्रयाजादीतिकर्त्तव्यताका स्वर्गकाम

कर्तृकार्थभावनालिङ्पदनिरूपितशक्तिग्रहकरणकस्त्वर्थवादेतिकर्तव्यताकविधिनिष्ठशब्द
भावनात्मकप्रवर्त्तनाविषयइतिमहावाक्यार्थबोधःप्रवर्त्तकोज्ञापयत्तविध्युपरक्ताभावनालिङर्थइ
तिमहसिद्धान्तात्।विधिःप्रवर्त्तनातदुपरक्तातद्धित्सितार्थभावनालिङ्प्रतिपाद्येतितादृशसिद्धान्ता
र्थोवसेयः।नचतादृशसिद्धान्तोनियुक्तिकइतिवाच्यं।पितुःशिरश्छेदंकुर्वित्यादेराज्ञादिस्थलेराज्ञास
विषयस्तादृशशिरश्छेदानुकूलोव्यापारइत्याकारकस्यार्थभावनाविशेष्यकप्रवर्त्तनाप्रकारकबोध
स्यप्रवर्त्तकत्वस्यक्लृप्तत्वेनतदनुसारेणतादृशसिद्धान्तोपगमस्यनियुक्तिकत्वाभावात्।एतेनात्रविरु
द्धार्थभावनाविषयिणीनिरुक्तशब्दभावनेतिशब्दभावनाविशेष्यकार्थभावनाप्रकारकएवमहावा
क्यार्थबोधःअन्यथावान्तरार्थभावनाविशेष्यकबोधमात्रस्यस्वर्गादेःप्रकारत्वयान्वयस्यक्लृप्ततयाम
हावाक्यार्थबोधेभाव्यार्थभावनायाःप्रकारतयाभानस्यैवाचित्यादितिकेषांचिद्युक्तिरप्येवंतयासप्सुप
दर्शितसिद्धान्तविरोधापत्तेयदिच्छराजादिस्थलेपिप्रवर्त्तनाविशेष्यकबोधस्यैवोपगमेनविद्धिसंवन्नाभा

वनाल्लिङर्थे इति सिद्धान्ताविरोध इत्युच्यते तेन तदा स्वप्रवर्त्तनाविशेष्यकबोधः का नो हानिरिति अत्रा
पि शाब्दभावनायां शक्तिग्रहकरणकत्वे शक्तिग्रहप्रयोज्यप्रवृत्त्यादिरूपफलप्रयोजकत्वरूपं पारिभा
षिकमेव यथा पश्यते शक्तिग्रहे शाब्दभावनाया जनकत्वरूपकारणत्वाभावेन तथाविधकरणात्वानिरू
पकत्वरूपतत्कारणकत्वस्यासंभवेनासंगत्यापत्तेः अत्रापि दैवकरणकत्वादेः संसर्गविधयैव भा
नेऽनुपगन्तव्यं प्रयत्नसंविधवाक्येन श्रूयते तत्तदंकल्पनीयमित्युक्तमेव अत्रायं तरबोधे भावना
फलकत्वभानेऽपि महावाक्यार्थबोधे तन्नभासे तत्प्रयोजनाभावात् अपवादप्रयमनुपदर्शितो शात्रम
विशिष्टार्थभावनाविशेष्यक एवं आवांतरबोधः तदुत्तरं च शाब्दभावनायामनुपदर्शिताकांक्षायां सत्या
मनुपदर्शितासवैत्रय विशिष्टार्थभावनाविशेष्यकनित्तकशाब्दभावनात्वे विशिष्टप्रवर्त्तनाविषयत्व
विषयकविषयकमहावाक्यार्थबोधउत्पद्यते न तु शाब्दभावनाविशेष्यकावांतरबोधेऽपि प्रयोजनाभा
वामध्यतयाबाधकल्पने गौरवात् अत्र च विषयत्वं जन्यत्वे तदैवपृष्टाकांक्षानिवृत्तेरिति अत्रेमह

वाक्यार्थबोधे अर्थभावनायां स्वर्गादिफलकत्वभाने ननु घटेन जलमाहरेत्यादौ छिद्रेतरत्वादिवदन्वयप्र
योजकरूपवत्त्वरूपयोग्यताविधया अर्थभावनायां प्रवर्त्तनाविषयत्वावयतस्येतादृशयोग्यतासार
अथाच्च यत्र योजकरूपवत्त्वरूपयोग्यताज्ञानविधयार्थभावनानिष्ठस्वर्गादिफलकत्वज्ञानस्य तत्र हे
तुत्वे अभिधायिनतत्वेन साक्षात्स्वरूपसतीवा हेतुरस्ति प्रसंगादिति प्रवर्त्तनात्वेन ज्ञानानेचानिष्फ
लत्वदुःखैकफलेवा कर्मणि सात्तयाज्ञातुं शक्यते अपितु भावनात्वेन साक्षात्तानच्च भाव्यानुपस्थितौ तत्सं
भवः नचक्रियाभाव्याकष्टत्वादिति समभिव्याहृतफलेप्रतिभावनात्वेन ज्ञाते लिपक्षधरमिश्रग्रंथासं
गतिः तेन ग्रंथेन प्रवर्त्तनात्वेनाभिधान्वयप्रअभिधागतस्वर्गादिफलजनकत्वलक्षणान्वयप्रयोजक
रूपवत्त्वरूपयोग्यताज्ञानस्य हेतुतायास्त्वभावादिति चेन्न तत्र भावनात्वेन ज्ञाते स्वनंतरंस्यानत्रेति फर
पित्वासात्तयाज्ञातुं शक्यते इष्टसनेन सहान्वयीगीकारणयत्रार्थभावनायाफलभावनात्वेज्ञाने तत्र सा
प्रवर्त्तनात्वेन ज्ञातुं शक्यनत्स्वरूपकस्यतयाविधग्रंथस्यापीत्वएवविध्यामेणासंगतेरभावात्‌ अन्यात्रा

र्थभावनायामप्रसक्तेस्तत्त्वेन कथमुक्तार्थलाभ इति वाच्यं । दुःखैकफले कर्मणि स्वर्थकर्मपदस्याभि
धानार्थकत्वेन तस्याः प्रसक्तेस्तथा च एवं प्रवर्तकज्ञाने संपत्स्यर्थमपि तज्ज्ञानमावश्यकं । यागादौ निष्फल
त्वज्ञानकाले प्रवृत्तिवारणाय स्वकरणकत्वसंबंधेन यागादिविशिष्टायामर्थभावनायामिष्टसाधन
ताज्ञानस्य हेतुतायां भट्टमते सिद्धत्वात् यागादिविशिष्टभावनायामिष्टसाधनताज्ञानकाले विशेषणीभूत
यागेपि इष्टसाधनताज्ञानस्यावश्यकतया तथाविधेष्टसाधनताज्ञानकाले यागादौ निष्फलत्वज्ञानासं
भवात् न चैवं सति न्यायमतादविशेष इति वाच्यं । न्यायमते किं यागत्वेष्टसाधनताज्ञानत्वहेतुतया विशेष
संभवात् । किंचित्तु अर्थभावनागतेष्टसाधनताज्ञानेन भट्टमते प्रवृत्तिहेतुः अपि तु अभिधागतेष्टसा
धनताज्ञानेन अत एव पक्षधरमिश्रैरप्युक्तं किं यागत्वेष्टसाधनत्वेन विध्यर्थः अपि त्वभिधागतमिति
विशेष इति अन्यथा लेपांत त्र विध्यर्थत्वकथनस्यासंगतेरित्याहुः तच्च तथासति क्रियायां निष्फलत्वज्ञा
नकाले प्रवृत्तिवारणासंभवात् अर्थभावनाविशेष्यकेष्टसाधनताज्ञानहेतुत्वे तु तद्वारणप्रकारस्यान्

त्वात् न चैवं सति अभिधागतमिति मिश्रग्रंथविरोध इति वाच्यं लक्षणयातत्रापि पदस्यार्थभावनापर
त्वात् न चैवं सत्यपि मिश्रग्रंथविरोधः मदयत्तेभिधायाप्रवलिङ्‌र्थत्वेनार्थभावनागतेष्टसाधनत्व
स्यतदर्थत्वाभावादिति वाच्यं तत्रस्य विध्यर्थशाब्दस्य विधिजन्यप्रतीतिविषयार्थकत्वेन तथाविधशा
ब्दबोधे फलकतासंबंधेन स्वर्गादेरन्वये स्वर्गादिफलकत्वस्यापि निरुक्तविधिप्रतिपाद्यत्वेनाविरो
धाभावात् अपि च फलभावनात्वेन तथाविधशाब्दबोधे फलकत्वे नार्थभावनामात्रे बोधस्तु अर्थ
भावनायां तथाविधप्रवर्त्तनाविषयत्वभाने निष्फलमिति चेन्न तद्दोषं च यद्यपरप्रयोज्यप्रवृत्तौ तद स्थ
नुकूलपरनिष्ठप्रवर्त्तनात्वेन तस्यानन्यकारणता यागाराजाज्ञादिकं तन्नानुरोधेनावश्यकतयात्तत्संप
त्त्यर्थमेव तदुपगमात् न च तदुपगमेपि कथं तादृशाकारणसंपत्तिरिति वाच्यं स्वस्य साध्यताज्ञान
कालेयागादौ प्रवृत्तिवारणाय यागादिप्रवृत्तौ यादृग्गोचरकृतिसाध्यताज्ञानस्य हेतुनयात्तत्संपत्त
ये स्वजन्यत्वस्वविषयोन्यतर इति संसर्गान्यतररूपस्वविषयत्वसंबंधेन शाब्दभावनाया यागादिविशि

ष्टार्थभावनायामन्वयोपगमनेऽसमानवित्तिवेद्यतया शाब्दभावनायाः प्रतिस्वजनकहेतिप्रयो
जकत्वरूपयागाद्यनुकूलत्वबोधस्यावश्यकत्वपाताद्दृशकारणसंपत्तिसंभवात् नच तत्राप्यर्थ
भावनायां प्रयाजादिसहकृतत्वभाने मानाभाव इति वाच्यं प्रयाजादिसहकारिसंदेहसर्गादिफ
लजनकत्वसंदेहादितस्य प्रवृत्तिप्रतिबंधकस्य दृषस्यासारणार्थं तत्र तदन्वयोपगमात् अत्रा
पि यागादिविशिष्टार्थभावनायां तज्ज्ञाने यागादिविशेषणेपि तज्ज्ञानेनानुपपत्त्यभावात् न चैवम
पि प्रवर्तनायै तत्कस्यार्थवादरहस्य तत्वस्य भाने किमर्थमिति वाच्यं। बलवदनिष्टाननुबंधित्वरूप
प्रवर्तकस्यानसंपत्त्यर्थं तदुपगमात् न च तत्कस्यार्थवादेन कथं तत्संपत्तिरिति वाच्यं। तदुपकोऽम्भत
यत्किंचित्सदस्य प्राशस्त्यरूपबलवदनिष्टाननुबंधित्वलाक्षणायोपगमात् अत एव अर्थवादानां स्वा
र्थे प्रामाण्यमिति सिद्धांतेन च तथापि स्वकारणकत्वसंबंधेन तत्र लिङ्शब्दनिरूपितशक्ति
ज्ञानेभावे किंमानमिति वाच्यं करणांशे बलेन तत्र तज्ज्ञानात् इदमत्रावधेयं पक्षधरमिश्राणां

शाब्दभावनाविशेष्यकार्थभावनाप्रकारकबोध एवं संमतः तथा सत्येव पूर्वोपदर्शिततद्रूपस्य भाव
नात्वेन ज्ञाते तस्य नेतरं यात्त्रेति पूरणं विनैव अभिधायतमिति विशेषइस्यत्राभिधायदस्यार्थभा
वनायाल्लक्षणां विनैव यथाश्रुततद्रूपस्य स्वरसत एव निर्वाहात् न च शाब्दभावनायां स्वर्गादिफलक
त्वस्याभाने कथं स्वरसतस्तन्निर्वाह इति वाच्यं स्वर्गादिफलकत्वविशिष्टायाः स्वविषयकत्वसंबंधेन
योगविशिष्टायाभावनायाजनकस्वरूपविषयितासंबंधे शाब्दभावनायामन्वये विशिष्टान्वयमपि
दयान्वयप्रयोजकरूपवत्त्वरूपयोग्यताविधया स्वर्गादिफलकत्वलाभसंभवात्। अर्थभावनावि
शेष्यकबोधांगीकारे तु पदर्शितरीत्या पूर्णे लक्षणयोरनुसरणक्लेशः स्फुट एव एवमेतन्मते शाब्दभाव
नायां यागाद्यनुकूलत्वयागादौ कृतिसाध्यताज्ञानसंपत्तिरुक्लेशेस्यासमानवित्तिवेद्यतानुसरणं वि
नैवं निर्वेह इति शाब्दभावनायां यागादिविशिष्टार्थभावनयाः स्वजनकत्वस्वजनकत्वे इति प्रयोजकत्वान्व
तररूपस्वविषयत्वसंबंधेनान्वयोपगमेन शाब्दभावनायां स्वजनकत्वे इति प्रयोजकत्वरूपयागाद्यनुकूल

त्वबोधस्य स्वरसत एव लाभात् एव लाभात् उक्तमते च समानवित्तिवेद्यत्वानुसरणन्तोन्नाः शाब्द
बोधे समानवित्तिवेद्यत्वाभावेन तदनुसरणे [illegible] पत्ति वह्निव्यस्फुटत्व एव तन्मते यागादौ सफलत्वव
लवदनिष्टाननुबंधित्वयोर्लाभोपि विशिष्टान्वयपर्यादपासुघट एव· न चैतन्मते विध्युपरक्तामा
वेनालिङर्थ इति सिद्धांतविरोध इति वाच्यं प्रवृत्ते विधित्वस्य प्रवर्तकज्ञानप्रकारत्वरूपत्तपाउक्तम
ते शाब्दभावनायामिवैतन्मतेप्यर्थभावनायां तत्सत्वेनाविरोधात् विध्युपरक्तेत्यस्य विधिसंबद्ध
स्यार्थकतामुपेत्य तादृशसिद्धांताविरोधस्य पूर्वमुपदर्शितत्वाच्च एवमेतन्मते लिङर्थत्वं लिङ्त्वा
वच्छिन्नशक्तत्वरूपपर्याप्तमेव उक्तमते तु लिङ्जन्यप्रतीतिविषयत्वरूपं वाच्यमिति वैषम्य
मपि स्फुटमेवेति दिक् अत्र भट्टमते लिङ्त्वावच्छिन्ननिरूपितशक्तिचतुष्टये बोध्ये एकांशा शाब्दभाव
नात्वज्ञानानुकूलात् ज्ञानस्याकांक्षास्थापकत्वेन शाब्दभावनात्वविशिष्टप्रवर्तनात्वज्ञानानुरोधेन
चावश्यकत्वात् अपराच्च प्रवर्त्तनात्वज्ञानानुकूलाशाजादिस्य लोप इति जनकत्वेन क्लृप्तस्य तादृश

ज्ञानस्यावश्यकत्वात्। अपराञ्च प्रवृत्त्यनुकूलाऽभिदाख्यासाक्षात्प्रवृत्त्यजनकेन शाब्दप्रवृत्तिजनने
व्यापारत्वेन तस्यास्यावश्यकत्वात् अपराचाभिधात्वस्यानानुकूलात ज्ञानस्याप्यनुभवसिद्धत्वादिति शा
क्तिचतुष्टयमिति वदंति अत्रान्येते शक्तिभिन्नस्याभिधापदवाच्यत्वे मानाभावेन कुत्रतव्याशक्तिके
ल्पनेन च पदस्य योग्यप्रवृत्तिं प्रति परनिष्ठप्रवर्त्तनाज्ञानस्य हेतुतापाराजात्यादिस्थलानुरोधेनावश्य
कत्वात्पा विधिनिष्ठप्रवर्त्तनाज्ञानं विना न प्रवृत्तिरिति तदुपयोग्यपदर्थविधिनिष्ठोऽभिधाख्यातिरिक्तपदार्थो
वश्यं विधिशास्त्रमुपेयपरंति यान्वें स्वेच्छाधीनप्रवृत्तिस्थलेऽवश्यकृत्यस्वेष्टसाधनताज्ञानहेतुतयैव
राजाज्ञादितः पित्रादिशिरश्छेदादौ पुत्रस्य इष्टसाधनताज्ञानकल्पनेन प्रवृत्तिनिर्वाहात् तादृशकार्य
कारणभावे मानाभावात् अपतत्पापि व्यापारभिन्नस्य कारणस्य परसमवेतव्यापारजनकत्वे स्वनि
ष्ठव्यापारद्वारैवेति नियमे स्वनिष्ठस्पंदादिद्वाराचेक्कादिनिष्ठप्रमिजनके दंडादाववधारितत्वात्तादृ
शनियमवत्त्वेन लिङादेरपि समवेतप्रवृत्तिजनकत्वेस्यानिष्ठाभिधारूपव्यापारद्वारैव निर्वहतीति

लिङः निष्ठात्मधाख्यापदार्थे सिद्धिरावश्यकीति चेन्न । अनुमितिकरणव्याप्तिज्ञानादौ अस्मदादिसम
वेतपरामर्शादिजनके स्वनिष्ठव्यापारद्वारकत्वाभावेन व्यभिचारात् तादृशनियमस्यैवासिद्धेः । न च प
रसमवेतव्यापारजनकत्वे स्वव्यधिकरणव्यापारजनकत्वरूपं नियमघटकमिति न व्याप्तिज्ञानादौ
व्यभिचारः अस्मदादिसमवेतपरामर्शस्य तद्व्यधिकरणत्वाभावादिति वाच्यं । तथापि गर्भाधाना
दौ स्वव्यधिकरणपित्रादिनिष्ठादृष्टरूपव्यापारजनके स्वनिष्ठव्यापारद्वारकत्वाभावेन व्यभिचारस्य
दुर्वारत्वात् अनुकूलतर्काभावेनोपदर्शितनियमस्याप्रयोजकत्वाच्च एवमुक्तरीत्येष्टसाधनताज्ञा
नस्य प्रवृत्तिसामान्ये हेतुत्वावधारणे नआवश्यकेष्टसाधनताज्ञानविषयेष्टसाधनत्वस्यैव विध्य
र्थत्वौचित्यात् । एतेनाप्ताभिप्रायो विध्यर्थः स चेच्छाविषयरूपः प्रवर्त्तनाख्यो लिङादिवाच्य इत्यस्यापि
वक्ष्यमाणदोषदुष्टतया ऽयमत्र प्रवर्त्तनामित्याकारकप्रवृत्त्युद्देश्यकेच्छात्मकप्रेरणारूपप्रवर्त्तनेति
लक्षणप्रवर्त्तनायाश्च लोके पुरुषनिष्ठत्ववेदत्वेश्वरनिष्ठत्वसाधारण्यमतमपि परास्तं । मीअत्राभिनवमीमांसकाः इष्टसाधनतासी [illegible]

ञादिवाक्यात्तथाहि। इष्टसाधनतायां लिङ्त्वेन प्रवर्त्तनप्रवर्त्ततीसत्र हस्ततः प्रथमांतपदार्थनिष्ठार्थचार
त्वयांगीकारनिमित्तव्युत्पत्तिद्वयेन प्रवर्तनप्रवर्त्तेदित्यत्र नत्रस्थवणतुल्यत्वेपि प्रथमांतपदार्थधात्व
र्थमुख्यविशेष्यकबोधांगीकारेण व्युत्पत्तिद्वयं नातिरात्रं इत्यादिवाक्येचनन्वयर्थविध्यर्थेष्टसाधनतान्व
यांगीकाराद्युपपत्तिः स्वनेत्रेति व्युत्पत्तिपंचककल्पनेगौरवं निरूक्तेप्रेरणायांलिङ्वाच्यत्वेच प्रवर्तेदित्यत्र
पाकंभावनायांस्वप्रयोज्यत्वसंबंधेनलिङ्र्थः प्रेरणान्वयवत्तनप्रवर्तेदित्यत्रापिस्वप्रयोज्याभावप्र
तियोगित्वसंबंधेनपाकभावनायामेव प्रेरणान्वयान्न व्युत्पत्तिभेदकल्पनेपचतीत्यत्र चैवंवादः
कृत्या बाधेयत्वसंबंधेन वननप्रवर्ततीत्यत्रापिस्वाश्रितभावप्रतियोगित्वसंबंधेन कृत्यावेवान्वया
न्नेतत्कल्पनेमितिलाघवैः किंचाचार्यहृक्तगामातयेत्यादिवाक्यजन्येष्टसाधनताज्ञानादेवशिष्या
देः प्रवृत्तौवाचार्यप्रेषितोहंगामानयामीत्याशयाचार्यादेः प्रवर्त्तकत्वव्यवहारानुपपत्तिः इष्टसाध
नतारूपप्रवर्तनायाआचार्यादावसत्वेनप्रवर्त्तनाश्रयत्वरूपप्रवर्त्तकताभावात् अस्मन्मतेतुप्र

न्या॰ कौ॰
८

रणारूपप्रवर्त्तनाश्रयत्वस्यात्र चैत्रे सत्त्वान्न तद्व्यवहारानुपपत्तिः न च प्रवृत्तिजनकेष्टसाधकताबो
धकलिङ्गाद्युच्चारयितृत्वाभावात् अस्मन्मते तत्त्वेन प्रवर्त्तकत्वव्यवहारवाच्यं तथा सति राजप्रेरित
पदातेस्तादृशलिङ्गाद्युच्चारयितृत्वेन प्रवर्त्तकत्वापत्तौ पदातिप्रेरितोऽहं न गमामान्त यामि किं तु राजप्रे
रित इति पदातौ प्रवर्त्तकत्वाभावव्यवहारानापत्तेः न चाप्तप्रेरितत्वसत्त्वे तादृशलिङ्ग्याद्युच्चारयितृत्वे
प्रवर्त्तकत्वमिति नोक्तदोष इति वाच्यं तथा सति विष्णुना प्रेरितो राजा इति प्रवर्त्तकत्वव्यवहारानापत्तेः किं
च भवन्मते येन स्वतन्त्र इष्टपाकादौ इष्टसाधनत्वादिबुध्या प्रवर्त्तितस्य पाकाभावेनावर्त्तमानं तादृशायां
चैत्रः पचेदिति प्रयोगापत्तिः इष्टसाधनत्वादिविशिष्टपाकानुकूलकृतिमत्त्वस्य चैत्रे बाधितत्वा
त् अस्मन्मते तु तादृशप्रवृत्तेः प्रेरणाप्रयोज्यत्वाभावान्नाद्युक्तप्रयोगस्य प्रामाण्यापत्तिः अपि च भवन्मतेऽपि प
राप्रेरणाद्यैवैत्रस्य प्रवृत्तिस्तत्र पाकाभावेनावर्त्तमानं तादृशायां चैत्रः पचेदिति प्रयोगस्य प्रामाण्या
पत्तिः परकृतानुकूलादौ चैत्रनिष्ठकृतेः प्रेरणाप्रयोज्यत्वस्य बाधादिति चेन्नैवं प्रयोज्यत्वे हि स्वला

८

नजन्येष्टसाधनतानुमितिजन्यत्वं स्वज्ञाने प्रेरणाज्ञाने तन्नव्यक्ततत्प्रवृत्तिप्राक्कालवृत्तित्तत्रलिङादि
पदज्ञानेनोत्पादितेव्यक्त्यात्मनासंवेधप्रवेशात्तदितितादृशाव्यक्तिजन्येष्टसाधनतानुमितिजन्यत्वे
स्वरूपयोग्यत्वे लिङः प्रेरणात्वाभावेनान्वयेसंसर्गे इतितादृशसंसर्गेण लिङः प्रेरणावत्त्वस्याभावेना
वर्त्तमानतादृशायांतस्यांबाधानपवेदिलिप्रयोगापत्तिः किंवास्मत्प्रभृतादिष्टसाधनत्वस्यनलिङ्गान्यत्वे
प्रवृत्तिं विषययागादेरिष्टसाधनतानुमानेनैवेष्टसाधनताबोधसंभवात्तत्सम्भवतिहित्रयमत्रप्रवर्त्तताभि
सीकारकामेच्छाविषयत्वेरिष्टसाधनत्वव्याप्यसत्तत्त्वेनतदनुमानेऽप्रत्यासुखेसुखत्वप्रकारेणसुखएव
वासुखंमेजायतामित्युदासीनेच्छाविषयत्वेपिरिष्टसाधनत्वाभावात्तत्रव्यभिचारवारणायहेतावाकार
कपर्यंतनुसाधवनंप्रतारकतादृशेच्छाविषयेव्यभिचारवारणायायेति। अत्रेच्छाविषयत्वंरिच्छाविष
योन्हतत्प्रवृत्तिविषयत्वेबोध्यंतेनप्रवृत्तौतदृशप्रयुक्षेच्छाविषयरिष्टसाधनत्वाभावेपिनव्यभिचा
रः यागादावेवहेतुसत्त्वादिष्टसाधनतानुमानमितिवदंति। तदसत्तलाघवेनव्युत्पत्तिभेदकल्पनमना

रस्य संबंधभेदमात्रमाश्रित्य पचति न पचतीत्यादौ समानाकारबोधांगीकारे चैत्रः पचति न पचती
त्यादिवाक्यजन्यशाब्दबोधानंतरं वर्त्तमानकालीनपाककृतिमत्तदभाववांश्चैत्र इति संशयनिरास
स्यानुभविकस्यानुपपत्तेः पाककृतिः किंदृशीति प्रश्ने चैत्रः पचति न पचतीत्युत्तरयोरौचित्यापत्ते
श्च। भवन्मतेपि संसर्गभेदेन व्युत्पत्तिभेदकल्पनप्रयुक्तगौरवस्यावश्यकत्वाच्च। किंच चैत्रः प
श्यति चैत्रं पश्यति चैत्रेण पश्यतीत्यादौ लाघवात्तद्भिन्नक्तौ नोतत्तदर्थसंसर्गकबोधजनकताया
हकतामंगीकृत्य चैत्रप्रकारकक्रियाविशेष्यककैकरूपबोधांगीकारसंभवेन प्रतिसमभिव्याहारं
नामार्थसुवर्थयोः सुवर्थक्रिययोश्चान्वयेनिर्वाहाय व्युत्पत्तिभेदांगीकारप्रयुक्तगौरवस्यापत्तिः
एतेन पचेत्र पचेदित्यत्रापि व्युत्पत्तिभेदकल्पनाभावप्रयुक्तलाघववोक्तिर्निरस्ता पचेदिति शाब्द
बोधात् प्रवर्त्तप्रतिनिवर्त्तप्रतिवर्त्तिसंशयनिरासासंभवनात्यतादृशबोधादेव कृतिः प्रमाणाव
तीन वर्त्तिसंशयनिरासापत्तेश्च कीदृशी कृतिरिति प्रश्ने पचेत्र पचेदित्युत्तरस्यापत्तेश्च किंचेत्या

दिनोक्तचार्यादेः प्रवर्त्तकत्वव्यवहारानुपपत्तिरप्यसंगता स्यात्तेष्वेसत्तिप्रवृत्तिजनकेष्टसाधनताबो
धजनकलिङादेस्त्वारोपितत्वस्यैव प्रवर्त्तकत्वरूपत्वात् राजप्रेरितपदातेः स्वातंत्र्याभावात्त्वेपि तु नप्रेरि
तराजादेः स्वातंत्र्याभावप्रवर्त्तकत्वप्रवर्त्तकत्वव्यवहारापपत्तेः पाकंभावनावर्त्तमानत्वात्तादृशायांपचेदिति
प्रयोगापत्तिरप्यसंगता तादृशप्रयोगवारणं भवतांमपायापहस्तदाभावनानिष्टत्वात्तत्र सवृत्तिप्राका
लीनतत्तल्लिङादिपदज्ञानोत्तरत्वस्य तादृशप्रयोगोपाधित्वमंगीकृत्यत्वस्यानुकूलत्वस्य प्रतिपादकधातु
समभिव्याहृततत्तत्प्रवृत्तिप्राकालीनतत्तल्लिङादिपदज्ञानोत्तरत्वोभयसंबंधेन पाकस्य हेतुतावच्छेदकम
गौहेस्सवासवारणायः प्रेरणायेष्टसाधनत्वस्याक्षेपेणान्यलभ्यत्वं तस्य लिङ्वाच्यत्वाभावे प्रयोजकं तथा
पुरुषव्यस्तेतदपि नसत्, इष्टसाधनत्वेन प्रेरणायाअप्याक्षेपसंभवेन प्रेरणायाअप्यन्यलभ्यतया लिङ्वा
च्यत्वासंभवात्। तथा हि दृश्यते हि कुलालसमीपे घटसामग्रीं दृष्ट्वा तिपुरुषे कुलालस्य घटनिर्माणप्रवृत्तु
द्दृश्य केष्टानुमानेन तत्प्रवृत्तस्य च कुलालस्य तत्प्रेरितत्वमवावटः दूतइत्यादिव्यवहारः भवति चेष्टसा

न्या० कौ०

८२

धनत्वादिज्ञानं प्रवृत्तिसामग्र्यां घटकं भवद्भिरपि प्रवर्त्तनयात्तत्स्वरूपांगीकारात्। एवं चेष्टसाधनताबोधक
शब्दोच्चारणमहिम्नैव प्रवृत्युद्रूपकेच्छात्मप्रेरणाया अन्यलभ्यत्वान्न लिङाद्यर्थत्वेन च प्रवर्त्तकीरीत्या वैपरि
त्यस्यापि संभवाद्विनिगमनाविरह इति वाच्यं शब्दनिरपेक्षस्वतःप्रवृत्तौ बालस्य स्वेष्टसाधनताज्ञान
जन्यत्वस्य प्रेरणाज्ञानाजन्यत्वस्य चावगमेन शब्दसमनंतरं भाविप्रवृत्तिहेतुत्वेनेष्टसाधनताज्ञा
नुमानासंभवस्यैव विनिगमकत्वात् शब्दापेक्षपरप्रवृत्त्यप्रवृत्तौ इष्टसाधनताज्ञानमनपेक्ष्य प्रे
रणाज्ञानजन्यत्वस्याप्यनवगमात् तत्र प्रेरणाया इष्टसाधनत्वेन प्रेरणाक्षेपकत्वाद्वाच्यत्वमिति दिक्।
किंचेच्छारूपप्रेरणाया लोके पुरुषनिष्ठत्वे संभवेपि वेदस्य भवन्मतेऽपौरुषेयत्तया सा किंनिष्ठेति व
क्तव्यं न च वेदे साक्षाल्लिङादिनिष्ठैवेति वाच्यं गुणे गुणानंगीकारात् जन्यसत्वात् वाच्छिन्नप्रतिद्रव्यत्वे
न समवायिकारणत्तया लिङ्-चिच्छायाः समवायिकारणत्वासंभवाच्च न च शब्दस्य द्रव्यत्वान्न दोष इ
ति वाच्यं स्पंदसमवायिकारणतावच्छेदकतया सिद्धस्य मूर्त्तत्वस्य तत्राभावेन मूर्त्तद्रव्यत्वस्य विभुत्वाभा

८२

वेनामूर्त्तद्रव्यत्वस्य विभुत्वाभावेनामूर्त्तद्रव्यत्वस्य चेतनत्वासंभवात्। न च भगवतो जीवाव्यतिरिक्तेश्वरेऽपि
स्वच्छांगीकारवद्दिक्शब्देऽपि निसेच्छांगीकारे बाधकाभावः। गुणेऽगुणस्याभ्युपगमादिति वाच्यं।
ईश्वरस्य चेतनत्वेन ज्ञातृत्वस्य वा चेतनत्वेन चैवैषम्यात्। अस्तु भव विरुद्धयत्किंचित्कल्पने उपेक्षणीयता
पत्तेश्च। अत्रेदं विचार्यते इष्टसाधनत्वं विषयितया प्रवृत्तिजनकतावच्छेदकत्वपर्याप्त्यधिकरणेन वा
इष्टसाधनत्वज्ञानाकालीनकृतिसाध्यत्वज्ञाने प्रवर्त्तकेन चेति वा विप्रतिपत्तिः तत्र प्रथमे विधिको
टिर्नैयायिकानां निषेधकोटिर्गुरूणां द्वितीये विधिकोटिर्गुरूणां निषेधकोटिर्नैयायिकानां अत्र गुरवः
कृतिसाध्यताज्ञाने चिकीर्षाद्वारा प्रवृत्तिसाध्यताज्ञानस्य प्रवृत्तौ हेतुतायां मानाभावः कृत्यसाध्यता
ज्ञानेकान्तेऽप्रवृत्तिवारणाय कृत्यसाध्यताज्ञानाभावस्यैव हेतुत्वमस्त्विति। वाच्यं पापप्रकारिकेच्छासा
सा तत्प्रकारकज्ञानसाध्या इति व्याप्तिबलात् चिकीर्षाप्रति कृतिसाध्यताज्ञानस्य हेतुत्वसिद्धौ चिकी
र्षाद्वारा कृतिसाध्यताज्ञानस्य प्रवृत्तिहेतुत्वसिद्धिः अन्यथा कृत्यसाध्यताज्ञानस्य हेतुत्वे निष्प्रयत्वेति

वेशेन गौरवमिति वाच्यं। इतरसाध्यताज्ञानत्वेन प्रतिबंधकतायां गुरुसत्त्वनिश्चयानास्कंदितत्वनिवेशे
प्रहोगौरवापत्तेः कृतिसाध्यत्वनिश्चयापेक्षया बलमत्वनिश्चयत्वस्य गुरुशरीरत्वात्। अत्र केचित्
कृतिसाध्यताज्ञाने इतरसाध्यताज्ञानाभावस्य हेतुत्वे कल्पनीये तत्र इतरसाध्यताज्ञानाभाववि
शिष्टं प्रति इतरसाध्यताज्ञानाभावत्वेन हेतुत्वे कल्पनामप्रवृत्तेरपि इतरसाध्यताज्ञानाभाववि
शिष्टतया कृतकार्यकारणभावेनैव निर्वाहसंभवात् न प्रवृत्तौ इतरसाध्यताज्ञानाभावस्य
स्वातंत्र्येण हेतुत्वमिति प्राहुः। तदसत्। कृतिसाध्यताज्ञानस्य हेतुत्वे भवदुक्तरू बोधदर्शिनं दोसा
पाकगोचरप्रवृत्तिं प्रति कृतिसाध्यत्वाभाववान्पाकेष्टसाधनतानुमितिसामग्र्याः प्रतिबंधकत्वे
न कल्प्यते प्रवृत्तिसामग्र्यां कालेपाकत्वघटितावच्छेदक कृतिसाध्यताज्ञानस्यावश्यकत्वेन बा
धानुद्देपेव तादृशानुमितिप्रतिबंधकत्वेन बाधाभावघटितानुमितिसामग्र्याः प्रवृत्तिसामग्र्या
श्च युगपन्मिलनासंभवेनैवोपपत्तेः भवन्मते इतरसाध्यत्वप्रकारकज्ञानाभावघटितप्रवृत्तिसामग्री

सत्त्वकालीनतादृशानुमितिसामग्रीकालेपाकगोचरप्रवृत्तिवारणाय तादृशानुमितिसामग्र्याः प्रति
बंधकत्वकल्पनेन महागौरवापत्तेः न तु इति साध्यत्वाभाववत्साकचंशाए तादृशविशिष्टविषयताशालि
मानसंप्रतिपाकगोचरप्रवृत्तिसामग्र्याः प्रतिबंधकत्वेन कल्प्यते तत्र तादृशमानससामग्रीकालेपाक
विशेष्यक इति साध्यत्वाभावप्रकारकज्ञानस्यावश्यकत्वे प्रवृत्तिसामग्र्याएवाभावात् इति पाकः इति
साध्यत्वाभाववत्त्वाए तादृशज्ञानाभावस्य हेतुत्वे लाघवमिति वाच्यं। इति साध्यत्वप्रकारक इति साध्य
त्वाभावप्रकारकपाकविशेष्यकज्ञाने पोरेकराऽसत्वेन तादृशमानसंप्रति तादृशसामग्र्याः प्रतिबंधक
त्वमप्यापि न कल्प्यत इति लाघवाभावात् एवं इति साध्यताशानस्य हेतु इति साध्यत्वप्रकारकपाकवि
शेष्यकज्ञानत्वावच्छिन्नाभावमानसंप्रतिपाकगोचरप्रवृत्तिसामग्र्याः प्रतिबंधकत्वेन कल्प्यते ताद
शप्रवृत्तिसामग्रीकालेपाकविशेष्यक इति साध्यत्वप्रकारकज्ञानस्यावश्यकत्वे इति साध्यत्वप्रकार
कज्ञानाभावमानसे स्वरूपसत् इति साध्यत्वप्रकारकज्ञानप्रतिबंधकत्वेनोपपत्तेरितिमतेन्मते तादृश

मानसे तादृशप्रतीतितादृशसामग्र्याः प्रतिबंधकत्वकल्पने महागौरवापत्तिरिति एवं प्रमाणविशिष्टवृत्ति
साध्यत्वप्रकारकपाकविशेष्यकज्ञानं वा न हमिति मानसे पाकगोचरप्रवृत्तिसामग्र्याः प्रतिबंधकत्वे
न कल्प्यते तादृशविशिष्टविषयताशालिमानससामग्रीघटकत्वेनाप्रामाण्यप्रकारकवृत्तिसाध्यत्व
प्रकारकज्ञानस्यावश्यकत्वेनाप्रमाण्यज्ञानानास्कंदितवृत्तिसाध्यत्वप्रकारकज्ञानघटितप्रवृत्ति
सामग्र्याः सत्वे न न तादृशसामग्र्याः प्रतिबंधकत्वमिति भवन्मते वृत्तिसाध्यत्वप्रकारकज्ञानाभावघटि
तप्रवृत्तिसामग्री तादृशमानससामग्र्योरेककालसत्वे बाधकाभावात्तादृशमानसप्रतीतादृशप्रवृ
त्तिसामग्र्याः प्रतिबंधकत्वकल्पने महागौरवापत्तिरिति न च पाके वृत्तिसाध्यताज्ञाने नेत्प्रमेतिज्ञाना
भावस्यस्वातंत्र्येण हेतुत्वेऽप्यपि वाच्यमिति वाच्यं। तर्हि एतादृशकार्यकारणभावाकल्पने लाघ
घवादिति। एवं इच्छाविशिष्टवृत्तिसाध्यत्वेऽपाकत्वाभाव्यानपदेशादिति विशिष्टवैशिष्ट्यबोधसामग्र्याः
प्रसक्तिप्रतिबंधकत्वे विशेषणतावच्छेदकप्रकारकज्ञानस्य निवेशापत्तिः किंचैतप्रवृत्तिसामग्रीमु

ऽप्यात्तस्याववृपकत्वादित्यलमसङ्ग्रहेण ॥ अथ कृतिसाध्यताज्ञानस्य हेतुत्वे जीवनयोनिप्रकृतिसाध्यता
ज्ञानात्प्राणपंचकसंचारे कथं न प्रवृत्तिः न चेष्टापत्तिः तस्य सुखदुःखादेनान्यथापाकेन कृतिसाध्यः पा
कः प्रवृत्तिसाध्य इति ज्ञानानंतरं प्रवृत्त्यापत्तेरतो कृतिसाध्यताज्ञानत्वेन कृतिसाध्यताज्ञानस्यैव प्रवर्त
कत्वे स्वीकरणीये तत्प्राक्तनजीवनयोनिकृतिसाध्यताज्ञानात्प्राणपंचकसंचारे प्रवृत्त्यापत्तिरिति चे
न्न चिकीर्षाधीनत्वस्य कृतौ विशेषणत्वात् तत्र चिकीर्षाधीनकृतौ साध्यताज्ञानाभावान्न प्रवृत्तिः न
च साध्यत्वास्याता संबंधेन कृतिसाध्यताज्ञानस्य हेतुतादृशहेतुतासंबंधेन कृतिसाध्यताज्ञानस्य
प्राणपंचकसंचारेऽभावात्प्रवृत्त्याभावोपपत्तौ कथं चिकीर्षाधीनत्वविशेषणमिति वाच्यं घटे जीवन
योनिकृतिसाध्यताज्ञानात्प्रवृत्त्यापत्तेस्तादृशसंबंधेन कृतिसाध्यताज्ञानस्य तत्र सत्वात्तद्वारणाय कृतौ
तद्विशेषणस्य विरूपकत्वादिति ॥ एतेन धर्मितावच्छेदकभिन्नकृतिसाध्यताज्ञानस्य हेतुत्वकल्पना
तत्र संबंधेन प्राणपंचकसंचारत्वधर्मितावच्छेदकीभूतकृतिसाध्यताज्ञानस्य हेतुत्वाकल्पनात्तत्र

न्या॰ कौ॰

प्रवृत्त्यापत्तेरभावात् कथं तादृशविशेषणमिति निरस्तं। इति साध्यताज्ञानात् घटे प्रवृत्ति वारणाय तत्
दावश्यकत्वात् घटत्वं धर्मितावच्छेदकीकृत्य घटगोचरप्रवृत्तेरनुरोधेन तादृशज्ञानस्य ताहेतुत्वक
ल्पनादिति अत एव प्रवृत्तिं प्रति इष्टसाध्यताज्ञानस्य धर्मितावच्छेदकताप्रत्यासत्त्यैव हेतुत्वा
ल्लाघवात् तत्पाचप्राणपंचकसंचारत्वे चिकीर्षाधीनत्व इति साध्यत्वे भ्रमात् प्रवृत्तिवारणाय प्र
कारतासंबंधेन प्रवृत्तिं प्रति प्राणपंचकसंचारत्वभेदस्यावश्यं हेतुता कल्पनीयतया कृतौ
चिकीर्षाधीनत्वविशेषणं व्यर्थमेवेत्यपि परास्तं। उक्तदोषवारणाय तादृशविशेषणस्यावश्य
कत्वात्। न च भोजनं साध्ये भ्रमात् भोजनप्रवृत्त्यापत्तिस्तत्रापि चिकीर्षाधीनत्व इति साध्यताज्ञानसत्त्वा
दिति वाच्यं स्वेच्छाधीनस्येव कृतौ विशेषणीयत्वात्। तत्त्वं च स्वावच्छिन्नविशेष्यताकेच्छाधीनत्वे
स्वपदं प्रवृत्तिविशेष्यतावच्छेदकत्वेनाभिमतं तत्तद्धर्मपरं। उक्तस्थले चेष्टात्वस्यैवादेस्तादृशधर्म
तया भोजनादिवृत्तेस्तदवच्छिन्नविशेष्यताकेच्छानधीनतया भ्रमो न स्वेच्छाधीनकृति साध्यः। किं

तु भोजनेच्छाधीनकृतिसाध्यत्वस्य न श्रमो नांतरीयकश्चेदुच्यते जन्येच्छाधीनकृतिसाध्यत्वपाने
कृतिसाध्यताज्ञानाभावादेव प्रवृत्तिवारणासंभवे किमर्थमिष्टतातादृशविशेषणमिति वाच्यं क्रियां
विनापि गुरुतरभारोत्तोलनादौ श्रमस्यानुभवेन कृतिसाध्यत्वस्यापि श्रमे सत्त्वात्तेन च धर्मितावच्छे
दकमिश्रितकृतिसाध्यताज्ञानस्य हेतुत्वात्तु श्रमत्वे धर्मितावच्छेदकीकृतस्य कृतिसाध्यताज्ञानस्य हेतु
त्वाकल्पनात्तु न तत्र प्रवृत्त्यापत्तिरिति वाच्यं धर्मितावच्छेदकतापर्याप्त्यासत्त्या कृतिसाध्यताज्ञानस्य ला
घवेन हेतुत्वकल्पनात् श्रमे प्रवृत्त्यापत्तिसंभवाद्विशेषणस्यावश्यकत्वादिति। अत्रेदमवधेयं।
तादृशविशेषणदाने पि यत्र जन्यपरिपाकादिप्रयोजकश्रमस्येच्छया गमनागमनादिकं कृतं तत्र
गमनागमनादिकृतेः स्वेच्छामुद्दिश्य श्रमेच्छाधीनत्वेन तादृशकृतिसाध्यताज्ञानात्तत्र श्रमे तादृशकृति
साध्यत्वभ्रमात् भोजनादिनांतरीयकश्रमे प्रवृत्तिवारणाय प्रकारतासंबंधेन विशेष्यतावच्छेदक
तासंबंधेन वा प्रवृत्तिं प्रति श्रमत्वमेदस्यावश्यं हेतुतया स्वेच्छाधीनत्वविशेषणं व्यर्थमेव परं तु घटादौ

जीवनयोनिकृतिसाध्यतानामप्रसिद्धत्तिवारणायेच्छाधीनत्वमात्रे कृतौ निवेशनीये न च गुरुमते
न्यथाख्यास्वीकारान्न दोष इति वाच्यं । विसंवादिप्रवृत्त्यनुरोधेन तादृशकृतिसाध्यत्वासंसर्गाग्रहत्वे
न हेतुताया आवश्यकत्वात् अन्यथाख्यातिस्थानाभिषिक्तज्ञानद्वयस्वीकारेपि तादृशकारणबलो
त्कापत्तिवारणासंभवादिति । केचित्तु श्रमानकृतिसाध्यः किंतु क्रियासाध्य इति तथा च कृति
साध्यताभावादेव प्रवृत्त्यापत्तिवारणसंभवान्न कृतौ तद्विशेषणं वदन्ति साहुः । न च केवलकृतिसाध्य
ताज्ञानस्य हेतुत्वेप्यत्र भोजने प्रवर्तेतेति वाच्यं । तत्तत्कालीनकृतिसाध्यताज्ञानस्यापि हेतु
तया तत्तत्कालीनकृतिसाध्यताज्ञानस्य हेतुत्वेन तत्र प्रवृत्त्यापत्त्यसंभवात् न च तत्तत्कालीनकृ
तिसाध्यताज्ञानस्य हेतुत्वे किं मानमिति वाच्यं । इदानीं कृतिसाध्यं कदाचित्कृतिसाध्यमिति ज्ञानकाल
प्रवृत्त्यापत्तेरवमानत्वात् । अपरइदानींकृतिसाध्यं नेह साधनमिति ज्ञानकालेप्रवृत्त्यापत्तेः । न चैतत्का
लीनकृतिसाध्यताज्ञानस्य हेतुताकल्पने नैव तद्वारणमिति वाच्यं । अतत्कालपदेन दंडसकः को

लोत्रास्य: क्षणत्वस्यापरिचेयत्वात् तथा च तद्गोस्यैककालमध्ये तत्तस्य तदंतर्गतपूर्वक्षणप्रवृत्तिदर्श
नात् तत्कालीनइष्टतिसाध्यताज्ञानस्य हेतुतायामावश्यकत्वे द्वितीयक्षणे इष्टसाधनमिति ज्ञाने सति स
ति च इष्टत्तिसाध्यताज्ञानेन तदुत्तरक्षणे प्रवृत्त्यापत्तेर्वज्रलेपत्वादिति चेन्न। स्वविशेषणवत्ताप्रति सं
धानजन्यकार्यताज्ञानस्य हेतुत्वात् तत्र स्वं पुरुषः तत्र विशेषणं कामनास्मुत्पितकालजीवित्वं च तथा
च इष्टसाधनमिति ज्ञानकाले तल्लिंगककार्यताज्ञानविरहान्न प्रवृत्तिः न च सामान्यतः स्वविशेषण
वत्ताप्रतिसंधानजन्यकार्यताज्ञानस्य प्रवर्तकत्वे पि शीघ्रं च लिंगककार्यताज्ञानसत्त्वे न इष्टसाधनमिति
ज्ञानसत्त्वे तत्परक्षणे प्रवृत्त्यापत्तिरिति वाच्यं। काम्यगोचरप्रवृत्तिं प्रत्यवच्छिन्नं प्रति इष्टसाधनतालिंगकका
र्यताज्ञानस्य हेतुत्वात् नित्यगोचरप्रवृत्तिं प्रत्यवच्छिन्नं प्रति शुचित्वकालजीवित्वलिंगककार्यताज्ञान
स्य हेतुत्वात् तथा च इष्टसाधनकाले इष्टसाधनत्वलिंगककार्यताज्ञानविरहान्न प्रवृत्त्यापत्तिरि
ति अयं कालस्यत्तन्यपानगोचरप्रवृत्ति नस्यादिति इष्टसाधनतालिंगककार्यताज्ञानापेक्षसोष्णुक

स्मरणात्मक

केठत्तपावाल्लोत्त्रियतेति चेन्न एककालीनरागकारसवृत्तित्वसंबंधेन इष्टसाधनताज्ञानविशिष्टत्वेति
साध्यताज्ञानत्वेन हेतुत्वात् तत्त्वानपानगोचरस्मरतिस्थले तादृशसंबंधेन इष्टसाधनताज्ञानविशिष्टत्वाद
शज्ञानसंभवाच्च व्यभिचारः नचेष्टसाधनताज्ञानविशिष्टत्वेति साध्यताज्ञानत्वेन हेतित साध्यताज्ञानवि
शिष्टतादृशज्ञानत्वेन वा विनिगमनाविरहात्कार्यकारणभावद्वयं तदपेक्षया इष्टसाधनताविषयकका
र्यताज्ञानत्वेनैव हेतुतास्तु एकत्रैष्टककालावच्छेदेन साध्यत्वसाधनत्वयोर्विरोधेन ग्रहीतुमशक्य
त्वात् तथाहि। साध्यत्वं कृत्युत्तरापक्षणवृत्तित्वं इष्टसाधनत्वं च इष्टाव्यवहितपूर्वक्षणवृत्तित्वं सतिर
इष्टकालवृत्तित्वं तयोरेकत्र एकज्ञानेन गृह्यमाणताज्ञानसामान्यसामग्रीवशात् द्वितीयविशेषणयोरे
कक्षणवृत्तित्वेनासत्ते तथा चैकसाधक्षणवृत्तित्वे इष्टकालवृत्तित्वे चाएकक्षणप्रसिद्धमनोसा
नेन ग्रहीतुमशक्यत्वात् इष्टसाधनताविषयकत्वेति साध्यताज्ञानासंभवेन इष्टसाधनताज्ञा
नविशिष्टत्वेति साध्यताज्ञानत्वेनावस्य हेतुत्वे स्वीकारणीयमिति पदार्थ इति साध्यत्वे प्रतियोगिता

संबंधेन वृत्तिकालीनप्रागभावविशिष्टत्वे इष्टसाधनत्वरहिताव्यवहितपूर्वक्षणवृत्तित्वे तत्पाचएकक्षणे
प्रागभावविशिष्टत्वे पूर्वक्षणवृत्तित्वे च विरुद्धमतीताज्ञाने न गृहीतुमशक्यते तथान्यथानुपपत्त्या तादृश
ज्ञानविशिष्टज्ञानत्वेन हेतुत्वमिति न चेष्टसाधनताज्ञानविशिष्टकृतिसाध्यताज्ञानत्वेन हेतुत्वे इष्ट
साधनताज्ञानकृतिसाध्यताज्ञानप्रामाण्यज्ञानाभावनिश्चयत्वादीनामेकत्र निवेशे विनिगमनाविरहे
णानेककार्यकारणभावापत्त्या तदपेक्षया वरं इष्टसाधनताज्ञानत्वेन कृतिसाध्यताज्ञानत्वेन हेतुत्व
मस्तु लाघवादिति वाच्यं पाकमुख्यविशेष्यकेच्छात्वावच्छिन्नं प्रति पाकमुख्यविशेष्यकेष्टसाधनता
ज्ञानत्वेन हेतुत्वं न कल्प्यते मन्मते सुखविशेष्यकपाकसाध्यसुखत्वप्रकारकेच्छाया एवोपगमेन पाक
मुख्यविशेष्यकेच्छाविरहेणाक्लृप्तहेतुत्वाकल्पनात् मन्मते न कल्प्यते गौरवमिति । एवं पाकमुख्य
विशेष्यकेच्छां प्रति पाकमुख्यविशेष्यकसिद्धत्वज्ञानाभावस्य हेतुत्वाकल्पनादपि लाघवात्तन्नैव
मुखविशेष्यकेच्छां प्रति सुखत्वप्रकारकज्ञानत्वेन हेतुत्वे लाघवात् मन्मते पाकसाध्यसुखत्वप्रका

रेकेच्छास्वीकारेण पाकसाध्यसुखत्वप्रकारकज्ञानत्वेन हेतुत्वे शरीरगौरवमिति वाच्यं। पाकसाध्यसु
खत्वप्रकारकेच्छाया उभयवादिसिद्धत्वेन भवन्मते सिद्धकार्यकारणभावकल्पनेनैव निर्वाहसंभ
वात्तत्परं तु सुखत्वप्रकारकेच्छां प्रति सुखत्वप्रकारकज्ञानत्वेन हेतुत्वं न कल्प्यते तेतादृशेच्छाविर
हात्तद्भवन्मते तत्कल्पने महागौरवापत्तेः न च पाकगौरवस्वीकारोपि ति पाकसाध्यसुखेच्छात्वेन हे
तुत्वे गौरवं मन्मते सुखेच्छात्वेन हेतुत्वे लाघवमिति वाच्यं। पाकसाध्यसुखेच्छाया एव सुखेच्छात्वेन
हेतुत्वादिति वस्तुतस्तु इष्टसाधनतालिंगककार्यतानुमितिनिष्ठवैजात्यमवश्यं व्यभिचारभिया स्वी
करणीयं तथा च विजातीयानुमितित्वेनैव प्रवृत्तौ कारणत्वमस्तु लाघवात्तन्मते कृतिसाध्यताज्ञा
नेष्टसाधनताज्ञाने निश्चयत्वे निवेशप्रयोजनाहार्यत्वं च निवेशस्यात्तेन्मेण प्रवृत्तौ इष्टसाधनताज्ञानस्य
कारणत्वं कल्प्यते एकत्रैव प्रमाण्यप्रकारकज्ञानाभावे निश्चयत्वादिनिवेशप्रयुक्तविनिगमनाविरहे
ण नतेः कार्यकारणभावकल्पने महागौरवापत्तेः। मन्मते अनुमितौ संशयत्वाहार्यत्वाभावेन निश्चय

लाघवनिवेशात् तत्तज्ज्ञानगोचरप्रवृत्तिस्थले च स्मरणात्मकपरामर्शजन्यानुमितेः स्वीकारान्न दोषः
एवं प्रत्यक्षादौ प्रवृत्तिसामग्रीप्रतिबंधकतायामिष्टसाधनत्वप्रकारकज्ञाननिवेशे लाघवेऽभवन्मते
तन्निवेशे महागौरवापत्तेः एवं सामग्रीप्रतिबंधकतायां निश्चयत्वादिनिवेशः प्रयुक्तविनिगमनाविर
हनिवधानानेकप्रतिबध्यप्रतिबंधकभावकल्पनेनासेतगौरवमिति। अप्यनुचितविहितकाल
जीवित्वलिंगककार्यताज्ञानहेतुत्वकल्पनागौरवं एवं च तत्तत्पिलाघवेन विजातीयानुमितित्वेन
निःसगोचरप्रवृत्तित्वेन कार्यकारणभावः कल्प्यते नोपः तथा च उभयपरामर्शजन्यानुमितौ उभयजाति
सत्वेन प्रत्येकमात्रजन्यानुमितौ परस्परासत्ताभावे समानाधिकरणप्रत्येकजातिसत्वेन जातिसांकर्या
त् एकं विजातीयानुमितित्वेन हेतुत्वमिति चेन्न प्रवृत्तिजनकतावच्छेदकत्वेन तदुपपरामर्शजन्या
नुमितौ एकजातिः स्वीक्रियते ताद्दशज्ञानेऽरेव कारणतावच्छेदकत्वात् न च पत्रे इष्टसाधनमिति ज्ञाना
विषयपटत्वादिलिंगिकादिष्टसाधनताज्ञानविषये इष्टसाधनत्वादिलिंगिकापत्वानुमितिर्घटपाको

विषयाहृत्यसमूहालंबनात्मिकाजातात्तत्र तादृशवैजात्यस्यावच्छेदकत्वेनेष्टसाधनत्वमितिसोन
विषये प्रवृत्तिः स्यात् तादृशवैजात्यस्यावच्छिन्नानुमितिसत्त्वादिति वाच्यं। मन्वन्मतेपीष्टसाधनतासा
नाधीनेच्छोत्तरउपादानविषयेकानिष्टसाधनताज्ञानोत्तरं प्रवृत्त्यापत्तेः तत्रेष्टापत्तौ मन्मतेपितु
ल्यमिति। नच विसंवादिप्रवृत्तौ स्वतंत्रोपरस्यतन्मतत्वमिति साध्यत्वासंसर्गाग्रहस्य हेतुत्वकल्पने गौर
वमिति वाच्यं। एकदेशिनोऽस्यभारम्यासिस्वीकारेक्षतिविरहात् नच गुणगतजातौ मानाभावे कथं विजा
तीयानुमितित्वेन हेतुत्वमिति वाच्यं। अत्रापि एकदेशिमताश्रयणादिति वदंति। अत्र नैयायिकाः। तदुक्तं
इष्टसाधनताज्ञानविशिष्टकृतिसाध्यताज्ञानत्वेन हेतुत्वे तत्तत्र विनिगमनाविरहेण कार्यकारणभाव
द्वयस्यावश्यकत्वेनावच्छेदकगौरवेण गौरवापत्तेः। तदपेक्षया स्वातंत्र्येणेष्टसाधनताज्ञानत्वेन कृतिसा
ध्यताज्ञानत्वेन हेतुत्वमेव लाघवात् एवं चेष्टसाधनताज्ञानकृतिसाध्यताज्ञाने निश्चयत्वाहार्यत्वाप्रामा
ण्यग्रहाभावादीनामेकत्र निवेशे विनिगमनाविरहेणानेककार्यकारणभावकल्पनापत्तेश्च मन्मते स्वतं

त्रहेतुत्वेनैकत्राप्रामाण्यग्रहाभावादीनामनिवेशेनलाघवादिति॰ यदपिउक्तंपाकमुख्यविशेष्यकेच्छा
प्रतिइच्छासाधनताज्ञानत्वेनहेतुत्वेगौरवंतदपिनभवन्मतेचिकीर्षाप्रतिइष्टसाधनताज्ञानविशिष्टकृ
तिसाध्यताज्ञानत्वेनहेतुत्वेपूर्वोक्तदोषापत्तिमीमांसाउपायेच्छात्वावच्छिन्नंप्रतिइष्टसाधनताज्ञानत्वेनहेतु
त्वेलाघवात्तस्योपायविशेष्यतावच्छेदकंकार्यतावच्छेदकसंबंधःइष्टसाधनत्वनिष्ठप्रकारतानिरूपित
विशेष्यतावच्छेदकत्वसंबंधेनकृष्णप्रतिबंधकत्वेनैवनिर्वाहसंभवादितियत्तुविजातीयानुमितित्वे
नहेतुत्वान्नेष्टसाधनत्वज्ञानस्यहेतुत्वंतन्नविजातीयानुमितित्वेनहेतुत्ववत्इष्टसाधनताज्ञानो
द्बोधितविजातीयस्मृतित्वेनापिकारणत्वमस्तुविनिगमनाविरहात् नचेष्टसाधनताज्ञानस्यस्मृतौ
उद्बोधकत्वाकल्पनान्नस्मृतित्वेनहेतुत्वमितिवाच्यं। जन्यमात्रस्यकालोपाधित्वेनकालस्योद्बोधक
त्वेनतस्यकालत्वेनउद्बोधकत्वकल्पनादितिनचविनिगमनाविरहादुभयस्यापिकारणत्वमितिवाच्यं।
अनुमितिमात्रस्येवप्रवृत्तिर्नस्यात् एवंइष्टसाधनतालिंगककार्यतानुमितौइष्टसाधनताज्ञानविशि

इष्टप्रवृत्तिसाध्यतामानसे वा तादृशवैलक्षण्यमङ्गीकार्यमित्यत्रापि विनिगमनाविरहः। न चानाहार्यत्वादिनि
वेशे गौरवमेव विनिगमकमिति वाच्यं। तादृशज्ञानव्यावृत्तायास्तादृशजातेः स्वीकारात्। किंच प्रवृ
त्ताविष्टसाधनताज्ञानस्य हेतुत्वाकल्पने लाघवमिति चेदपि न युक्तं। इष्टसाधनताज्ञानस्य हेतुत्वेऽपि कवि
शेष्यकेष्टसाधनत्वप्रकारकज्ञानत्वावच्छिन्नाभावमानसप्रवृत्तिसामग्र्याः प्रतिबंधकत्वं न कल्प्य
ते ज्ञानाभावग्रहे स्वरूपसज्ज्ञानस्यैव प्रतिबंधकत्वात् अत एवाकांक्षाग्रहेऽप्यन्वयानुभवे सति अन्व
यानुभवाभावज्ञाने नास्तीति स्वीकृतं पक्षधरमिश्रैः। भवन्मते इष्टसाधनताज्ञानजन्यविलक्षणानुमि
त्युत्तरं तादृशमानसवारणाय तादृशसामग्र्याः प्रतिबंधकत्वमतो गौरवापत्तेः। न च लिंगोपहितलैंगि
कभानानङ्गीकर्तृनैयायिकानां नये विलक्षणानुमितिकाले इष्टसाधनताज्ञानावश्यकत्वेन मयापि ता
दृशसामग्र्याः प्रतिबंधकत्वं कल्प्यत इति वाच्यं। अस्मन्मते तथास्वीकारेऽपि भवन्मते तथास्वीकारात् साध्यत्वसा
धनत्वयोरेकत्र भानस्यास्वीकारात् एवं इष्टसाधनत्वाभाववान् पाक एतादृशानुमितिसामग्र्याः पाकगोचर

प्रवृत्तिंप्रतिबंधकत्वेनकल्प्यतेतादृशसामग्रीकालेइष्टसाधनताज्ञानसत्वेनतस्याबाधमुद्रयैवप्रतिबं
धकत्वमेवादिति। अपिचअप्रमाण्यग्राह्यवदिदमिष्टसाधनताज्ञानेकार्यत्वव्याप्येष्टसाधनत्वज्ञान
यंपाकइत्याकारकसमूहालंबनरूपपरामर्शानंतरंयत्रेष्टसाधनताज्ञानमप्रमायाकस्यकार्यइत्यानुमि
तिः तदनंतरंचिकीर्षाकालेप्रवृत्तिकालेवाअप्रमाण्यविशिष्टेष्टसाधनताज्ञानमानसवारणायतत्र
चिकीर्षासामग्रीप्रवृत्तिसामग्रीवाप्रतिबंधिकावाच्याअतोगौरवापत्तेः मन्मतेतादृशसामग्रीकालेप्र
वृत्तिसामग्र्याएवाभावात्अप्रमाण्यप्रकारकज्ञानानात्मकेदित्तरेष्टसाधनताज्ञानरूपकारणविर
हादिति। नचेष्टसाधारनताज्ञानस्याहेतुत्वेप्रवृत्तिसामग्रीप्रतिबंधकतापारेष्टसाधनताज्ञानस्य
शिष्यानिवेशलाघवमितिवाच्यं। इच्छाविशिष्टइष्टसाधनीभूतपाकवानयंदेवदत्तइत्याकारकविशिष्ट
विषयताशालिमत्सहसामग्र्याःप्रवृत्तौप्रतिबंधकतायांविशेषणतावच्छेदकप्रकारकज्ञाननिवेशो
नक्रियतेइतिलाघवसंभवादिति। एवंइष्टसाधनीभूततत्तिसाध्याभूतपाककालीनसामग्र्यानहमितिवि

शिष्टविषयिताशालिमानसे घटादिचाक्षुषसामग्री घटाद्यनुमितिसामग्री घटादिशाब्दसामग्र्यादीनां प्र
तिबंधकत्वं न कल्प्यते विशेषणतावच्छेदकप्रकारकत्वेन मुख्याव्यापकप्रवृत्तिसामग्रीप्र
तिबंधकेनैवोपपत्तेः भवन्मते इष्टसाधनत्वादिलिंगककार्यतानुमितिघटितसामग्र्या अव्या
पकत्वेनानेन तद्घटादिचाक्षुषादिसामग्र्या तादृशमानसे प्रतिबंधकत्वकल्पने महागौरवापत्तेः
न च सिद्धत्वज्ञानकाले सिद्धत्वज्ञानाभावघटितप्रवृत्तिसामग्र्यसत्त्वे घटादिचाक्षुषादिसामग्र्या
काले तादृशमानसापत्तिवारणाय तादृशसामग्र्याः प्रतिबंधकत्वं खुपाधिवाच्यमिति वाच्यं। उ
पदर्शितमानसे असिद्धत्वेन पाकस्य विशेषणाय तत्पाकासिद्धत्वसामान्यकात्वसिद्धत्वेनानासंभवादिति
न चेष्टसाधनत्वाभाववान्पाक इति बाधसत्वे तादृशमानसनापत्तामितौ तासत्वे घटादिचाक्षुष
सामग्रीसत्त्वे तादृशमानसवारणाय तस्याः प्रतिबंधकत्वमावश्यकमिति वाच्यं। बाधकाले मानसे
च्छासत्त्वे आहार्यमानसोदयेन तादृशमानसापत्तिविरहात् तादृशसामग्र्याः प्रतिबंधकत्वमित्येवं

दुष्टतादृशसाधनत्ववद्वृत्तिसाध्याभूतवह्निव्याप्यधूमवान् इष्टसाधनत्ववद्वृत्तिसाध्याभूतपर्वतएत
तादृशपरामर्शघटितानुमितिसामग्र्याः घटादिप्रत्यक्षप्रतिबंधकत्वेन कल्पनेनैव वह्निपर्वतविषयप्र
वृत्तिसामग्रीभूततादृशसाध्यज्ञानविशिष्टतादृश्यपक्षतानत्वेनैव प्रतिबंधकत्वकल्पनेलाघवात्
भवन्मते तादृशपरामर्शस्थलेपरावृत्तिसामग्र्याः अनावश्यकत्वेन तादृशपरामर्शघटितत्तादृश
सिद्ध्यभावघटितानुमितिसामग्रीघटादिप्रत्यक्षेच्छाविरहविशिष्टाप्रतिबंधिकाया वाच्यत्वेनागौरवा
पत्तेः अस्मन्मते परामर्शसिद्ध्यभावाघटितनिवेशे वलाघवं संभवात् न च सिद्धत्वेतानेकाले प्रवृत्ति
सामग्रीविरहेणाप्रत्यक्षापत्तिवारणाय तादृशानुमितिसामग्रीप्रतिबंधिकाभवतापि वाच्येति
वाच्यं असिद्धत्वस्यापि साध्यपक्षकोटौ निवेशादिति एवं इष्टसाधनत्ववद्वृत्तिसाध्याभूतपाककाल
नेशानवानहमितिमानसे प्रवृत्तिसामग्रीप्रतिबंधकतायां वृत्तिसाध्यताज्ञानस्य निवेशानक्रियते कि
शेषणताविच्छेदकप्रकारकज्ञानमुद्रयाप्तस्यावश्यकत्वादिति भवन्मते वृत्तिसाध्यतानुमितेत्वे हेतुत्वा

त्तस्यनिवेशस्यावच्छेदकत्वादित्यस्तुमस्मद्गुरुचरणैस्तत्सिद्धमिष्टसाधनताज्ञानस्यप्रवर्त्तकत्वे हेतुत्वमिति ॥ अ
न्येसोदंत्लोपाध्यायाः ॥ पाकगतेष्टसाधनताज्ञानेन हेतुः चिकीर्षाप्रवृत्तितस्याहेतुत्वात्तदभ्यचिकीर्षातस्यप्रवृ
त्त्यविषयत्वेनतस्यचिकीर्षाद्वारेणहेतुत्वात्चिकीर्षापदस्यसन्नन्तत्वेनसनोधात्वर्थमुख्यविशेष्यककर
णतावच्छिन्नत्वेनधात्वर्थमुख्यविशेष्यकेच्छाप्रतिपाद्यत्वधात्वर्थमुख्यविशेष्यककरत्वेष्टसाधनताज्ञानेतेनहेतुत्वा
न्नवृत्तिगतेष्टसाधनताज्ञानत्वेनहेतुत्वं ॥ मितिनचवृत्तिनेपाकीपावृत्तिरिष्टसाधनमितिज्ञानकाले
प्रवृत्त्यापत्तिरितिवाच्यं ॥ पाकानुकूलाकृतिरिष्टसाधनमितिज्ञानस्यैवहेतुत्वात्तेनपाकोनकृतिसा
ध्यइतिज्ञानकालेपिप्रवृत्त्यापत्तिरितिनिरस्तं ॥ उक्तज्ञानेपाकानुकूलत्वेकृतेनागृह्णात्पाकादावपि
कृतिसाध्यत्वविषयीकरोतिसमानसंवित्संवेद्यत्वात्नन्वेवंपाकोनेष्टसाधनमितिज्ञानेपाकानुकूलकृति
रिष्टसाधनमितिज्ञानकालेप्रवृत्तिरितिवाच्यं ॥ सामान्यतदिष्टसाधनत्वस्यकृतौविरहात्पाकद्वारेष्टसाधन
त्वमेववृत्ताविष्टसाधनत्वेनपाचवृत्ताविष्टसाधनत्वज्ञानकालपाकादावपिइष्टसाधनत्वज्ञानावच्छेदके

नतादृशज्ञानकालेपाको नइष्टसाधनमितिज्ञानविरहान्नापत्तिरिति न चपाकानुकूलकृतिरिष्टसाधन
मितिज्ञानस्यहेतुत्वेपाकानुकूलकृतिरिसंवादाऽप्रामाण्यग्रहाभावानाहार्यत्वनिश्चयघटितविशेषगौरवमि
तिवाच्यं।भवन्मतेपिकृतिसाध्यताज्ञानस्यस्वतंत्रहेतुत्वेऽप्रमाण्यज्ञानाभावत्वेनपितस्यानाहार्यत्वादि
वेशेसाम्यादिति न च साक्षात्साधनत्वज्ञानात्परंपरासाधनत्वज्ञानादपिप्रवृत्तिदर्शनात्कथंकृतिष्टसाधन
ताज्ञानस्यएकरूपेणहेतुत्वंउभयसाधारणानुगतसाधनत्वस्यैवाभावादितिवाच्यं।उभयसाधारणसाध
नत्वस्यातिरिक्तस्यस्वाकारादितिवदंति तन्नपाकेइष्टसाधनताज्ञानस्यप्रवृत्तिहेतुत्वेसमानविशेष्यता
प्रत्यासत्त्यैवकार्यकारणभावःकल्प्यते कृतीष्टसाधनताज्ञानेहेतुतावादिमतेतुप्रवृत्तिभिन्नविशेष्य
तानिरूपितानुकूलत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वसंबंधेनकृतीष्टसाधनताज्ञानस्यहेतुताक
ल्पनेनविषयभेदेनकार्यकारणभावकल्पना।भिन्नस्यापासिद्धिपंचकाभावात् नविषयभेदेनकार्यकारण
भावकल्पनागौरवमितिवाच्यं।अन्यथासिद्धिपंचकाराहित्यविशिष्टनियतपूर्ववर्तित्वघटितानुकूलत्वमि

षयतानिवेशं पं कार्यकारणभावकल्पनेऽन्यथासिद्धिपंचकाभावानांमिथोविशेषणविशेष्यभावे विनि
गमनाविरहात्कार्यकारणभावबाहुल्याद्गौरवं तदपेक्ष्य प्रवृत्तिं प्रति पाकेष्टसाधनताज्ञानस्य हेतुत्व
स्यैव सम्यक्त्वात् न च भवन्मतेऽपि अन्यथासिद्धनियतानंतरवृत्तित्वरूपवृत्तिसाध्यत्वविषयतानिवेश्य
वृत्तिसाध्यताज्ञानस्यैव तत्र हेतुताकल्पने महागौरवमिति वाच्यं। तन्मते उक्तत्वेष्टस्वभाववद्वृत्तित्वस्य
वृत्तिसाध्यतापदार्थत्वेन गौरवानवकाशात् न च तथापि भवन्मते कार्यकारणभावद्वयकल्पने गौरवमिति
वाच्यं। तन्मते उक्तानुकूलत्वविशिष्टतानिवेशेन कार्यकारणभावकल्पनेऽन्यथासिद्धिपंचकाभावानांवि
शेष्यविशेषणभावविनिगमनाविरहात् पंचकार्यकारणभावकल्पने गौरवं कारणतावच्छेदकगौरवं
चेतरपेक्षया कार्यकारणभावद्वयकल्पने लाघवस्यातिस्फुटत्वात् न चानुकूलत्वमतिरिक्तमेव तथा च
प्रवृत्तिं प्रति इष्टसाधनताज्ञानस्य हेतुत्वे एक एव कार्यकारणभावः भवन्मते तु कोऽपि कारणभावद्व
यमिति गौरवमिति वाच्यं ज्ञानस्यैककारणताग्राहकप्रमाणाभावात् तारोभती ननु वृत्तीष्टसाधनताज्ञानेन स्यापि

न्नविशेष्यकत्वमेव सहकारि ननु भिन्नविशेष्यकत्वमेव सहकारि ननु भिन्नविशेष्यकत्वं तस्य कारणता
ग्रहप्रतिबंधकत्वात् तथा च पाके इष्टसाधनताज्ञानस्य पाकः इति साध्यत्वेनाहरणज्ञानस्य च समानविशेष्यक
तया तयोरेव प्रवृत्तिकारणताग्राहकप्रमाणावतारो भवति ननु इष्टसाधनताज्ञानेन तस्य भिन्नविशेष्य
कत्वात् अत एव विधिवादमणिकारैरुक्तं समानविशेष्यत्वे गौरवमिति तत्र लाघवे कारणताग्रहस्य सह
कारित्वे गौरवं कारणताग्रहस्य प्रतिबंधकत्वमित्यर्थः इत्यंशे तिरस्कृत्य तत्र समानविशेष्यकज्ञानस्य हेतु
तासंभवति तत्रैव भिन्नत्वे तु भिन्नविशेष्यकज्ञानमपि कारणमित्यवधेयमिति पदपि सनोधात्वर्थ
मुख्यविशेष्यकेच्छावाचित्वेन स्वाउक्तं तन्न्येवात् सनोधात्वर्थप्रकारकेच्छावाचकत्वात् तथाहि पाकं चिकी
र्षितिसाध्यदे पाकादिमुद्देश्यविशेष्यकत्वेनैव पाकः क्रियतां पाके कृत्यासाध्यतामोत्साद्याकारकेच्छारूपा
चिकीर्षा तु न प्रतीतिहितीयादिविभक्तेर्मुख्यविशेष्यताधायकत्वात् न च विषयतामात्रमेव द्वितीयार्थोस्त्विति
वाच्यं तथा सति पाकत्वमित्थंतिपाकत्वचिकीर्षतिरात्रनाशेच्छाकाले रात्रिंभित्थंतिस्यादिति प्रयोगस्या

पत्तेः। ननुकेत्रेमुख्यविशेष्यत्वेन भूपतेर्पाकादिषु स्वविशेष्यकचिकीर्षया न स्यात्तादृशविशेषत्वासं
भवात्। नचैतर्हि हेतुः कीदृशविषयत्वसंसर्गावच्छिन्नायां प्रतीयत इति वाच्यं। धात्वर्थेच्छाप्रकारत्वाविच्छे
न इच्छायां प्रकारितासंबंधेनावच्छिन्नताप्रबोधकतयाप्रकारितायाएवसंसर्गावच्छिन्नायाहेतुः संसर्गतयाभाना
त्। अथैवंपाकादिदृष्टादिरूपपदार्थचिकीर्षास्थले पाकंचिकीर्षतीत्यादिप्रयोगापत्तिः नच द्वितीयार्थ
पाकादिविशेष्यकत्वेन कृतिसंसर्गतयाभासमानस्यप्रकारित्वस्यावच्छेदकाभावभानान्नदोष
इतिवाच्यं। कृतिसाध्यतायाःपाकेच्छायामपिसाध्यताप्रकारितापाकएवविशेष्यकत्वावच्छिन्नत्वात्तत्रा
पिनादृशप्रयोगानुपपत्तेः वस्तुतः संबंधसंबंधभानानुपगमोक्तेतिसंबंधतयाभासमानप्रकारि
त्वेविशेष्यतयावच्छिन्नत्वस्यप्रकारतयासंबंधतयाचभानासंभवः। एतेनचिकीर्षायांसाध्यतासंबंधे
नहेतुः प्रकारत्वेपिननिस्तारइतिचेन्नद्वितीयांतसमभिव्याहारस्थलेद्वितीयार्थस्यपाकादिविशेष्यत्व
स्येच्छायांप्रकारत्वेनैवाकांक्षावशात्तदवच्छिन्नत्वस्यप्रकारितानिष्ठसंबंधतावच्छेदकतयाभानोपगमे

नष्टदोषात्॥ ननु पाकं चिकीर्षतीत्यादौ प्रकारतये वद्द्वितीयार्थोस्तु तथा च पर्विशेष्यतैव छायाभासतां एवं
वेत्प्रकारता विशेष्यतेनयोरवच्छेद्यावच्छेदकभावभाने प्रमाणाभावात् पाकादिचिकीर्षायां सत्तिसादिविषय
केतत्स्यपाकत्वस्य पाकेत्वादिप्रकारकत्वानवच्छिन्नपानपाकचेचिकीर्षणीयस्यादिप्रयोगः न चैवं गृहा
दिप्रकारकस्थित्यादिगोचरेच्छादशायां गृहं तिष्ठासतीत्यादिप्रयोगापत्तिरिति वाच्यं भवतामपि स्थित्या
दिप्रकारेण गृहादिगोचरेच्छादशायां तादृशप्रयोगापत्तेर्दुर्वारत्वात्। न च सकर्मकधातूत्तरसन्प्रत्ययोप
स्थापितेच्छायामेव कर्मप्रत्ययस्य स्वार्थान्वयबोधोपयिकाकांक्षा स्वीकाराभ्युपगम इति वाच्यम् अयापीयस्त्वं स्वव
चत्वात्। वस्तुतस्तु कर्मतासंबंधावच्छिन्नप्रकारताद्वितीयादिरूपकर्मप्रत्ययेन सन्नर्थेच्छायां प्रतिपाद्य
त इति मुमुत्सत्तेः गृहादिस्थितिगोचरेच्छायां बाधेन तासंबंधेनैव गृहादेः स्थित्यादौ प्रकारमथानागृह
तिष्ठासतीत्यादयः प्रयोगाः तु मन्त्रसवसयाभ्याहारस्थलेप्र सप्रणिवद्वितीयादिकर्मप्रत्ययार्थान्वया
यः न तु सन्नर्थेच्छायामेवान्वय इति मुमुक्षुर्गृहं दृष्टौत्यादिप्रयोगापत्तेः प्रकृत्यर्थस्य तत्कर्मकत्वात्

पाकं चिकीर्षतीत्यादौ च साध्यतया विषयत्वारूपे इति कर्मत्वे द्वितीयार्थः अतो न पाकं चिकीर्षतीति वत्पाक
त्वं चिकीर्षतीत्यादयः प्रयोगा इति तच्च गगनदर्शने भवतीत्यादौ इच्छाबोधकस्य गगने दिदृक्षणे इत्यस्य विशेष
तद्दर्शि वाक्यस्य प्रामाण्यानुपपत्तेः दर्शने गगनकर्मकत्वबाधात् यत्र पटविषयेकत्वेन वस्तुगत्या घटविष
यकस्य दर्शनस्येच्छाविषयता न तत्र घटं दिदृक्षते इति प्रयोगापत्तेश्च न च तत्र घटकर्मकत्वविशिष्टदर्शन
विषयितेच्छायां भाषते इति परमादुक्तेच्छायां सत्तादृशविशिष्टयकत्वस्य बाधान्नातिप्रसंग इति वाच्यं एवम
पि तत्र घटो दिदृक्ष्यते इति प्रयोगस्य दुर्वारत्वात् इच्छाविषयीभूतदर्शनकर्मत्वस्य घटे प्रतीयमानस्याबा
धात् द्वियुक्तप्रकार एव विवरणीय इति चेन्मैवं पाकं चिकीर्षतीत्यादिवाक्यजन्यशाब्दबोधे पाकादिविशेष्यकत्वा
वगाहित्वाया अनुभवसिद्धत्वात् सनो धात्वर्थप्रकारकेच्छावाचित्वस्यावश्यकत्वात् धात्वर्थविशेष्यकेच्छाबो
धकत्वे सम्भवेपि तत्प्रकारकेच्छावाचित्वे बाधकाभावेन पाकं कृत्या साधयामीतीच्छा पाकं चिकीर्षापदार्थं पत्ते
निराकरणायोगाच्च न च पाकं कृत्या साधयामीतिकं पचिकीर्षाकारोपितादृशशब्दैनेच्छाविषयस्यारूपिसाध्य

ताविशिष्टपाकस्याबोधनात् आत्मनिष्ठतिकरणकपाकसिद्ध्यनुकूलव्यापारस्यैव तत्ताप्रणितेरितिवाच्यं
आत्मनिपाकेसिद्ध्यनुकूलत्वहृतिरूपव्यापारबोधेपाकेपिस्वहृतसाध्यत्वेनसिद्धिकच्छरूपंस्वहृतिसाध्यत्वस्यानु
त्पत्तिविषयत्वाभावेनेताहशवाक्यस्यविकीर्षाविशिष्टबोधकत्वात्तद्धृतिरूपव्यापारस्याणिजप्येतोल्लाभा
पत्तुरसेतिकथनात् एतेनइष्टतोच्छायाहृतिहेतुत्वेहृतिप्रतिजिज्ञासाविशिष्टज्ञानसामग्र्याः प्रतिबंधकत्वा
दस्तेनेलाघवेनताहशसामग्रीकालेइष्टतोच्छायाअसत्वेताहशकारणताभावादेवनदुष्टुसत्तेः तत्सत्वेहृतिसा
मग्र्याइच्छाघटितायाजिज्ञासासहितज्ञानसामग्रीतोपिबलवत्त्वाद्धृतेरेवोत्पत्तेः। नचज्ञानप्रत्यक्षेयुगपदु
त्पादोपगमेक्षतिविरहात्ताहशसामग्र्याःप्रतिबंधकत्वेहृतिसाध्यत्वप्रकारकेच्छायाः प्रवर्त्तकत्वादिनेति
स्थितिः पत्तरतिनल्लाघवमितिवाच्यं जिज्ञासासानेतरज्ञानेस्यैवानुभवेनप्रत्यक्षभासात्नुभवसिद्धत्वहृपातर
तुरोधेनप्रवृत्तोताहशसामग्रीप्रतिबंधकत्वकल्पनस्यावश्यकत्वात् अनुभवाद्नादरेज्ञानप्रतिविजातीय
ज्ञानसामग्रीप्रतिबंधकतायाअपिविलयप्रसंगादितिसांप्रदायिकोपाध्यायानुयायिमतमपिनिरस्तं। अनुभवानु

सा॰कौ॰
९७

रोधादेरेणकं कस्या साधयामीति कृतिसाध्यत्वप्रकारकप्राक्विरोध्यकेच्छायाजपि प्रवर्त्तकत्वस्यानुभवानु
रोधेनावश्यकत्वात्तदनादेरेचोक्तरीत्याप्रतीच्छायाअपि हेतुत्वासिद्धेरिति सेत्स्यपः। यत्तु इष्टसाधनत्वस्य
विध्यर्थत्वेन कलंजभक्षणेदिसादौ लिङो निष्टसाधनत्वलक्षणा नञ्पदं तात्पर्यग्राहकमित्येव वाच्यं तथा
संगतेत तथा सति ज्योतिष्टोमेन न यजेतेति लौकिकवाक्यस्यापि प्रामाण्यापत्तेः श्रुत्या स्वर्गसाधनतावगमे
पि तात्कालिकानिष्टसाधनत्वस्य प्रागबाधकाभावादिति तदप्यसत् न कलंजमिसादौ लिङोनिष्टसा
धनत्वे निरूढलक्षणिकत्वाज्ज्योतिष्टोमेन न यजेतेत्यत्र निषिद्धलक्षणांगीकारस्यानुचितत्वात्। यदपि लि
ङः इष्टसाधनतार्थकत्वे लिङःशब्दे इष्टसाधनताशाब्दयोः पर्यायतापत्तिरिति तदप्यसत् लिङः पदत्वात् इष्टसा
धनतः शब्दस्य वाक्यत्वात् लिङ्शब्दादिष्टसाधनत्वेनेष्टसाधनताबोधात् इष्टसाधनताशब्दाच्चेष्टसाधन
त्वत्वेन धर्मित्वेन तद्बोधात् पर्यायत्वस्य प्रसक्त्यभावाच्च। यदपि ज्ञप्तेष्टसाधनेऽस्य प्रवृत्त्यभावेन मदिष्टसाधनता
ज्ञानस्यैव प्रवृत्तिजनकत्वं वाच्यं। तथा चेष्टसाधनत्वे लिङः प्रवृत्तिजनकज्ञानविषयत्वस्यैव लिङर्थत्वात्

प्रवृत्तिजनकस्य मंदस्यांतर्भावेन तादृशज्ञानस्य च विधिवाक्यादसंभवात् । मंदतर्भावेण ज्ञातो शास्त्रानेस्याप
त्तिरिति तदप्यसत् प्रवृत्तिप्रयोजकज्ञानविषयस्यैव लिङर्थतया विधितइष्टसाधनत्वोपस्थितौ प्रवर्त्तस्यामंद
तर्भावेन तज्ज्ञानस्य मनसा संभवात् किंच यद्विशेषयोरिति न्यायेनेष्टसाधनताज्ञानत्वेन प्रवृत्तित्वेन हेतु
मत्तावस्याचश्यकतया प्रवृत्तिजनकस्य सामान्यतइष्टसाधनताज्ञानस्य विधिजन्यत्वसंभवेन प्रवृत्तिजन
कज्ञानविषयस्य लिङर्थत्वेपि तत्र शक्तौ बाधकाभावात् तस्मादिष्टसाधनत्वं लिङर्थ इति सिद्धं यत्र दृष्टं कृति
साक्षात्कर्त्तुरेव कस्यचित्परंपरया अन्नएनाचार्यप्रेरणया प्रवृत्तौ आचार्येष्टस्य परंपरया शिष्येष्टतया तत्
साधनत्वज्ञानात् शिष्यादेर्गवानयनादौ प्रवृत्तिः आचार्यप्रेरणया हं गामानयामि न किंचिन्मयेष्टमिति
व्यवहारस्य न मे साक्षात्किंचिदिष्टमित्येवं परतया संगमीतीय इति चेत् चिंत्यं इति । वस्तुतस्तु सर्वत्रेष्टे साक्षात्क
र्त्तुरेव आचार्यप्रेरणया प्रवृत्तावपि आचार्यप्रसादिकं साक्षात् शिष्यादेरिष्टमस्तीति न दोषः उपदर्शितव्यवहा
रस्त्वाचार्यप्रसादातिरिक्तं उक्तधपानादिकमिष्टं मे नास्तीत्येवं परतया संगमनीयः गुर्वादिप्रेरितवाल्लादेव

त्कारेणाध्ययनेपि तदभावप्रयुक्तेर्गुर्वादिकोपजन्यत्वात् नाभावत्वेष्ट इति तत्साधनताज्ञानात्प्रवृत्तिः यत्विष्टसा
धनताज्ञानेन प्रवर्त्तकं अनिष्टसाधनत्वेष्टसाधनेपि कर्त्तुं कमेति न्यायेन द्वेषादेव प्रवृत्त्यभावोपपत्तेरिति तं
तेजातत्वाल्लिकेश्च मे द्वेषाभावदशायां प्रवृत्त्यापत्तेः न च चिकीर्षायाश्च सत्वे तदभावादेव न प्रवृत्तिः तत्सत्वेष्टाप
त्तिरितिवाच्यं इष्टसाधनताज्ञानस्योपायेच्छां प्रति हेतुत्वे यदिष्टसाधनत्वज्ञानं विना चिकीर्षायाएवासंभवात्
न रूपायेच्छां प्रतीष्टसाधनताज्ञानात्तस्य हेतुत्वम् असंभवविरुद्धपायत्वस्येच्छाविषयत्वस्याचानुगमात् फलवपाके
च्छां प्रतीच्छाविषयसुखसाधनताज्ञानं हेतुरिति स्ववैरीसातत्संभव इति वाच्यं कान्तोन्तरीयपुरुषान्तरेपेच्छा
माहायादिप्रसंगवारणाय तत्तत्कालीनत्वे तत्तत्पुरुषीयत्वनिवेशास्यावश्यकत्वात् अननुगमतादवस्थ्यात् तदिच्छा
विषयत्वाज्ञानेपि स्वतन्त्रेप तत्सुखेच्छासुखसाधनताज्ञानाभ्यां पाकेच्छोत्पत्तेश्च न च पाकेच्छां प्रति सुखेच्छात्वेन सु
खसाधनताज्ञानत्वेन च हेतुत्वान्नोक्तदोष इति वाच्यं दुःखाभावेच्छादुःखाभावसाधनताज्ञानाभ्यां तत्पाकेच्छो
त्पत्त्याव्यभिचारप्रसंगादिति चेन्न त्वसामानाधिकरण्यस्यावश्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन सुखेच्छासु

खसाधनेपाक इतिज्ञानोभयविशिष्टेछां प्रतिसुखेछात्वेन सुखसाधनताज्ञानत्वेन च हेतुत्वोपगमात्।। एवं
दुःखाभावेछादुःखाभावसाधनताज्ञानादीनामपि हेतुत्वं बोध्यं न च सुखेछावैशिष्ट्यसुखेछाजन्यतावछेदके
नैवेश्यतां नस्यसुखसाधनताज्ञानजन्यतावछेदके निवेशप्रयोजनाभावः एवं वैपरिसेनापीति वाच्यं कार्य
तावछेदकयोर्व्याप्यव्यापकभाव एव कारणानां परस्परसहकारिता स्वीकारेण परस्परजन्यतावछेदककोटौ
परस्परवैशिष्ट्यनिवेशसावश्यकत्वात्।। अन्यथा तु तादृशसंबंधेन स्वस्ववैशिष्ट्यमेव स्वस्वकार्यतावछेदक
कोटौ निवेशो निवेशनीयः कार्यतावछेदकयोर्व्याप्यव्यापकभावविरहेपि सामानाधिकरण्यमात्रेणैव कार
णानां परस्परसहकारित्वस्वीकारादिति साकुः।। स्वतंत्रफलसाधनत्वस्यापि स्वज्ञानजन्येछाया प्रकारता
भ्युपगमात् सुखसाधनत्वप्रकारतानिरूपितताथापाकत्वावछिन्नोद्देश्यतानिरूपितछायां प्रति सुखेछात्वेन
सुखसाधनताज्ञानत्वेन च हेतुत्वे यद्यासुखसाधनताज्ञानस्यैवेताहशेछात्वावछिन्नं प्रति हेतुत्वं सुखेछा
यास्तु सुखसाधनताधीजन्येछात्वावछिन्नं प्रतीति साकुः स्वतंत्रफलसाधनत्वस्य स्वविशेष्यविशेष्यकज्ञान

जन्यतायाः प्रकारत्वे मानाभावात् । यदि पि सुखेच्छादिजन्यतावच्छेदकजातिविशेष एव स्वीक्रियते सुखदुः
खाभाववयोरिच्छातत्तत्साधनतास्तानं चयद्यवर्त्तते तदुत्तरमिच्छाद्वयमेव स्वीक्रियते प्रयत्ने योगपद्यवदि
च्छायौगपद्यस्वीकारादतस्तत्र संकर्यमिति तिन्नैव न वीतैरुक्तं तेदपि चिंत्यं एतादृशानंतजातिमात्ताभावा
त् । अन्यथा तत्तत्स्मृतिजनकतावच्छेदकतानंतजातिसंस्कारयौगपद्ययोः स्वीकारेणैवोपपत्तौ संस्कारे सवि
षयेकत्वासिद्धिप्रसंगात् । किंच यदा शातफलव्याप्तिग्रहात्फलोपाये न तत्र सुखं न तत्र भक्तिः स्वेन विष
यीत्वसाध्यमांसस्य त्वध्वैत्रोप्यात्मकसागरूपाश्वमेधसामग्री च तदा तादृशानेच्छासाविनिगमनाविर
हेण सर्वासामेवाश्वमेधत्वात्तेकर्तुं शातकेतुत्वापत्तिः अपरे तु प्रकारतासंबंधेनेच्छाविशिष्टविच्छिन्नका
र्यतानिरूपितसाधनतनिष्टप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेनेत्तानत्वेन कारणताप्र
कारतासंबंधेनेच्छात्वेन कार्यता नतिनव्यभिचारो न वा घाकत्वादिभेदेन भिन्नकारतावच्छेच्छाविषये
विशेषणंज्ञानेउपलक्षणं तेन फलेच्छाविरहदशायां नोपायेच्छापत्तिर्न विष्टसाधनताज्ञाने नेच्छापाऽविषयो

करणेष्टसुपापच्छानुपपत्तिः इत्थं चोपायेच्छायां फलेच्छायाः स्वातंत्र्येण कारणत्वोपगमो निरस्तः कारणतावच्छेद
कविशिष्टकारणस्य कार्योत्पत्तिः पूर्वकाले पेक्षणीयतया फलेच्छाविरहकालीनउपायेच्छायास्सभावात् न
चोक्तविशेष्यतावच्छेदकतासंबंधेन ज्ञाने विनापि प्रकारतासंबंधेन सुखत्वदुःखाभावत्वयोरिच्छा
यास्याव्यभिचार इति वाच्यं सुखत्वदुःखाभावत्वान्यवृत्तित्वविशिष्टप्रकारतायाएवकार्यतावच्छेदक
संबंधत्वोपगमेन व्यभिचाराभावात् न चैवं यत्र सुखदुःखाभावत्वधर्मितावच्छेदकोद्देश्यइष्टसाधनता
ज्ञानं वृत्तं तत्र सुखत्वदुःखाभावत्वयोः सुखदुःखाभावत्वान्यवृत्तित्वविशिष्टप्रकारतासंबंधेनेच्छाप
त्तिरिति वाच्यं सुखं सुखमित्यादितः शाब्दबोधवारणाय सुखत्वसाधर्म्यवृत्तिविषयतासंबंधेन ज्ञानेप्र
तिसुखत्वादिभेदत्वेन कारणताकल्पनेगुणत्वस्यैवकार्यतावच्छेदकत्वोपगमेनोक्तापत्त्यभावादिति
प्राकृ इति दिक् तत्र इष्टसाधनत्वं स्वर्गादिसाधनत्वे सति नैवलिङः शक्यं तेन तद्रूपेण ज्ञानादेव प्रवृत्त्या
तस्य च प्रवर्तकत्वात् । न चेष्टसाधनत्वेन इच्छायाः स्वरूपसत्या एव हेतुत्वेन तज्ज्ञानानपेक्षणात्

बहुवित्तव्ययायाससाध्य आमुष्मिकेच विशेष्यतेआनेविनाप्रवृत्त्यभावाच्चान चैवं लिङोनानार्थ
त्वात् प्रतीतिरितिवाच्यं। तदादिपदे बुद्धिविषयतावच्छेदकत्वस्यैवानापि शक्यतावच्छेदकानां स्वर्गादीनां
इच्छायाविषयतया अनुगमकत्वात् तथाहि यथा तदादिपदे तदादिपदं बुद्धिविषयतावच्छेदकेति
शक्तिभिन्नाकारकः शक्तिग्रहः बुद्धिविषयतावच्छेदकत्वमुपलक्षणतया घटत्वादीनामनुगमके
तत्तु तदंशे शक्तिः पदार्थोपस्थितिस्तत्प्रकरणादिमहिम्ना घटत्वादिनैव न तु बुद्धिविषयतावच्छेद
कत्वस्योपस्थितौ शाब्दबोधे वा भानं तथा प्रकृतेपि लिङादिमिच्छाविषयतावच्छेदकत्वसाधनत्वे शक्ति
भिन्नाकारकः शक्तिग्रह इच्छाविषयतावच्छेदकत्वं स्वर्गत्वादिनामुपलक्षणतयानुगमके तत्तु तदंशे
शक्तिः पदार्थोपस्थितिस्तत्समभिव्याहृतस्वर्गादिपदमहिम्ना स्वर्गादिसाधनत्वेनैव न त्विच्छायाउपस्थि
तौ शाब्दबोधे वा भानं इष्टसंच विशिष्टेष्टतावच्छेदकस्वर्गत्वादिप्रकारेण शाब्दबोधो लिप्सा विधिवाक्या
प्रवर्तकज्ञाननिर्वाहः एवं चेच्छाविषयतावच्छेदकत्वोपलक्षितस्वर्गत्वादिविशिष्टसाधनत्वे विधेः शक्ति

रित्ति पर्यवसन्नं। नैवं तस्य स्वर्गकामादिपदाद्धानेनान्यलभ्यत्वेन तत्र शक्तिरिति वाच्यं। तस्मात्स्वर्गाद्यु
पस्थितावपि साधनत्वबोधकाभावात् नचैवं साधनत्व एव शक्तिरस्त्विति वाच्यं तस्मात्स्वर्गाद्युपस्थि
तावपि साधनत्वबोधकाभावात् नचैवं साधनत्व एव शक्तिरस्त्विति वाच्यं। तस्य कार्यतावच्छेदकविशि
ष्टकार्यत्वनियंत्रितत्वेन सामान्यतस्तस्यैकस्याभावात्।। नच विशिष्टसाधनत्वस्य विध्यर्थत्वे ज्योतिष्टोमेन स्व
र्गकामो यजेतेत्यादौ तृतीयानुपपत्तिः तद्विधायककर्तृकरणयोरिति सूत्रेण तस्यानभिहिताधिकारीयत्वे
न करणत्वानभिधान एव तद्विधानेन लिङा तदभिधानेन तृतीयाऽसंभवात्। नच परस्मैपदागमनसाध
नत्वेस्य लिङाभिधानेपि तद्विशेषज्योतिष्टोमादिप्रातिपदिकार्थगतस्य तस्यानभिधानात् तृतीयानुपपत्ति
रिति वाच्यं। ज्योतिष्टोमयजनस्य धात्वर्थयागयोरभेदादिति चेन्न लिङा साधनत्वमात्राभिधानेपि तद्विशेषकरण
त्वस्यानभिधानात्। नन्वेवमपि लिङादिना ज्योतिष्टोमादेः स्वर्गत्वविशिष्टसाधनत्वं कथं बोधनीयं स्वर्ग
त्वादेर्गम्यमानत्वाज्जपेयादिजन्यस्वर्गादिसाधारण्येन ज्योतिष्टोमादिजन्यतावच्छेदकत्वासंभवेन तत्तस्य

र्गत्वादिविशिष्टसाधनत्वबाधादिति चेन्न विजातीयत्वे तत्साधनत्वस्यैव विधिना बोधनात् वैजात्यं च विधे
स्तथाशक्तिस्वीकारादेवोपपत्तेरिति । तर्ह्यमेव च लिङादेस्तत्साधनत्वे शक्तिस्वीकारात् । केचित्तु स्वर्गत्वा
दिकमेव ज्योतिष्टोमादिजन्यतावच्छेदकं अतिप्रसक्तस्याप्यवच्छेदकत्वे बाधकाभावात् । न चैवं स्वर्ग
त्वावच्छिन्नत्वेस्य ज्योतिष्टोमादिरूपकारणाभावात् कुंकुमास्नानादितोऽनुत्पत्तिप्रसंगात् उत्पन्नो चेद् घटादौ रा
सभङ्गेऽपि व्यभिचारः ज्योतिष्टोमादिरकारणत्वप्रसंगः एवं गुणसमवायिकारणतावच्छेदकत्वस्य द्रव्यत्वे ने
गीकारेणासत्तामेवायातं गीकारे गुणदानेऽपि रूपाद्यापत्तिरिति नातिप्रसक्तमवच्छेदकमिति चेन्न ज्यो
तिष्टोमादिजन्यापूर्वे विशिष्टसमवायसंबंधेन स्वर्गत्वावच्छिन्नं प्रति ज्योतिष्टोमादेः कारणत्वोपगमेना
दोषात् एवं तृणादेरपि तृणत्वावच्छिन्नसंयोगसंबंधेन वह्नित्वावच्छिन्नं प्रति तृणत्वादिना हेतु
तेति न व्याप्तिवैजात्यकल्पना । अत एव व्रीहिभिर्यजेत यवैर्यजेतेत्यादौ परस्परव्यतिरेकेन प्रत्येकं
फलजनकत्वेऽपि न दोषः व्रीहिभिर्यवैर्वा इति संकल्पात् पूर्वावच्छिन्नसमवायसंबंधस्यैव व्रीहिकार्यतावच्छे

दकत्वेनादोषात्। संकल्प्यादर्शं वे चेत्फलाभावे प्रवृत्त्यनिष्टमिति प्रयोगांतरेष्ववादीनामुपादानेनानुपपत्तेश्चेन
चैवरासभादेरपि घटहेतुत्वापत्तिः रासभाद्यवच्छिन्नसंयोगस्य कार्यतावच्छेदकत्वोपगमे न व्यभिचाराभा
वादिति वाच्यं एवं दंडादेः तृणादेरन्वयव्यतिरेकाभ्यां हेतुतासिद्धावपि रासभादेर्हेतुत्वे मानाभावात्। किं
त्ववश्यकल्पनीयं दंडादिभिरन्यथासिद्धेरेव एवं गुणादौ रूपापत्तिरपि न तत्तद्रूपे तत्तद्रूपसमवायिका
रणतायावश्यकत्वेन विशेषसामग्र्यभावादेव तदभावोपपत्तेरित्याहुः अपरे तु कंबुग्रीवादिमात्रा
स्तीत्यादौ गुरुधर्मानवच्छेदकत्वपक्षे घटत्वावच्छिन्नप्रतियोगितायाः एवसंबंधत्ववदृत्त्यापि विजातीयस
र्गसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन स्वर्गसमाना
धिकरणाभावप्रतियोगितावच्छेदकत्वीयाभावः प्रतीयत इति तानुपपत्तिः अन्वयितावच्छेदकावच्छिन्न
प्रतियोगिताकत्वव्युत्पत्तिश्च नञ्समभिव्याहारस्थल एवेति न तद्विरोध इति प्राहुरित्यादिकं न्यायाल
अन्यथासिद्धतदभावेव वदृत्तित्वरूपत्वसाध्यत्वघटितसाध्यत्वस्य चकत्वज्ञानमेव रत्नाघवात्संपत्तिहेतुरि

त्तिसाध्येष्टकत्वमेवसाध्ये स्वर्गादिकत्वपर्यवसितं लिङ्गार्थः पुज्यते चैतत् अन्यथोपदर्शितरीत्याज्यो
तिष्टोमादिकं विना पिंगगास्नानादितः स्वर्गादिकमितिसाने व्यभिचारज्ञानसत्वेन लिङादिनेष्टसाधनता
याबोधनासंभवात् साध्येकेष्टत्वस्य लिङ्गार्थघटितहेतुत्वेष्टत्वसामानाधिकरण्येन ज्योतिष्टोमादिमदन्यावृत्ति
त्वेग्रहे बाधकाभावः द्रव्यं गंधवदिति ग्रहेपि सामानाधिकरण्यतद्द्रव्यंगंधाभाववदिति ग्रहादितिवदिति।
अपेष्टसाधनत्वं साध्येष्टकत्वं वा न लिङ्गार्थः नित्यनैमित्तिकयोः फलाभावेन तदसंभवादिति चेन्नत्र
सत्वाय परिहाररूपफलस्य तत्रापि सत्वात् शास्त्रबलेन तदकरणे शास्त्रस्य प्रत्यवायस्य तत्करणे परिहारा
वेरूपभावात्। न च वेदबोधितत्वेन निष्फलयोरेव तयोः प्रवृत्तिरिति वाच्यं वेदसहस्रैरपि बोधिते निष्फ
लत्वज्ञानदशायामप्रवृत्तेः नचैवमफलाकांक्षिभिर्यज्ञो विधिदृष्टो यइज्यते यष्टव्यमेवेति मनः समा
धाय स सात्त्विक इति भगवद्वचनविरोध इति वाच्यं। यज्ञो दानं तपः कर्म पावनानि मनीषिणां एतान्यपि तु
कर्माणि संगं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् इत्यस्य शादेशे भगवतैव पावनत्वोक्तेः तस्मादनु

दृष्टोऽपि प्रत्यवायपरिहारः फलमिति फलं सत्काम्यपि क्रियमाणस्य पावनत्वमिति तदाशयः संध्यामुपासते ये तु
सततं तु संशितव्रताः विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनमिति फलविधिस्मृत्यापि फलश्रवणात्। न चार्थवादत्वं
केमुक्तवेवचनं स्तावकं कल्पकतिस्व प्ररोचनार्थी सा चतुरस्पश्च स्पर्येतिवाच्यं। तथा सति सर्वेभ्यः कामेभ्यो दर्शपूर्ण
मासाविसादेरपि तथात्वापत्तेः चतुर्थी तु उभ्यवरज्जूरित्याद्यर्थवादे चतुर्थीवत् नार्थसाधिका दर्शपूर्णमासा
भ्यां स्वर्गकामो यजेतेत्यादिभिः फलाकांक्षानिरस्यस्वेस्यलंपल्लवेन। ननु तथापि स्वर्गकामो यजेतेति विधिना
यागस्वर्गसाधनत्वबोधोऽनुपपन्नः देवतोद्देशेन द्रव्यत्यागरूपस्य यागस्य [illegible]स्यच्छारूपतया कालांतरभाविस्व
र्गेपर्यंतमसत्वेन स्वर्गाव्यवहितपूर्वकालवृत्तित्वघटितस्य स्वर्गसाधनत्वस्यासंभवात् न च यागस्य साक्षात्स्व
र्गसाधनत्वासंभवेऽपि अपूर्वस्य व्यापारद्वारा स्वर्गसाधनत्वसंभव एवेति वाच्यं। तदानीं तादृशव्यापारानुपस्थि
सात द्वारापि स्वर्गसाधनत्वबोधासंभवादिति चेन्न स्वरूपसंबंधरूपतया कार्यनिपतत्पूर्ववृत्तित्व स्यबोधस्य
विसंधाने रूपत्तयापत्पर्यंतररूपतया वा विधिना यागे सामान्यतः स्वर्गसाधनत्वेन स्वर्गसाधनतत्वबोधि

पू॰-को॰
१०३

तेपश्चात्तन्नियामकस्य स्वर्गाव्यवहितपूर्वकालवृत्तित्वस्य बाधप्रतिसंधाने न स्वर्गसाधनत्वानुपपत्तिप्रति
संधाने तदुपपादकतया स्वर्गपर्यंतस्थाय्यपूर्वरूपव्यापारकल्पनेन दोषः। अत्रेदं विचार्यते विधेरपूर्वबोध
कत्वमस्ति न वेति तत्रापूर्वं कल्प्यमिति नादिनां न्यायविदां सा नास्तीति सिद्धांतः। अपूर्वं न कल्प्यं किंतु वाच्यमिति
वेदंतः प्राभाकरास्तु स्वर्गकामो यजेतेत्यादिकालांतरभाविफलकामसमभिव्याहृतवैदिकविधेरपूर्वबोधक
त्वं स्वीकुर्वंतीति तेषामित्थमाशयं वर्णयंत्यभियुक्ताः फलकामना क्रियायां कामिनं नियोजयति प्रवर्तके धीमंते
करोतीति सुखसाकामी नियोज्य इत्युच्यते नियोज्यत्वं च तस्य ममेदं कार्यमिति धीमत्वमेव यागादिक्रियाया
चैतन्नरूपेण स्वर्गादिफलकामस्यान्वयः अयं किमर्थं नियोज्यतया कामिनोऽन्वयः स्वीक्रियते कर्तृत्वेनैव
सोऽभासतां अवश्यं केचरति विशेष्यतयान्वयिनस्य संख्यान्वयनियामकत्वात् आख्यातोपात्तभावनावि
शेष्यत्वे च प्रथमायाः साधुत्वात्। न च स्वर्गकामकार्यत्वस्य क्रियायामन्वये स्वर्गकामनियोज्यकत्वप्रयोजकं
स्वर्गकामकार्यताज्ञानविषयत्वं विनायागादेस्तद्वृत्तिसाध्यत्वानिर्वाहात् इत्यन्वयप्रयोजकरूपलक्षणयोगप

ताज्ञानविधया स्वर्गकामनियोज्यकत्वबोधः स्वर्गकामकार्यत्वबोधेऽपेक्षित इति मणिकारेण। किं नाहस्य क्रिया
कार्यतया लिङा बोधयितुमशक्यत्वे स्वर्गकामनियोज्यान्वययोग्यताज्ञानविरहादित्यनेन प्रथमतः कार्यताबो
धासंभवे हेतुविधया नियोज्यत्वबोधसामग्रीविरहोऽभिहितः एतदभिप्रायेणैव तिनाख्ये। ततः कर्तृत्वबो
धे योग्यताज्ञानविधया नियोज्यत्वभानापेक्षाप्रभाकरैर्नाभ्युपगम्यतेऽपचेतीत्यादौ लङर्थाख्यातेऽपि तत्सौका
पत्तेः एवं च क्रियायां कालिकार्यताबोधो विपिकामिनः कर्तृत्वबोधपर्यवसितः विशेष्यविशेषणभा
वमात्रवैपरीत्यादित्ति तुल्ययुक्त्या तत्रापि कामिनि नियोज्यतया भानमनपेक्षितमेवेति चेत् स्वर्गका
मनाविशिष्टस्य हि कर्तृत्वेनान्वयो न संभवति कामनारूपविशेषणांशे तदन्वयप्रयोगसंसर्गिकस्यासंभवा
त्। अथ चैत्रः पचतीत्यादावन्वयितावच्छेदकचैत्रत्वादेः कर्तृत्वबाधेऽपि यथा तदुपलक्षितेऽन्वयः भिणि
कर्तृत्वान्वयस्तथा मम स्वर्गेऽपि कामनोपलक्षिते पुंसि तदन्वयो निःप्रत्यूह एवं विशेष्यान्वये न चापि तत्त
दुपलक्षणत्वेऽपि तत्स्वाः ब्राह्मणादिवत्ततः कर्तृत्वान्वयप्रयोजकतासंभवस्यैवेति निःकामसाधारणक

तृत्वान्वयप्रसंगो वारणीय इति चेन्न विशिष्टान्वयपरतायावेदस्यौत्सर्गिकतया संभवस्याकथंचिद्विशेष
णतायामुपलक्षणताभ्युपगमस्यानौचित्यात् । न च विशेष्यान्वयिना कर्तृत्वेन कामनायां आश्रयत्वे
नान्वयितसमानकालत्वतया तस्या विशेषणत्वमास्तां विदंडी गच्छतीत्यादौ गमनकर्तृत्वाद्यन्व
येदंडादिविशेषणत्ववदिति वाच्यं । विशेष्यापर्याश्रियत्वेनान्वितविशेषणस्याश्रयतये च विशेषण
त्वस्यौत्सर्गिकतया सामान्यायोगात् तदुक्तिक्षणे उपायत्विकीर्षया अंतरिता याः फलकामनाया असत्वे
न तत्समानकालत्तायाअपि तस्या असंभवात् । नियोज्यत्वेन कामिनोऽन्वये चेमम इदं कार्यमिति
ज्ञान प्रयोजकत्वरूपनियोज्यत्वस्य कामनांशेपि सत्वाद्विशिष्टान्वयो निराबाधः कार्यसाधन
ताज्ञानस्य कर्तव्यतानुमापकतया कामनायास्तत्प्रयोजकत्वात् । अथैवमाख्यातार्थस्येतरविषयो
ज्ञकता संबंधेन कामनाविशिष्टेऽन्वयसंभवात् नियोज्यत्वेन कामिनः अन्वयो विफलः इति सा
ध्यताज्ञानस्य कामनाप्रयोज्यत्वेन तद्द्वारा कृतेरपि कामनाप्रयोज्यत्वादिति न च विनिगमनाविरहेण

नियोज्यतयापूर्वयोनिःप्रसरह इतिवाच्यं नियोज्यत्वेनान्वयेपिकर्तृत्वेनानन्वयस्य प्रथमायाः साधुत्व
नियामकत्वेनावश्यकत्वमिति प्रागेवोक्तत्वादिति चेत् आम्नाये प्रथमासाधुतानिर्वाहकत्वेन कर्तृत्वपाको
मिति चेद्योस्तथापि तदनुरोधेनैव नियोज्यत्वभानमावश्यकं विशिष्टान्वयानुरोधात् प्रयोजकतासंबं
धेन कृतेरप्यथबोधोपगमेनोद्देश्यान्वयप्रयोजकनियोज्यताज्ञानमपि योग्यताज्ञानत्वेनानुद्देश्यान
यबोधहेतुः तथाहि परं परासाधनस्थले हितदंशे तत्प्रयोजकत्वज्ञानस्य योग्यताज्ञानविधया तद्देशे
तत्कार्यप्रयोजकताबोधहेतुत्वं गुरूणामनुमतं अत एव तन्मते पागस्य स्वर्गसाधनताबोधे अएवं
साधनताबोधापेक्षा कामनायाश्चवसासात्कृतिप्रयोजकता अपि तु कार्यताज्ञानसंपादने नैवेति
कामनाविशिष्टकृतिप्रयोजकत्वान्वस्वीकारे नियोज्यत्वोपस्थितिर्वा अभिहिते चेत् साध्याकृताऽपि
एतज्ज्ञानद्वाराकृतिजनकत्वमिति बोधजनकज्ञानधीरोव्येनान्वयांगीकारादिति ग्रंथेन एवं कार्येक
देशस्य तावपि कामनाविशिष्टस्यैव पुंसोऽन्वयउक्तउत्तरास्वीकारणीयः स चाधेयतासंबंधेन तस्य भवतो

त्तिप्रयोज्यतासंबंधेनैववाच्यत्वमिति। कामिकार्यत्वाभावांशमगृहीत्वैवेति कामनाप्रयोज्यत्वनिर्वाहकत्व
योज्यत्वाभावानुरोधेनापि कामनाविशिष्टनिरुक्तविधेयान्वयबोधापत्तिः नाहत्यक्रियाकार्यत्वेन्यादि
चिंतामणिग्रंथसंगतिः। नचगुरूणांक्रियाकार्यताबोधानशाब्दः किंत्वौपपादिकएवेतितत्कथंतत्र
योग्यतापत्तिर्वाच्येशाब्दसामग्रीसत्त्वेतादृशानुपपत्तिज्ञानस्यैवौपपादिकत्वात्। तदुक्तमुपपादानेतावदनु
पपत्तिसहकृतःशाब्दइति। कामनापादेककार्यताज्ञानोपयोगोनसाध्यादपि तुस्वविषयककाम्यसाध
नतासककार्यत्वानुमापकलिंगज्ञानसंपादनेन। तदुक्तंसचैकायनानेतरेकाम्यसाधनताबोधा
कार्यताज्ञानेसतिस्यादितिएवंचकामनापांकार्यताज्ञानप्रयोजकत्वरूपनियोज्यत्वाभावेनोक्तयुक्ति
याविशिष्टेष्टसाधनताज्ञानप्रयोजकत्वेनत्वगुरूणांक्रियाविशिष्टेष्टसाधनतयाविनानतत्रकाम्यसाधन
ताभानमितिस्वर्गसाधनताज्ञानंविनानियोज्यान्वयबोधसंभवः। अथयोग्यताज्ञानाभावेकेनियोज्यत्व
ज्ञानेमानसमेवापगंतव्यंनतुशाब्दंनियोज्यत्वस्यपदानुपस्थितेरितिनतत्रयोग्यताज्ञानपेक्षेति चेन्नः

सानप्रत्यासत्तिमनभ्युपगच्छतां गुरूणां मन्नसो वहिरोस्वात्तत्वेण नियोज्यत्वज्ञानस्य शाब्दत्वे नियोज्यस्ये
वोपगंतव्यत्वात् तेच शाब्दत्वे नास्ति मदोपादानिकेवापकत्वेनान्वविशेषः पदमेन्नियोज्यत्वोपस्थिति
विरहस्य वांप्याहारमतेऽप्रयोजकः। अस्तु वा नियोज्यत्वमपि विध्यर्थः। स्वर्गकामयागकाः संसर्ग
नियोज्यत्वमिति तु नामार्थधात्वर्थयोः साक्षादन्वयस्यानुत्पन्नत्वाश्च तु पादेयो कार्यताबोधो याग
विशेष्यक एव मिश्राणां संमतः। यस्तु स्वर्गकामः स नियोज्यत्वकर्तायागकरसाकारकबोधस्तेर
भिहितः स्वर्गकाम इति साध्ययागनियोज्यः स्वर्गकाम इति तदर्थः स्वर्गेतत्रैकामस्य विशेष्यतया
भानेनैतत्तत्राख्यातोपस्थाप्यसंख्यान्वयानुरोधेन पदमभिहितेत्वेतु न सप्तके चरयभावविशेषोपादानि
ककर्तृत्वरिसंख्यान्वयेनैवोपपत्तेः कार्यताबोधे संख्यान्वयांगीकारेपि ओपादानिकबोधे संख्या
न्वय एव तत्रैव प्रमासाधुत्वनिर्वाहकः कार्यताबोधस्याप्योपादानिकत्वात् अत एव कार्यत्वपक्षे
समभिव्याहृतक्रियान्वयित्वे विप्रतिपत्तिसंगतिः कार्यत्वबोधस्य शाब्दत्वे जातिमत्वे तादृशजातिम

त्तिबोधे क्रियासंसृष्टतया भासमानत्वरूपक्रियान्वयित्वाभावस्य बाधप्रसंगादपूर्वे कार्यताबोधानुत्तर
बोधापक्रियान्वयित्वाभावो विप्रतिपत्तिविषय इति चेन्न । अपूर्वकार्यतायाः क्रियाकार्यतां विनाऽनुपपत्त्या
तस्याप्युल्लिङ्गानुपपत्तिद्वारा पारंपर्याबोध्यैवेति मिश्रग्रंथासंगतेरशक्यपरिहारत्वात् । न चोक्तबो
धे एव कर्तृत्वबोधः नतु चरमे कर्तृत्वावगम इति मिश्राभिप्राय इति वाच्यं । अनुपदमेव नन्वेवं नियो
ज्यत्वेनैव स्वर्गकामाद्यन्वयेऽपेक्षाकारणाऽस्तामे प्रवर्तकत्वायोग इति चेन्न । चरमभाविन्यापाराहानि
कबोध एव कर्तृत्वाधिकारित्वपर्यवसानलाभादिति तेरवस्यमानत्वात् । तथा च स्वर्गकामनियोज्य
को यागः स्वर्गकाम इत्याकारकशाब्दत्वेन कार्यताबोधः श्रेयात् यागनियोज्यः स्वर्गकामकार्योपि यागार
तितदुर्भागविशेष्यकस्य कार्यताज्ञानप्रयोजकस्वर्गकामनाविशिष्टप्रयोज्यवृत्तिसाध्यो याग
इति निर्वाहः । न च योग्यताज्ञानत्वेन नियोज्यत्वज्ञानस्यापूर्वपि लक्षणीय चेदपि फलित्वे तत्ताने तत्त्वम
नर्थकमिति वाच्यं । तदन्वयप्रयोजककरूपविशिष्ट एव तदन्वय इति नियमात् तदुक्तं मिश्रैरेवयोग्य

तावच्छेदकप्रकारेणैवोपस्थितत एवेतरान्वय इति घटेच्छिद्रेतरत्ववत्स्वर्गकामनियोज्यत्वस्य योग्यतावला-
दुपस्थितेरिति तत्र च योग्यतायागादिनियोज्यतत्र यागादिकर्त्तत्वबोधः इतरबोधस्तु तदनुमितो व्यापक-
तानवच्छेदकप्रकारभासकत्ववच्छाब्दबोधेपि पदानुपस्थितप्रकारभासकतायास्तत्वयुक्तिसिद्धत्वा-
त्ववस्त तस्यअध्याहारवादिनोते योग्यताज्ञानासकनियोज्यताबोधस्त्वनुलीनः ततज्ञानेपि नेत-
रबाधोयस्येति विषयाबाध एव योग्यताऽन्वयप्रयोजकरूपस्य फलिभूतबोधेभानं मणिरत्नोप्यनुमतं
कार्यताविधिपक्षेऽन्वयप्रकारतयासाधनत्वं शाब्दमिति तदुक्तेः शाब्दे शाब्दज्ञानविषयः अन्वयप्रका-
रतयाऽन्वयितावच्छेदकतया न वान्वयप्रयोजकरूपस्यान्वयितावच्छेदकतयाभाननियमेऽन्वयप्र-
योजकरूपस्य पदान्वयप्रयोजककरूपांतरं तस्यापि भानप्रसंगेनानवस्थेति वाच्यं। पदार्थनावच्छेदकत्व-
पस्यान्वयप्रयोजकस्यान्वयितावच्छेदकांतरानपेक्षणेनानवस्थापरिहारात्। अथ यदि कार्यताबो-
धेपीष्टसाधनत्वभासते तदा गतेतेषां काम्यसाधनताविषयकत्वेति साध्यताज्ञानस्य प्रवर्तकास्मेव

सू॰ कौ॰
२०७

बीजभूतेन साध्यत्वसाधनत्वयोर्विरोधनिबंधनैकधीविषयत्वासंभवेनेति चेत्साध्यत्वसाधनत्वयोर्वि
रोधे नैकेतानाविषयत्वं गुर्वनुयायिनां केषांचिदेवानुमतं तत्तु सर्वेषामिति मतभेदेन सर्वसामंजस्या
त् ज्ञात एव यज्ञे तत्सादेष्टसाधनयागरूपधात्वर्थकार्यतान्वय इति मतं साधनत्वस्याभिधासमकतावा
दिनो नरसिंहस्य संगमितं एवं यागस्य स्वर्गसाधनत्वमुपादानेनावगम्य काम्यमानस्वर्गसाधनं यागः
स्वर्गकाम्यकार्य इति उपादानसन्निवाच्छब्दाद्वैतीति स्मृतिकानाथ ग्रंथेप्युपपादितः साधनत्वेना
द्भिलिप्सितकार्यताबोधजनकनियोज्यताबोधे अन्वयताबच्छेदकतया साधनत्वभानाभिप्रायकं
वेत्स्कृतस्तत्त्वज्ञ अन्वयप्रकारतया अन्वयप्रयोजकरूपलक्षणयोग्यतालेन साधनत्वं शाब्देन्याव्दसहकारीति
मत्त्वार्थकरणादन्वयप्रयोजकरूपस्य फलिभूतेन विषयत्वानियमेपि उपपद्यते अत एव दीधिति
कृतापि सच्चेतयाम अन्वयप्रयोजनकरूपवत्त्वेन तेनज्ञाने प्रथमं मंगपतनं च शाब्दबोधे तदनुप्रवेशापि
नियत्ताभानाभावादि समभिहितं प्रपत्तिसमर्पणे दीधितिविस्तरवधेय एवं चेच्च पश्चात्मते कार्यबोधनत्मनत्कटुं

त्तत्ज्ञानकबुद्ध्यैवैव काम्यसाधनताज्ञानस्यावश्यकत्वे साक्षात्स्वर्गसाधनस्य यागादेरपूर्वद्वारैव स्वर्ग
साधनत्वेनगृहीतत्वं तस्य च नापूर्वोपस्थितिं विनापूर्वे विधिशक्तिकल्प्येयत इति मिश्रानुसारिणः। केचित्तु
कामनाविशिष्टस्य कार्यत्वान्वयितया भानात्तद्गतस्य कामनाधीनकार्यत्वभानस्य साक्षादेव निर्वाहके
काम्यसाधनताज्ञाने हेतोः कामनाधीनत्वे हेतिप्रयोजककाम्यसाधनत्वशरीरे कामनान्तर्भावादेव
तिकाम्यसाधनत्वस्य कामनाधीनकार्यत्वान्वयप्रयोजकतया तदन्वय एव तस्य योग्यतात्वोपग
मात् नियोज्यबोधानन्तरमनपेक्ष्यैव काम्यसाधनताज्ञानेन कार्यताज्ञानमुत्पाद्यते यागस्य स्वर्गसाध
नत्वमुपादानेनावगम्य काम्यमानस्वर्गसाधनं यागः स्वर्गकामकार्यं वस्त्वेतीति शाब्दीनं ग्रंथस्या
थत्वेवसरसोऽवसीयते तत्र नियोज्यत्वज्ञानापेक्षाभावः कार्यताविधेरन्वयितावच्छेदकतया नियो
ज्यत्वभानस्य चाप्रदर्शनात्। कामनाविशिष्टतन्नियोज्यत्वमपि तद्विशिष्टस्येति तत्प्रयोजकता
निर्वाहकमिति तल्लानयत्यवश्यापेक्षणीयमिति चेद्वत्तकिंपावन्निर्वाहकज्ञानमेव शाब्दबोधेपेक्षि

ते तथा सति चिकीर्षाप्रयोजकत्वादेरपि कृत्युपयोगितानिर्वाहकतया तज्ज्ञानमप्यपेक्षितमिति चेत्‌ बहवोऽन
र्थाः प्रसज्येरन्‌। अथ विध्यधीनबोधे नियोज्यत्वभानानुपगमे स्वर्गकामश्चैत्रस्त्वं वेदतेत्यादिवाक्यमपि प्र
माणं स्यात्‌ तस्मान्न स्वत्स्वर्गकामनयापि चैत्रस्य वेदनसंभवेन स्वर्गकामनाधीनकृतिसाध्यत्वस्यापि तद्बोध्य
धात्स्वमते तु स्वर्गकामनाधीनस्वकृतिसाध्यत्वज्ञानस्य विषयो न चैत्रस्य वेदने अन्यथा स्यात्त्वेनाभ्युपगमे
न चैत्रस्य वेदनादौ काम्यस्वर्गसाधनत्वरूपलिंगस्य विशिष्टज्ञानासंभवेनश्चांतस्य पुंसस्तादृशलिंगासं
सर्गाग्रहात्‌ कार्यत्वासंसर्गाग्रहमात्रोपगमात्‌ स्वर्गकामनाविशिष्टानियोज्यत्वस्य तत्र बाध इति तादृ
शवाक्याप्रामाण्यमप्रतिपत्तिरिति चेन्न स्वर्गकामसमभिव्याहृतविधिजन्यकार्यताबोधे स्वर्गसाधनत्वस्या
न्वयप्रयोजकस्यानुपस्थितावच्छेदकतयाभाने नियमोपगमे नैव तदप्रामाण्यापत्तेः साध्यत्वसाधनत्व
योरेकधर्मिण्येकज्ञानाविषयत्वे तु स्वर्गसाधनताज्ञानविषयत्वस्यैवायोग्यतात्वानुपपत्तेः तदेव च कार्यता
बोधेऽनुपस्थितावच्छेदकतयाभासे इति अन्यथाख्यात्यनभ्युपगमेऽपि तदपि बाधितं चैत्रस्य वेदनादावपि न किंचि

दनुपपत्तेः। अथ कामनायाः कृतिप्रयोजकत्वं कार्यताज्ञानासंपादनद्वारैवेति कृतिजनककार्यताज्ञानप्रयोज
कत्वरूपमेवतत्त्वे कार्यताधीप्रयोजकस्वरूपनियोज्यत्वघटितमिति कामनाविशिष्टस्य कर्तृत्वभाना
न्तर्गतं नियोज्यत्वभानमिति चेत्तर्हि अपूर्वस्य कृतिसाध्यत्वं यागद्वारैवेति कृतिसाध्ययागसाध्यत्वात्सक
मेवतत्तस्य यागस्य कार्यतयाघटितामेति यागस्य कार्यताभानेऽपूर्वकार्यताभानांतर्गतमिति किं या
कार्यत्वमाभिधानिकमेवस्यात् तत्तथाचापूर्वकार्यत्वानुपपत्त्या यागकार्यतालाभ इति किंवा कार्यत्वमौ
पादानिकमिति तत्रसिद्धांतोऽस्मन्मते न पदद्वित्वस्यापूर्वयोः साध्यसाधनभावः स्वरूपसंबंधविशेषः पदार्थांत
रमेवेति नासौ कृतियागयोः साध्यसाधनताभावघटितः अपितु तन्नियतदस्तुतेतदाहृतिकामनयोः
प्रयोज्यप्रयोजकभावोऽपि न कामनाकार्यताज्ञानयोः प्रयोज्यप्रयोजकभावघटित इत्यपितु त्वं स्वर्गका
मस्मियोज्यस्यप्रयोज्यत्वज्ञानविरहादिस्यपि न नियोज्यस्वरूपेणान्वयबोधपरञ्च अपितु स्वर्गकामरूपो
यो नियोज्यः तत्कार्यतान्वयपरमेव कामनाविशिष्टस्याहीत्यादिना कार्यताज्ञानस्य कार्यसाधनताबो

धाधीनतायाश्चिरस्थितियोग्यतानिर्वाहकत्वेनकथनमितिकाम्यसाधनतायाःकार्यताधीद्वाराकार्यता
धीजनकार्यत्वनिर्वाहकत्वमितितदन्वयेसायोग्यतेतिसच्चचिंतुमित्याहुः नदयंनिष्कर्षः।यागादिरूपका
लांतरभावीफलसाधनाभूतक्रियायांव्यापारघटितस्यतादृशफलसाधनत्वस्यज्ञानेनव्यापारोपस्थि
तिंविनाअपूर्वरूपव्यापारस्यचोपस्थापकांतराभावाद्विधेरेवतत्वस्थापकत्वमंगीकार्यंतेनचैवर्त्तिंवि
नानिर्वहतीतिवैदिकलिङः कार्यत्वेनतत्रशक्तिः कल्प्यते।यदिचसाधनत्वंस्वरूपसाधनत्वस्यसं
वेद्यविशेषःपदार्थांतरवत्तस्यपरंपरासाधनस्यापिनव्यापारघटितेएवंचव्यापारानुपस्थितावपिसा
धनतात्वेनसामान्यधर्मेणपरंपरासाधनत्वमपिसुग्रहंपरंपरासाधनत्वेनचतानमनपेक्षितेतिमि
लुच्यतेतदापिसाक्षात्साधनत्वेनग्रहीतेसाधनेसान्वयपदद्वोपफलसमपर्यंतस्यापिव्यापारजेन
कत्वरूपान्वयप्रयोजकधर्मज्ञानमपेक्षितंतेयोग्यताधियःशाब्दधीजनकत्वादितियागादेस्तथासाधनत्वा
न्वयबोधेहेतुभूतस्यस्वर्गपर्यंतस्यापिव्यापारजनकत्वज्ञानस्यनिर्वाहायतादृशव्यापारेविधिशक्तिकल्प

नमावरूपकं तथा च विधिप्रत्ययार्थकार्यत्वावच्छिन्नोपस्थितौ तत्र यागस्य जन्यतासंबंधेन तदेकदेशोपस्थितौ च
कामनाविशिष्टस्य प्रयोज्यतासंबंधेनान्वयोपगमात् स्वर्गकामो यजेतेत्यादिनः यागविषयकं स्वर्गकाम
कार्यं इत्याकारकः प्राथमिकोऽन्वयबोधः विषयपदस्य जनककार्यतया यागविषयकमित्यस्य यागजन्य
मित्यर्थः तत्र च कामनाविशिष्टस्य कृतौ प्रयोज्यत्वेनान्वयकार्यतास्थाने व सरूपस्य नियोज्यत्वस्यान्वयप्र
योजकतया जलेन घटमाहरेत्यादौ घटादितरत्ववज्ञावनोपगमे क्रियायां कामिकार्यताबोधे का नः कि
यानियोज्यत्ववदुक्तेर्बोधेपि कामिनोऽपूर्वे नियोज्यतया भानमावश्यकं तथा च काम्यसाधनतातानज
न्यकार्यताधीमनुरुध्य कार्यं यागविषयकमित्याकारक एवापूर्वकार्यताबोधः इत्थं च यागपुरुषयोश्च कामना
नो स्वर्गार्थयतिपानतीतिः स्वर्गार्थता च यागस्योपगम्यत्वेन स्वर्गेतुहेतुभूततापूर्वे नियोज्यतया पुरुषस्य स्व
र्गहेतुभूतपुरुषस्यैव इति अनेन कृताकार्यताज्ञानजनककाम्यसाधनताज्ञाननिर्वाहितत्तपा च कामनाया
इति तत्सिद्धातोपि संगच्छते एवं पूर्वं स्वर्गपर्यंतस्यापि तत्वमपि प्राथमिकबोधे भासते तावते वफलत्वमप

पर्यंतस्यापि व्यापारजनकस्वरूपयोग्यताज्ञाननिर्वाहात्तच्छिद्रेतरत्वादिवत्यदनुपस्थितमप्याभास
तेऽस्त्वतदपि विवध्यर्थः एवमपूर्वे कार्यताया प्रतीतायामपूर्वे कार्यत्वं यागस्य कार्यतां विना नोपप
द्यते यागद्वारैवापूर्वस्य इति साध्यत्वादिसत्त्वनुपपत्तिज्ञानसहितशब्दसामग्रीतः स्वर्गसाधने यागः
स्वर्गकामकार्य इति द्वितीयो बोधः तत्र काम्यसाधनत्वरूपयोग्यतापदानुपस्थितापन्वयितावच्छेदक
तया भासते तत्तत्रश्च यागस्य स्वर्गकाम इति साध्यत्वे स्वर्गकामस्य यागकर्तृत्वे विनाऽनुपपन्नमित्य
नुपपत्तिधीघटितशब्दात्स्वर्गकामो यागकर्तेति तृतीयो बोधः यद्यपि क्रियाकार्यताबोधात्पूर्वं मौपा
दानिकैः क्रियायाः काम्यसाधनताबोधोवश्यमंगीकरणीयः तं विना योग्यताज्ञानविरहेण क्रिया
कार्यत्वबोधासंभवात्तदुक्तं एवमपूर्वकार्यताबोधाद्बोद्धा विमृशति अपूर्वं जनिका तावत्कामिन्
तिः सा यदि यागविषया भवति तदैवापूर्वं जनयितुं शक्नोति न त्वन्यथान्यतत्वसदानुपपत्तेः कामिकृति
श्च यागविषया तदा भवति यदि यागः काम्यमानसाधनं स्यात्काम्यसाधनता याज्ञात एव कामिनः कार्य

ताधीनविषयमात् एवं यागस्य स्वर्गसाधनत्वमुपादानेनावगम्य काम्यमानस्वर्गसाधनं यागः स्वर्गकाम
कार्यं इत्युपादानसचिवाच्छब्दादवैलीता एवं मिश्रमते कामिनः क्रियानियोज्यतयाबोधोपवर्ण्यमनरा
स्वीकरणीयः तेन नियोज्यस्य कार्यत्वबोधोपपत्तिकयोग्यतास्वीकारादिति बोधपंचकमेवन्नतु त्रय
तथापि योग्यताज्ञानविधया अपेक्षितस्य तादृशबोधद्वयस्य शाब्दजन्यत्वामनियतं प्रमाणान्तराधी
नबोधेनापि निर्वाहादिति बोधस्यैवतन्मते शाब्दजन्यत्वनियमाद्बोधत्रयप्रवादः केचित्तु स्वर्गका
मकार्यत्वेनाद्यं बोधानन्तरं मयेदं यागविषयकं कार्यमिति द्वितीयो बोधः। कार्यसाधनत्वेन स्वर्ग
कामकार्यत्वेन च क्रियाया बोधस्तृतीयः स्वर्गकामो यागकर्तेति चतुर्थः स्वर्गकामकार्यमिदमहं च
स्वर्गकामः अतो मयेदं कार्यमिति यागेषष्ठः प्रतिसंधाने पंचममिति पंचैवज्ञानानि शाब्दानीत्याहुः
परे तु यागविषयकं स्वर्गसाधनत्वेन ज्ञायमानं स्वकृतिकार्यं नियोज्यस्वर्गकामीयमिति प्राथमिकोन्वय
बोधः नियोज्यत्वयोग्यतात्वेन स्वर्गकामप्रकारकतयाभासत्तेविशिष्टान्वयनिर्वाहकत्वेन स्वर्गकामस्य

संसर्गितयापि भासते तत्तोऽतींद्रियत्वेन फलत्वेन न्यच साक्षात्स्वसाध्यस्यापूर्वस्यावगतं कार्यसंयाग
स्य स्वर्गकामिकार्यत्वं विनानुपपन्नमित्यनुपपत्तिज्ञानेन सहकृतप्रतीतात्पूर्वद्वारककामसाधनत्व
ज्ञानान्नियोज्यस्वर्गकामीयः स्वर्गसाधनत्वेन ज्ञायमानो यागः कार्यमिति द्वितीयो बोधः वृत्तीयस्त्विति
साध्यत्वेन यागाज्ञातः स इति राज्यव्यतिरेकेणानुपपन्नमित्यनुपपत्तिज्ञानेन स्वर्गकामः स्वनियो
ज्यस्वर्गसाधनत्वेन ज्ञायमानकार्यपाठानुकूल इति मानुस्वर्गकामः स्वनियोज्यकस्वर्गसाधनत्वेन
ज्ञायमानकार्ययागानुकूलव्यापारवानिति वात्ततीयो बोधः। किंयानुकूलव्यापारवत्त्वमेव कर्तृत्वं च।
त एव यागस्वर्गकाम इति साध्यत्वेऽवगते तत्कर्तृत्वमपि लब्धमिति तृतीयबोधोऽस्फुटस्वविपरास्तं।
सामान्यतः शब्दाज्ञास्यातोपस्थापितस्य व्यापारस्य कर्तृमात्राकांक्षतया प्रथमातपदोपस्थाप्यश्चापि च
नियमेन च तृतीयबोधस्यावश्यकत्वात् ततो नानधिकृतस्य कर्तृत्वमिति न्यायेन स्वर्गकामस्यावगतं कर्तृत्वं
यागजन्यफलभोक्तृत्वात्मकाधिकारित्वं विनानुपपन्नमित्यनुपपत्तिज्ञानेन स्वर्गकामो यागजन्यफलस्वामी

त्तिपदार्थबाधः तत्तश्चैतद्वाक्यस्यप्रवृत्तिपरत्वेऽवगते शरीरभूतस्यानन्तरं तेनैवितनुतेऽनुपपन्नमिति अनुपपत्तिसा
न्नसहिते न स्वर्गकामस्य यागः कार्यः स्वर्गकामो यागस्य कर्त्ता भोक्ता च हि यथा स्वर्गकाम इति प्रवृत्तिसंधानेन
यागो मह्यमिति साध्यः अहं च यागे कर्त्तेति तदधिकारी चेति प्रवर्त्तकं पंचमं सोऽनुसंधत्त इति प्राभाकरसंप्रदा
यइति प्राहुः ननु आशुविनाशिनः कालान्तरभाविफलसाधनतान्वयफलिपदसमयस्यापि व्यापारवत्त्वे
योग्यतातत्र आग्नेयादिषु षड्यागेषु परस्परमपूर्वे साधनतान्वयबोधानुरोधेन मुख्यमाकलिकापूर्वाणामपि वान्व
त्वमंगीकारणीयं तत्र वाचितस्यैव योग्यतात्वात् तथाचाग्नेयोऽष्टाकपालो भवत्यमावास्यायां पौर्णमास्यां च दधि भवत्य
मावास्यायामैन्द्रं पयो भवत्यमावास्यायां आग्नेयोऽष्टाकपालो भवति पौर्णमास्यां ताभ्यामग्नीषोमीयमेकाद
शकपालं पौर्णमासे प्राप्यच्छत उपांशुयाजमन्तरा यजतीति षड्द्रव्यदेवतासंबंधरूपयागस्य प्रथमप्र
तीतिनिरूपोपपत्तिबोधकत्वेयोरनत्तिवाच्यानि दर्शपौर्णमासाभ्यां यजेत स्वर्गकाम इति प्रधानविध्यर्थ इत
परमापूर्वं विधिप्रतिरूपकीभूते नांतर्भावितणिजन्तेन भवतीत्यादि नान्वयतेहेतुत्वेषु षड्यागानसकृत्

पौर्णमासस्वरूपे प्रतिपाद्ये नितदंतरं च तज्जनीतीति साधनत्वानुपपत्त्या तस्य पूर्वोत्पत्तिकल्पिकापूर्वस्य
पदेस्यानि कल्प्यत इति प्रभाकरसिद्धांतभंगप्रसंगः यागं विना व्यापारोपस्थितिस्त्वगे हेतुत्वस्य च पर
मापूर्वहेतुत्वस्यापि गृहीतुमशक्यत्वात्तस्मादुभयत्रापि पूर्वं कल्प्यतावाच्यं तावास्कनातु वैषम्येणार्ध
जरतीयं एवं गापूर्वं पि । यद्वोत्त्वा प्रधानविधिप्रहृस्या तदुपस्थापित परमापूर्वमनुपत्त साधनत्वमा
ग्नेयादीनां बोध्यते तदानीं सामान्यतो यागः फलपर्यंतं स्यापि व्यापारवानिति मान्यता निश्चयोऽस्य वमधा
न विधेनैचापूर्वस्योपस्थितत्वात्स एव च परमापूर्वसाधनतान्वयबोधजनकतदसत्तादृशनिश्च
यस्याग्नेयत्वादिरूपान्वयितावच्छेदकाप्रकारत्वाभावेन परमापूर्वसमयपपर्यंतस्यापि व्यापाराविष
यकत्वेन योऽन्वयबोधजनकत्वासंभवात् । अन्यच परमापूर्वस्योपस्थितौ तज्जातीयद्वारसंभावान्वयान्व
यबोधसंभव इति वाच्यं । शाब्दबोधे न यप्रयोजकरूपवत्त्वरूपयोग्यता निश्चयस्य वजननेकत्वात् अन्य
थानाशकोराधभक्षणादौ फलपर्यंतस्यापि व्यापारस्य धातुसाम्योदर्शनेन तत्संभावनया स्वर्गसाधनत्व

धीसंभवेनापूर्वमात्रस्यैववाच्यतानस्यात् तदपि भक्तिः पुरुषैरेकदानुष्ठितानामाग्नेयादीनां प्रयोगप्रसं
भवेन साक्षात्साधनत्वसाधारणत्वमारेण प्रथमे तेषां परमापूर्वसाधनत्वधारासु घटेवेति न कलिकापूर्वोपक्षे
क्षापरं त्वेनचरमेकैककर्तृकत्वावधारणेन साक्षात्साधनत्वबाधप्रतिसंधाने साधनत्वसामान्यरक्षाय तु
सत्यपूर्वकल्पनेति तेषां कस्यचिदपि सुकृत्पाध्यायेरुक्ते तदप्यसंभवं संप्रथममेककर्तृकत्वस्य पाणिपिहित
त्वाभावेन योग्यतानिर्णयासंभवात् अमावस्यापौर्णमासीहितयोः प्रयोगप्रसंभवानायाजसंभवात् तत्राप्येक
प्रक्रमेणाग्नेयादीनां मुख्यैकैकस्य परमापूर्वसाधनत्वप्रगम्यते तत्र चेन्नानुपपत्तिः साक्षात्साधनत्वबोधात्
अनंतरं चप्रथमं एवं च विद्वानमावस्यायां प्रजते पएवं विद्वान् पौर्णमास्यां प्रजते इति विद्वत्सांप्यादर्शपौ
र्णमासयोः क्रियाकलापस्वरूपलाभगमे साक्षात्त्वबाधेपि प्रयोगविधिनैक्यं प्रयपदसाधनत्वस्य रक्षणाय
कलिकापूर्वकल्पनमिति चेन्न एवं सति कलिकापूर्वाणामवश्यमावकल्पनतायाउपपादनेप्यभिरुके कल्पना
नामा अनुपपादनात् उत्पत्तिवाक्यानि यदि पद्धोगानां परमापूर्वसाधनत्वं बोधयेयुस्तदेवोत्पत्तिवाक्य

लिकापूर्वाणां वाच्यत्वं स्यात्तदेवन्न किंतु तेषामिष्ट्योः स्वरूपमात्रबाधकत्वमुपपन्नमिति णात्वे हीस्यात्ते पांवा
च्यतेतिति चेन्न तत्रापि दर्शपौर्णमासपरमापूर्वसाधनताबोधकतया दर्शपौर्णमासाभ्यामिति द्विवच
नेन प्रथमपठितेरुत्पत्तिवाक्यस्थकारणकत्वापन्नस्वरूपतयावगते यागे साक्षात्परमापूर्वसाधनताबा
धस्यातिस्फुटतया च तदनुरोधेनैव कलिकापूर्वाणां वाच्यताभ्युपगमस्यावश्यकत्वादिति चेदत्र के
चित् कलिकापूर्वाणामपि न मते वाच्यत्वमेव न कल्प्यत्वं कल्प्यताप्रचादत्र परमापूर्वसाधनत्वमप्य
पायथानुपपत्त्या तद्बोधप्राप्यभ्युपगममात्रं निबंधनमिति वदंति अपरे त्वाहुः यद्रूपावच्छेदेन कार्य
तरभावित्वप्रतिसंधानेन तेनैव तेनैव रूपेण भासमानं फलप्रतिफलसाधनतान्वये फलपर्यंतस्यापि
पायारवत्वं योग्यता तादृशं च रूपं स्वर्गत्वादिकमेव न तु कार्यत्वं कार्यस्याव्यवहितत्वेनापि संभवात्
एवं च कार्यसाधनतात्वेन परमापूर्वसाधनतान्वये द्वारापेक्षायां तदपेक्षाविरहेण कलिकापूर्वाणां वा
च्यता परं तु अग्रे स्वर्गपर्यंतस्यापि कार्यत्वे तिराजनेकानामाग्नेयादीनां तादृशकार्यजनकत्वे परमापूर्व

मादायैव पर्यवस्यति तच्च सर्वौदीर्घ्यं कालांतरभावीति व्यापारं विना तज्जनकत्वानुपपत्त्या कल्पिकापूर्वाणि
कल्प्यंत इति तेषां कल्प्यत्वमिति एवं मंगलापूर्वेप्युक्तरीत्या कल्प्यतां स्वीति दिक्। नन्वेवं यागे स्वर्गसाधनता
निर्वाहायापूर्वं वाच्यमिति यथांगीक्रियते तद्यो ब्राह्मणायावगुरेत्तं शतेन यातयादित्यस्यायो ब्राह्मणाव
घोषमप्रागभाववानुशासतयानारूपनरकविशेषवानित्यर्थकाद्ब्राह्मणावगोरणस्य शतयातनाहे
तुत्वग्रहार्थं दुरितापूर्वस्यापि वाच्यत्वमावश्यकं विशेषाभावात् तथा चैतत्र तथा च शतयातनाहेतुत्व
मवगम्यते तत्र चेहिकं दुरितापूर्वं कल्प्यत इति भाष्याकरसिद्धांतविरोधो दुर्वार इति चेदत्राहुः नह्यवगुरदा
तयादित्यनेनावगोरणयातने विधीयेते तयोः कार्योपदेशानो विस्यात् एवं च स्वर्गकामो यजेतेत्यत्र वि
धिलिङा स्वर्गकामकार्यत्वे यागप्रतिपाद्यते तत्र च स्वर्गसाधनत्वे योग्यतातो द्रहस्य न द्वारापेक्षेति वि
नैतियुक्तेत दपूर्वस्य वाच्यत्वे प्रकृते तु हेतुहेतुमतोर्लिङि इत्यनुशासनबलेनावगोरणशतयातनयोर्निमित्त
पौर्वापर्यमात्रं प्रतिपाद्यते तत्र च न द्वारापेक्षेति रपेक्षितेति द्वारं विनैव पौर्वापर्यनिश्चयसंभव इति न तु

मा॰ कौ॰
१२४

रितादृष्टस्य वाच्यत्वेऽनेवं चेद्दुरितादृष्टं कल्प्यमपि न स्यादिति वाच्यं कारणता तत्र कल्पनायां गौरवेणा
न्यथासिद्धिरियं चेत्कारणतास्य वा गौरवेणास्य नियतपूर्ववर्तिताया अपि तस्य कारणत्वे कल्प्यते जन्यता
नियमबीजभूताकांक्षायाः अपेक्षणं तेष्वेति दुरितादृष्टं कल्पनाया आवश्यकत्वात् इति प्राभाकरमतनिर्ग
वेरिति अत्र न्यायविदः अन्वयप्रयोजकरूपवत्त्वं यदि योग्यता स्यात्तदैवोक्तरीत्या दृष्टस्य वाच्यत्वं संभा
व्यते तत्तु एवं न अन्वयप्रयोजकरूपवत्त्वस्य योग्यतात्वे स्थूलजलाभिप्रायकत्वे पयसा सिंचतीति वा
क्यस्यापि योग्यतापत्तिः सेकान्वयप्रयोजकरूपस्य द्रवद्रव्यत्वस्य स्थूलजलेपि सत्त्वात् तेन योग्यतानन्वितत्व
त्तित्वेन तदुपस्थितिधर्मवत्त्वमेवान्वयप्रयोजकरूपवत्त्वमपि नोक्तातिप्रसंग इति वाच्यं तत्रासत्त्वेनान्व
यविनिश्चयविरहस्यैव योग्यतात्वमुपेयस्य वस्तुतः सत्त्वस्यान्वयबोधहेतुत्वौचित्यात् तस्य च योग्यतापि स्व
र्गसाधनत्वबाधविरहेण सत्त्वात् वस्तुतस्तु एकपदार्थतावच्छेदकविशिष्टे अपरपदार्थसंसर्गस्यैव यो
ग्यतात्वस्य आवश्यकत्वात् तस्याश्च संशयनिश्चयसाधारणं ज्ञानमात्रमेवाहेतुः तत्र यागेपि स्वर्गसाधनत्वसंशयस्य

तत्र सत्वात् अपूर्ववाच्यत्ववादीनामपि तथैव वाच्यत्वात् न साऽपूर्वे स्वर्गसाधनत्वसंशयस्य तत्र सत्वात्
अपूर्ववाच्यत्ववादिनामपि तथैव वाच्यत्वात् न सापूर्वे स्वर्गसाधनत्वस्य तद्योग्यतानुपस्य फलपर्यंतस्यापि सा
पारवत्वस्य वापूर्वे निश्चयसंभवतीति एवं चापूर्वे वाच्यत्वे विनैव मागेस्वर्गसाधनत्वादिशाब्दबोधसंभवेऽपू
र्ववाच्यत्वभानाभावान्ननु सामान्यज्ञानजनकसामग्र्या एव विशेषबाधे तदितरविशेषप्रकारकज्ञानजन
कत्वं क्लृप्तमत एव घटेन जलमाहरेत्यादौ सच्छिद्रघटबाधे सच्छिद्रेतरपटस्यासच्छिद्रेतरत्वेन भानं एवं च
याग साक्षात्साधनत्वबाधे परंपरासाधनसाधनत्वेन भानमुपेयं तत्तत्परंपराघटकापूर्वोपस्थितिं
विना न संभवतीति तद्वाच्यत्वमावश्यकमिति चेन्न साक्षात्परंपरोदासीनसाधनत्वेनैव परंपरासाध
नत्वभानोपगमात् घटेन जलमाहरेत्यादावपि घटत्वादिनैव सच्छिद्रेतरघटादिभानं ननु सच्छिद्रेतरघट
त्वादिना पदादुपस्थितस्यैव शाब्दबोधविषयत्वेन च्छिद्रेतरत्वस्य पदानुपस्थितत्वात् शाब्दबोधे विषयत्वा
संभवात् न च घटपदस्य छिद्रेतरघटत्वावच्छिन्ने लक्षणया सच्छिद्रेतरत्वमपि पदोपस्थितमेवेति वाच्यं अ

न्वयानुपपत्तिज्ञानादिविरहेण निर्वाणमलक्षणायामानाभावात्तल्लक्षणापत्तिसंधानाभावेपि शाब्दबोधस्या
नुभवसिद्धत्वाच्च अथ घटादिपदस्य घटादौ व्यवहारादिना शक्तिग्रहे सति द्वित्तरत्वादेर्भानात्तु शक्तिग्रहज
न्यसंस्कारोपस्थितस्य तस्य शाब्दबोधे भानमस्तु अकाशाद्यादाशस्यापि शक्याश्रयत्वविषयकाकाशा
दिशक्तिग्रहजन्यसंस्कारोपस्थितशक्याश्रयत्वस्य काशशब्दजन्यशाब्दबोधे भानादर्शनादिति चेन्नाद्यस्या
पदजन्योपस्थितिविषयत्वाभावात् अन्यथा संस्कारोपस्थितस्येव फलोपधेयस्यापि व्यापरित्वस्योपस्थिति
संभवेन अननुभवसिद्धमदर्शवाच्यत्वमपि दुर्घटं स्यात् विशिष्यापदर्शानुभवाभावेन तत्पाऽस्मरणेपि शाब्दबोधं
प्रति समानप्रकारकत्वेनैव पदार्थोपस्थितेर्हेतुत्वात् सामान्यतः स्मरणेन गवादिपदरवाशापि विशेषस्य
शाब्दबोधविषयत्वासंभवात् आकाशपदस्य तु शब्दाश्रयत्वविशिष्ट एव शक्तेरुपगमात् नचाष्टद्रव्यातिरिक्त
द्रव्यत्वेनाप्याकाशस्याकाशपदादुपस्थितावनियतोपस्थितिकत्वाभावान्न शब्दाश्रयत्वविशिष्टे शक्तिकल्पना
पाउर्वितसात् अन्यथा कदाचिद्गवयादिसादृश्यविशिष्टस्य शक्तिभ्रमाद्गवादिपदेन बोधने गौरवत्वादिविशिष्ट

शक्तिविलोपापत्तेः। शब्दाश्रय आकाश इत्यादि सहप्रयोगस्त्वाकाशपदस्याकाशपदवाच्यादिपरतयोप
पादनीयः। केचित्तु आकाशपदादाकाशस्य निर्विकल्पकस्मरणं शाब्दबोधस्तु समभिव्याहृतेतरपदा
र्थप्रकारक एवेति न तस्य निर्विकल्पकत्वापत्तिरित्याहुः। अन्ये तु आकाशांशे निर्धर्मितावच्छेदकतयाऽऽ
काशादृत्वमित्यादिवाक्यजन्यशाब्दबोधस्य संशयनिवर्तकत्वेन स्यात्तस्य तत्स्याच्च तदंशे निर्विकल्पना
त्मकोपपत्तिस्वीकारे तस्य युक्तातिरिक्तकार्यकारणाभावादिकल्पनागौरवमिति नोक्तमतं सम्यगित्या
हुः। अथ साक्षात्स्वर्गसाधनत्वबोधसहकृतायाः स्वर्गसाधनत्वत्वेन स्वर्गसाधनत्वबोधसामान्यसामग्र्या
स्तादितरपरंपरास्वर्गसाधनत्वत्वेन परंपरास्वर्गसाधनत्वत्वेन परंपरास्वर्गसाधनत्वप्रकारकबोधज
नकत्वमनुभवसिद्धं प्रत्यवैयोक्तिकं चेदन्यथा पर्वतो वह्निमानित्यत्र वह्निबाधसहकृततया न्यायानुमितेसाम
ग्र्या अपि पर्वतो वह्निमान् पर्वतीयवह्निप्रकारकानुमितिजनकतेतरनेतरं पर्वतपर्वतीयवह्निमान्त्वे
तिसंशयापत्तेः इतरबाधस्य तत्त्वेनानुमितौ [illegible] उपकृतानवच्छेदकत्वे यशाब्देपदत्तु पस्थितस्यापि भानात्तस्याः

वेवाच्यत्वेऽनुवोरिमेति चेन्न साक्षात्साधनत्वबाधे साक्षादन्यसाधनतात्वेन परंपरासाधनत्वबोधोप
गमेनाद्यव्याप्तेः तस्मादपूर्वस्यावाच्यतयाकल्प्यत्वेन लिङोऽपूर्वबोधकेनानास्तीत्यलं विस्तरेण। अत्र
भट्टाः यागव्यापारतयास्वर्गपर्यंतस्थायिनोऽपूर्वस्य कल्पनमपेक्ष्य यागादेरेव स्व[illegible]गपर्यंतस्थायित्व
कल्पनमुचितं धर्ममात्रकल्पने लाघवात्। तो चैतेवस्वर्गसाधनत्वोपपत्तेरिश्वा। अथ विनुपवेत्तया
ग्य विशेषगुणनाशत्वावच्छिन्नंप्रति स्वोत्तरोत्पन्नस्वसमानाधिकरणविशेषगुणत्वेन हेतुतायाः ज्ञा
तादिस्थले क्लृप्ततयेच्छारूपयागस्य तत्तीयक्षणे नाशावश्यंभावेन स्वर्गपर्यंतस्थायित्वेन संभवतीति
चेन्न स्वत्वाननुगमेन कारणतावच्छेदकस्य तत्तद्व्यक्तिविश्रांततया कार्यतावच्छेदकस्यापि तत्तद्व्यक्ति
विश्रांतत्वावश्यकत्तया यागादिनाशस्य जन्यचरमस्वर्गव्यक्तेरेव तद्व्यक्तित्वेन हेतुतायाउपगमेन
यागस्य स्वर्गपर्यंतस्थायित्वासंभवात् नच यागस्य स्वर्गपर्यंतमवस्थाने चतुर्थादिक्षणेपि यमेहमि
साकारकयागमस्य स्यापत्तिरिति वाच्यं। विषयतासंबंधेनालविशेषगुणप्रत्यक्षस्वाधिकरणक्षणो

चळति फलं नोत्पादयतीत्यर्थकतया तदर्थस्य च फले कीर्तनस्य प्रतिबंधकतयैव निर्वाहेणापूर्वासिद्धेः न
च प्रधानफलाजनकत्वे सति तज्जनकापूर्वजनकस्यांगत्वात्तस्य च द्वारएनापूर्वे प्रमाणमिति वाच्यं प्रधान
कर्मतापन्नत्तविधिविषयस्यैवांगत्वात् न च यागध्वंसस्य व्यापारत्वेस्त्वंगविच्छेदानुपपत्तेः अपूर्वस्य व्यापा
रत्वे च तस्य चरमस्वर्गव्यक्तिनाश्यतया तदुपपत्तिरिति वाच्यं। तत्तद्यागादेरिहलोकेपि फलवारणाय स
हकारितयावश्यापेक्षणीयस्य वृत्तिलाभात्मककालविशेषस्यैव फलोत्पादकतया तदुपपत्तेः एवं निषिद्धक
र्मणामपि स्वध्वंसद्वारा नरकजनकतोपपत्त्या दुरितापूर्वेपि मानाभावः न च तस्माद्ध्वंसः प्रतीतो भवतीति क्ष
स्यति सिद्धिः तदुत्पत्त्युत्तरप्रायश्चित्तस्य दुरितापूर्वनाशप्रतिपादनादिति वाच्यं एतेन पदस्य तादृशकर्मपरि
तयातदुत्तरं कृतप्रायश्चित्तस्य निषिद्धकर्मजन्यफलभागित्वाभावमात्रप्रतिपादकत्वात् स्वर्गयागादि
ध्वंसस्य व्यापारतायामंगानामपि प्रधानफलंप्रत्येव हेतुत्वस्योपगंतव्यतयोक्तदिशा गौरवप्रसंगादिति
दिक् इति वदंति केचित्तु कीर्तनादिनाश्यतयैवापूर्वसिद्धिः अन्यथा कीर्तनादेः फलाभावप्रयोजकत्वात्तु

पपत्तेः ध्वंसस्य तदनाश्यत्वात् स्विदातीतेन कीर्त्तनादिना कालांतरभाविस्वर्गादिफलप्रतिबंधस्याप्ययोगा
त्। न च कीर्त्तनादिध्वंसस्य फलप्रतिबंधकत्वोपगमात् तदुपपत्तिरिति वाच्यं तथा सति कीर्त्तने काश्वमे
धस्य पुरुषस्य कीर्त्तनानंतरमाचरितेनाप्यश्वमेधेन फलानुत्पत्तिप्रसंगात्। न च तत्तत्कर्मव्यक्तिजन्यफलं
प्रति तत्तत्कर्मकीर्त्तनध्वंसस्य विरोधित्वाभ्युपगमे प्रसंग इति वाच्यं तादृशफलस्य प्रायशोऽप्रसिद्धत्वात् गौरवात्
अकीर्त्तितकार्यस्य लीयसामान्यसामग्रीबलेन कीर्त्तितकर्मणः फलजनकतापत्तेर्दुर्वारत्वाच्च। एतेन तत्त
त्कर्मजन्ये तत्तत्कर्तृगते यत्फले तदन्यफले तदन्यफलप्रति तत्तत्कर्मकीर्त्तनाध्वंसो विरोधी। तथाविधस्य फ
लस्य पुरुषांतरे प्रसिद्धत्वादित्यपि निरस्तं। यत्तु अश्वमेधादेः फलजनकतायां कीर्त्तनाभावस्यावच्छेदक
तया निवेशान्नोक्तदोष इति तदसत् तथा सति समानकर्तृकत्वपूर्वकालीनत्वोभयसंबंधेन कर्मणा शाज
त्वस्य रौविशिष्टस्याश्वादीनामपि तत्र निवेशनीयतया विशेष्यविशेषणभावे विनिगमनाविरहेण पुष्कल
गौरवापत्तात् तदपेक्षया स्वविषयजन्यत्वादिसंबंधेन कीर्त्तनादेः पूर्वनाशकत्वस्यैव युक्तत्वात्। न च कर्मना

शाजल्लस्पर्शादिप्रयुक्तादृष्टेनाशव्यभिचार इति वाच्यं। उक्ताभप्रसंबंधे नकीर्त्तनादिविशिष्टं यद्यदृष्टं तद्
त्तिप्रतियोगितायाः कार्यत्तावच्छेदकसंबंधतासुपगमेनोक्तव्यभिचाराभावात्। यदपि उपधायकतासंबंधे
नफलेप्रतिकीर्त्तनास्यहेतुरत्तो नातिप्रसंगः नचगौरवमितितन्न हृष्यसत्। अतीतयागादानुपधायकता
संबंधेन फलोत्पत्तेरसंभवात् कीर्त्तितयागादानुपधायकतासंबंधेन फलोत्पादस्योक्तहेतुतावारणे वि
समवायेनात्म निष्फलोत्पादापत्ते ईश्वरत्वाच्च। न चोपधायकतासंबंधेन फलोत्पादकसामग्र्याः प्राक् क्षण
सत्त्वमपि समवायेन फलोत्पादव्यापित्तमतो नोक्तदोष इति वाच्यं। अकीर्त्तित एव यागादौ तादृशसामग्र्याः
सत्वेनोक्तापत्तेर्दुर्वारत्वात्। अपि समवायेन तत्तद्दात्मीयस्वर्गादिकं प्रतितत्तत्सत्वेन माहात्म्यप्रयासत्वा
समवायिकारणत्वस्य तत्तदात्मीयाश्वमेधादित्तिष्टोपधायकतासंबंधेन स्वर्गादिकं प्रतितत्तदात्मीयाश्व
मेधत्वादिनाता दासेप्रसासत्वाकारणत्वस्यकल्पनेनोक्तापत्तिरितिचेन्न गौरवापत्तेः। एवं प्रायश्चित्तादि
नाश्यत्वेनदुरितादृष्टं सिद्धिः ध्वंसस्यनिष्पिद्धक्रियाव्यापारत्वेहृत्तप्रायश्चित्तस्यापि गोवधादिध्वंसत्वेन

नरकोत्पादप्रसंगात्तन्न च प्रायश्चित्तध्वंसस्य प्रतिबंधकत्वोपगमात्तद्दोष इति वाच्यं प्रायश्चित्तानंत
रं हि तस्यापि गोवधादेर्नरकाजनकत्वप्रसंगात्। न च तत्तत्कर्मानिंतरं हि तत्प्रायश्चित्तध्वंसादेस्तत्तत्कर्म
जन्यनरकप्रतिबंधकत्वोपगमान्नोक्तदोष इति वाच्यं। उपदर्शितरीत्या तादृशोपगमासंभवादित्या
हुः अपरे तु तत्त्वज्ञानेनानुपपत्त्या दृष्टसिद्धिः ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते ऽर्जुनेत्यादिस्मृतेः।
न च तत्त्वज्ञानस्य भोगप्रतिबंधकतया फलाजनकत्वपरा सा स्मृतिरिति वाच्यं। सोभरिप्रभृतीनां त
त्वज्ञानिनां भोगश्रवणेन तत्त्वज्ञानस्य भोगप्रतिबंधकत्वायोगात्। किंच प्रारब्धानंगीकारे तत्त्वज्ञानिनाम
पि विहितनिषिद्धाचरणेन भोगापत्तिः। तदंगीकारे तु वासनाविरहेण प्रवृत्तिसत्त्वात्पापसंभवात्।
न च वासनाया भोगनियामकत्वे संभवति तत्त्वज्ञानिनो भोगाप्रसंगात्। एवमपूर्वे पुण्यप्राप्तिश्च यथा
मैत्रेय जायते इत्यादिस्मृतपाप्यपूर्वे प्रमाणमिति प्राहुः। तथा अपूर्वविधिविधेयं परमापूर्वं कलिकापूर्वं दर्श
पूर्णमासाभ्यां यजेत स्वर्गकाम इति प्रधानविधिबोधितबोधितस्य दर्शपौर्णमाससाध्यत्वान्नेः स्वर्गसाधन

त्वस्यानुपपत्त्या यथा परमापूर्वकल्पनं तथैवाग्नेयाष्टाकपालो भवत्यमावास्यायामैन्द्रं दधि भवत्यमावास्या
यामैन्द्रं पयो भवत्यमावास्यायामाग्नेयोष्टाकपालो भवति पौर्णमास्यां ताभ्यामग्नीषोमीयमेकादशकपालं पौ
र्णमासे प्रायच्छत् उपांशुयाजमन्तरा यजतीति षड्द्रव्यदेवतासंबंधरूपयागस्य प्रथमं उत्पत्तिरूपो
त्पत्ति प्रत्यायकत्वयोत्पत्तिवाक्यैः प्रत्येकमाग्नेयत्वाद्यवच्छिन्नं बोधितं तस्य परमापूर्वद्वारकस्वर्गसाधन
त्वस्यानुपपत्त्या षट्कलिकापूर्वाणां कल्पनेस्यापि औचित्यावर्जितत्वेन युक्तत्वात्। अथ षडाग्नेयादिभिः
कलिकापूर्वविशिष्टद्वारा स्वर्गजननसंभवेन परमापूर्वे मानाभावः षण्णां कलिकापूर्वाणामेव स्वर्गोपपत्ता
वस्थानसंभवात् न च षण्णां स्वर्गहेतुत्वे गौरवादेकमेव परमापूर्वं तिहेतुतया सिध्यतीति वाच्यं परमा
पूर्वोपगमे तत्रैव कलिकापूर्वाणां हेतुत्वस्य वाच्यतया तत्कल्पनायामेव गौरवात् न च व्यापारादीनामंगा
नां षट्कलिकापूर्वेषु कारणत्वकल्पनायां गौरवात्त्वन्मते परमापूर्वे कल्पते रतिवाच्यं। परमापू
र्वकल्पनापेक्षया लाघवेन कलिकापूर्वे द्वव्यापारादिजन्यतावच्छेदकजातिकल्पनस्यौचित्यात् नचैर

मांगहरिस्मरणादिजन्यस्यैवास्तुपरमापूर्वं चेतन्नहि हरिस्मरणं साक्षात्तदाग्नेयादियागषट्कं च कलिकापू
र्वद्वाराकारणमिति वाच्यं। हरिस्मरणादिमात्रजन्यस्यापूर्वस्य षडाग्नेयादिजन्यत्वोपगमे गौरवात्। किं च
कलिकापूर्वाणां स्वर्गहेतुत्वे स्वर्गनाश्यत्वेन तथैव परमापूर्वस्वीकारे च कलिकापूर्वाणां परमापूर्वनाश
के परमापूर्वस्य च स्वर्गनाशकत्वे नाश्यनाशकभावद्वयकल्पने गौरवादिति चेन्मैवं प्रधानविधि
प्रवृत्तिकाले दर्शपौर्णमासजन्यस्वर्गसाधनमपूर्वं सिध्यल्लाघवादेकसिद्धत्वात्तदेव च परमापूर्वं
पश्चात्षडाग्नेयादीनां कर्मिकत्वेज्ञाने तदुपपादककलिकापूर्वकल्पनस्य फलमुखत्वेनादोषत्वात्। य
त्तु स्रक्चन्दनादिविषयसंबंधाधीनतपःस्वरविजातीयसहस्रादिसंख्यास्वर्गादिफलजनकत्वेनैव प
रमापूर्वसिद्धिः कलिकापूर्वाणां स्वर्गादिफलजनकत्वे षष्ट्यधिकसहस्रकार्यकारणभावस्यले षट्सह
स्रकार्यकारणभावकल्पनापत्तेः न च कलिकापूर्वेषु जनकतावच्छेदकतये कजातिरेव कल्प्यतेइ
ति वाच्यं। तादृशजातेराग्नेयादिजन्यतावच्छेदकजातिव्याप्यकत्वे पं नर्गतकतिपयानुष्ठाने पि फल

प्राप्तिप्रसंगात् तद्व्यापकत्वे जातित्वे संकरापातात् जन्यतावच्छेदकतया नानाविधस्वर्गादिनिष्ठैकजाति
कल्पनानुपपत्तेश्चेदन्न संयोगादिजन्यतावच्छेदकजातिभिः सममसंकरादिति तदसत् कलिकापूर्वसंबं
धेन दर्शपौर्णमासत्वादिनैव नानाविधस्वर्गत्वावच्छिन्ने हेतुत्वात् कलिकापूर्वाणां च धर्मत्वेन नादृष्ट
त्वेन वा सुखत्वावच्छिन्ने कार्यतावच्छिन्ने वा हेतुत्वात् । न च दर्शपौर्णमासादेरेकजातीयपरमापूर्व एव हे
तुत्वे परमापूर्वस्यैवैकजातीयस्य नानाविधस्वर्गत्वावच्छिन्न इति वाच्यं श्रुत्या दर्शादेरेव स्वर्गहेतुत्व
बोधनात् । युज्यते चैतत् परमापूर्वस्य स्वर्गे कर्मणां विशेष्यहेतुत्वे स्वर्गे परमापूर्वस्येति कल्पनामप्यस्व
स्वर्ग एव कर्मणां विशिष्य हेतुत्वे बाधकाभावात् श्रुत्यनुग्राह्यत्वे इति दिक् । अथ तथापि दर्शपौर्णमासस्थले
किं पंचापूर्वाणीति चेदत्राहुः दर्शत्रयेण प्रत्येकमाग्नेयाद्येकैकापूर्वं जननीयात् त्रयं द्वाराएकं दर्श
समुदायापूर्वं जन्यते एवं पौर्णमासत्रयेण प्रत्येकमाग्नेयाद्येकैकापूर्वं जननीयात् त्रयं द्वारे एकं पौर्णमा
ससमुदायापूर्वं जन्यते । ततः पश्चिमे च कलिकापूर्वैर्मध्यमसमुदायापूर्वद्वारा फलजनकस्य कापूर्वं परमा

परमाअन्यत इति नवापूर्वो पक्षः नच दर्शस्य पौर्णमासस्य परमाचरमकरणस्य सांसादेव
मध्यमसमुदायापूर्वजनकतासंभवेन तज्जन्यकलिकापूर्वेमानाभावात्सप्तापूर्वीपक्षएव श्रेया
निति वाच्यं। तथापि उत्तरांगदक्षिणादिसमयेपर्यंतमनवस्थितस्यात तज्जन्यकलिकापूर्वस्थापाावश्यक
त्वादिति चेदत्तिनत्यात्क्रमध्यमसमुदायापूर्वद्वयेमानाभावात् षट्सु दर्शादियागेः कलिकापूर्वेषु एक
द्वारैव परमापूर्वं जन्यत इति सप्तापूर्वीपक्षः नचैवं पंचभिः पंचापूर्वद्वाराषष्ठेन च सांसादेव परमापू
र्वं जन्यतामिति किं षष्ठेन कलिकापूर्वेण तथा च षडपूर्वीपक्षएव श्रेयानिति वाच्यं षष्ठेनाप्युत्तरां
गदक्षिणादिसहकारेणैव परमापूर्वजननानावश्यकत्वेन मनवस्थितस्या कलिकापूर्वेजननात्। नच वा
मावास्यायामवास्यपायजेत पौर्णमास्यां पौर्णमास्यायजेतेति विधिबोधितस्य दर्शत्वावच्छिन्नपौ
र्णमासत्वावच्छिन्नकारणताद्वयस्य निर्वाहाय मध्यसमुदायापूर्वद्वयमवश्यं कल्पनीयमिति वाच्यं।
दर्शत्वादेः कारणतावच्छेदकत्वपर्यंतस्याविद्यप्रतियाकारणतयैकलाघवेन अमावास्यायामित्यादि

विधिभ्यामेकस्यैव दर्शपौर्णमासोभयसाधारणधर्मावच्छिन्नकारणत्वस्य बोधनात् दर्शत्वपौर्णमा
सत्वाभ्यां च कारणताद्वयमप्रामाणिकं कारणतैकत्वलाघवेनोभयसाधारणवैजात्यस्यैवावच्छेदकत
याकल्पनौचित्यात्। न च दर्शत्वपौर्णमासत्वाभ्यां कारणतावच्छेदकत्वे विधिप्रामाण्यप्रमाणाभावात्।
न चैकरूपेण दर्शपौर्णमासयोः कारणतायामङ्गीकृतदर्शस्यापि कृत्तपौर्णमासस्य स्वर्गोत्पादापत्तिरिति
वाच्यं परमापूर्वाभावेन तदयोगात् इति प्राहुः। अथ यजदेवपूजायामिति शाब्दिकस्मृतिबलेन पूजा
यागो रतिप्रीतिहेतुक्रियारूपतया यागस्य देवताप्रीतिहेतुत्वेन तद्द्वारैव यागस्य स्वर्गहेतुत्वमस्तु
किमपूर्वेण न च देवताप्रीतेर्देवतानिष्ठसुखात्मकत्वेन यागस्य यागवत्त्वक्षणिकत्वेन कथं स्वर्गज
नकत्वमिति वाच्यं प्रीत्यनुभवजनितसंस्कारद्वारा प्रतिरपि स्वर्गहेतुतासंभवात्। न चैवं संस्कारजन्य
स्य स्मृतित्वनियमेन स्वर्गस्य संस्कारजन्यत्वे स्मृतित्वापत्तिरिति वाच्यं तादृशनियमे मानाभावात्।
अन्यथा नित्यसंस्कारस्य प्रत्यभिज्ञाहेतुत्वपक्षे तस्याः स्मृतित्वापत्तेश्च यागस्य देवताप्रीतिहेतुत्वेपि

प्रा॰कौ॰
१२२

तस्याः स्वर्गहेतुत्वेऽपि नाभावात् । न हि तस्याः स्वर्गजनकत्वं विना यागजन्यतामात्रेण व्यापारत्व
संभवति तत्तज्जन्यत्वे सति तज्जन्यजनकस्यैव व्यापारत्वादिति वाच्यं यायजीति हेतुक्रिया सा तसी
ति जन्यतत्कर्त्रनिष्टफलजनिकेति व्याप्तेः अवधारितत्वाच्चेपराजयीतिं हेतुभूतायां राजशत्रुनाश
क्रियायां । किंच स्वर्गकामो यजेतेति श्रुतिबलात् यागस्य स्वर्गसाधनत्वे सिद्धे तस्य साक्षात्साधन
त्वासंभवेन परंपरासाधनत्वे प्रामाणिके तस्यैव व्यापारं विनानुपपद्यमानतया व्यापारकल्पना
वश्यकत्वे अतिरिक्तस्यादृष्टस्य व्यापारत्वकल्पनमपेक्ष्य क्लृप्ताया देवताप्रीतेरेव व्यापारत्वं कल्प्य
ते लाघवात् । न च देवताप्रीतेस्तदनुभवजन्यसंस्कारस्य चैकाधिकरणतया स्वर्गहेतुत्वं न संभवती
ति वाच्यं पूजके प्रीतिमान् देव इत्यादिवचनेन तस्या अपि विलक्षणसंबंधेन स्वर्गसामानाधिकरण्य
संभवात् अन्यथा पूजकेरतिः सप्तम्यर्थस्य दुर्वचत्वापातात् एवं च तादृशसंबंधेन देवताप्रीतेः स्व
र्गहेतुत्वे संभवति सेवाप्रीत्यनुभवजनितसंस्कारस्य स्वजनकत्वे विषयप्रीतिनिरूपिततादृशविलक्ष

णसंबंधेन हेतुत्वं बोध्यमिति चेन्न वेदवत्ताप्रीतेस्तदनुभवजन्यसंस्कारस्य चित्तस्थस्य संबंधेनात्मपरं
परासंबंधेन चैत्स्वर्गहेतुत्वे गौरवेणात्लाघवात्फलसमानाधिकरणादृष्टस्यैव कल्प्यत्वेनमुचितत्वा
त्। किं चोक्तसंस्कारस्य व्यापारत्वे लोकसंग्रहार्थमनुष्ठितेन यागादिना तत्त्वज्ञानिनामपि भोगापत्तिः
तत्त्वज्ञानिनो बहुशो भोगश्रवणेन भोगे मिथ्याज्ञानजन्यवासनारूपकदोषस्य हेतुत्वासंभवान्न।
अदृष्टस्य व्यापारत्वोपगमे तु वासनायाः अदृष्टकारणत्वेन तदभावे नादृष्टोत्पत्त्यसंभोगापत्त्यसंभ
वात्। न च तत्त्वज्ञानेन देवताप्रीत्यनुभवजन्यसंस्कारस्य नाशान्नोक्तापत्तिरिति वाच्यं। तन्नाशक
तावच्छेदकत्वकल्पने संबंधांतरासंभवेन स्वसमानाधिकरणहतिजन्यकर्माहितप्री
तिविषयतादिरूपसंबंधस्यैव तन्नाशकतावच्छेदकत्वकल्पने गौरवात्। तत्त्वज्ञानस्योक्तसंस्का
रनाशकत्वे तत्त्वज्ञानिकृतापिचादिस्वर्गार्थकर्मणो निष्फलत्वप्रसंगाच्च। एतेन सर्वत्रादृष्टं कर्तृग
तमेव साक्षात्संबंधेन तत्र यागादेर्जनकत्वे लाघवात् न च गवाश्वादिजन्यफलेपि स्त्र्यादिगतमेव

155

158

न तु कर्तृगतं येत्राम्नायात तयेत्यिङं तन्नयेदूलत्राप्यतमित्यादिवचनादिसदृष्टस्यापि पित्रादिग
तत्वेन कथं तस्य कर्तृगतत्वनियम इति वाच्यं। तत्राप्यदृष्टस्य कर्तृगतत्वेन तन्नियमापायात्॥
अन्यथा मुक्ते पितरि गयाश्राद्धजन्यादृष्टानुत्पत्त्या निष्फलत्वेन सांगस्यापि वैदिककर्मणः फल
जनकत्वव्यभिचारेणाविश्वासाद्धि धीरन नुष्ठानलक्षणाप्रामाण्यापातात्। न च फलाबाधेः एवं
मेव कर्तृमुक्तौ तज्जन्यादृष्टनाशे न पितुः फलं न स्यादिति वाच्यं। गयाश्राद्धादिजन्यादृष्टस्य स्वसमा
नाधिकरणभोगजनकत्वेन तन्मोक्षदशायामपि सत्वोपगमात्। न च पुत्रे च्युते गयाश्राद्धे न मुक्त
स्यापि पितुर्ब्रह्मलोकावाप्तिः स्यात् तानि नो भोगादये न दोषस्य भोगाजनकत्वादिति वाच्यं॥
इष्टत्वात्। न च श्राद्धादिजन्यादृष्टस्य कर्तृगतत्वे युगपदेकोद्दिष्टकानेककर्तृकश्राद्धादिस्थले क
र्तृभेदेनादृष्टभेदात् गौरवमिति वाच्यं। भोक्तृगतत्वनियमेपि शतपुरुषं श्राद्धादिजन्यादृष्टस्य भो
क्तृभेदेनादृष्टभेदे न गौरवस्य तुल्यत्वात्। न च फलस्य स्वसमानाधिकरणपुण्यजन्यतानियमे नर्के

१५२

प्पुत्रादिगतादृष्टेन पित्रादेः फलमिति वाच्यं। तादृशनियमे मानाभावादिसपास्तेः गयाश्राद्धादिज
न्यादृष्टस्य कर्तृगतत्वे तस्य पित्रादिगतफले प्रतिसमवायसंबंधेन हेतुत्वासंभवात्। स्वजनककर्
मोद्देश्यतासंबंधेन हेतुत्वोपगमे च गौरवात् पित्रादिगतादृष्टं प्रति तु गयाश्राद्धादेरुद्देश्यतासंबंधे
न हेतुत्वे तस्य चोक्तपरंपरासंबंधापेक्षया लघुत्वेनास्मन्मते न किंचिदपि गौरवं। किंच गयाश्राद्धादेः
कर्तृमात्रगतादृष्टजनकत्वे पित्रादेरुद्धाराय तत्त्वज्ञानिनां तदनुष्ठानानुपपत्तिः कर्तुर्दोषाभावे नाद
ष्टानुत्पत्त्या फलासंभवात्। न चैवं वैकुंठादिलोकभोक्तृगतमेवादृष्टमुपेयतामिति वाच्यं इष्टत्वात् किं
च पुत्रनिष्ठगयाश्राद्धादिजन्यादृष्टेन पितुर्मुक्तस्यापि भोगाय जन्मोपगमे न स पुनरावर्तत इति श्रुति
विरोधः तुल्यन्यायेन पुत्रकृतसाक्षात्कारादिना मुक्तपितुर्नरकादिप्रसंगस्यापि दुर्वारतापातः एवं नासंत्त
विमुक्तश्चरतीत्यादिश्रुतेरपि विरोधो दुर्वारः तस्माददृष्टस्य भोक्तृगतत्वेन नियतमेव फलस्य कर्तृगत
त्वे चौत्सर्गिके। अत एवोक्तं शास्त्रदेशितं फलमनुष्ठातरीत्युत्सर्ग इति। अत एव च पत्रस्य परविशेषाद्

१५२

रस्कारेण फलं श्रूयते तत्र परकीयस्वर्गादिकामनयापि ऋत्विक्कारिणी यागादाचारः शिष्टानां संगच्छते
स्वर्गकाम इत्यादौ साधारण्यात्स्वपरसाधारणस्वर्गस्य फलत्वलाभात् । ननु स्वरितेत् यजधातू
त्तरमात्मनेपदं यागरूपक्रियाफलस्य कर्तृगतत्वं बोधयति स्वरितञितः कर्त्रभिप्राये क्रिया
फल इत्यनुशासनात् कर्तारमभिप्रैति संबध्नातीति कर्त्रभिप्रायं कर्मोपपदादभिप्रैतेः कर्तर्य
णप्रत्ययेन तत्पदनिष्पत्तिः एवंभूते क्रियाफले तादृशविषये सत्यात्मनेपदमित्यनुशासनार्थः ।
तथा च यजेतेति विधिबोधितयागात् यदि परगतस्वर्गादिफलं तदा यजेतेत्यात्मनेपदमसाध्वे
व स्यादिति चेदत्र चिंतामणिकृतः यजेतेत्यात्मनेपदं क्रियाफलस्य कर्त्रनिष्ठत्वेपि कर्त्रभिप्रेतत्वमा
त्रेणैव साधु । अभिप्रेतः प्रसिद्धेच्छार्थकत्वसंभवेनाभिप्रेतत्वस्येच्छाविषयत्वरूपत्वादित्याहुः । मि
श्रास्तु एवं सति यत्र विशिष्यैव पुरुषविशेषस्य फलार्थं यत्कर्मोक्तं तदपि पुरुषांतरगतफलकामनया
कृतं पुरुषांतरफलजनकमस्तु एवं च परपुत्रादिपूतत्वार्थमपि जातेष्ट्यादिकमस्तु दद्यादहरहः श्राद्धं

पितृभ्यः प्रीतिमावहन्निसाराहावपि परपित्रादितृप्तावापत्तिश्च। आत्मनेपदमपि फलस्य कर्तृगतत्व एव
साधु स्वरितञितः इति सूत्रस्य कर्त्रभिप्राये क्रियाफलमभिप्रैतिअभिसंधत्त इति व्याख्यानात् फलस्य कर्तृनि
ष्ठत्व एवात्मनेपदस्य साधुत्वात्। अत एव कर्त्रभिप्राये क्रियाफलयोः सामानाधिकरण्यमुपपद्यते
अभिप्रायशब्दार्थस्येच्छार्थकत्वे सामानाधिकरण्यानुपपत्तिः नन्वभिप्रायशब्दस्येच्छाविषयत्वलक्षणया
तदुपपत्तिरिति वाच्यं गौरवात् अत एव यजेतेत्यादौ नकाः पचेति पाचकार इति प्रभृत्युदाहरणं संगच्छते अ
न्यथा याजकादीनामपि क्रियाफलेऽभिप्रायसत्वादात्मनेपदापत्तेः न च तेषां वेतनमात्रे अभिप्राय इति
वाच्यं स्वर्गफले सत्येव वेतनमिति फलाभिप्रायस्यापि वेतनोपरागेण सत्वात्। तस्माद्यथा संबंधिक
पित्रादिपदस्य संबंधवाचकपदासमभिव्याहारे स्वपितृत्वादिना बोधकत्वनियमस्तथा कर्तृविशेष
णकामनाविषयफलबोधकशब्दस्यापि तादृशपदासमभिव्याहारे स्वीयसंबंधेनैव फलबोधकता
अत एव स्वारसिकसंकल्पवाक्येपि त्रादिगतस्वर्गकामनाभिलाषे स्वर्गोदोपित्रादिसंबंधवत्स्वगतस्वर्गा

दिकामनाभिलाषपदांतरेणस्वसंबंधोननिर्दिश्यतेअपितुस्वर्गकामोहमित्साधेवप्रयुज्यतेएवंचस्वर्ग
तेस्वर्गादिकामनयैवमात्तापितृगतस्वर्गादिकामनयापत्नीपुष्करिणीयागा~~दिकंकुर्यादिति~~ महादानेदु
र्गापाठादेःशिष्टैरविगानेनाचरणात्।तत्रतृतत्वेनफ॰ लबोधकप्रत्ययस्याकृतिविरहेपिस्वपरसाधारण
स्वर्गकामःपुष्करिणीयागादिकंकुर्यादितिविशिष्टश्रुतिःकल्प्यतइत्याहुःअत्रेदंविचार्यतेचिंतामणि
कारमतमेवसम्यक्तथाहिशिष्टाचारानुरोधेनविशिष्टश्रुतिकल्पनामपेक्ष्यस्वर्गकामइतिप्रत्ययस्
विधेरेवशिष्टाचारबलेनसामान्यपरत्वावधारणेनोत्सर्गिकस्वत्वपरत्वाबाधोयुक्तःपितृभ्यइत्यादौ
चेस्वपितृभ्यःपित्रादयोदिव्यादिवाकांतरेकवाक्यतयाशिष्टाचारेणचसंबंधिशब्दत्वेनौत्सर्गिकस्वपितृ
परत्वमेवयुक्तं।नचाभिप्रायपराद्स्यैच्छापकत्वेपिअभिप्रेतार्थकतानोपपद्यतइतिसंबंधपरत्वेवयुक्तेति
वाच्यं।अभिप्रायशब्दस्यभावघंतत्परत्वाच्छापरत्वेपिकर्तुरभिप्रायोयस्मिन्नितिबहुव्रीहिणातद्विषयबो
धकतासंभवात्।यद्वाक्रियाफलेकर्त्रभिप्रायेसतीत्यधिकरणफलांतोत्तरस्यतत्प्याविषयार्थकतयाफल

स्याभिप्रायविषयत्वाल्लाभजयवाभिप्रीयते साविति कर्मस्तु वस्याकर्त्रभिप्रेते क्रियाफल इत्यर्थलाभः न च क्रिया
फलस्य कर्त्रनभिप्रेतत्वे कामनाविषयसाधनत्वाभावात् क्रियागोचरकृतेरेवानुपपत्त्या यजंतेति याजकाः
यवेति पाठकाइत्यादिप्रत्युदाहरणासंगतिरिति वाच्यं अत्विगादेर्यजमानस्वर्गादिरूपयागादिजन्यफल
कामनाविरहेपि परंपरया यागादिप्रयोज्यदक्षिणालाभादिरूपफलगोचरकामनासहकृतत्वफलप्रयोजक
ज्ञानाद्यागादिकृत्युपपत्त्या तादृशप्रत्युदाहरणसंगतेः न हि स्वर्गादिवद्दक्षिणादिगतस्वत्वे यागादिजन्यत्वेपास
ति तादृशफलस्य कर्तृसंबंधतया कर्त्रभिप्रायपदस्य कर्तृसंबंधार्थकत्वेपि कर्तृत्वेपि तादृशप्रत्युदाहरणासं
गतेः अत एव अत्विक्स्वरूपकारादेः फलभागित्वाभावान्न फलभागित्वघटितं कर्तृत्वमिति टीकाकृतः कर्त्रभिप्राय
रस्यैव फलभागित्वाविशेषितक्रियानुकूलकृतिमत्त्वमेव कर्तृत्वमभिमतमतः पित्रादिस्वर्गकामस्यापि कर्तृ
तया फलस्य तदभिप्रेतत्वेनात्मनेपदनिर्वाहः अन्यथाकर्तुः क्रियाफलसंबंधेनैपस्मैन कर्तारं चेत् क्रियाफ
लमभिप्रैति संबद्धोतीतिव्याख्यानांतरासंगत्यापत्तेः अत एव दक्षिणाद्युपरागेणापि यजमानस्वर्गादेः अ

त्विजोकाम्यत्वेयजेतेयाजकारस्यैवस्वीयदक्षिणादिमात्रस्यैवतेषांकाम्यत्वेतुयजेर्णियाजकारस्युभयमे
वसमर्थितंग्रंथकारैः अथनविशुचेतिसामर्थ्यवाक्यार्थेषुपरानिनः यञ्चत्वंतिहिकाष्ठानितक्षिपाकेन
कुर्वतेरस्यचेतनस्यत्वेकर्त्रभिप्रायेप्यात्मनेपदस्यभेदाचार्यैः प्रयुक्तत्वादयुक्तमिदमेवेकमत्यनेना
ध्यादनंकुर्वतेयदरसंपरिवारयंतेकंडकारसाधयेततस्यलेआत्मनेपदानुपपत्तिरितिचेत् । नतेदोष
स्याभिप्रायशब्दस्यसंबंधार्थकत्वाययंतमतेपितुल्यत्वात्यदिचतत्रात्मनेपदाधिविवक्षणान्नदोषः अ
न्याभिप्रायविवक्षयामेवात्मनेपदस्यासाधुत्वात् अतएवोक्तंकर्त्रभिप्रायइति किंअन्याभिप्रायेमाभूदि
तिअतएवभट्टिनामिवयानकर्मकुरुतेकामेकुरंगेक्षणारस्यनात्मनेपदमनर्थकमित्सेवेकाव्यप्रका
शकृताखेनत्वसाधितमितिविभाव्यतेतथापिनक्षतिः अभिप्रायशब्दस्येच्छाविषयपरत्वेप्येतत्समाधानस्य
तुल्यत्वात् युज्यतेचाभिप्रायशब्दस्येच्छाविषयपरत्वमेवअन्यथान्तरतिमस्तुतरतिव्रसहस्रंपोष्यमेधेनय
जतेरस्यात्मनेपदश्रवणात्सितुदंशरथस्यांधकमुनिपुत्रश्रवणवधजनिततपापक्षमकानयाशमस्याश्वमेधा

सप्तिकत्वसंबंधेन कृतेर्हेतुत्वोपगमेनोक्तापत्तेसंभवात्। नचैतादृशहेतुताकल्पने गौरवमिति वाच्यं।
अतिरिक्तापूर्वकल्पनापक्षेपि तादृशहेतुतायामेव लाघवादिति वदंति अत्र नैयायिकधुरंधरा नव्याः
योग्यविशेषगुणवृत्तिप्रतियोगितासंबंधेन नाशावच्छिन्नं प्रतिस्वपूर्ववृत्तित्वस्वसामानाधिकरण्योभयसंबं
धेन विशेषगुणत्वेन सामान्यत एव कारणताकल्पने बाधकाभावेन नाशवत्त्वादेरिव यागस्योत्पत्तीय
क्षणनाशस्य दुर्वारत्वात् स्वर्गपर्यंतमवस्थानासंभवेन तावत्पर्यंतस्थाय्यपूर्वात्मकव्यापारकल्पनमाव
श्यकं। किंचापूर्वस्वीकारे लाघवात्तदुपगम आवश्यकः तथाहि अपूर्ववनियोगीकारे प्रधानफलहेतुत्वमंगा
नामपि वाच्यं तथा च यस्य दशविधफलहेतोर्यागविशेषस्यांगानि शतं तस्य फलं प्रति हेतुत्वानि दशांगानां
च दशशतानि हेतुत्वानि· अपूर्वोपगमे तु प्रधानस्यैकं परमापूर्वं हेतुत्वं फलेषु दशहेतुत्वानि परमापूर्वस्यापि
फलेषु दशहेतुत्वान्येव· परमापूर्वमिति चांगानां शतं हेतुत्वानि शतं हेतुत्वानि चांगापूर्वाणां। अंगापूर्वेषु चांगा
नां शतं हेतुत्वानीति लाघवं स्फुटमेव। एतेन यागादिध्वंस एव यागादीनां स्वर्गजनने व्यापारोस्तु। किमपूर्वेण· नव

प्रतियोगिकार्यध्वंसस्य ध्वंसकार्ये च प्रतियोगिनोऽन्यथासिद्धतया न हेतुत्वं संभवतीति वाच्यं । तथान्यथासि-
द्धत्वे मानाभावात् । नन्वेवं यागादेः स्वर्गादिप्रति बंधकतापत्तिः कारणीभूताभावप्रतियोगित्वस्यैव प्रतिबं-
धकतारूपत्वादिति वाच्यं घटादिनाशजनकनाशप्रतियोगिनः कपालादेर्घटादिनाशप्रतिबंधकतावार-
णाय संसर्गाभाववत्त्वावच्छिन्नासंताभावत्वावच्छिन्नाभावाकारणतात्वे हस्रपाभावप्रतियोगित्वस्यैव प्रतिबं-
धकतारूपत्वेनादोषात् यत्तु गंगास्नानस्य सर्वांगीणजलसंयोगरूपस्यापूर्वद्वारे च फलहेतुतायुक्तत्वे वि-
निगमनाविरहेण जलावयवविनाशद्रवत्वसंयोगादीनां स्नानत्वेन एकस्य ध्वंसस्य व्यापारत्वायोगा-
त्वन्हेनोचत्तधात्वेगौरवप्रसंगादितितदसत् । बहूनामपि ध्वंसानां ध्वंसत्वेनैकहेतुतायां गौरवान्नकोऽपि
शेनोक्तयुक्तेरप्रयोजकत्वात् । नन्वेवं धर्मः क्षरति कीर्तनादित्यादिस्मृतिरेवापूर्वे प्रमाणं तस्या विहितक्रियाध्वाप-
रविशेषो धर्मः क्षरति नश्यतीत्यर्थकतया तदपूर्वस्यापूर्वमन्तरेणानिर्वाहात् ध्वंसेन ध्वंसासंभवादिति वाच्यं ।
विहितक्रियाकर्तृत्वमात्रेण धार्मिकपदप्रयोगेन तस्याः स्मृते धर्मो विहितक्रियाः क्षरति स्वकार्यजननात्

नुष्ठानानुपपत्तेः न च स्वकीयरावणवधजन्यपापक्षयकामनयैव तदनुष्ठानं अंधकपुत्रस्य रुद्रस्येनत
द्वधजन्यपापक्षयार्थं ब्रह्मवधप्रायश्चित्तानुष्ठानानुपपत्तेरिति वाच्यं रावणवधजन्यपापक्षयार्थं रामे
श्वरशिवस्थापनस्य पुराणादौ प्रसिद्धत्वात् ब्रह्मवधप्रायश्चित्तस्य मुनिवधपापक्षयकारकत्वाभावात्तदनु
ष्ठानोपपत्तेरिति संक्षेपः नन्वात्मनः कर्तृगामिफलमेवात्मनेपदार्थस्तथा च वा तु यजते इत्यादावात्मनेपदस्य
फलमात्रार्थकत्वे यागजन्यफलवान् कर्त्तेतिवाक्यार्थमर्यादया फलस्य कर्तृगामित्वलाभाद् कर्त्रभिप्रेत
फले शक्तौ च गौरवं आत्मनेपदार्थविशेष्यैकवचनयजेताय जकारस्यादिः प्रयोग इति तन्न यजतीत्यादौ परस्मै
पदार्थ[illegible]स्य पराभिप्रेतफलजनकत्वस्य धात्वर्थविशेषणत्वेनान्वयादात्मनेपदार्थस्य कर्त्रभिप्रेतफलजन
कत्वस्या[illegible]पि तथान्वयौचित्यात् अत्र वदंति आत्मनेपदस्य कर्तरि परस्मैपदस्य च कर्तृभिन्ने शक्तिः तयोर्यथा
यथं समभिव्याहृते तत्तत्संबंधेन आख्यातसामान्यार्थे फले च यः फलस्य च धात्वर्थेन्वय इति वाक्यार्थमर्यादयैव कर्तृ
गामित्वादिलाभः न च काम्यत्वसंबंधेनैव फले कर्त्रादिकर्मन्वयोरन्वयाद्वाक्यार्थमर्यादयैव कर्त्रभिप्रेतत्वादेर

न्या. को
१२८

पित्वाभिसंसर्गवैशिष्ट्येवेति वाच्यं । इच्छाविषयस्वरूपकाम्यत्वस्य समवायात्मकसमवेतत्त्वापेक्षया गुरुत्वेन
भवन्मते काम्यत्वसंबंधेनान्वयबोधत्वादेः कार्यतावच्छेदकत्वे गौरवात् अस्मन्मते समवेतत्वसंबंधेनैवा
न्वयबोधत्वादेः कार्यतावच्छेदकत्वेन लाघवात् ॥ अत एवारवंगर्पत्वेपि वर्त्तते क्रियासमवेतफलत्वन्तु नके
त्वयोरवयवा यथा मात्मनेपदपरस्मैपदयोः प्राप्तिरिति तत्पक्षत्वेन सच्चायं विधिः क्वचित्केवलकर्मवि
धापकत्वेन कर्ममात्रविधिरिष्यते यथाग्निहोत्रं जुहोतीत्यादिः । क्वचिद्गुणविधिर्यथा दध्ना जुहोतीत्यादिः
तत्र वाक्यांतरप्राप्तहोमानुवादेन दध्यादिरूपगुणविधानात् । क्वचिद्विशिष्टविधिः यथा सोमेन यजेतेत्यादिः
तत्र यागस्य तद्गुणसोमद्रव्यस्य चाप्राप्तत्वेन सोमद्रव्यविशिष्टयागविधानात् । क्वचिद्गुणद्वयविशिष्टविधिः
यथा उपसद्भिश्चरित्वा मासमेकमग्निहोत्रं जुहोतीत्यादिः तत्रोपसदित्युत्तरत्वमासात्मककालरूप
गुणद्वयविशिष्टस्य कर्मणो विधानात् । अत्रेदं बोध्यं उपसद्भिश्चरित्वा मासमेकमग्निहोत्रं जुहोतीति त्रिक
ति बोधितयावज्जीवमग्निहोत्रं जुहोतीति श्रुतिबोधिताग्निहोत्रपदमुख्यार्थयावज्जीवसाध्याग्निहोत्र

भिन्नं मासैकसाध्याग्निहोत्रं कर्मांतरमेव तत्रैव यागविशेषलक्षणया प्रयुक्तोऽग्निहोत्रशब्दो मुख्याग्निहोत्रध
र्मप्राप्त्यर्थः अत एव तस्य गौणाग्निहोत्रत्वेन व्यपदेशः न तु उपसद्भिरिसादिवाक्येन यावज्जीवसाध्याग्नि
होत्र एव मासरूपकालोपसदाख्यस्पुरत्वरूपगुणद्वयं विधीयते न तु कर्मांतरे तथा च प्याग्निहोत्रशब्दो मु
ख्य एव न तु गौण इति नोक्तव्यपदेशासंगतिरिति चेन्न । प्राप्ताग्निहोत्रानुवादेन गुणद्वयविधाने विधेयभे
देन वाक्यभेदप्रसंगात् तादृशवाक्यस्य गुणद्वयविशिष्टकर्मांतरविधायकत्वोपगमात् । तथा चोक्तं मासैकम
तिनानेको विधातुं शक्यते गुणः । अप्राप्ते तु विधीयंते बहवोप्येकयत्नत इति न तु विशिष्टविधानेपि गुण
द्वयविधानमस्त्येव कर्मांतरस्य चाधिकं विधानमिति तत्रापि विधेयभेदेन वाक्यभेदस्य दुष्परिहरत्वा
न्न च विशिष्टस्यैकस्य विधेयस्यैकत्वं विशिष्टस्य विशेषणविशेष्याभ्यामनतिरेकेणैक्यासंभवात् तत्रापि विधे
यभेदेन वाक्यभेदः । अपि तु विधानभेदेन विशिष्टांतर्गतत्वेनानेकेषामप्येकमेव विधानमिति न वाक्य
भेदः अप्राप्ते हि सादिना कर्मणो प्राप्तत्वे तस्य नानागुणोपरागेणाप्येकमेव विधानम् अपि तूक्तं विधानं च न

ज्ञानेऽसत्यपि कर्मणि नानागुणानामेकज्ञानसंभवेन वाक्यभेदासंभवात्। अपि तु विधेयतासंबन्धो[?] विषयता
विशेषः नानाविशेषणविशेष्यघटितेन विशिष्टैकैकविषयतेति चेन्न विशिष्टान्तर्गतविशेषणानां
विशेषणत्वेन नानाधर्मावच्छिन्नाभिधावित्स्वलक्षणा[?]विषयताविशेषस्य विशेष्यविधया अन्यादृशी विषय
तातासां च विषयतानामैक्यासंभवेन विधानैक्यकल्पनस्यायुक्तत्वात्। अन्यथा प्राप्तकर्मानुवादेन गुण
द्वयविधानेऽपि गुणद्वयरूपविधेयविशिष्टानुवाद्यकर्मणोऽपि विषयतैक्यमुपगम्य वाक्यभेदपरिहारसं
भवात्। एवं विधेयविशेषणतानापन्नविधेयविषयतायां अभेदो वाक्यस्य प्रयोजकः स्यात्। नैकगुणविशि
ष्टस्य विधाने गुणानां विषयताभेदेऽपि नानागुणविशिष्टकर्मणो विधेयस्य विषयतैक्यमाद्यके[?] विधेये
स्यैकस्येऽपि उद्देश्यभेदेन विधेयविषयताभेदात्तु उद्देश्यभेदस्यत्वेन विधेयैक्ये नैकवाक्यता अर्थवादैकवा
क्यमिति चेन्मैवम्। निरुक्तमपि[?] नेयेषां पदानामेकवाक्यत्वात्तत्पदार्थाभेदपरत्वेन तत्पदानां मिथोऽभेदात्।
नापि तत्तत्पदार्थविषयतानामभेदपरं सर्वत्रैव वाक्यार्थप्रविष्टविशेषणविशेष्यसंसर्गविषयतानामकार

विशेष्यतासंसर्गतारूपाणां विलक्षणतया भेदस्यावश्यकत्वादेकवाक्यविलयप्रसंगात् किंतु तावद्धर्म-
विषयितानां साक्षात्परंपरया वा अवच्छेद्यावच्छेदकभावपरमेवावच्छेद्यावच्छेदकभावापन्नविषयि-
ताकूटस्यैकविषयितातुल्यत्वात् अतो विशिष्टैकविषयिता एव वाक्यमेकव्यवहारमादधाति। एवं च
नानागुणविशिष्टस्य कर्मणो विधिपक्षे नानागुणानां विधेयत्वे कर्मणि गुणपदार्थविशेषणतया वि-
धेयविषयत्वेनमात्। द्वारा नानागुणविषयितानामवच्छेद्यावच्छेदकभावात् कर्मितगुणविषयितयोश्च
साक्षादेवावच्छेद्यावच्छेदकभावापन्नतया वाक्यार्थांतर्गतवस्तूनां न विशिष्टैकविषयितेति नवा-
च्यो भेदः। न चैवं यागस्य कर्मणि अनेकगुणविधानेऽपि कर्मण एकविषयितया विधेयतयाभासमान-
गुणद्वयविषयतावच्छेद्यावच्छेदकभावे नैकवाक्यतोपपद्यत इति वाच्यं। विधेयांतरविशेषणत-
याभासमानविधेयविषयिताभेदेऽप्युद्देश्यविषयिताभेदस्यावश्यकतया तादृशविधेयविषयित-
योः परंपरया अवच्छेद्यावच्छेदकभावविरहात्। अत एवास्यात तद्विघटितेनैकवाक्यत्वाख्यातापि

श्री·कौ·
१२९

स्यविधेयांतरविशेषणतयाविधेयत्वनियमेननद्विषयितानिरूपितोद्देश्यविषयितामेदस्यावश्य
कत्वात्लाघवं च चैत्रः स्वघ्नी कुंडली स्यादित्युभयविधेयकैकवाक्यतात्वोक्तिस्यतेस्वोक्तिपत्तेउरस्वघ्नी कुं
डली चैत्रो दंडी स्यादावेकविधेयकरावतिदिके अधिकपुंस्त्वमात्रैककल्पविद्धिकल्पविधिः यथा व्रीहिभि
र्यजेत यवैर्यजेतेत्यादिः स च पक्षे संगस्य गलग्वादेसंश्लेषणोक्तान्यायाधिकोक्तेय पुनः प्रसज्यते तत्रसि
द्धोविरुद्धयोर्विधानेविकल्पविधिः यथा व्रीहियवयोरीप्सयोरेकत्रयागेऽकरणतयाविरुद्धयोर्या
गकरणतयोर्विधानेनचैवमश्वमेधवाजपेयादीनां स्वर्गादिरूपैकफलेकरणतयाविरोधेऽस्तु
साधनतयातद्विधानेवैकल्पिकं स्यादिति वाच्यं परस्पराभावसाहित्येनविधानेऽस्य विवक्षित
त्वात् अश्वमेधादेर्वाजपेयाभावसाहित्यं पुरस्कृत्य स्वर्गादिरूपफलेकारणत्वेनविधानात् व्रीहियव
योश्च परस्पराभावसाहित्यं संप्रतीयते मंथमनः प्रवृत्त विधिवाक्यात् व्रीहिरूपद्रव्यसंबंधपुरस्का
रेणयागत्वाभावात् द्रव्याकांक्षानुदयेनतत्रयागेयवरूपद्रव्यान्वयासंभवाद्व्रीहिस्वभावेन कथं यागत्वाकांक्षा
त रस्या

येवंयववविधेरुत्पन्नस्य स्वीकरणीयत्तपाकारव्यतिरेकेण तादृशाकांक्षाविरहयबोधासंभवात्तुआकांक्षा
याअनिवृत्तेः तन्निवृत्तयेयववविधौवाकारकल्पनेनसमभिव्याहृतश्रीस्वभावसाहित्यबोधकवाका
रवत्त्वात्तदभावसहितकरणत्वप्रतीतेरवश्यमुपगंतव्यत्वात् अतएवाभयंकरणकृपायोगात्कृत्वात्तु
रसाविकल्पे उभयोरप्याकांक्षार्थनोपवादः यथोक्ताकांक्षायाः श्रीस्वभावसहितद्भूतांतरस्यकरणत्वेनवि
षयः किंतु श्रीहिमवधानाभावकालीनयागेऽद्भुतांतरकरणकत्वमेवेतितन्नैवयवैयर्थ्यमितितत्त्वमस्य
तात्पर्यंकल्पनीयं न तु श्रीस्वभावस्यकरणसहकारित्वेतत्र तात्पर्यकल्पकाभावात् वाकारस्मरणेनास्ति
तदर्थस्यालाभः वाकारस्य पवेकरणकत्वान्वयिनियोगे श्रीहिकरणत्वाभावमात्रबोधकत्वात् श्री
स्वभावस्यकारणत्वाबोधकत्वात् दधिमुखेयपोवामुक्तेरसादित्वौकिकवीक्षः वाकारोव्यवहितप्र
वैयाहृताविभक्तिसहितपदेनयत्रस्वार्थान्वयः प्रस्ताप्यतेतत्रसर्ववाक्यतादृशंविभक्त्यंतसमुदा
यार्थस्यैवच्छेदबोधकतायावाकारेव्युत्पन्नत्वात् अतएवतत्रेदधिकर्मकत्वाधभावएवप्रयः कर्म

कत्वाच्चयितिभोजनेप्रतीयते न तु दध्याद्यभावे कर्मकत्वे एवं वैकल्पिककारणत्वस्थले यागेयव
स्यव्रीह्यभावसहकृतस्यकरणत्वस्याभ्युपगमेपि उभयकरणकयागात् फलोत्पत्तौ बाधकाभावात् १८ व्री
ह्यभावकरणकत्वस्य कथंचिदप्यलाभात् एवं यागेव्रीह्यभावस्यकरणत्वमिति वाधित यागसा
मान्यस्य तद्व्यभिचारित्वात् यागविशेषेच तस्यासिद्धत्वात् एवमिष्टारूपेयागेत दंगपुरोडाश
निर्वाहकव्रीह्यादेरपि न कारणत्वं इष्टसाधनतासानादिष्टार्थितसामग्रीतएव तदुपपत्तेरिति पर
स्पराभावसाहित्येन कारणत्वरूपविकल्पस्यव्रीहियवयोरदाचसंभवएव । यत्तु व्रीहियवयागयो
रप्येवंविधोपकारणत्वमेव वैकल्पिकं न तु यागव्रीहियवयोरिति नोक्तदोषः अपूर्वयागस्य एककर
णकयागजन्यापूर्वे परकरणकयागाभावस्य च कारणताया अव्याहतत्वात् । विकल्पमुखेनो
क्तान्ननव्रीह्यभावे कथं यागरसाकारिकापि तु व्रीह्यसंपत्तौ व्रीहियागाभावे सति कथंचनमि
साकारिकैवेति तदतीवासुस्पष्टि विरंमितं । प्रागुक्तव्रीह्यादियागस्य फलजनने सहकारिणोऽना

कांक्षितत्वेन तत्र विधितात्पर्यकल्पकाभावात् व्रीहिभिर्यजेतेत्यादिश्रुते स्वश्रुतेतरभागयागानुवादेन
द्रव्यविधायकत्वेऽपि वैकल्पिकयागविधित्वासंभवात्। तादृशश्रुतेर्यागविधायकत्वे प्रधानविधित्वेन पर
स्परसाकांक्षताविरहात् विकल्पमुख्याख्याकांक्षायाश्च योगे न वाकारकल्पकाभावात्। अन्यथाश्वमेध
वाजपेयादौ नो विधिस्थलेऽपि वाकारकल्पनापत्तेः न च तत्र प्रकरणभेदान्न साकांक्षत्वेऽपि नैकल्पकाभा
व इति वाच्यं। तत्रैवात्रापि प्रधानयागभेदे प्रकरणभेदध्रौव्यात्। परंतु उक्तेऽपि सत्यनुरोधेन श्रौतप्रकरण
कत्वान्वयि यागे यत्प्रकरणकत्वान्वय एव स्वीकरणीयः एवमपि व्रीहियवोभययागस्य न फलसाधनत्वे
प्रमाणं किं तस्य विध्यविषयत्वात्। तादृशान्वयबोधस्याकांक्षितोऽपि प्रथमविधेर्याग स्वसामानाधि
करण्येन श्रौतान्वयपरत्वात् श्रौतप्रकरणकयागस्यापि चेदिष्टसाधनत्वेन तादृशो यागः किंद्रव्यकरण
करसाकांक्षायाः सुलभत्वात् परस्परकरणकत्वाद्यभावाच्चापि निपत्प्रकरणकत्वादिमानाकल्पवि
धिरेव वैकल्पिककारणता विधिः अश्वमेधादि विधिर्न तादृशः तत्र फलेऽवाजपेयादिकरणकत्वाद्यभाववो

धकाभावादिति तद्विन। तथा सत्यपि व्रीहिभिर्यजेतेति विधिजन्यबोधे यककरणकत्वाद्यभावभाना
त् उभयकरणकयागस्यापि तादृशविधिविषयतया फलजनकतायाऽवीरत्वात्। पयैर्यजेतेत्यत्रय
वकरणकत्वान्वयिनि व्रीहिकरणकत्वाभावेऽपि स्लाघवात् व्रीहिकरणकत्वाभावास्य कांक्षानुरोधात्।
घटितधर्मस्यैव स्वर्गादिकारणतावच्छेदकतायाः कल्पनात्। तदुपाचांततयाउभयकरणकयागस्या
गस्यापि फलसाधनतायाऽवीरत्वात् न हि व्रीहिकरणकत्वाभावस्याकांक्षानुरोधात्यवविधिजन्य
बोधविषयस्य कारणतावच्छेदकत्वेऽपि किमपि प्रमाणमस्ति। एतेन दुग्धेऽपि चलितद्रव्यं वारस्याघप्रयोगा
त् वाकारघटितेत्यत्रोत्तरवाक्ये तत्रेदृर्वे वाक्यस्यापि उत्तरवाक्यप्रतिपाद्यद्रव्यकमकित्वादिप्यवच्छेदको
धकत्वेमावस्यकेतद्बोधस्वरूपलक्षणादिना कथंचिदुपपादनीयः। एवं च व्रीहिभिर्यजेतेत्यादौ पञ्चकर
णकत्वाभावबोधश्चौत्पत्तिमुक्त्वाऽपि नतिस्तारः। एवं व्रीहियवयोर्यागप्रति कारणत्वे न प्रामाणिकि
इच्छारूपस्य यागस्येष्टसाधनतातानादिघटितसामग्रीत्व एव निर्बाहात्। अत्राहुः वेदस्य के विशिष्टा

न्वयपरतासंभवे तदपरित्यागात् व्रीहिकरणकत्वाभावस्य विशेषणत्वेनैव यवकारणकयागस्यापि
स्वर्गसाधनत्वाभावेनैतेन तादृशाभावस्य स्वर्गादिफलप्रयोजकत्वसिद्धिः एवमुक्तातिप्रसंगवारणाय करणत्व
नीयत्वस्य सा व्रीहिभिर्यजेतेत्यत्रापि यवकरणकत्वाभावविशिष्टव्रीहियागस्य स्वर्गादिसाधनत्वाभा
नात्तस्यापि तादृशयागजन्यफलप्रयोजकतासिद्धिरिति नोभयकरणकयागात्फलादिसोत्तरवामे
वोकाराद्यवच्छेदस्यान्वयितावच्छेदकव्यापनतावच्छेदेनान्वयोपगमे न तद्भवति दुग्धपाने दु
ग्धकर्मकत्वस्यावच्छेदबाधेनातिप्रसंगो वार्यते तदापि न क्षतिः प्रकृते पि फलसाधनयवकरणकयागसा
दिरूपान्वयितावच्छेदकावच्छेदेन व्रीहिकरणकत्वस्यावच्छेदबोधेन उभयकरणकयागे निष्फलत्वोपपत्तेः
व्रीहिकरणकफलजनकयागे यवकरणकत्वस्यावच्छेदस्याप्रसिध्या च व्रीहिभिर्यजेतेत्यस्य तत्परत्वमप्या
हतमेवेति। विधेययोः परस्परान्वयित्वे परस्परसंबंधस्यावच्छेदविधानात् पर्यवेक्षकत्वके विधानेनैतेन निव
हति यागस्य व्रीह्यादिकरणकत्वेन व्रीह्यावयवयवारब्धपुरोडाशविषयकत्वरूपमेव वर्त्तीत्यर्थः अथ यदि छाग

पयागश्रौत्वादेरनन्यथासिद्धनियतपूर्ववर्त्तितारूपकारणताविरहेपि नानुपपत्तिः श्रौत्वकरणकयवक
रणकयागत्वाद्यवच्छिन्नस्य फलत्वनिष्ठावीतरवेजात्यंजन्यतावच्छेदकमिति फलस्य तद्रूपावच्छिन्नव्यभि
चारेपि न क्षतिः श्रौत्वकरणकयवकरणकत्वादिरूपकारणतावच्छेदकयोः परस्परं विशेष्यविशेषण
भावविनिगमनाविरहेनपि न क्षतिः अगत्याकार्यकारणभावाधिक्यस्यादोषत्वात् केचित्तु श्रौत्वक
रणकत्वादिकमनिवेश्य यवकरणकत्वयागत्वादिनैव विनाशोपफलजनकता उभयकरणकया
गानंतरं प्रत्येककरणकयागकर्त्तरि नापूर्वानुपपत्तिः पूर्वं उभयकरणकयागस्याकामाभावान्वो अन्य
(थाश्वमेधवाजपेयादीनां विधिस्थलेपि वाकारकल्पनापत्तेः नच तत्र प्रकारणभेदान्नसाकांक्षतेति)
(तत्कल्पकाभाव इति वाच्यं तत्रैवात्रापि प्रधानयागभेदे प्रकरणभेदध्रौतेस्मो। यत्तु उक्तसुलससनुसं)
(धेन श्रौत्वकरणकत्वान्वयि यागे यवकरणकत्वान्वय एवस्वीकरणीयः एवमपि श्रौहियवोभययाग)
(स्य न फलसाधनत्वं प्रामाणिकं तस्य विध्यविषयत्वात्तत्ताद्रुशान्वयबोधस्याकांक्षितत्वेपि प्रथमं विधेयी)

नाख्यातत्वादिमात्रकरणकयोगेनापूर्वेजननीयेत्तादृशयागस्यजौहि करणकत्वाद्यभावादुभय
करणकत्वविशिष्टयागाभावस्यनिर्वाहइति तज्जन्यफलेयागनिष्ठव्रीह्यादिकरणकत्वाद्यभावस्यप्र
योजकत्वमप्याहत्तमेवेति न विशिष्टयागस्यप्रयोजकत्वबाधइत्याहुः उपधायकतासंबंधेनयवा
दियागजन्यफलेफलत्वेजन्यतासंबंधेनव्रीह्यादिव्रीह्यादिजन्यत्वस्यैववासाधारणरूपावच्छिन्नफले
उभयवावच्छिन्नस्यवाप्रतिबंधकमितिसंयोभावयाविकल्पपरस्परव्यवच्छेदबोधकेवाकारापेक्षा
नवतिरात्रेषोडशिनंगृह्णातिनातिरात्रेषोडशिनंगृह्णातीत्यादौग्रहणाग्रहणादिविकल्पेतत्रवाका
रेणविनैवपरस्परव्यवच्छेदरूपयोःग्रहणाग्रहणयोःप्रतीतेःनचषोडशिग्रहणेप्रत्ययप्रसक्तेस्तुविरोधे
नकातिरात्रजन्यसातिशयफलकल्पना तज्जनकविजातीयापूर्वेषोडशिग्रहणस्यानन्योपायासिद्धत्वेन
हेतुत्वेप्यतादृशातिशयरहितफलस्यषोडशिग्रहणाभावेगकयागादतिशयप्रयोजकाभावसहितादप
नएवोपपत्तेः तज्जनकविजातीयापूर्वासिद्ध्याअतिरात्रजन्यापूर्वेषोडशिग्रहणाभावेग्रहणाभावोऽ

न्यथासिद्ध इति नातिरात्रे षोडशिनं गृह्णातीत्यत्र विध्यर्थबाध इति वाच्यं तद्बाधानुराधेनातिरात्रपश्र
स्यफलनिष्ठवैजात्यस्यापि कल्पनीयत्वादिति अनुकल्पस्थले प्रथमकल्पाप्रथमकल्पासामर्थ्यस
हकारिनस्तु प्रथमकल्पस्याभावः कुशाद्युपादाने संभवे काशादिमात्रमुपादायानुष्ठितेन कर्मणो नि
ष्फलत्वात् प्रथमकल्पेन चान्यव्यवच्छेदापेक्षेति विकल्पानुकल्पयोर्भेदः यत्तु विकल्पस्थले परस्प
रोत्कर्षायकधर्माभावान्नाश्रयफलजनकत्वमभ्युपगम्यते प्रथमकल्पानुकल्पस्थले परस्परोत्कर्षा
यकधर्माभावाश्रयफलजनकत्वमभ्युपगम्यत इति विकल्पानुकल्पयोर्भेद इति नव्यतरैरुक्तं
तदसत् प्रथमकल्पानुकल्पस्थले सोमेन यजेत सोमाभावे पूतिकयाभिषुणुयादित्यादौ परस्परो
त्कर्षायिकधर्माभावाश्रयफलजनकत्वे सर्वमीमांसकैरनभ्युपगमादिति कृतमधिकं निरूपणमाक
रादावनुसंधेयम्॥ सिद्धार्थबोधकः शब्दोऽर्थवादः स च वायुर्वै क्षेपिष्ठा देवतेत्यादिस्तत्स्वार्थवाद
सारो दोदियादिनिंदार्थवाचादिरूपः अत्र मीमांसकाः पदमात्रस्य[illegible]कार्यान्वित एव शक्तत्वपार्थ

वादानां प्रामाण्यासंभवः तत्र कार्यतावाचकपदाभावात् । तथा हि लोके घटमानयेति वाक्यश्रवणोत्त
रं कस्यचिद् घटे प्रवृत्तिमुपलभमानो बालः प्रवृत्तेः कार्यताज्ञानजन्यत्वनियमेन तज्ज्ञानजन्यत्वेन हि
त्वा उपस्थितपदानां कार्यत्वान्वितज्ञानजनकत्वे प्रथमं गृह्णाति तदनंतरं अपरस्य पदादौ प्रवृत्तेर
दर्शनादावापोद्वापेन कार्यतान्वितं यदानयनं तदन्वितं यत्कर्मत्वे तदन्वितघटज्ञानजनकत्वं घ
टपदे गृह्णाति । एवं तादृशकार्यत्वज्ञानजनकत्वं अमरपदस्येत्येवं क्रमेण शक्तिग्रह इति तद्दृष्टार्थं शा
ब्दसामान्ये प्रति कार्यतावाचकपदज्ञानस्य हेतुत्वं स्वीकारणीयं अत एव कृतिसाध्यत्वे शक्तिः कृतेः पद
घटितं घटमानयेत्यादिवाक्यानामेव शाब्दबोधजनकत्वं प्रामाण्यं च न तु घटोऽस्तीति वाक्यानां तेषां कार्य
तावाचकपदाघटितत्वात् न तु कार्यतावाचकपदज्ञानस्य कार्यतावच्छेदकं पदनिष्ठशाब्दत्वे तद्घ
टमानय घटोऽस्तीति वाक्यात्तु समूहालंबनतादृशबोधापत्तिः यदि कार्यतान्वितशाब्दत्वे तदा न्यूनवैशि
षणत्वापत्त्या व्याप्तिविरहेण वेदमात्रविच्छिन्नलिङ्गरूपितकारणत्वासंभवात् तादृशवाक्यात्समूहालंबनमा

द्बोधापत्तिरिति चेन्न। कार्यतान्वितानयनान्वितकर्मत्वाघटविषयताशालिशाब्दत्वावच्छिन्नंप्रति
घटमानयेतिसमभिव्याहारज्ञानमपि हेतुरेवं क्रमेण विधिसमभिव्याहारज्ञानस्य हेतुत्वे घटोस्ती
ति वाक्यस्य तादृशशाब्दबोधं प्रति हेतुत्वाकल्पनेनायादृकाभावः। एवं मते घटोस्तीत्यादिवाक्यस्य के
वलघटमित्यादिपदज्ञानस्य च तत्तच्छाब्दबोधत्वावच्छिन्नं प्रति कार्यकारणभावोत्तरकल्पने गौरवे
घटमानयेत्यादिस्थलीयकार्यकारणभावकल्पनमुभयसिद्धमेव घटोस्तीति वाक्यानां लक्षणया
कार्यत्वान्वितत्तच्छाब्दहेतुत्वाभ्युपगमे तु तत्स्थलीयकार्यकारणभावकल्पनमुभयमते समानं ल
क्षणाज्ञानस्य कालेन तत्तत्सदजन्योपस्थितिकालीनासंसर्गाग्रहवशाद्विशिष्टव्यवहारः एवं च तस्मा।
तादृशलक्षणायामानाभावः नलक्षणामात्रोच्छेदापत्तिरिति वाच्यं घटमानयेति वाक्यानां कार्यता
न्वितानयनान्वितकर्मतान्वितघटविषयकशाब्दनिर्वाहाय लक्षणास्वीकारात् न च वालकेन
यदि कार्यतान्वितघटशाब्दं प्रति घटमानयेति वाक्यस्य न शाब्दहेतुता गृहीता तदा फलानुरोधात्

घटोस्तीतिवाक्यस्य यदा कदाचित्कारणसत्त्वेऽपि पूर्वं कल्पनाया अविरोधात् कथं सिद्धार्थकवाक्यस्य
न शाब्दहेतुत्वमिति वाच्यं। यत्र यदा कार्यत्वान्वितशाब्दं प्रतिहेतुता बालके न गृहीता न देवत्तन्निर्वाह
य शाब्दत्वावच्छिन्नं प्रति विषयाविशिष्टकार्यत्वोपस्थापकपदज्ञानस्यापि हेतुत्वेन गृहीतं यस्यादति
प्रसंगवारणाय विधिसमभिव्याहृतवाक्यस्य तदर्थविषयके शाब्दबोधं प्रति हेतुत्वकल्पनेऽपूर्वं गृ
हीते सामान्यकारणताया अविरोधेन तद्विरोधसिद्धार्थकवाक्यस्य हेतुत्वेन लौकिकं यप्रवृत्तेः। न च कार्यत्वो
पस्थापकपदज्ञानस्य हेतुत्वकल्पने कार्याभावे अस्तीति वाक्यादपि शाब्दबोधापत्तिरिति वाच्यं। कार्य
पदभिन्नकार्यत्वोपस्थापकपदज्ञानत्वेन हेतुत्वकल्पनात्। किं च विशेषसामग्रीविरहेण तत्र शाब्द
बोधापत्त्यभावः। वस्तुतस्तु घटः इति साध्यः इत्यादिवत्तत्र सापि इष्टापत्तिः। न च तदा सामान्यकारणता
यां मानाभाव इति वाच्यं। यद्विशेषयोरिति न्यायात् तादृशकारणत्वकल्पनात्। अथ यदि कार्यतान्वित
घटे शक्तिस्तदा तादृशशक्तिमान् घटः इति स्मरणानुपपत्तिः शाब्दबोधे कार्यतान्वितत्वप्रकारता

पत्तिरिति चेन्मैवं द्विविधा हि पदशक्तिः अनुभविका स्मारिका च कार्यतावच्छिन्नघटविषयकशाब्दबोधनि
रूपितापदनिष्ठाशक्तिरनुभाविका घटत्वनिरूपितापदनिष्ठाशक्तिः स्मारिका अनुभाविकात्वरूप
सत्यपेक्षिता स्मारिका या शक्तिज्ञानं तथा च तादृशस्मारकशक्तिज्ञानादेव घट इति स्मरणोपपत्तिरिति सं
प्रदायः वस्तुतस्तु कार्यतावच्छिन्नघटविषयकशाब्दनिरूपितापदनिष्ठानुभावकशक्तेरेव घट
विषयत्वेन ज्ञानं कारणं तथा च यत्संबंधित्वेन ज्ञानं तस्यैव स्मरणात् प्रकृते घटत्वसंबंधित्वादृशज्ञाना
तघटत्वस्य साघटस्मृतिर्दुर्लभेति जातिनिरूपितस्मारकशक्तेः कल्पने मानाभावात् न शक्तिद
यमिति सारं अत एवं केवलघटोस्तीति वाक्यस्यापि घटत्वादिना स्मारकतामात्रं स्वरूपसंबंधेन का
र्यत्वविशिष्टं यदा नयनं निरूपकतासंबंधेन तदन्वितैकमत्वं आधेयत्वसंबंधेन तदन्वितोय
घणदिस्तोच्छाब्दत्वेन कार्यतास्वीकारेण च बहुमानयसादोतसंसर्गकशाब्दोदयन्न चावांतर
वाक्यार्थबोधस्य महावाक्यार्थविशिष्टवैशिष्ट्यबोधहेतुत्वेन तदनुरोधेन घटकमत्वबोधस्वीकारे

कार्यत्वाद्विषयकशाब्दस्वीकारापत्तिरितिवाच्यं व्युत्क्रमेणकार्यत्वान्वितानयनमित्यादिक्रमेणावो
तरवाक्यार्थबोधस्यकार्यत्वविषयकस्यस्वीकारात्। नचैवंन्यायिकमतेघटपदजन्योपस्थितेर्घ
टत्वप्रकारकघटशाब्दत्वंभवन्मतेकार्यत्वान्वितान्वितघटशाब्दत्वंकार्यतावच्छेदकमितिगौर
वमितिवाच्यं। भवन्मतेपिघटशाब्दत्वमेवावच्छेदकं किंतुघटइतिपदेआनयपदेनसहान्वयबो
धतात्पर्यकमितिज्ञानस्यसहकारेणतादृशोपस्थितेर्हेतुत्वस्वीकारेणलाघ[illegible]संभवात्। एवंयो
ग्यताज्ञानादेरप्येवंज्ञानसहकारेणविशिष्टविषयताशालिशाब्दंप्रतिहेतुत्वेकेवलंघटमिति
शाब्दबोधेयोग्यताज्ञानादेःशाब्दसामग्र्याःहेतुत्वाकल्पनेनचापरंलाघवं। एवंयत्रचैत्रपुत्र
जातइतिवाक्यस्यपुत्रजन्मज्ञानजनकतोपगताततत्रापिहर्षेकल्पनाविरोधेनकार्यत्ववाच
कपदस्यसहकारेणजनकतोपगतेल्लाघवादिप्रतिसंधानादिवशात्। एवंविध्येकवाक्यतापन्नाप
वादस्यापिशाब्दबोधजनकत्वेविध्येकवाक्यतापन्नत्वज्ञानसहकारिवशात्। नचकार्यत्ववाचकप

दलभ्यत्वप्रत्तिसंधानोत्तरं पूर्वं क्रमकार्यतान्वितानयतान्वितकर्मत्वान्वितघटज्ञानजनकत्वेशानस्या
प्रामाण्यग्रहस्वीकारात् अन्वितज्ञानजनकत्वमेवकल्प्यते तेतथाचापातसिद्धार्थवाक्यस्यापिप्रामाण्यमि
तिवाच्यं त्वमेवकल्पने गौरवात् । न चाप्येमेया [illegible] दोयथास्वर्गत्वसामानाधिकरण्येन तत्तन्निरूपितज
नकतागृहीते तेन स्ववछेदकत्वांशोपि तत्पाकार्यत्वान्वितत्तदर्थग्रहजनकतागृहीतेन स्ववछेदकत्वांशो
पि तथा च कार्यत्ववाचकपदसमभिव्याहारेण ताद्दशास्परक्षणात् लभ्यतरति न सिद्धार्थवाक्यस्याप्रा
माण्यमिति वाच्यं । तदवछिन्नजनकत्वस्यैव वाक्ये ग्रहात् न च तदाकार्यान्वितताद्दशघटज्ञानत्वावछि
न्नजनकताग्रहात्तदनुरोधेन घटांतर्भावेनापि सर्वत्र बोधकतापत्तिः अन्यलभ्यत्वप्रतिसंधानात्
यदि घटांचास्यागस्त्वहाकार्यत्वांशोपीति वाच्यं । प्रथमे घटांतर्भावेनैव विशेषजनकताग्रहेण सामा
न्यमनकत्ताया आग्रहात् । घटांतर्भावेन सर्वत्र बोधकतापत्तेरभावादिति वदंति । अत्र नैयायिकाः
घटोस्तीतिवाक्यश्रवणानंतरं शाब्दबोधोदयेन तदनंतरं शाब्दयामीत्यनुव्यवसायेन चैतादृशवाक्या

स्य शाब्दबोधजनकत्वेन प्रमाणत्वात् प्रकृते शाब्दसामान्यं प्रति कार्यत्वावच्छेदकपदसमभिव्याहृतत्वा
नकारणत्वग्रहस्य भ्रमत्वकल्पनात् अन्यथा घटमानयेत्यादिवाक्यश्रवणात् तज्ज्ञानोपस्थितिमत्य
मानसबोधेनैव व्यवहारोपपत्तौ शाब्दमात्रस्याप्रामाण्यापत्तेः एवं विधिशेषीभूतवाक्यस्य प्रामाण्य
निर्वाहाय विध्येकवाक्यत्वज्ञानस्य हेतुत्वकल्पनमपि न संभवति नेवि नापि स्वर्गपदशक्तिग्राहक
वाक्यस्य प्रमाणत्वादिति। अपरेतु दास्तरान्वित एव शक्तिरस्तु शाब्दबोधविषयतावच्छेदवृत्तिविषयता
व्याप्येति नियमात्। अन्यथाऽनन्वयस्य शाब्दबोधविषयता न स्यात्। न चान्वितघटत्वादिना शक्यत्वेऽन्वि
तघटस्य घटान्वितकर्मत्वस्य च भानेन घटमानयेति शब्दाद्वाक्यार्थद्वयबोधः स्यान्नतु विशिष्टैकार्थबो
ध इति वाच्यं तथासति घटान्वये घटपदस्य शक्तिः कर्मत्वान्वये चाम्पदस्य शक्तिरस्ति सैव क्रमेण
वाक्यार्थैकासंभवात्। न चैवं नीलघट इत्यादौ घटस्य विशेष्यतया भानेन तत्र कर्मत्वघटान्वयस्याऽवि
शेष्यतया भानमिति वाच्यं घटान्वये च खंडशक्तित्वाकारेणानुपपत्तेः अनन्वयस्यान्वितेतरप

दार्थ एवान्वयेन तत्र तादृशेतरपदार्थाभावेन तस्यानन्वयापत्तेः अत एव घटमानयेत्यादावानयनान्वयस्य
विशेष्यतयाभानापत्तिरपि निरस्ता वस्तुतस्तु यथा तथा दिशा द्वेतुद्वेप्स्यत्वेन शक्तिः सहकारिविशेषा
द्विशेषरूपेण बोधस्तथा पदानामितरान्वितत्वेनान्वितत्वेन वा सामान्यरूपेण शक्तिः घटकर्मकानय
नादित्याभस्तु परस्पराकांक्षादिवशादिसेवसारं मिति चेन्न अन्वयसामान्यस्य शक्यत्वेपि अन्वय
विशेषभानार्थमाकांक्षाज्ञानादेर्विषयमकत्वकल्पनावश्यकत्वेन तत्र स्वतंत्रशक्तिकल्पनातः शाब्द
विषयतायाः वृत्तिविषयताव्याप्यत्वानंगीकारात् पदार्थद्वयसंसर्गभाने चाकांक्षावशात् पदार्थाव
च्छेदकसंसर्गभाने तु शक्तिबलात् अन्यथान्वये शक्तिस्वीकारे तत्संसर्गस्यापि भानेन भासमानवैशि
ष्ट्यप्रतियोगिनः प्रकारतापत्तेः । न चैतदनुभवसिद्धं अन्यलभ्यत्वे शक्त्यकल्पनात् अत एवान्वयस्य
सांसर्गिकविषयताशक्तिशाब्दबोधे शक्तिज्ञानस्य सहकारित्वकल्पनमेव तादृशान्वयप्रकारत्वावार
कमिति परास्तं । आकांक्षावशादेव तादृशसांसर्गिकविषयताशालिशाब्दबोधनिर्वाहात् तदंशमन्वयेश

क्तिकल्पनानौचित्यात्। अत एव शाब्दबोधविषयतापादकत्वविषयताव्याप्यत्वाभ्युपगमेऽन्वयांशस्य
लक्षतावच्छेदकविधयाभानेऽप्युपदर्शितहेतुविरोधानभ्युपगमात् तस्यैव पदस्य लाक्षणिकत्वेऽपि न बाधानु
पपत्तिः लाक्षणिकपदस्यानुभावकत्वमुखेनैव कल्पनादिति परास्तं। आकांक्षावत्त्वलभ्यलक्ष
णायाअप्यकल्पनात् अत एव बध्मोस्तीतिवाक्ये वह्निपरत्वस्यानुमानेन निर्वाहात् न तत्तदर्थबोधकम
पदस्य वृत्तिकल्पना किंचैवं घटपदस्य शक्तिविलोपापत्तिः लक्षणानिर्वाहार्थं शक्तिकल्पनेऽपि यावति रिक्ते
पि शक्तिः स्यात् मुख्यप्रयोगविरहस्योभयत्र तुल्यत्वात्। अत एव पदार्थज्ञाने पदानां शक्तिः शक्तीस्त
ज्ञानविषयत्वं लक्षणशाकलस्वरूपेऽपि निरस्तं तस्यार्थस्मरणाजनकत्वात् ज्ञानं च ज्ञाने शक्तिरेव
स्मारिकाशक्तिरर्थ इति मतेन दोषः ज्ञानशक्तिज्ञानस्य घटस्मृतित्वस्य कार्यतावच्छेदकताभ्युपगमे
न तादृशफलोपपत्तिरिति वाच्यं। ज्ञानशक्तिस्वीकारे मानाभावात् पदार्थशक्तेरेव तादृशफलोपपत्तेरि
इत्थं च कार्यान्विते न्विते नाम शक्तिः किंतु पदार्थमात्र इति शक्तिमत्पदज्ञानं करणं पदार्थस्मृतिर्व्यापारः

शाब्दबोधस्य फलत्वमिति न्यायसिद्धान्तः। अत्र मदाः अर्थस्यैव करणत्वमस्तु किं पदस्य करणत्वकल्पनेन
न चार्थस्यातीतत्वेनागतत्वात् तत्र तस्य शाब्दकारणत्वं स्मृतेर्विषयजन्यत्वेन तस्या व्यापारत्वाभावादिति वाच्यं
तत्तत्पदार्थस्मृतेः कारणत्वमस्तु तद्द्वारेण सर्वोपपत्तेरिति। अत्र वदन्ति तोपस्थितत्व उपनीतज्ञानान्येतरं
कार्यत्वमिति वाहस्तथा च मदनये सर्वपदस्थले सर्वार्थोपस्थितिकाले च शाब्दबोधः शाब्दत्वरूपमेकं
सर्वपदजन्यपदार्थोपस्थितेर्जन्यतावच्छेदकं अपरं पदाजन्यपदार्थोपस्थितिजन्यतावच्छेदकं अत
एव यत्किंचित्पदासत्त्वेऽपरपदाध्याहारेण च शाब्दबोधः न च यत्र पदजन्योपस्थितिः पदाजन्योपस्थि
तिश्च तत्रोभयसजातीयशाब्दोपत्तिरिति वाच्यं। पदाजन्योपस्थितिघटितशाब्दसामग्र्याः प्रतिबंधकतये
वैकदा शाब्दद्वयजातीयानुदयात्। न च विषयमिश्रितत्तादृशशाब्दत्वस्य प्रतिबध्यतावच्छेदकत्वे म
हागौरवमिति वाच्यं। पदजन्यसर्वोपस्थितिघटितसामग्र्याः प्रतिबध्यतावच्छेदकत्वस्य तादृशशा
ब्दत्वएवोपगमात्। न च घटमानयेति पदजन्योपस्थितिसत्त्वे पटमानयेति पदाजन्यैतादृशसर्वोपस्थि

तिसत्वे परस्परविरोधेन शाब्दमात्रानुत्पादेनुभवविरोध इति वाच्यं। पदजन्योपस्थितिघटितशाब्दसा
मग्र्याः प्रतिबंधकत्वकल्पनेन तस्यैवोपगमात्तत्र भवन्मते पदाजन्यसर्वोपस्थितिघटितसामग्र्याः प्रति
बंधकत्वे पदजन्यत्वाभावेतत्राभावांशानिवेशाधिक्येन गौरवात् न्यायनयेपि तदर्थस्मानसबोधा
स्वीकारेण पदजन्योपस्थितिघटितसामग्र्यास्तं प्रति प्रतिबंधकत्वस्वीकारात्। न च यत्र शक्तिज्ञानघटित
सामग्री नास्ति केवलपदाजन्योपस्थितिः तत्र तदर्थस्मानसबोधवारणाय प्रतिबंधकत्वस्यावश्यक
त्वेन तत्रैव पदाजन्योपस्थितिघटितसामग्र्यास्तज्जातीयान्यं प्रति प्रतिबंधकत्वाभ्युपगमे क्लृप्तेनैवोपपत्तेः
न प्रतिबंध्यप्रतिबंधकभावांतरकल्पनमिति वाच्यं। तत्र मानसेच्छापाउत्तेजकत्वे मत्ताहन्तेच्छाकाले शा
ब्दोत्पत्तिवारणाय स्वात्तेत्रेण प्रतिबंधकताया आवश्यकत्वादिति तन्न पदाजन्यसर्वपदार्थोपस्थितिकाले
मानसबोधस्वीकारेण तादृशान्यवहारोपपत्तौ तत्र शाब्दत्वमानाभावात्। तस्मात्पदज्ञानेकैरणं पदार्थोप
स्थितिर्व्यापारं रसत्वे प्रसंगात्तेनेतस्मात्कार्यान्वितशक्तिविरहासिद्धमर्थबोदानो प्रामाण्यमत एव

यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् इत्यर्थवादात्सुखविशे
षस्वर्गपदशक्तिग्रहोपपत्तेः न च यत्र दुःखासंभिन्नत्वं यदि दुःखानवच्छेदकावच्छिन्नत्वं तदा राजचक्र
वर्तिसुखे तादृशसुखे शरीरावच्छिन्ने तिप्रसक्तेः। न च दुःखावच्छेदकवृत्तिजात्यसमानाश्रयावच्छिन्नत्वमर्थ
स्तत्र तादृशचैत्रत्वादिजातिसत्त्वान्नातिप्रसंग इति वाच्यं। तथा सति स्वर्गारंभकसुखावच्छेदके शरी
रेपि तादृशसत्त्वद्रव्यत्वादिजातिसत्त्वेनासंभवप्रसंगादिति चेन्न दुःखावच्छेदकवृत्त्येककालीनतद्व्यावृ
त्तिजात्यसमानाश्रयावच्छिन्नसुखत्वस्यैव तदर्थत्वात् तस्यैव स्वर्गपदशक्यतावच्छेदकत्वात् तत्सत्त्वादेरेक
कालीनद्वयवृत्तित्वाच्चैत्रत्वादेश्चैकदोभयशरीरावृत्तित्वाच्चैत्तात्के दोषः नव्यास्तु दुःखावच्छेदकावृ
त्तिजात्यसमानाश्रयावच्छिन्नत्वं तदर्थः स्वर्गावच्छेदकवृत्तिचैत्रत्वादिजातेः दुःखावच्छेदकावृत्तित्वात्संग्र
हः न च तत्रापि पापातिभयजन्यदुःखसत्त्वात्स्वदुःखावच्छेदकावृत्तित्वे तादृशजातेरिति वाच्यं। स्वर्गेपि
पापाभिलाषस्य क्षपितत्वान्नैव निवृत्तिरित्यादिश्रुतेः स्वर्गस्य हेतुत्वाप्रतिपादकत्वेन तादृशार्थे तात्पर्या

भावात् । यत्तु भयाजन्यत्वे वा दुःखविशेषणं देयमिसाकुः अथ तादृशस्वर्गिशरीरनाशानंतरं मुक्त्यनुपप
त्तिस्तत्र दुःखासत्त्वे न तन्नाशविरहादिति चेन्न मुक्तिं प्रति ब्राह्मणशरीरादेर्हेतुत्वे न तत्र तदभावादेव मु
क्तिविरहात् स्वर्गिशरीरे ब्राह्मणत्वप्रयोजकादृष्टाभावेन तच्छरीरे ब्राह्मणत्वाभावात् । यदि च श्रवणा
दिजन्यमुक्तौ ब्राह्मणशरीरापेक्षा न तु प्रकारांतरेण मुक्तौ काशीमरणादिजन्यायां तदपेक्षेति विभाव्य
ते तथापि न क्षतिः तादृशशरीरनाशानंतरं दुःखावच्छेदकशरीरोत्पत्तिमुपेत्य चरमदुःखोत्पांत्तगिका
रेण तादृशदुःखध्वंसस्यैव मुक्तित्वसंभवात् । न चैवमस्तु मनंतरमिति न चेत्तदपि राजचक्रवर्तिसुखे
नैमित्तिकखंडशरीरावच्छिन्नेतिप्रसक्तमिति वाच्यं । क्षणद्वयासकैकालोपाध्यावच्छेदेन सुखाभावाव
च्छेदकाच्चेति जात्याश्रयावच्छिन्नसुखत्वस्य तदर्थत्वात् अभिलाषोपनीतत्वमिति न चाचाभिलाषविषय
सुखत्वं जन्यखंडशरीरावच्छिन्ने राजचक्रवर्तिसुखेतिप्रसक्तमिति वाच्यं । तत्तद्विषयसंबंधगोचरेच्छा
व्यवहितोत्तरकालावच्छेदेन तत्तद्विषयसंबंधत्वावच्छिन्नाभावावच्छेदकात्वेति जात्याश्रयावच्छिन्न

सुखत्वस्य तदर्थत्वात्। अत्र च प्रत्येकमेव स्वर्गपदशक्यतावच्छेदके एतद्धर्मत्रयं तत्र सर्यवन्सादेव
कदाचिद्भानमिति तस्य नानार्थत्वं। अत्र केचित्तु इंद्रादीनां सुखविच्छेदस्य बहुशः श्रवणात्तत्र न
चयस्त्वे सादिप्रतिपाद्यस्य न स्वर्गपदशक्यतावच्छेदकत्वं स्वर्गसुखस्यापि विषयजन्यत्वाच्च न नि
रुक्ताभिलाषोपनीतत्वस्यापि अविलंबेन विषयप्राप्तिरवहितत्वमभिलाषमात्रात्। अविलंब
स्याक्रियाद्यनपेक्षत्वमिति तस्याघन्नदुःखस्यादिप्रतिपाद्यस्याद्यधर्मस्यैव स्वर्गपदशक्यतावच्छेद
कत्वमित्याहुस्तदसत् देवानां सुखविच्छेदश्रवणस्य रामादिदुःखश्रवणवत् संसारनिंदापरत्वात्
स्वर्गसुखस्य विषयजन्यत्वेमानाभावाच्च। न च तत्प्राप्तित्वादग्निष्टोमादिजन्यतावच्छेदकं स्व
र्गनिष्ठत्वं तदेव जात्यमेव स्वर्गपदशक्यतावच्छेदकमस्तु उक्तधर्मत्रयं तत्परिचायकमेवेति वाच्यं तस्या
नेनुगमेन शक्यतावच्छेदकत्वसंभवेप्यग्निष्टोमाङ्गगास्नानादिरूपविभिन्नजातीयकारणजन्यसक
लस्वर्गनिष्ठस्वर्गत्वरूपविलक्षणजातिरेव स्वर्गपदशक्यतावच्छेदिकास्तु न त्वस्वर्गत्वे जातौ मानाभावः।

ननु हे जातस्यैवाग्निष्टोमादिजन्यतावच्छेदकत्वावश्यकत्वेन तां विना कार्यकारणभावानिर्वाहविरहादिति
वाच्यं। अग्निष्टोमादीनां विशेषरूपेण या कारणता तत्प्रतियोगिककार्यतायास्तत्तद्वीनरत्वे जातस्य नावच्छि
न्नत्वेपि विहितकर्मत्वेन या सामान्यकारणता तत्प्रतियोगिककार्यतावच्छेदकतया व्यापकस्वर्गत्वजा
तेरवश्यकल्पनीयत्वात्। न च कार्यतावच्छेदकाननुगमस्य दोषत्वापाततस्तद्वीनरत्वैजात्यानामेव
तादृशकार्यतावच्छेदकत्वमास्तामिति वाच्यं। यद्विशेषयोरिति न्यायेन सामान्यरूपेण कार
णताया अप्यावश्यकत्वात् कार्यकारणभावे लाघवाच्च। तेनापि सकलसाधारणैककार्यतावच्छेदकस्य
जातित्वं स्यस्मिन्निष्प्रसूहत्वाच्चेति चेन्नैवं। सकलस्वर्गोपायसाधारणस्य विहितकर्मत्वस्य दुर्व
चत्वया तेन रूपेण कारणत्वस्याप्रामाणिकत्वात्। प्रामाणिकत्वेपि सुखत्वस्यैव तज्जन्यतावच्छेदके
त्वात् लौकिकापूर्वस्य सुखस्यापि विना पुण्यमनुत्पत्त्याभिचाराननवकाशादिति दिक्। एवमिन्द्रमुपासी
तेत्यादौ अपि इन्द्रपदस्य लोके पृथ्वीगदादावपि प्रयोगादिन्द्रपदार्थानिर्णयेन इन्द्रः सहस्राक्ष इत्यर्थवाद

न्या॰कौ॰
१४२

दलौकिके सहस्राक्षादाविंद्रादिपदशक्तिग्रहः अत एव देवताचैतन्यसिद्धिरपि । अत एव मीमांसकाः देव
ताचैतन्यमानाभावः तथाहि देवतावाचकेंद्रादिपदानां इंद्रपदस्याहस्ताद्दिमच्चात्मकचेतन एव शक्तिः
तस्यैव देवतात्वात् न तु सहस्राक्ष इंद्रः सहस्राक्ष इत्यर्थवादस्याप्रवर्त्तकत्वेनाप्रमाणत्वात् । अपरि
वायवागांदध्यादिसाद्दोस्यागजन्यफलभागित्वरूपदेवतात्वनिष्ठसंप्रदानत्वस्य श्रुतेः वरदातृत्वेश्वरतेस्या
चेतनमंत्रस्य कथं शिवादिपदशक्तत्वं तस्याचेतनरूपतया तादृशसंप्रदानत्वतयाविरहात् ।
अपि च मंत्रस्य शिवादिपदशक्तत्वेनेतमंत्रानुपूर्वीविशेषणामेव शक्ततावच्छेदकत्वेनैव वशाक्ते
तावच्छेदकाभावात् शिवादिसहस्रनाम्नांपर्यायत्वव्याघातापत्तिः एवं वाजपेययागस्येंद्रपदफल
कत्वात् विरोधापत्तिश्चेति चेद स्वेतावतापि इंद्रादिपदानां सहस्राक्षत्वादिविशिष्टे शक्तिः एवमपि
तस्य देवतापदवाच्यत्वे मानाभावः देशनादेशितचतुर्थ्यंतपदनिर्देश्यत्वरूपदेवतात्वस्य देवता
पदशक्यतावच्छेदकत्वात् तन्निर्देश्यत्वे च देवबोधितचतुर्थ्यंततयोच्चार्यत्वेन त्वकपादेशानपाइं

इन्द्रादिपदस्य चतुर्थ्यन्ततत्पोऽर्थत्वे बोध्यतरत्तिवाच्यं। ऐन्द्रं दधि भवत्यमावास्यायामाग्नेयं हविर्निर्व
पेदित्यादौ देवतार्थे च विहिते न तद्धिते न चतुर्थ्यन्ततत्पोऽर्थत्वरूपदेवतात्वस्येन्द्रादिपदेबोधनात्।
तत्रेन्द्रादिपदस्य स्वपरतया चतुर्थ्यन्ततत्पोऽर्थत्वे रूपदकरणकामिन्नेदधीतेवान्वयबोधात्। अत ए
वैन्द्रापत्यादिपदमेव देवता न तु शाक्यापत्यादिपदं शाकपदे चतुर्थ्यन्ततत्पोऽर्थत्वस्य वेदाबोधित
त्वात्। न चेन्द्राय स्वाहेति स्वाहान्तसमुदायस्यैव मन्त्रत्वेन तस्य कथं देवतात्वे चतुर्थ्यन्ततत्पोऽर्थत्वे
न तादृशमन्त्रस्य वेदेनाबोधनादिति वाच्यं। स्वाहादेस्त्यागमात्रबोधकत्वेन देवतानन्तर्गतत्वात्।
न तु चतुर्थ्यन्ततत्पोऽर्थत्वमात्रेण देवतात्वमपि तु वेदबोधितत्वे सति च हि तत्त्वे तादृशवेदेनबोधयितुं
नशक्यते· पूर्ववेदेनबोधनेतादृशबोध्यत्वसामान्यतद्देवतात्वं वेदेनग्राह्यं नैवेदेन देवतात्व
ग्रहे वेदबोधितत्वेऽपामिति पन्योन्याश्रयापास्कारान्तरेण म हुहा। तस्य सम्यक्त्वात्। एवं रथवेदने
सानमस्कोत्तरोत्तरतादृशान निर्वाहेति प्रथमतस्तादृशवेदजन्यशाब्दबोधे तदसंभवादिति वाच्यं।

विशेष्यमात्रस्यैव तथात्वात्तत्तथा च देशनादेशितायाश्चतुर्थ्यंततानतद्विशिष्टपदत्वमेव देवता
त्वे घटनायेत्यादि चतुर्थ्यंततानं च देवबोधेनेति तन्निरासः केवलेंद्रपदस्य चतुर्थ्यंतत्वाभावादेवमु
द्दासः ऐंद्रदध्यादौ तद्धितेनापि चतुर्थ्यंतत्वे बोध्यते चतुर्थ्यंतेंद्रपदकरणकाभिन्नं दधीत्येवान्व
यबोधात्तन्नेत्युभयत्रैव धत्तिः स्वाहेतिमंत्रपदमात्रघटितपदे देवतात्वाभावप्रसंग इति वाच्यं चतुर्थी
पदेन चतुर्थ्यर्थकस्योक्तत्वात् तत्र चतुर्थीनिषेधेन प्रथमाया एव तत्स्थलाभिषिक्तत्वात् तथा चतुर्थ्या
इवतत्स्याज्ञप्यहस्यतात्पर्यकत्वात्तथैसाकिं केवा चतुर्थ्यंतत्वं निवेश्य परत्वेपि चतुर्थ्यंतत्वेनज्ञानात्म
त एवेत्तु स चतुर्थ्यर्थकोपि भवः स्वाहेत्यादौ नानुपपत्तिरिति न चाचेतनस्येव देवतात्वे इंद्रो देवतेति
भेदाच्चयानुपपत्तिरिति वाच्यं इंद्रपदस्यैव अद्यैति पदपरत्वादिति संप्रदायः वस्तुतस्तु चेतनस्य
देवतात्वमत्रैव प्रतिपाद्यता संबंधेनेंद्रायस्वाहेत्यादिमंत्रविशिष्टस्यैव देवतात्वमनेश्यं स्वीकार
णीयं अन्यथा पर्यायांतरेणापि समागापत्तेः तथा च विनिगमनाविरहात् प्रतिपाद्यता संबंधेन मंत्रवि

शिष्टोर्थः प्रतिपादकतासंबंधेनार्थविशिष्टो मंत्रो वेत्युभयमेव देवता केवलस्यार्थस्य देवतात्वे पर्या-
यांतरेणापि त्यागप्रसंगात् । केवलपदस्य तत्त्वे च लक्षणादिनार्थांतरबोधकतादशापदस्य देवतात्वप्र-
संगात् तत्र येवेदबोधितायां चतुर्थ्यंततातत्तद्विशिष्टपदप्रतिपाद्यत्वमेव देवतात्वं अंत्यचतातादृशाच-
तुर्थ्यंतता विशिष्टत्वमेव न तु चकेन वेदेन तातादृशा चतुर्थ्यंतता बोध्यते इति वाच्यं । ऐंद्रं दधीत्येन नैवतद्बो-
धनात् तथाहि पदविशिष्टस्यार्थस्य देवतात्वपक्षे इंद्रपदस्यैंद्र इत्यर्थः तद्धितप्रत्ययस्य च चतुर्थ्यंत-
पदप्रतिपाद्यत्वविशिष्टः तथा चेंद्राभिन्नचतुर्थ्यंतपदप्रतिपाद्यकपदोद्देश्यकत्यागकर्माभिन्नं दधीत्यन्व-
यबोधः अर्थविशिष्टपदस्य देवतात्वकल्पे च तद्धितप्रत्ययस्य च चतुर्थ्यंतेंद्रादिपदमेवार्थः तथा च प्र-
तिपादकतासंबंधेनेंद्रविशिष्टचतुर्थ्यंतपदोद्देश्यकत्यागकर्माभिन्नं दधीत्यन्वयबोधः इंद्रपदसमभि-
व्याहृततद्धितपदेन च पदरूपेणेंद्रादिपदमेव बोध्यते सुपते इति तानुपपत्तिः इत्थं च पक्षद्वये
पर्यायांतरेण न त्यागोपपदोपस्थाप्यते हि ताप्यान्वयः चतुर्थ्यंतेनेवापदं बोध्यते तेनैव त्याग

इतिनियमात्नचवेदबोधितचतुर्थ्यन्तपदस्यदेवतात्वरूपस्येंद्रोस्यदेवतेत्यभेदान्वयबोधोनस्या
दितिवाच्यंवेदबोधितचतुर्थ्यन्तत्वावच्छेदकप्रतिपाद्यत्वरूपदेवतात्वस्यैवदेवतापदशक्यतावच्छे
दकत्वात्।तथाचैतत्क्रमिकस्तांगांगीभूतचतुर्थ्यन्तपदप्रतिपाद्याभिन्नइंद्रइत्यन्वयबोधःव्युत्पत्ति
वैचित्र्यानुरोधात्व्युत्पत्तिवैचित्र्यात्देवतापदार्थैकदेशेचतुर्थ्यन्तपदार्थविषयान्वयस्वीकारा
दित्याहुः।अत्रनैयायिकाःएवंतर्हिमंत्रादीनामिंद्रादिपदवाच्यत्वेनवादेवतापदवाच्यत्वमपि
तुसहस्राक्षस्येंद्रःसहस्राक्षइत्यादिप्रसिद्धपदसामानाधिकरण्यस्थलेइंद्रपदार्थेसहस्राक्षसामे
दानुभवसिद्धत्वात्इंद्रमुपासीतेत्यादौइंद्रपदार्थेउपासनान्वयपासेभवाच्यअचेतनेउपास्यत्वानि
रहात्।एवंशिवादिपदानामप्यचेतनेनवाचकत्वेशिवायगांदद्यादित्यादौतन्निष्ठफलोद्देश्यनकि
यमाणत्वारूपसंप्रदानकत्वस्यत्यागादावन्वयासंभवेःअचेतनस्यफलाभावात्।एवंशिवादिसह
स्रनाम्नांदेवतावाचकत्वेनप्रसिद्धानांपर्यायत्वमपिनस्यात्मंत्रस्यदेवतात्वेअनुगतैकशक्यतावच्छे

दकाभावात्। एवं देवतानां वरदातृत्वश्रुतिरपि विरुद्धा स्यात् अचेतनस्य वरदातृत्वासंभवात् तस्मा
न्मंत्रकरणकहविस्त्यागोद्देश्यत्वस्यैव देवतात्वरूपतया सचेतनेंद्रादिरेव देवतेति। न च हविस्त्यागोद्दे
श्यत्वस्य देवतात्वरूपत्वे द्रव्यांतरत्यागोद्देश्यदेवतात्वाभावापत्तिरिति वाच्यं। हविःप
दस्य द्रव्यसामान्यपरत्वात् प्रयोजनविरहेणानुपादेयत्वाच्च। न च तादृशोद्देश्यताया देवतात्वरूपत्वे
तादृशोद्देश्यताशून्यकालेऽदेवतात्वप्रसंग इति वाच्यं। यदाकदाचित्तादृशोद्देश्यतावत्त्वस्यैव तथात्वात्।
न च यदाकदाचिदुद्देश्यत्वस्य तथात्वे इंद्रीयशरीरानवच्छेद्यतादृशायामपि इंद्रीयात्मनो देवतात्वाप
त्तिरिति वाच्यं। इंद्रीयादिशरीरस्यैव त्यागोद्देश्यत्वात्। न च शरीरस्यैव देवतात्वे आत्मन्यतिव्याप्तिः तत्रापि
त्यागोद्देश्यतासत्त्वादिति वाच्यं। आत्मव्यावृत्तोद्देश्यताया एव लक्षणघटकत्वात्। न च शरीरस्य देवता
त्वे आत्मन्यति देवताया अचेतनत्वापत्तिरिति वाच्यं। अवच्छेदकतासंबंधेनोद्देश्यताश्रयतया शरीरस्या
पि सचेतनत्वात्। न च ब्राह्मणादेरपि त्यागोद्देश्यतासत्त्वाद्देवतात्वापत्तिरिति वाच्यं। त्यागस्य मंत्रकरण

कत्वाभावात् इंद्रायस्वाहेत्यादेरेवमंत्रत्वात्। अत एव पत्नीद्दृश्यकस्यागस्यापि मंत्रकरणकत्वाभावान्नप्र
तस्य देवतात्वं न च तथापि कन्यायागोद्देश्यत्वात् ज्ञामात्रादेर्देवतात्वापत्तिः तत्र यागस्य कौशादिसाद्दिमं
त्रकरणकत्वादिति वाच्यं। तन्मंत्रस्य प्रतिग्रहोत पठनीयत्वेन करणत्वाभावात्। शेषादेस्तु नमः पदस्य
मंत्रत्वात् तत्करणकपार्वणोद्देश्यत्वे पित्रादेर्देवतात्वमेव न च नमः पदस्य मंत्रत्वे तत्करणके प्रेतश्राद्धोद्दे
श्यप्रेतस्य देवतात्वापत्तिरिति वाच्यं। तस्य लौकिकनमः पदस्य मंत्रत्वानंगीकारात्। शक्तिसंबंधेन मंत्र
पदवत्त्वस्यैव मंत्रत्वरूपत्वात्। ननु मंत्रकरणकहविर्भागित्वमेव देवतात्वमस्तु किमुद्देश्यतापर्यं
तनिवेशेन। न चैवं मुक्तस्य पित्रादेः श्राद्धे आकाशायस्वाहेत्यादावाकाशादेश्चासंग्रहः तस्य हविर्भागि
त्वाभावात्। उद्देश्यतायाश्च विसंवादित्वाच्छ्रमादायत्वापि संभवादिति वाच्यं। एवं सतिरिंद्रोद्देश्यकयागे
मंत्रस्य करणत्वे मानाभावेनासंभवस्य दुर्वारत्वादिति चेद्। उच्यते। मंत्रोच्चारणपूर्वकत्यागविधिबोधि
तोयस्यागस्तत्र हविःसंबंधितया विषयतेतादृशपत्नीकोपि देयः आकाशादेरचेतनत्वेपि हविःस्वामि

त्वेनतादृशत्यागविषयत्वात्तैः तदुद्देश्यकत्यागस्याकांक्षायस्वाहेत्यादिमंत्रपूर्वकत्वेनशास्त्रबोधितत्वात्।
महादानांगृहोमादौमंत्रपाठस्यविहितत्वेपितत्पूर्वकत्वेनदानांगृहोमादेरेवविहितोदानेतुतादृश
होमादिपूर्वकत्वेनवदानस्यापितुभ्यंसंप्रददेइत्यादिवाक्योच्चारणपूर्वकत्वेनशास्त्रबोधिकत्वान्मं
त्रपर्यंतनिवेशः एतादेरपिदेवतासंबंधादिप्रकारेणत्यागविषयतायातेन्नातिव्याप्तिवारणायहविः
संबंधितयेतिकौदादित्यादिमंत्रपाठपूर्वकत्वेनविधिबोधितेप्रतिग्रहेद्रव्यसंबंधितयाप्रतीयहिंतुवि
षयतयातत्रातिप्रसंगवारणायत्यागत्वनिवेशइतिसंक्षेपइतिवदंतिनचेतुंपदानांकार्यतान्विते
नित्तेवाशक्तिविरहेहेतुत्वेगवादिपदानांशक्तिरितिचेन्नअत्राहुः गवादिपदानांगोत्वादिविशिष्टगवा
दिव्यक्तौशक्तिः जातावृत्तिमत्त्वकपदार्थइतिसूत्रेवाक्यतिपदंवैशिष्ट्यपरंसामान्यलक्षणोपगमेतपा
सर्वत्रगविशक्तिग्रहसंभवात्तदनुपगमेचसमानप्रकारकत्वेनैवहेतुहेतुमद्भावोपगमान्नदोषःपिष्टम
प्योगावेरित्यादौचगवादिपदेगोसंस्थानसदृशसंस्थानवत्पिष्टाक्षणिकमतौनतत्रानुपपत्तिरितिदीधिति

कारादयस्तु गवादिपदानां व्यक्तावेव शक्तिर्न तु गोत्वाद्यंशेऽपि नैवेशाब्दबोधप्रयोजकत्वाभावात् गोत्वा
दीनां शाब्दबोधे प्रकारतयाभानानुपपत्तिरिति वाच्यं पदापेक्षिगोत्वादिधर्मस्य शाब्दबोधप्रकारतायां
तदंशे तत्पदशक्यतावच्छेदकत्वस्यैव प्रयोजकत्वात् शक्यतावच्छेदकत्वं च संकेतविषयत्वे सति तच्छाब्द
बोधविषयत्वे प्रकारत्वानिरूपितविशेष्यतावच्छेदकत्वेन तु बोधविषयतावच्छेदकतया संकेतविषय
त्वरूपं विशेषणविधया वाच्यत्वेन तथा च तद्धर्मप्रकारता शाब्दबोधे तद्धर्मावच्छिन्नत्वविशिष्टतादृशवि
शेष्यकतासंसर्गिकशक्तिज्ञानस्यैव कारणत्वमिति नोक्तानुपपत्तिः। एतेनैवं सति शक्तिसाधारणाधुनिकसं
केतस्थानयोरेकरूपेणैव हेतुतया यत्र द्रव्यपदाद्गुणत्वादिना द्रव्यं बोद्धव्यमित्याकारकः कस्यचित्संकेतः
द्रव्यत्वाद्यवच्छिन्नतादृशविशेष्यतासंबंधेन गृहीतस्तत्र तादृशसंकेतग्रहात् द्रव्यत्वेन द्रव्यबोधोप
त्तिर्गुणत्वादि[illegible]प्रकारकबोधानुपपत्तिश्चेति दूषणोद्भावनं तदसत् द्रव्यपदाद्गुणत्वादिना द्रव्यं
बोद्धव्यमित्येतादृशसंकेते द्रव्यांशे द्रव्यत्वस्य प्रकारत्वेऽपि विशेष्यतावच्छेदकतया गुणत्वस्य एवंस्वीकार

णात्कानुपपत्तेर्भावादिति प्राहुः। प्राभाकरास्तु गवादिपदानां गोत्वादिविशिष्टशक्तिकल्पने गोत्वान्वाग्र
हीतविशेषणन्यायेन गोत्वादौ शक्तिकल्पनस्यावश्यकत्वात् लाघवेन केवलगोत्वादावेव शक्तिः। न चै
वं गवादिपदाद्गोत्वादिविशिष्टान्वयबोधानुपपत्तिः विशिष्टशक्तिविरहादिति वाच्यं गोत्वादिविशिष्टशा
ब्दत्वस्यैव गोत्वादिशक्तिज्ञानकार्यतावच्छेदकत्वोपगमेन केवलगोत्वादिशक्तिज्ञानादेव विशिष्टान्व
यबोधसंभवात्। अथैवं पश्वादिपदस्थलेपि पशुत्वाद्युपाधिशक्तिज्ञानस्यैव पशुत्वादिविशिष्टशाब्दबो
धत्वस्य कार्यतावच्छेदकत्वोपगमेन पशुत्वादिशक्तिज्ञानादेव पशुत्वादिविशिष्टबोधोपपत्तौ तत्रापि
विशिष्टशक्त्युच्छेदः न चेष्टापत्तिः उपाधिप्रवृत्तिनिमित्तकस्थले विशिष्ट एव शक्तिरिति तत्सिद्धान्तवि
रोधादिति चेन्न। जातेर्व्यक्तिवैधर्म्यत्वनियमेन जातिप्रवृत्तिनिमित्तकस्थले उक्तरीत्यासंभवेपि उपाधे
र्व्यक्तिवैधर्म्यत्वनियमाभावे नत्तत्त्वातिरिक्तरसवेत तत्र विशिष्टशक्तेर्गोकारस्यावश्यकत्वात्। न च गोत्वा
दौ शक्त्युपगमे गोत्वे गोपदशक्यमिति शक्तिज्ञानहेतुतायां गोत्वत्वादेर्विशिष्यतावच्छेदकतया निवेशे

गौरवं च विशिष्टशक्तिस्वीकारे च गौणोपदर्शकात्तिशक्तिज्ञानहेतुतायां गोत्वादेर्विशेष्यतावच्छेदकतया
निवेशलाघवमिति विशिष्टशक्तिस्वीकार एवोचित इति वाच्यं। गोत्वादौ शक्तिस्वीकारेपि तादात्म्ये
न गोत्वादेरेव विशेष्यतावच्छेदकतया निवेशेन गौरवाभावादिति वदंति तत्तदसत् केवलजातिशक्तिस्वी
कारे गवादिपदात्कदाचित्समवायेन गोत्वादिविशिष्टस्य बोधः कदाचित्स्वकालिकसंबंधेन गोत्वादि
विशिष्टस्य बोध इत्यत्र नियामकाभावप्रसंगात् विशिष्टशक्तिस्वीकारे च पदात्समवायेन गोत्वादि
विशिष्टशक्तिज्ञाने तदा समवायेन गोत्वादिविशिष्टस्य शाब्दबोधः पदाच्च कालिकसंबंधेन गोत्वादिवि
शिष्टशक्तिज्ञाने तदा कालिकसंबंधेन गोत्वादिविशिष्टशाब्दबोधनियमसंभवात्। न च केवलगोत्वा
दिशक्तिज्ञानादेव तात्पर्यवशात् तत्तत्संबंधेन गोत्वादिविशिष्टशाब्दबोधनियमसंभव इति वाच्यं तस्
त्यापि तात्पर्यज्ञाने वृत्तिज्ञानं विना शाब्दबोधानुदयात्। किंच प्रत्यक्षे जातेर्व्यक्तिवेद्यत्वनियमेपि शाब्द
बोधे तथा नियमाभावेनोक्तरीत्या केवलजातिशक्तिज्ञाने द्विशिष्टान्वयबोधानुपपाद इति विशिष्टशक्ति

स्वीकार आवश्यक इति दिक् ॥ इत्थं विशिष्टवाचकत्वेन व्यवस्थितेषु शब्देषु केचन शब्दाः केवल
यौगिकाः यथा पाचकपाठकादयः केचन केवलरूढाः यथा गवादिशब्दाः केचन योगरूढाः यथा पंके
जादिशब्दाः केचन यौगिकरूढाः यथोद्भिदादिशब्दाः ननु पंकजादिशब्दस्य यौगिकत्वमेवास्तु किं
रूढ्या इति चेन्न पंकजादिशब्दात् योगशक्त्या कुमुदादिशब्दबोधापत्तिवारणाय तत्र रूढिस्वीकारस्या
वश्यकत्वात् न च रूढिस्वीकारेप्येतदापत्तिर्दुर्वारैवेति वाच्यं रूढिज्ञानस्य प्रतिबंधकत्वोपगमेनो
क्तापत्तिवारणात् तदुक्तं रूढिर्योगापहारिणीति ननु पद्मत्वविशिष्टे पंकजनिकर्तृत्वप्रकारक
शाब्दत्वावच्छिन्नं प्रति पंकजपदं पद्मत्वाभिस्वीकारकरूढिज्ञानत्वेन प्रतिबंधकत्वासंभवः तादृश
रूढिज्ञानकाले कर्दमजादिपदानाद्रुप्पण कुमुदादिबोधानुदयप्रसंगात् न च पंकजपदजन्यता
दृशशाब्दत्वावच्छिन्नं प्रति उक्तरूपेण रूढिज्ञानस्य प्रतिबंधकत्वोपगमान्नोक्तदोष इति वाच्यं तत्पास
त्वप्युक्तरूढिज्ञानकाले समुदायलक्षणया पंकजपदात् पंकजनिकर्तृत्वेन कुमुदादिबोधानुपपत्तेर्

क्षणाग्रहस्योक्तरूढिज्ञानप्रतिबंधकतायामुक्तेनेकत्वेकल्पनेगौरवादिति चेन्न अवयवशक्त्या
पंकजपदजन्यपद्मान्यविशेष्यकपंकजनिकर्तृत्वप्रकारकशाब्दत्वावच्छिन्नं प्रति उक्तरूढिज्ञान
त्वेन प्रतिबंधकत्वात् । नचैवं कुमुदादावेव पद्मत्वेन भ्रमात्मकरूढिज्ञानकाले तादृप्येण कुमु
दादिबोधानुपपत्तिः उक्तरूढिज्ञानरूपप्रतिबंधकसत्वादिति वाच्यं पद्मान्यविशेष्यकत्वेनैनप
द्मत्वावच्छिन्नविशेष्यताकत्वस्य विवक्षणात् । नचैवमुक्तरूढिज्ञानसत्वे पंकजपदं कुमुदेशक्त
मिति रूढिज्ञानकाले पद्मस्यैव कुमुदादेरपि अवयवशक्त्या पंकजनिकर्तृकुमुदमित्यादिबोधो
नस्यादिति वाच्यं इष्टापत्तेः पंकजपदविशेष्यककुमुदादिशक्तत्वप्रकारकज्ञानाजन्यत्वस्यापि
प्रतिबध्यतावच्छेदककोटौ निवेशनीयत्वाद्वाच्छक्तत्वसामानाधिकरण्यस्याव्यवहितोत्तरक्ष
णावच्छिन्नकत्वोभयसंबंधेनोक्तरूढिज्ञानविशिष्टशाब्दत्वस्यैवोक्तरूढिज्ञानप्रतिबध्यतावच्छेद
कत्वाद्यथाश्रुते वैयर्थ्योक्तदोषवारणासंभव वाच्य इति सारं । ननु योग्यताज्ञानस्य धर्मितावच्छेदकभेदेन

विभिन्नहेतुताकत्तयाकुमुदत्वादिधर्मितावच्छेदकपंकजनिकर्त्तृकप्रकारकेशाब्दत्वावच्छिन्नेप्रति
तादृशयोग्यताज्ञानस्यहेतुत्वाकल्पनेनापादकाभावादेवतादृशशाब्दवारणेरूढिज्ञानस्यप्रति
बंधकत्वेमानाभावः नचयोग्यताज्ञानस्यधर्मितावच्छेदकभेदेनहेतुत्वेगौरवाद्धर्मितावच्छेदके
निष्ठप्रत्यासत्त्यैवहेतुत्वंकल्प्यतइतिपंकजनिकर्त्तृत्वप्रकारतानिरूपितविशेष्यतावच्छेदकता
संबंधेनकुमुदत्वादौशाब्दत्वावच्छिन्नापत्तौक्रियमाणायांफलतःपंकजंकुमुदमित्यादिशाब्दाप
त्तिर्दुर्वारैवेतिवाच्यं।तथापिकुमदंकुमुदमित्यादौशाब्दवारणायकुमुदत्वभिन्नवृत्तिविषयतासं
बंधेनशाब्दत्वावच्छिन्नंप्रतिकुमुदत्वादिभेदस्यहेतुत्वावश्यकतयायोग्यताज्ञानेनशाब्दत्वावच्छिन्ने
जननेपेकुमुदत्वादिभेदस्यसहकारित्वकल्पनेनैवोक्तशाब्दापत्त्याभावात्तत्पंकजनिकर्त्तृत्वनिष्ठ
प्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेनशाब्दत्वावच्छिन्नस्यकुमुदत्वादिभिन्नएवजाय
मानत्वात्कुमुदत्वादावजायमानत्वाच्चेतिचेन्नैवमिच्छाविशिष्टविरोधिसामग्र्यभावस्यभिन्नविषय

कानुमितिसामग्र्यभावस्य च विनाधर्मितावछेदकनिवेशनेकार्यकारणभावासंभवेन तद्वत्वउ
कशारस्यात्मन्यापत्तिवारणाय रूढिज्ञानस्यप्रतिबंधकताया आवश्यकत्वात् लक्षणया पंकजादि
पदासंकेजेकुमुदमित्यादिशाब्दस्य जायमानत्वेन कुमुदत्वादिभेदस्योत्कटोस्या सहकारित्वकल्पना
याअसंभवाच्च। मणि इत्तस्तु नियमतोरथास्मृतेपयमेनव्यक्तिवाचकेकडप्रत्ययेन पंकजनिकर्तृत्व
यानुभाव्यत्वेव्यक्तिवचनानां सन्निहितविशेषपरत्वनियमादिति रूढिज्ञानस्यप्रतिबंधकत्वे मा ना
भावेरसाहुस्तदसत्। उत्कटोस्यापद्येनैवसहपद्मपमंयोगार्थस्यान्वयबोधे पंकुमुदादितात्पर्यग्र
हवेशायुनः पंकजपदानुसंधानेन योगादेवकुमुदादिशाब्दधीवारणायरूढिज्ञानस्यप्रतिबंधक
ताया आवश्यकत्वात्। मीमांसकास्तु पद्मत्वस्यप्रयोगोपाधिताभ्युपगमेनैवातिव्याप्तिवारणे रूढि
ज्ञानस्यप्रतिबंधकतायां मानाभावः तथाहि पंकजनिकर्तृत्वनिष्टप्रकारतानिरूपितविशेष्यताव
छेदकतासंबंधेन शाब्दत्वावछिन्नं प्रति तादात्म्येन पद्मत्वस्य हेतुत्वकल्पनेनोक्तापत्तिः पद्मत्वप्रयोग

पाधिरितिप्राचीनमतवादस्याप्युक्त एवार्थः यत्तु पंकजनिकर्त्तृत्वनिष्ठप्रकारतानिरूपितविशेष्यता
संबंधेन शाब्दत्वावच्छिन्ने समवायेन पक्षत्वस्याभावेन व्यभिचारात् अतीतानागतादौ सविषय
कस्यैव वृत्तेः अत एव जातेः संबंधस्यैव स्वरूपः काल इति प्राचीनवादोपि साधुसंगच्छते। पद्वितादृशसंबं
धेन शाब्दत्वावच्छिन्ने पक्षत्वाभावः प्रतिबंधक इत्युक्ते पक्षतावादाप्यसिद्धेश्च नोक्तव्यभिचारः॥
अतीतानागतादौ पक्षत्वस्यैव पक्षताभावस्याप्यसत्वादिति तदप्यसत् तथासति यद्देशावच्छेदेन
यदा कार्योत्पत्तिस्तद्देशावच्छेदेन तदा काले तत्सामग्रीसाकारकसामग्रीप्राप्तिविलंबप्रसंगात् न
च यद्देशावृत्तिसामग्रीपदात्तद्व्यवहितोत्तरकाले तद्देशावृत्तिकार्योत्पत्तिरित्याकारकापा एवं
सामग्री व्याप्तेरूपगमान्न दोषः अतीतानागतपक्षलक्षणदेशावृत्तिपक्षस्येदानीं संबंधेन तद्दे
शावृत्तिकार्योत्पत्तिसंभवादिति वाच्यं तथासति मण्यादिमति कालेपि दाहाद्यापत्तेः तद्देशस्य ति
मण्याद्यभावस्य तत्ताघवच्छेदेन तत्काले सत्वे तत्र देशावृत्तिदाहादिरूपकार्योत्पत्तिसंभवात् नचैवं

केवलपंकजपदात् निर्धर्मितावच्छेदकपंकजनिकर्तृत्वप्रकारककुमुदादिबोधोपि स्यादिति वाच्यं।
इष्टापत्तेः कुमुदत्वादिधर्मितावच्छेदकपंकजनिकर्तृत्वप्रकारकशाब्दस्यैवानभ्युपगमात् तावत्स्त-
नस्त्वपंकजनिकर्तृत्वनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दत्वावच्छिन्नं प्रति च वि-
शिष्टविषयतासंबंधेन ज्ञानत्वेनैव रूढिज्ञानस्य हेतुत्वम् अतो न कोपि दोषः उक्तस्य वादस्याप्यत्रैवं
तात्पर्यमित्याहुः तदसत् लक्षणाजन्यकुमुदादिशाब्दबोधे व्यभिचारात् ताशक्तिजन्यत्वस्य जन्य-
तावच्छेदके निवेशनात् व्यभिचारोपि समुदायरूढिशात्मग्रहदशायां पंकजपदात् पंकजनिकर्तृत्वे-
न कुमुदादिशाब्दबोधानुदयप्रसंगस्य दुर्वारत्वात् स्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्प-
त्तिकत्वोभयसंबंधेन रूढिज्ञानवत्त्वस्य जन्यतावच्छेदककोटौ निवेशे रूढिज्ञानकाले योग्यतादिज्ञा-
नरूपसामान्यसामग्रीबलात् पंकजनिकर्तृत्वेन कुमुदादिबोधापत्तेर्दुर्वारत्वात् रूढितावदन्यतादृ-
शबोधे रूढिज्ञानाभावस्यातिरिक्तहेतुत्वोपगमे चातिगौरवापत्ता रूढिज्ञानप्रतिबंधकत्वस्यैव सम्य-

ष्कात् । वैयाकरणास्तु रूढिज्ञानप्रतिबध्यतायां प्रमाण्यविशेष्यकत्वनिवेशगौरवेण पंकजनिक
र्तृप्रकारकबोधमात्रे रूढिज्ञानस्य प्रतिबंधकतया तद्दशायां पंकजनिकर्तृत्वेन पद्मस्यापि न बोधः
किंतु पद्मत्वेनैवेति पंकजादिपदं रूढमेवेति योगरूढः शब्दो नास्त्येव तदुक्तं न हस्त्यादिषु तत्रैव यत्र
रूढिर्विरोधिनी पंकजं मनसा देवी पद्मनाभो युधिष्ठिर इत्याद्युक्तं तदसत् पंकजमस्तीत्यादिवा
क्यात् पंकजनिकर्तृमत्पद्ममस्तीत्याद्याकारकबोधस्य सर्वानुभवसिद्धतया प्रामाणिकगौरवस्यादो
षत्वात् । वस्तुतस्तु साधुपदशक्तिरीत्यास्माकमपि प्रमाण्यधर्मिकत्वस्यानिवेशाच्चेति दिक् । अत्र
इदं बोध्यं धेनुपदं गोत्वविशिष्टे साधनकर्मणि रूढमेव न तु योगरूढं नेच दधात्यनेन धेट् धेरित्वे स
नु शासनात् । योगशक्तिर्डुद्वारेतिवाच्यं तस्योणादिसूत्रस्य तेन कथं विप्रस्तावदनपरत्वात् । अत्र च
इति सलवत्वा । तंडतिक्षिपतीत्यर्थकत्वडुड सादिवत् उणादिप्रत्यये शक्तिकल्पने मानाभावात् तस्मुदा
यशक्त्यैव लाघवाच्य अत एव पाणिनिः पंचपादिका विहितानुणादिप्रत्ययानुणाद्यो बहुलमित्येकेनैव स

त्रेण चेद्विहितत्वान्वयत्वं च प्रत्यये शक्तिस्तत्र प्रत्येकमेवास्तु यतः तत्तद्धेनुपदस्य गोत्वे न शक्तिः किंतु
तल्लक्षणाभेदे पशुमात्रानुगमकतया शक्त्युपाधेः गोत्ववत्सधानकर्मत्वे तु धेनुपदशक्तेः गोत्वांशे तु न श
क्तिस्तस्य शक्योपस्थितस्य शक्तिग्रहाहितसंस्कारादेवोपस्थितस्य शाब्दबोधविषयत्वसंभवात् न च लाघवा
द्गोत्वे शक्यं धानकर्मत्वे शक्त्युपाधिरस्त्वावास्तु विनिगमनाविरहादिति वाच्यं गोत्वज्ञातेः शक्यत्वे
तुल्यवित्तिवेद्यतया व्यक्तिलाभसंभवे व्यक्तेरशक्यत्वापत्तेः तथा च धानकर्मत्वस्य गोत्वनिष्ठश
क्त्युपाधित्वासंभवे धानकर्मत्वभानेन स्यात्तद्रूपभानादिबोधश्च स्यादितिस्येव विनिगमकतया धान
कर्मत्वरूपोपाधिविशिष्टधर्मिण्येव शक्तेरिति तत्र धानकर्मत्वस्यानुगतत्वेनातिप्रसंगात्तथा च
शक्यतावच्छेदकत्वासंभवादिति। अथ यौगिकरूढस्य योगरूढादवैलक्षण्यं न कथं पाचकत्वेनोक्तिरिति
चेन्न योगरूढस्य पंकजादिपदादेकदेशकस्य धर्मिणो योगरूढिभ्यां बोधः यौगिकरूढस्य तु उद्भिदा
दिपदात् कदाचिद्योगस्य मात्रतरुगुल्मादीनां बोधः कदाचिच्चोद्भिदाख्ययागे तस्य तत्र रूढिशक्त्या यागविशेषस्य

बोधइतिवैलक्षण्यस्यस्फुटत्वात्एवमन्यात्राप्युक्तंशक्तिश्चेश्वरसंकेतः सचास्माच्छब्दादयमर्थोबो
ध्यइत्याकारकेश्वरेच्छारूपः तद्विषयत्वरूपोवाएतदाशयेनैवाशक्तिःपदार्थांतरमितियुक्तिर्नव्यानोविषय
त्वस्यपदार्थांतरत्वात्विवेचितंचैदतस्माभिर्भवानेदोषकारो। नचैवंवाच्यवाचकव्यवस्थानुपपत्तिस्त
स्यास्सर्वत्राविशेषादितिवाच्यंबोध्यत्वेनबोधनिष्ठजन्यतानिरूपकत्वेनचविषयतायायपाकमेवा
च्यवाचकव्यवस्थासंपादकत्वसंभवात्। नचेश्वरस्यानादिकमादायविनिगमनाविरहइतिवाच्यं।
इच्छात्वस्याविचक्षणेनशस्यापिशक्तित्वस्येष्टत्वात्। आधुनिकसंकेतस्येच्छात्वदर्शनेनइच्छायाएवत
थात्वसंभवाच्च अपभ्रंशः बाधतिग्रामगामइत्याद्यसाधुशब्दोच्छाब्दबोधकारणायसाधुत्वसानंशा
ब्दबोधजनकंतद्विषयसाधुत्वमपिनिरूढशक्तिमत्वमेवतथाहिसाधुत्वेनप्रतिपादकत्वेअसाधो
रपिप्रतिपादकत्वात्। नाप्यनादित्वंहेरयोहलयइतिवदंतोऽसुराःपरावभूवुरितिवेदेश्रवणेनाना
दितयालिशब्दस्यसाधुत्वापत्तेः लौकिकगौणलाक्षणिकयोराधुनिकसंकेतितानांचासाधुत्वापत्तेःना

पि साधुत्वं जातिर्व्याकरणाध्येतृपुरुषप्रयोक्तृत्वादिति तासां कर्मान्तरादपि पुण्यजनकशब्दत्वे परोपकार
हेतावसाधावतिप्रसंगात्। अपकारहेतौ संस्कृतेऽप्रसंगाच्च। तस्माच्छक्तिमत्वमेव साधुत्वं। एवं
सत्यपभ्रंशस्यापि साधुत्वापत्तिः तस्मान्नियमेनार्थप्रतीत्या व्यवहाराधीनव्युत्पत्तिसंभवेन तच्छ
क्तिसंभवात्। न चापभ्रंशे नस्मादितात् साधुशब्दात् तदर्थप्रतीतिरिति वाच्यं। पामराणां साधुश
ब्दप्रतिसंधानेपि ततोऽर्थप्रत्ययात् तदर्थकसंस्कृतेनाप्रत्ययाच्च। न च तत्र शक्तिभ्रमाद्बोध इति वाच्यं।
बाधकं विना भ्रमत्वासंभवात्। अन्यथापभ्रंशे साधुशक्तिः साधुशब्द एव तत्तदारोपस्यैव किं न स्यात्।
न चैतस्य साधुत्वे यज्ञे प्रयोगापत्तिरिति वाच्यं। नापभ्रंशितवै न म्लेछितवै इत्यनेन प्रत्येतनिषेधाद
वत्तदनापत्तेः। युज्यते चैतत्। अन्यथा साधुभिर्भाषितव्यमिति विधेरेवापभ्रंशस्याप्रयोगसंभवेना
पभ्रंशितवै इति निषेधस्य व्यर्थतापत्तेः। न चापभ्रंशस्य कोशादावव्युत्पादनाच्चेत्येवमिति वाच्यं कोषादौ
धर्मविशेषजनकशब्दानामेव व्युत्पादनादिति तदसत्। अपभ्रंशस्य शक्तिमत्वांगीकारे अर्थवदधातु

रीत्या दिसूत्रेण प्रातिपदिकसंज्ञापत्तौ तदुत्तरं ङ्याप्प्रातिपदिकादिति सूत्रेण विभक्त्यापत्त्या तस्य शक्ति
मत्वानंगीकारात् । न चैवं तस्य साधुत्वाभावादेव पदत्वप्रयोगासंभवेनापभ्रंशितत्वे इति निषेधवैयर्थ्या
पत्तिर्दुर्वारेति वाच्यं । अयत्नितयोपभाषा इति वत्तस्य विधिप्राप्तानुवादत्वेनादोषात् न चैवमपभ्रंशा
त् शाब्दबोधानुपपत्तिस्साधुत्वज्ञानाभावादिति वाच्यं । वक्ष्यमाणरीत्या स्मृत्युपन्नानां साधुशब्द
स्मरणेनास्मृत्युपन्नानां च शक्तिभ्रमेण तत्संभवात् । न च गवादिशब्दघटितायाः शक्तेः कथमपभ्रंशे
भ्रमसंभव इति वाच्यं । वक्ष्यमाणरीत्या तत्संभवात् [illegible] तथा हि केनचिज्ज्ञो शब्दप्रयोक्तुव्यप्रमा
दाज्ज्ञो गौशब्दे प्रयुक्ते व्युत्पन्नस्तेन शब्देन गोशब्दमनुनीय ततो गोप्रतीत्यश्यमवहृतवान् समीपस्थो
स्मृतिहस्तस्थ गावीशब्दादेवायं गोप्रतीतवानिति स्वगत्या गावीशब्दमेव गोशक्तत्वेन प्रतीत्य सु
लोदयतीति यत्तु एवमपि भ्रमानुपपत्तिस्थता हि तत्तत्पदपदार्थघटितेश्वरेच्छायाग वादिपदव
त्तितया गावीशब्दस्य बोध्यत्वप्रकारतावच्छिन्नेच्छानशक्तिः किंतु गोशब्दस्य तत्वेन ग्रहस्य भ्रमस्व

गावीशब्दात्सकापभ्रंशो न संभवति विभिन्नानुपूर्वीकस्वरूपविशेषदर्शनसत्वात्साधारणध
र्मदर्शनाभावाच्च न गावीशब्दघटितेच्छायामीश्वरीयत्वभ्रम एव शक्तिभ्रम इति वाच्यं ईश्वरस
ज्ञानतामपि शाब्दबोधादिति वैयाकरणादिभिरुक्ते तदसत्। मीमांसकनैयायिकादिसाधार
णस्य शक्तित्वस्यैक्याभावेन शक्तित्वेन शक्तिज्ञानस्य हेतुत्वासंभवेनानुभवजनकतावच्छेद
कधर्मत्वेन तज्ज्ञानस्य हेतुतयाताद्दशधर्मवादितिभ्रमस्य संभवात् किंच गोगोपदशक्ये
त्यादिशक्तिप्रकारकंज्ञानं न हेतुः किंतु शक्तिसंबंधेन गोपदादिप्रकारकं गोपदवती गोरित्याद्या
कारकंतल्लाघवात् एवं च व्यधिकरणसंयोगादिसंबंधेन घटादौ रूपस्य वगादिपदघटितशाब्दः प्र
सिध्यातेनसंबंधेन गोत्वादिपदप्रकारको गावीपदवती गौरित्याद्याकारकभ्रमसत्वपपदएवंयद्वा
गवादिविशेष्यकशक्तिसंबंधेन गवादिपदप्रकारकशक्तिज्ञानंन हेतुस्तथासति गोरवापत्तेः किं
तु लाघवाद्गोपदादिविशेष्यकशक्तिसंबंधेन गवादिप्रकारकज्ञानमेव हेतुः तथाहि गोपदत्वेना

मगकाराव्यवहितोत्तरत्वे तत्राव्यवहितोत्तरत्वांशे संशयात्मकज्ञानवारणाय तदंशे गकाराव्यवहितोत्त
रत्वत्वावच्छिन्नाभावप्रकारकत्वे सति गकाराव्यवहितोत्तरत्वत्वावच्छिन्नप्रकारत्वरूपं निश्चयत्वं निवे
शनीयं गवादिविशेष्यकपदप्रकारकज्ञानहेतुतामते गवादिपदविशेष्यकगवादिप्रकारकज्ञान
हेतुतामते च गवादिपदत्वरूपधर्मितावच्छेदकांशे संशयाभावेन तदंशे निश्चयत्वानिवेशनेलाघ
वं न चैवं तन्मतेऽपि गवादिप्रकारांशे निश्चयत्वनिवेशसाफल्यमिति वाच्यं तस्यानोपस्य गवादिपद
रूपप्रकारांशे निश्चयत्वनिवेशस्य तन्मतेऽपि सत्त्वात्। अव्यवहितोत्तरत्वांशे निश्चयत्वनिवेशस्य
पुनराधिक्यात्। इत्थं च गवाद्यादियदं गवादिपदघटितशक्तिसंबंधेन गवादिमदिति भ्रमस्य पपन्नए
वेऽपि सारं। न च तत्र तस्या ईश्वरेच्छारूपशक्तेस्तत्त्वेन न शाब्दबोधप्रयोगित्वे ईश्वरमविदुषां शाब्दबोधाना
पत्तेः किंतु संकेतत्वेनैव एवं चापभ्रंशाद्यसंविनैव शाब्दबोधस्योपपादस्तत्राधुनिकसंकेतस्य सत्त्वात्
नन्वेवमपभ्रंशस्याप्युक्तरीत्या शाब्दबोधजनकत्वेन सन्मात्रविषयकेश्वरेच्छाविषयत्वस्य तत्र सत्त्वात्तस्य शक्ति

मत्वेड्डुवीरं अन्यथा भगवाञ्छादिपाः सन्मात्रविषयेनत्वोच्छेदापत्तेः एवं लाक्षणिकगंगादिपदस्याप्युक्त
रीत्या तीरादिशक्तत्वं डुवीरमिति चेन्न तत्तदर्थजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्य
तासंबंधेनेश्वरेच्छावत्वस्येश्वरेच्छानिरूपिततादृशविशेष्यतावत्वस्य वा तत्तत्पदशक्यस्वरूपतया तस्य
सत्त्वे तन्निरूपितत्वस्यैव प्रवाहादावेव च स्वीकारेणापभ्रंशादेरशक्तत्वस्य कारयितुंशक्यत्वात्तत्रान चेवि
निगमकाभावात् नापि तत्स्वीकारोस्तीति वाच्यं तत्र शक्तिभ्रमादिपाल्लक्षणया वा निर्वाहे पदापत्स्य
तेनुरोधेन कल्प्यमानसंबंधतात्कल्पनिरुक्तशक्तत्वस्य साधुसंस्कृते एव स्वीकारात् लघुत्वेनत
थैव कल्पनात् अन्यथापभ्रंशस्य साधुनायत्नोपस्थितप्रयोगायत्तः एतेनेश्वरेच्छाया एकत्वेन सर्ववि
षयकत्वेन च शब्दापभ्रंशव्यवस्थानुपपत्तिरित्यपि समाहितं उक्तवत्त्वेन निरुक्ततत्तत्पदशक्यत्वस्य
तत्तत्पदार्थ एवांगीकारात् यत्तु प्रसिद्ध्यादिकं सर्वदेशीयशिष्टपरिगृहीतत्वादिकं च विनिगमकं
मिति तदसत् प्रसिद्धत्वं नियतत्वात् लाक्षणिके सर्वदेशीयशिष्टपरिगृहीतत्वस्य सत्वाच्च तत्तद्देशनिय
संबंध

तत्संस्कृतेषु सर्वदेशीयशिष्टपरिग्रहीतत्वाभावेन शक्तिसिद्ध्यनापत्तेश्चेति वदंति। न च व्याप्तत्वे व्याकरणस्मृत्या
घटत्वमेव साधुत्वमिति वदंति तेषामयमाशयः साधुत्वेन शक्तिमत्त्वे लाक्षणिकादेरसाधुतापत्तेः। न चैत
स्यापिष्टत्वमिति शक्तिमत्त्वं साधुत्वं संभवति इति वाच्यं। घटादिपदस्य पटादिरूपे साधुतावारणाय तत्तदर्थक
त्वस्य तत्तदर्थे साधुत्वरूपतायामवश्यवाच्यत्वात्। केवलयोः प्रकृतिप्रत्यययोः साधुतापत्तेश्च प्रकृ
तिप्रत्ययसमुदाये समासादौ च शक्त्यभावेन तस्यासाधुत्वापत्तेश्च। न चैतत्स्यापत्ये च घटकशक्तिमा
दाय साधुत्वमुपपादनीयमिति वाच्यं। तथा सति बाधतिग्राममगाम इत्यादेरपि साधुत्वापत्तेः। एतेन
वृत्तिमत्त्वमेव साधुत्वमित्यपि परास्तं। तस्माद्व्याकरणस्मृत्या घटत्वमेव साधुत्वं घटशब्दो पटभिन्नेर्थे व्या
करणस्मृत्यादितः तत्र साधुः न चैवं गावीशब्दोपि गोगणपतिं अन्विं तु शीक्रमस्य स्वार्थे साधुः स्यादिति
वाच्यं इष्टत्वात् तस्य गवाघटपटत्वे वा साधुत्वात्। तत्तदर्थे तस्य व्याकरणोव्युत्पाद्यत्वात्। येषामाधुनिकसंके
तितडित्थादिशब्दानां विशिष्य व्याकरणे न स्मृतत्वादने नास्ति तेषामपि उणादयो बहुलमित्यादिनां स्मृतत्वात्

व्या॰कौ॰
१५४

नान्यदोषः एतज्ज्ञाते च न शाब्दबोधे कारणं व्याकरणं स्तु साधुत्वाग्रहेपि शाब्दबोधात् किंतु व्याकरणा
त्तु साधुत्वरूपासाधुत्वनिश्चयःप्रतिबंधकस्तदभावः कारणं अत एवासाधुशब्दे साधुत्वनिश्चये ततो न
शाब्दबोधः न चापभ्रंशात् व्युत्पन्नानां कथं शाब्दबोधः असाधुत्वनिश्चयस्य प्रतिबंधकत्वे तेषां तत्स्यादि
ति वाच्यं तेषां साधुशब्दानुमानेन साधुशब्दस्मरणेन वा शाब्दबोधानेवात् व्युत्पन्नानाम साधुत्वनि
श्चये कथं तस्मात् शाब्दबोधः तेषां साधुशब्दानुमानस्य साधुशब्दस्मरणस्य वाऽसंभवादिति वाच्यं॥
व्युत्पन्नपुरुषीयशाब्दबोध एवासाधुत्वनिश्चयस्य प्रतिबंधकत्वात् तैर्व्युत्पन्नानामसाधुशब्दात्
सामान्यसामग्रीबलात् शाब्दबोधापत्तिर्दुर्वारैवेति वाच्यं अव्युत्पन्नपुरुषीयशाब्दबोधे व्युत्पत्त्यभाव
स्यापि हेतुत्वात् सामान्यसामग्र्याः फलजनने साधुत्वनिश्चयाभावव्युत्पत्त्यभावान्यतरस्य सहकारित्वो
पगमे न तत्रापत्त्यसंभवात् परं तु व्युत्पन्नानां साधुशब्दानुमानेन साधुशब्दस्मरणेन वा शाब्दबोधोपपाद
नेन सम्यक् अनुमानस्य व्याप्तिग्रहविलंबेन स्मरस्य चोद्बोधकविलंबेनानिपन्नत्वात् अनुमानस्मरणे वि १५४

नापि स्मृतस्यानां बोधानुभवाच्च भवदुक्तसंस्कृतेरपभ्रंशेन बुद्धः क्लिं ले तदुक्तभाषयेति न्युपलभ्य वहा
राच्चेति तदसत् फलवत्वेनानुमानस्य स्मरणस्य वासामर्थ्यानियमेन कल्पनात् उक्तबोधानुभवे मा
नाभावाच्च कारणं विना कार्यानुभवस्य काप्यसिद्धेः भवदुक्ते सादिव्यवहारोप्यसिद्धः प्रत्युत भव
दुक्तसंस्कृतादेः तदुक्तभाषात्वायमर्थो विगलं गवादिशब्दवत्व्यगाव्यादिशब्दोन तोक्तेरसादिव्य
वहारस्यैव सर्वसिद्धत्वात् अतएव वाक्यपदीये हरिणाप्युक्तं ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः न शिष्टैरनुमन्यन्ते पर्यायेव साधवः न यतः स्मृति
शास्त्रेण तस्मात्साक्षादवाचकाः अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते अव्यक्तं तद्विदां तत्र व्य
क्तेन भवति निर्णयः एवं साधौ प्रयोक्तव्ये योपभ्रंशः प्रयुज्यते तेन साधुव्यवहितः कश्चिदर्थोभिधीयत
इति अत्र योक्तं हरिग्रंथे नापभ्रंशस्य तत्साधुशब्दानुमानेन साधुशब्दस्मरणेन वा शाब्दबोधोपपादना
तेदसंगतापत्तेः न च व्याकरणव्युत्पादनेन साधुत्वे व्याकरणस्यासाधुशब्देषु तादृक् तेरूपतयाप्योप्या

श्रयादिति वाच्यं। पाणिन्यादिसंकेतसंबंधेन व्याकरणपदवत्त्वस्यैव व्याकरणत्वकल्पत्वात् न चैवमु
त्पन्नानां शास्त्रकारसंकेतितत्वलक्षतादिपदाद्यादिषु संकेतितत्वाद्वा दिशब्दस्यानेकेषु तत्तदर्थप्रत्ययः
तेषां तत्तदर्थे साधुत्वनिश्चयादिति वाच्यं। तत्सत्त्वेपि धर्मतावच्छेदककोटौ तत्तदर्थशक्तिप्रयोज्यत्वस्या
पि निवेशात् तन्नैवमपि तेषां यत्र प्रयोगो न स्यादसाधुत्वादिति वाच्यं। इष्टापत्तेः। न च लाक्षणिकानां
तत्तदर्थे व्युत्पादनविरहेण तदर्थे तेषामसाधुत्वापत्तिरिति वाच्यं। नेदस्य(?) लाक्षणिकानां निरूढलाक्ष
णिकानां च तत्तदर्थे व्युत्पादसत्त्वात्तत्र साधुत्वेन(?) लाक्षणिकानामसाधुत्वे चेष्टापत्तेरिति दिक्। वैय्या
करणास्तु शाब्दबोधेन साधुत्वे ज्ञानं कारणं न वा। साधुत्वनिश्चयः प्रतिबंधकः। न चैवमसाधुशब्दाद
दृष्टौ स्यादेः शाब्दबोधापत्तिरिति वाच्यं। इष्टत्वात्। न चैवं च्युतसंस्कृतेर्दोषत्वानुपपत्तिः तद्वीजस्य शाब्द
बोधासंभवस्याभवन्मतेऽभावादिति वाच्यं। साधुशब्दे प्राप्तरूपे(?) असाधुशब्दः किमिति प्रयुक्तः स्यादनु
संधानेन संहृदयो[illegible]गस्यैव तद्वीजत्वात्। न चैवं साधुत्वस्य कोपयोगः तज्ज्ञानेन शाब्दबोधहेतुतापास्तदभा

वन्निष्ठत्वेपवाशाब्दबोधप्रतीतेर्वैधकतापामवद्भिरनंगीकारादितिवाच्यं। एकःशब्दःसम्यग्ज्ञातःसुप्रयु
क्तःस्वर्गेलोकेकामधुग्भवतिसाधुनैवप्रयुंजीतेत्यादिबोधितपुरापजननेपयोगात् साधुत्वेच
व्याकरणव्यंग्यःशब्दनिष्ठःपुण्यजनकतावच्छेदकोजातिविशेषः नचकेत्वादिनासंकरान्नैवमितिवा
च्यं दूषकताबीजाभावेनसांकर्यस्यादोषत्वात्। एवंचासाधुशब्दस्यगावीबाधस्यादेर्भाषापात्रंशस्यबो
बोधजनकत्वेनतेषामपिशक्त्यैवबोधकत्वेबोधकत्वस्यैवशक्तित्वात्। पुण्यत्वेचैतत्। मीमांसकैर्न
याप्यपिकादीनांशक्तित्वस्यैवाभावेनबोधजनकत्वावच्छेदकधर्मत्वेनज्ञानस्यहेतुत्वंवाच्यं। तथाच
बोधजनकत्वज्ञानस्यैवलाघवेनशाब्दबोधहेतुत्वमुचितंकिंचेश्वरेच्छारूपसंकेतस्यशक्तित्वमतेत
स्याजस्याच्छब्दादपभ्रंशबोधव्यवहारस्याकारकत्वस्यैवव्यंग्यंशाब्दएतदर्थबोधकत्वस्याकारकस्यापिविनि
गमनाविरहेणसुवचत्तथाबोधजनकत्वप्रकारकेच्छायाःशक्तित्वापेक्षयाबोधजनकत्वस्यशक्तित्वेला
घवंस्पष्टमेवाअपभ्रंशादिनिष्ठकर्मताघटनयबोधेगवादिवृत्तमपाज्ञातपदसमभिव्याहृतविभक्ति

जन्यकर्मत्वाद्युपस्थितेर्हेतुत्वात्तां विनापभ्रंशात्कथं शाब्दबोधः नच नामार्थातिरिक्तजन्यकर्मत्वाद्युप
स्थितिरेव कारणं नामत्वे च सुवंतत्वे तत्तद्देश्यापभ्रंशेऽपीति वाच्यं एवं सति निराकांक्षापभ्रंशादपि शा
ब्दबोधप्रसंगादिति चेन्न गवादिवत्तत्तद्याशक्तपदसमभिव्याहृतकर्मत्वोपस्थापकपदज्ञानविशिष्ट
कर्मत्वाद्युपस्थितेरेव शाब्दबोधजनकत्वात् तादृशपदज्ञानजन्यकर्मत्वाद्युपस्थितिसत्वे शाब्दबोध
स्तेन जन्यतासंसर्गेण वैशिष्ट्यं वाच्यं तेन नातिप्रसंगः संबंधाननुगमस्यादोषत्वात् अत एवोदत्तेन
पल्लोभुज्यत इत्यादौ जानामि सीत्ताजनकप्रसूतेत्यादौ च तन्निर्वाहः नच बोधकत्वस्य शक्तित्वे गंगा
दिपदे तीरादिबोधकताया अपि सत्वेन शक्तेर्वोपपत्तौ लक्षणोच्छेद इति वाच्यं तत्र गंगादिपद
निष्ठायास्तीरादिबोधकत्वप्रकारकेच्छाया इव मम गंगादिपदनिष्ठस्य तीरादिबोधकत्वस्यापि शक्ति
त्वाभावात् गंगापदादिनिष्ठतीरादिबोधकत्वमेव लक्षणा कोपादिति सिद्धसंबंधतापन्नबोधकत्वस्यैव शा
क्तित्वमिति व्यवस्थायाः संभवात् स्वयं द्वाशक्तिलक्षणयोर्भेदः एवं परं त्वप्रसिद्धशाकसंबंधितेन गृहीता

र्थे विषयकबोधजनकत्वं लक्षणात्वेन व्यवह्रियते प्रसिद्धार्थविषयकबोधजनकत्वं च तत्त्वेतिवेनव्य
वह्रियते प्रसिद्धत्वं च प्रचुरप्रयोगविषयत्वं शक्त्यादिनियामकं तदा प्रसिद्धादेस्तत्वाप्यावश्यकत्वात् तान
चापभ्रंशस्यार्थबोधप्रातिपदिकत्वे सुवुत्पत्तौ व्याकरणस्यासाधुत्वासाधुत्वप्रसंग इति वाच्यं अनभिधा
नादेवानभिधानात् भाषाशब्देभ्यः सुबुत्पत्तौ भाषात्वस्यैव भंगापत्तेश्च तस्माद्बोधकत्वस्यैव शक्तित्वेनिष्ट
त्वं हि मिसाकुत्स्नदसत् । असाधुशब्दस्यस्वरूपायोग्यत्वयात् तस्मात् शाब्दबोधस्यानुभवविरुद्धत्वात् अ
न्यथा साधुशब्दस्यैव निराकांक्षघटः कर्मत्वमित्यादेरपि शाब्दबोधजनकत्वस्य सुवचत्वापात्तौ स्यादिशा
नस्यापि शाब्दबोधहेतुता विरुद्ध्यापत्तेः असाधुत्वे जातिरित्यप्युक्तेरहानुमानपरिच्छेदे भवानेदोषप्रका
शेवास्माभिः संकरदूषकतोयाव्यवस्थापत्तेन कत्वादिना संकरस्य दोषत्वात् । बोधकत्वे शक्तिरित्यप्यस
मंजसे । सामान्यतो बोधकत्वस्य तत्त्वेय यादिपदेऽपि पदादिशक्त्यापत्तेः तत्सदति छत्ते तदर्थबोधजनक
त्वमेव तत्तत्पदे तत्तदर्थशक्तत्वमिति स एव वाच्यं । तथा चाधुनिकसंकेतितचैत्रादिपदे शाब्दबोधाभावे तत्तरप

बोधजनकत्वाग्रहेण तं विनापि तत्प्रकारकसंकेतज्ञानमात्रात् शाब्दबोधोदयेन बोधजनकत्वज्ञान
स्य हेतुत्वासंभवात्। न च तत्तणारणिन्यायेन बोधकत्वज्ञानसंकेतज्ञानयोर्वैकल्पिककारणत्वाभ्युपग
मान्न दोष इति वाच्यं संकेतज्ञानस्य हेतुतावश्यकत्वे सर्वत्र तद्धेतुत्वेनैव निर्वाहे बोधकत्वज्ञानसंकेत
ज्ञानज्ञानयोर्वैकल्पिककारणतांगीकारगौरवापत्तेः न च संकेतज्ञाने बोधकत्वमनुमायाधुनिकसं
केतितचैत्रादिपदेबोधकत्वज्ञानादेव शाब्दबोधसंभवेन सर्वत्र बोधकत्वज्ञानस्यैव हेतुत्वोपगमान्न
गौरवमिति वाच्यं। व्याप्त्यादिप्रतिसंधानाभावेपि शाब्दबोधात् फलोपधायकस्वरूपबोधकत्वज्ञानस्य
हेतुत्वे शाब्दबोधात्पूर्वं तदसंभवात् गौरवात्। तस्य कादाचित्कत्वेन शक्तौ शब्दार्थयोर्निरुक्तसंबंधत्वानुप
पत्तेश्च। न च स्वरूपयोग्यतारूपबोधकत्वज्ञानस्यैव हेतुत्वोपगमान्न दोष इति वाच्यं स्वरूपयोग्यतायाः
जनकतावच्छेदकरूपतया बोधकत्वस्य तत्त्वे आत्माश्रयापत्त्या संकेतस्यैव तत्त्वे वाच्यमिति सर्वत्र संकेत
ज्ञानस्यैव जनकत्वप्राप्त्या अस्मदभिमतसिद्धेः लक्षणापि दुर्वारत्वात्। अजनकत्वमिति रिक्तं पदार्थोत्तरमेव

नेतु जनकतावच्छेदकरूपं तच्च जनकतावच्छेदकरूपग्रहं विनाप्यनुमानादिनानुग्रहं प्रत्यक्षेण जनकता
ग्रहे एवं जनकतावच्छेदकरूपप्रत्यापेक्षणादिति बोधजनकत्वज्ञानमेव सर्वत्र कारणमस्तु लाघवात्तथ
पभ्रंशादिसाधारण्येनाधुनिकसंकेतितसादिपदेपि संकेतज्ञानाद्बोधकत्वमनुमेयेत वा नादिपदे तद
र्थबोधकत्वज्ञानात्तु संकेतवदिति चेन्मैवं तत्र हि तज्जनकत्वेनानाव्यक्तिगर्भत्वाद्गुरुः संकेतस्तु एकैवाल्लघु
रिति स एव पदपदार्थयोः संबंधः किं च तद्धि जनकतार्थमेव संबंधापेक्षितं तदेव संबंधज्ञानसाध्यपात्
अत एव प्रसाप्यप्रस्वपात्त्वाजनकत्वसंबंधज्ञानं सहकारीति प्रत्यायकत्वोपपादकतया वाच्यत्वोपयोग
इत्युक्तं महार्णवेपि न च तद्धि जनकत्वेन ज्ञातत्वे संबंधरतिमात्मसाध्यपरतिवाच्यं तज्ज्ञानस्य स्मृतावनुप
योगात् संबंधित्वावच्छेदकज्ञानस्यैव तत्पात्वात् प्राक्सत्तानियमाच्च एतेन शक्तत्वसमानाधिकरणतत्त
ज्जनकतान्यतमसंबंधेन बोधस्यैव शक्तित्वमिति ममाप्यकस्यैव लघोः संबंधत्वमिति नवीनवैयाकरणे
मपि परास्तं किं च तद्धि जनकत्वज्ञानमात्रस्य हेतुत्वे पदमात्रे स्मृतास्मकाकाराधीजनकमितिज्ञानादाव

शशाब्दबोधप्रसंगः न च तत्तच्छाब्दबोधजनकत्वज्ञानं कारणमिति नोक्तदोष इति वाच्यं तत्तद्घटवद्वि
ष्याकारकघटशाब्दबोधजनकस्य ज्ञाने तु भ्रमतत्त्वादिपदेऽपि सत्त्वेनातिप्रसंगात्तदवस्थ्यात्। अपि च घटप
दात् शक्तिभ्रमेण पटशाब्दबोधे पटशक्तत्वाभावविशिष्टपदस्यामपि पटशाब्दबोधजनकत्वज्ञानात्
शाब्दधीप्रसंगः एवं घटपदं पटे आधुनिकसंकेतितं न तु शक्तमिति ज्ञानेऽपि न शाब्दधीरिति ईश्वर
संकेतज्ञातमेव कारणमिति सिद्धम्। एवमनभिधानोदेवानभिधानमित्यप्यसत्। तस्य दुर्वचत्वात्।
तस्य पूर्वप्रयोगाभावादेवाप्रयोग इत्यत्र पर्यवसाने न पूर्वप्रयोगाभाव एव किं बीजमिति प्रश्ने उत्त
राभावाच्चागत्येतराभावास्य च एव तदङ्गीकारात्। अन्यथा संकेतस्युत्पत्तिनामुच्छेद एव स्यात्। किंच
दुनाव्याकरणस्यैवानैरर्थक्यप्रसंगः पूर्वं पूर्वाप्रयोगे नैवोपपत्तेः भाषात्वभंगापत्तिरपि पतिभंगप्रवृत्त
स्य त्यादीन्यायमनुसरतीति न किं दत्तस्य अतएव अपभ्रंशोऽपशब्दः स्यात् शास्त्रे शब्दस्तु वाचकोऽरति अ
मरकोशानुशासनमपि स्वरसत एव संगच्छते बोधकत्वस्य शक्तित्वे तदसंगतेरिति दिक्। शक्तिग्रहश्चाय

वहारात्व्याकरणादितश्चतदुक्तं शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्वि
वृत्तेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धा इति। तत्र व्याकरणात् शक्तिग्रहो यथा कर्त्तरि शबित्यादिव्याकरणा
द्भ्वादीनां कर्त्तृबोधो। नन्वेवं लः कर्मणि च भावे चाकर्मकेभ्य इति सूत्रे कर्त्तरि कृदिति सूत्रस्थस्य कर्त्तरीत्यस्यानुवृ
त्या कर्त्तरि लकारविधानेनाख्यातस्यापि कर्त्तरि शक्तिः स्यात् तथा चाख्यातस्य कृतौ शक्तिरिति नैय्यायिकसिद्धां
तो दत्तजलांजलिः स्यादिति चेन्न असति बाधके एवं व्याकरणस्य शक्तिग्राहकत्वोपगमेन कर्त्तरि शक्त्या वने
तच्छक्तौ नाशकतावच्छेदकत्वकल्पने रूपगौरवात्मकबाधकसत्त्वेन कृतित्वरूपजात्यवच्छिन्ने शक्तिकल्पने
लाघवेनाख्यातस्य कृतावेव शक्तिस्वीकारात्। न चैवं सुत्कलाघवेन कृतोपि कृतिः शक्यास्यात्। न तु कर्त्ता
रीकर इति वाच्यं। चैत्रः पक्तेत्यादौ पाकानुकूलकृतेर्नामार्थत्वे न चैत्रेन नामार्थभेदेनान्वयासंभवेनाभेदान्व
यस्य बाधादसंभवेनानापत्त्या कर्त्तरि शक्तिस्वीकारात्। न च कर्त्तृकरणयोरिति सूत्रेणानभिहिते कर्त्तरि तृ
तीया विधानेन तदुक्तं पचति चैत्र इत्यादौ तृतीयापत्त्याख्यातस्य कर्त्तर्येव शक्तियुक्तेति वाच्यं। सूत्रस्यानभिधान
तिङ्कृत्तद्धितसमासान्यतमैः कर्त्तृसंख्या करणसंख्या च यत्र नाभिहिता तत्र कर्त्तृत्वरूपार्थे करण
त्वरूपार्थे च तृतीया जायते इति सूत्रार्थः

स्यैव तत्तीयानियामकत्वोपगमेनोक्तापत्त्यभावात् । न चैवं चैत्रेण पच्यते तंडुल इत्यादावपि तत्तीयानुप
पत्तिस्तत्राप्याख्यातेन हूत्यभिधानादिति वाच्यं । कर्माख्यातस्य कर्मत्वाभिधायकत्वेन हूत्यनभिधायक
त्वात् । न चैवं चैत्रेण गतं इत्यादिहूदेतस्य छेपि तत्तीया[illegible]नुपपत्तिस्तत्राप्याख्यातेन हूत्यभिधानादिति वा
च्यं (कर्माख्यातस्य कर्मत्वाभिधाय) विशेषणतया विशेष्यतया वा हूत्यनभिधानस्यैव तत्तीयानि
यामकतया हूतौ विशेष्यतया हूत्यनभिधानेपि विशेषणतया तदभिधानेनोक्तोपपत्त्यभावात् । एवं च वि
शेषणतया विशेष्यतया वा कर्मत्वानभिधाने द्वितीया नियामकं । एतेन कर्मानभिधानस्य द्वितीयानिया
मकत्वे चैत्रेण पच्यते तंडुल इत्यत्र तंडुलपदोत्तरं द्वितीयापत्तिः । कर्माख्यातस्य कर्मत्वाभिधायकतया
कर्मानभिधायकत्वेपि कर्मत्वानभिधानस्य द्वितीयानियामकत्वे चैत्रेण गतो ग्राम इत्यत्र ग्रामपदोत्तरं
द्वितीयापत्तिः हूतः कर्माभिधायकत्वेन कर्मत्वानभिधायकर्मादिसाधारणा[illegible] निरस्ता कर्माख्यातस्य विशे
ष्यतया कर्मत्वाभिधायकतया हूतस्य विशेषणतया कर्मत्वाभिधायकतयोभयत्रापि द्वितीयाभावोपपत्तेः

प॰ ३

= किंचित्कर्मकृताच्चितस्वार्थबोधकतात्पर्यं यत्र नास्ति तत्र अकर्मकधातुग्रहणं यत्कार्यं तत्सकर्मकधातूत्तरम
= पि जायते प्रकृते पूर्वं तथा तात्पर्याभावादेवाकर्मकधातुग्रहणप्रसङ्गः = ४

नन्वेवमपि कृतपूर्वी कटमित्यत्र कृतप्रत्ययेन कर्माभिधानात् कटमिति द्वितीयानुपपत्तिः अन्यथा कटः कृतपूर्
वेत्यत्रापि द्वितीयापत्तेः अत्र हि कृतः पूर्वं कृतोऽनेनेति कृतपूर्वीति वदन्तः सपूर्वाच्चेति सूत्रेण सोपपदात्
पूर्वशब्दात् कर्तर्यर्थे इनिप्रत्यये कृतपूर्वीति सिद्धं यत्तु कृतं पूर्वमनेनेति कृतपूर्वी सूत्रकृतमिति भावक्तो
तमविवक्षितकर्मकमेव पूर्वशब्देन समासे समासाद्यकर्तरि तद्धिते जनयित्वा कृतपूर्वीति साधं सा
धयंति स च प्राक्कालिककरणकर्तेति बोधसमर्थो वर्तिष्ठते पश्चात् भावक्तोत्तरस्यार्थे च कट ■ कर्मक
त्वान्वयरतिशाब्दिकैः स्वीकृतं तदसत् कर्मयोगे निष्ठाप्रत्ययानुपपत्तेः कृतस्य यस्य भावार्थकत्वे कृतोऽवि
वक्षितकर्मतया पश्चादपि कर्मान्वयानुपपत्तेश्च अन्यथा भावप्रत्ययोत्तगम्यार्थे ग्रामकर्मकत्वस्यान्व
यसंभवे तैनैगतं स्यते वा ग्राममभि लिप्रयोगापत्तेः अत एव पूर्वेत्र शब्दः कर्मविशेषरूपकटान्वय
मप्रतीपद्यमान एव कर्मसामान्यवाचकक्तप्रत्ययोत्ततपाण्युपस्थित्तिः पूर्वपदेन संस्यते पश्चात्क
टं कृतवानितिवत् कटं कृतपूर्वीत्यत्रापि द्वितीयोत्तस्य कर्मार्थं च पः क्तप्रत्ययेन तस्यानभिधानाद्द्वितीं

चैत्रे

म

गरु

योपपत्तिरिति नव्यशाब्दिकमतमपि परास्तं तथात्व सुन्दरी सा चैत्रेण पच्यते तण्डुल इत्यादावपि द्वि
तीयापत्तेर्दुर्वारत्वात् न च प्रयोगानुरोधेनैव विवक्षायाः सत्वान्न दोष इति वाच्यं प्रयोगानुरोधस्य
प्रयोगान्यथानुपपत्तिरूपत्वात् तदन्यथोपपत्तेर्वक्ष्यमाणत्वात् तदन्यथानुपपत्त्यभावात् यद र
पि कारकाणां प्रत्ययार्थभावनायामेवान्वयः न तु धात्वर्थे गुणानां च परार्थत्वादसंबंधः समानत्वास्या
द्विति न्यायात् तत्र तत्प्र[illegible]स्पत्र च भावनान्वितार्थः स च हेत्तिरेव तस्यामेव द्वितीयापाठक्रमेणान्वयः कृ ग ५
त्तिवाचकतद्धितेन कर्मकारकस्यानुक्तत्वाद्द्वितीयोपपत्तिरिति मीमांसकैरुक्तं तदप्यसत् क्रि
याभेदस्यैव कर्मभेदनियामकतया पदभेदेन तदभावे हते [illegible]न्यथापि कृतप्रत्ययेन तद्धितार्थभा
वनाकर्मणत्वाभिधानेन द्वितीयानुपपत्तितादवस्थ्यात् न हि तद्धितार्थस्य हे[illegible] [illegible]हेतिरूपस्य
भेदः तथा सत्यतेन हृतमित्यत्र कर्तृत्वान्वयानुपपत्तेः किंच तद्धितार्थभावनायां कारकान्वयस्वी
कारे हृतहरवीत्यादावपि हरवीयत्रापि कर्मान्वयप्रसंगः एवं दिनिरिति सत्रेणापि कर्तृ यत्र रने विधानात्

= कर्मत्वकर्मतावैतदन्यतरावच्छिन्नविषयतानिरूपितस्वरूप[illegible]तादात्म्यैतदन्यतरसंबन्धविषयतानिरूपि =

२ नु = तत्वपर्याप्त्यधिकरणावच्छिन्नविषयतानुगाही बोधोऽनन्यते आख्यातादिना तत्र तं [illegible] धर्मावच्छिन्नवाच =
कपदोत्तरं द्वितीया जायते इति कर्मत्वाद्वितीयेति सूत्रार्थः =

तस्मात् तत्र पूर्वोक्तमिस्त्रे द्वितीयानुपपत्तिरिदं दूरे वेति चेदत्र प्राचो नानुयायिनो नैयायिकाः प्राहुः तत्र
पूर्वोक्तमिस्त्रे [illegible] सम्बन्धेन कर्मणाभिधानेपि कटे कर्मतादात्म्येनपतिपादयितुं शक्यते तत्र कट
पदार्थस्य तादात्म्येनान्वये तत्र स्वसमानविभक्तिकत्वस्याभावात् तस्य विशेषणस्य [illegible] त्वस्य
नुपपत्तेरनुपपत्तेश्च स विशेषपूर्णो भवतीति नैयानुशासनात् तेन कटत्वावच्छेदेन प्रकृततादात्म्या
न्वयबोधस्य कर्मार्थकेनापि तत्पदेनानुपपादनात् कटपदेऽसमभिव्याहारेण द्वितीयायास्तत्त्वा
बोधकाभावः तथा च प्रकृतपूर्वोक्तमिस्त्रे आश्रयत्वनिरूपतद्वितीयार्थः तत्र कृतधात्वर्थस्य प्रपत्त
[illegible]स्यान्वयः तत्रेव तत्प्रत्ययवाच्ये कर्मद्वितीयावाच्यं कर्मत्वं विशेषणतयान्वेति [illegible]स्यानुपविष्ट ए
प्रत्तो धात्वर्थविशेषणस्यार्थबोधकत्वस्य व्युत्पत्तिसिद्धत्वात् अत एव प्राप्तोदको ग्राम इत्यत्रोदक
तादात्म्येन कर्तरि कर्ता च प्राप्तो साऽत्र बहुव्रीहिश्चरमावयवस्य कर्मण्यन्वयेऽपि सुदकर्तृकप्राप्ति
कर्मग्रामीयस्यान्वयबोधं इत्येव प्रकृतपूर्वोक्तमिस्त्रे प्राकाङ्क्षिककटकर्मकसविषयकत्वस्याश्रयो देव
म

३ = आकांक्षाबललभ्यत्वात् =

= शाब्दिकाहङ्कलया ८ =

तेइतिशाब्दबोधस्साकुः। नव्यास्तु हृतस्त्वैकिटमिस्य वृहत्साश्रयरूपः कर्तारुनिरूपतद्धितस्यवार्थः।
इतपदंस्य तद्धितार्थेशक्तिपाहकत्यो पपुरुषेन तु इति कर्मार्थके एवं चरूप्रत्ययेन कर्माभिधानात्
द्वितीयानुपपत्तिः तद्धितार्थस्ते तेः इधीत यहितेभ्यो कृत्सामे दाभावेन तद्धितार्थस्तोकटके मे कर्ता
चेपपिन कारकाणां धात्वर्थीयत्वनियमभंगः कोतेइधातोस्तल्यम्हाहकतयोतद्धितार्थस्तेर्घा
तुप्रयोगोपस्थितिविषयत्वरूपधात्वर्थत्वस्याप्यनापायादिति प्राकुः वस्ततस्त्वाजनभिधानपक्ष
पपियोस्तो चेनाूपाइतेइत्वीसाद्य नद्वितीयानुपपत्तिः शंकापितयाहि। यथाःकृतस्य कर्मत्वाभि
धानस्य द्वितीयानियामकत्वे ओदनः पक्ष्वासुज्यत इत्यादौ इताकर्मत्वानभिधानात् द्वितीयापत्तिः
नचे इदमिष्टापत्तिस्यसामान्यतमाभिहितत्वसामान्याभावस्य द्वितीयानियामकत्वान्नदोषः तत्रैव
ताकर्मत्वानभिधानेप्याख्यातेन तदभिधानादितिवाच्यं। तथासति भोक्तव्यमोदनेपचतीत्यादौद्वि
तीयानुपपत्तेः इताकर्मत्वाभिधानात् तत्र च तत्रै इतामोभनकर्मत्वाभिधानेपि पाककर्मत्वानभिधा

१ = यद्धात्वर्थनिरूपितं तत्प्रातिपदिकार्थविशेष्यकर्मत्वं लिङादिनाभिहितं तद्धात्वर्थान्वयिकर्मबोध = त्वे
१ = तात्पर्ये सति तत्प्रातिपदिकोत्तरं द्वितीया जायते = १   निरूपिततत्प्रातिपदिकार्थ

= तत्तत्प्रातिपदिकार्थनिष्ठप्रकारतानिरूपितकर्मत्वनिष्ठविशेष्यताशालिबोधानुनादिता=
= त्पर्यं यत्र तत्र तत्तत्प्रातिपदिकोत्तरं द्वितीयेति=

नाचेदा एवइति वाच्यं ओदनः पक्व इत्यादावपि तदनभिधानात् द्वितीयापत्तेरपरिहारात् । न च प्रधानक्रिया
निरूपितकर्मत्वानभिधानमेव द्वितीयाया नियामकमिति वाच्यं । तथापि चैत्रेण दृश्यमानो घटो मैत्रः पश्य
तीत्यादौ द्वितीयानुपपत्तेः ज्ञानभेदेन विषयताभेदमानाभावेन चैत्रदर्शनमैत्रदर्शनोभयनिरूपित
विषयत्वरूपकर्मत्वस्य कृताभिधानात् तस्मात् धातुनिरूक्ततत्तदस्यातात्पर्यतमेनानभिधानमेवान
भिधानपदार्थ इति वक्तव्यं अथ यातत्तत्प्रातिपदिकार्थविशेषणतामात्रेण कर्मत्वाद्यविवक्षणमेव तद
नभिधानं मते तत्प्रातिपदिकार्थविशेष्यतया कर्मत्वादिविवक्षायां द्वितीयादेः साधुत्वमिति पर्यवस्यति इ
संचप्रधानीभूततत्तद्धितेन कर्मत्वानभिधानात् कटविशेष्यत्वेन कर्मत्वस्य विवक्षितत्वाच्च न स विशे
षणहस्तशब्दस्य हस्तेनुमयेशानुपपत्तिरपीति सारं एतेन चकर्तृकर्मणोः कृतीति सूत्रे कृद्ग्रहणे न ज्ञाप्यते
हेतरपूर्वोक्तिकटं भिस्यादावभिहितेपि कर्मणि तद्बोधिकाविभक्तिर्भवतीति तेन न द्वितीयानुपपत्तिः तथाहि
उक्तस्थापनानंगीरेस्य चे कृद्ग्रहणं व्यर्थं नहि तिङादियोगे षष्ठीव्याप्त्यर्थं तत नन्त्रो कौ व्यपतिसूत्रेण देश

का

७७१

7

रूपतिङादियोगे षष्ठीनिषेधेन परिशेषादेव कृद्योगे षष्ठीविधिप्राप्तेः नापि कृत्पूर्वी कटमित्यादौ तद्धित
योगे षष्ठीवारणार्थमिति न लोकाव्ययेति सूत्रेण लादेश रूपतिङादियोगे षष्ठीनिषेधेन परिशेषात् कृद्यो
गे षष्ठ्या आवश्यकत्वे नभिहिताधिकारीयत्वेन तत्र कर्मणः कृत्प्रत्ययेनाभिहितत्वात् षष्ठ्या अप्रसक्तत्वेन तद्वार
णार्थं कृद्ग्रहणासंभवात् उक्तज्ञापनांगीकारे तु कृत्ताकर्माभिधानेपि तद्धितयोगे षष्ठ्याः प्रसक्त्या तद्वारणार्थ
र्थं कृद्ग्रहणसार्थकमिति केषांचिद्व्याख्यापितमप्यपास्तं उक्तरीत्या ज्ञापनेन विनैव द्वितीयोपपत्तौ कृद्ग्रहण
५ ने स्य ज्ञापकताकल्प[illegible]मानाभावात् तदुपदर्शितरीत्या कर्मणोनभिधानसत्त्वेनानभिहिताधिकारीय
षष्ठ्याः प्रसक्त्या तद्वारणाय कृद्ग्रहणस्यावश्यकतया वैयर्थ्याभावेन ज्ञापकत्वासंभवाच्च व्यर्थसं[illegible]पपत्ती तू शा
३ न्या [illegible]सार्थक्ये न व्यर्थस्यैव ज्ञापकतया प्रकृते कृद्ग्रहणस्योक्तरीत्या सार्थक्यादित्यलं प्रसंगागतविचारबा
हुल्येन अथाख्यातस्य कृत्तौ शक्तिस्वीकारे संख्यावाचकत्वेन फले चैत्रः पचतीत्यादौ संख्याबोधस्य सुपपा
व संभवात् कर्तरि शक्तौ तु पचतीत्यादौ संख्याबोधानुरोधेन तत्सफलमिति चेन्न लक्षणया कर्तृबोधके

पचतीत्यादौ संख्याबोधानुरोधेन वृत्तिशक्तावपि न साफल्यात्। न च संख्याविशिष्टकर्तृत्वैव लक्षणास्त्विति
वाच्यं। विशिष्टलक्षणाप्रतिसंधानं विनापि तादृशान्वयबोधात्। न च वृत्तिशक्तौ वृत्तिः पचतीति वाक्यपौ
प्यतापत्तिः वृत्तावभेदेन पाकानुकूलवृत्तिप्रकारकशाब्दस्य तद्वाक्यजन्यस्य संभवादिति वाच्यं। आख्या
तार्थवृत्तेर्भेदेनान्वयबोध एव साकांक्षत्वोपगमात्। एवं च चैत्रः पचतीत्यादौ पाकानुकूलवृत्तिमांश्चै
त्र इत्याकारकः प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः। गच्छतीत्यादौ गत्याश्रयत्वमात्रप्रतीत्या
आश्रयत्वे एव तेन गच्छतीत्यादौ प्रतीयमानत्वं प्रतीत्या तत्राख्यातस्य निरूढलक्षणा। न चोभयत्र प्रयोगादुप
रिसमेव किं न स्यादिति वाच्यं। तपासति चैत्रो जानातीतिवद्घटो जानातीति प्रयोगवारणाय गच्छती
त्यादिवन्महाकालो गच्छतीत्यादिप्रयोगवारणाय तत्संवेधावच्छिन्नाश्रयतासु वृत्तितदन्यवस्तुमात्रवृ
त्तिप्रतियोगित्वे च शक्तिकल्पने गौरवापत्त्या वृत्तिशक्तिराश्रयत्वादौ लक्षणेत्यस्यैव सम्यक्त्वात्। न च वि
क्लेत्यादिफलानुकूलव्यापारमात्रस्य धात्वर्थतया वृत्तेरपि तदंतर्गतत्वेन कथमाख्यातार्थत्वमनन्यलभ्यत्व

व्या·को
१६३

स

भ्यस्यैव स्वार्थत्वादिति वाच्यं। सतित्वेनान्यलभ्यत्वाभावात्। विक्लि[स]त्त्यनुकूलव्यापारानुकूलत्वेन रन
न्यलभ्यत्वाच्च। रूपादिपरावृत्तिफलकतेजःसंयोगादेरेव पचधात्वर्थत्वापत्तेर्यथा तथानेन गतत्वाच्च। अ
त एव स्वतंत्राः परमाणवः पच्यंत इति प्रयोगः। वस्तुतस्तथा सति तेजःसंयोगानुकूलत्वस्याभावेऽपि प्र
स्तावणानुकूलत्वमिति पचतीति प्रयोगानापत्तिरिति। तदसत्। तदानीं प्रस्तावे यत्नीसे च प्रयोगे
णापच्यतीति प्रयोगाभावे इष्टापत्तेः प्रस्तावणानंतरं रसादिपरावृत्त्यर्थमंगारेषु पुनःस्थापने प्रस्ता २५
वणानुकूलत्वेऽपि रसादिपरावृत्तिफलकतेजःसंयोगानुकूलत्वाभ्युपगमेन पचतीति
प्रयोगोपपत्तेः। पचधातोः प्रत्ययेनैलक्षण्येऽवतदानीं पचतीति प्रयोगान्निर्वाहाच्च। वैयाकर
णास्तु आख्यातार्थ आश्रयः। आश्रयत्वं चाखंडोपाधिरूपेणाकृतावच्छेदकेनैवाश्रयस्यैवैत्रादिप
दलभ्येनत्यावकथं तत्राख्यातशक्तिरिति वाच्यं। आश्रयत्वेन तदलाभात्। एवं च चैत्रः पचतीत्यादौ ए
कचैत्राभिन्नाश्रयिका पविक्लित्तिपाकरसापाकारकः शाब्दबोधः आख्यातस्थले सर्वत्र क्रियाविशेष्य

कत्वाद्बोधस्यैवाभ्युपगमात् तथैवानुभवात् अत एव मृगो धावतीत्यादौ मृगाभिन्नैकाश्रयिकाधावनक्रियेत्सा
कारकक्रियामुख्यविशेष्यकबोधः साधुः पश्य मृगो धावतीत्यादौ मृगकर्तृकधावनक्रियायाः एवाहंदृशिक्रियायां
कर्मतासंबंधेनान्वयः एवमेव वाक्यार्थकर्मतोपपद्यते मृगो धावतीत्यादौ धावनानुकूलकृतिमान् मृग इत्साका
पि
रकानैयायिकसम्मतः प्रथमांतार्थमुख्यविशेष्यकोबोधस्तु न साधुः पश्य मृगो धावतीत्यादौ वाक्यार्थकर्मता
नुपपत्तेः तथा हि पश्य मृगो धावतीत्यादौ धावनानुकूलकृतिविशिष्टमृगस्य दृशिक्रियायां कर्मतापत्तौ द्विती
यापत्तिः न चैवमप्रथमासामानाधिकरण्यात् न शात्रसंगः तथा च धावेतं मृगं पश्येति वाक्यप्रयोगः स्यात् एव
मपि द्वितीया[blot]यायाः दुर्वारत्वेन पश्य मृगो धावतीति वाक्यासंभवापत्तिः न च पश्येत्यत्र तमिति कर्माध्याहार्य
वाक्यभेदप्रसंगात् उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मत्वेनाऽन्वयस्य प्रतिपादयिषितत्वात् अध्याहारे
नैन्वेपापत्तेरिति आकुः अत्रेदं प्रतिभाति पश्य मृगो धावतीत्यादौ वाक्यार्थस्य तस्य धावनानुकूलकृतिविशिष्टमृगस्य
कर्मतासंबंधेन दर्शनेऽन्वयः न चैवं मृगपदोत्तरं द्वितीयापत्तिरिति वाच्यो अत्र वाक्यार्थस्य कर्मत्वेन मृगपदोत्तरं

द्वितीयापादनासंभवात्। यत्र तु केवलमृगपदार्थस्य कर्मत्वे तात्पर्यं तत्र मृगपदोत्तरं द्वितीयायाः साधु
त्वात्। न चैतत्तथापि धावनानुकूलवृत्तिविशिष्टस्य मृगस्य नामार्थस्य धात्वर्थे [illegible] दर्शने कथं भेदेनान्वयः
अन्यथा तंडुलः पचतीत्यादौ तंडुलादेरपि कर्मतासंबंधेन पाकेन्वयापत्तेरिति वाच्यं केवलनामार्थस्य
धात्वर्थे भेदेनान्वयानंगीकारात्त्वन्नामार्थस्य धात्वर्थे भेदेनान्वयांगीकारे क्षतिविरहात्। अत एव कृता
ममैतन्महात्म्यं तथा चोत्पत्तये स्तु भाः पाराके मेच पुट्टेष्वापतेन्निर्भयः पुमानित्यत्र प्रथमांतपदोप
स्थापितानांमष्टु भेत्वविशिष्टत्वादीनां भेदेन श्रवणेऽन्वयः संगच्छते एवं च तंडुलः पचतीतिं तंडुलपदार्थ त्यत्र
स्य तंडुलपदरूपनामार्थत्वेन धात्वर्थेन सहतस्य न साक्षादन्वयबोधः शुक्लस्तंडुलः पचतीत्यादौ च शुक्ला
भिन्नतंडुलरूपवाक्यार्थस्य नामार्थत्वाभावेनान्वयबोधो निराबाध एवेति। ननु तंडुलः पचतीत्यादौ तंडुल
स्य कर्मतासंबंधेन पाकादावन्वयबोधवारणाय विशेष्यतासंबंधेन तंडुलपदजन्यतंडुलप्रकारकशाब्द
बोधं प्रति तंडुलपदोत्तरविभक्तिजन्योपस्थितेः कारणत्वकल्पनात् तत्र कथं तां विना शुक्लस्तंडुलः पचतीत्यादौ

तंडुलपदजन्यान्वयबोधः न च शुक्लतंडुलस्वरूपेण तंडुलान्वयबोध एव तादृशोपस्थितेः कारणत्वमिति
वाच्यं शुक्लस्तंडुलः कर्मत्वमित्यादौ विभक्तिजन्योपस्थितिं विनापि कर्मत्वे शुक्लाभिन्ने तंडुलस्वरूपेण तं
डुलान्वयबोधापत्तेः शुक्लतंडुलत्वप्रकारकतंडुलबोध एव विभक्तिजन्योपस्थितेः कारणत्वकल्पनादि
ति चेन्न विशेष्यतासंबंधेन तंडुलपदजन्यतंडुलप्रकारकशाब्दबोधे विभक्तिजन्योपस्थितिप्रथमांत
शुक्लादिपदसमभिव्याहृतप्रथमांततंडुलपदोत्तरषष्ठ्यादिधातुजन्योपस्थितेरन्यतरस्य कारणत्वकल्प
नात् केचित्तु पश्य मृगो धावतीत्यादिवाक्योत्तरकर्मत्वोपस्थापकमिति पदमध्याहृत्य सर्वत्रैवान्वय
कर्मस्थलेऽन्वयबोधः निपातातिरिक्तनामार्थयोरेवान्वयबोधस्य व्युत्पन्नत्वेन निपातीभूतेति
पदोपस्थापितकर्मत्वे मृगो धावतीत्याद्यर्थस्य धावनकर्तृमृगादेरन्वयबोधे बाधकाभावात्। एवं नि
पातातिरिक्तनामार्थस्यैव धात्वर्थे साक्षादन्वयबोधस्य व्युत्पन्नत्वपारतिपदोपस्थापितकर्मत्वस्य धात्व
र्थगमनादौ साक्षादन्वयबोधस्यापि निराबाधतानन्नव घटो नेवेदं दर्वेसादौ नञ्पदेत्व परा शुप [illegible]

स्या·कौ
१६५

धात्वर्थ २

स्थापितार्थे घटपदं चेद्रूपदार्थयोर्भेदेनान्वयबोधदर्शनेन नामार्थयोर्भेदेनान्वयाबोधव्युत्पत्तौ नाम्नि
निपातातिरिक्तत्वविशेषणस्यावश्यकत्वे पि नामार्थयोर्भेदान्वयाबोधव्युत्पत्तौ नाम्नि तादृशं विशे
षणं किमर्थमिति वाच्यं नातिरात्रे षोडशिनं गृह्णातीत्यादौ निपातीभूतनञर्थेन सह धात्वर्थान्वय
बोधस्य सर्वसंमतत्वेन तत्रापि तद्विशेषणस्यावश्यकत्वात्। अत एवाव्ययोत्तरं कर्मत्वाद्युपस्था
पिकां प्रथमां न्यविभक्तिं प्राचो नस्वीकुर्वन्ति। धात्वर्थे तेषां कर्मत्वादिसंबंधेनैवान्वयबोधोपपत्तेः
नैवं पश्य चैत्रः पचतीत्यादौ वाक्यार्थकर्मस्थले अध्याहृतेतिपदोपस्थापितकर्मतायामाख्यातार्थ
विशिष्टचैत्रादेर्विधेयत्वे नान्वयबोधे कर्मत्वादौ नामार्थस्योद्देश्यतयैवान्वयेति घटमानयेत्यादिस्थ
लेकृत्स्नमुत्पत्तिभंगप्रसंगात् इति वाच्यं। इतिपदसमभिव्याहारे तादृशव्युत्पत्तिसंकोचस्वीकारादित्या
हुः अन्ये तु अध्याहृतेतिपदेनैव तादृशवाक्यार्थोपस्थितिस्तादृश[illegible]वाक्ये च तादृशे तात्पर्यग्राहकं इतिप
दोत्तरं द्वितीयोश्च कर्मत्वम[illegible]र्थस्तावतैव विभक्त्यर्थद्वारा धात्वर्थे नामार्थान्वयबोधसंभवादित्याहुः तद
मनुसंधीयमान

३

या

१६५

पं२

भयमप्यसत्। वाक्यार्थकर्मत्वस्य ले इति पदमध्याहृत्यान्वयबोधस्वीकारे तण्डुलः पचतीत्यादावपि तिप
दमध्याहृत्यान्वयबोधसंभवे तण्डुलः पचति सुक्तं तण्डुलः पचतीत्यादौ सर्वत्र नामार्थधात्वर्थयोः साक्षा
दन्वयबोधस्यैव स्वीकर्तुमुचितत्वात् तस्मात् केवलनामार्थस्य धात्वर्थे भेदेनान्वयस्याव्युत्पन्नत्वेऽपि वाक्या
पुरुष ४ र्थस्य धात्वर्थे भेदेनान्वये इष्ट उक्तरीतिरेव समीचीना। यत्तु विशिष्टस्यानतिरिक्ततया वाक्यार्थस्यापि ना
मार्थतया तस्य धात्वर्थे भेदेनान्वयासंभवादुक्तरीतिर्न सम्यगिति तदसत्। विशिष्टस्यानतिरिक्तत्वेऽपि वि रि
शिष्टं केवलप्रकारस्तयोर्भेदात्। यद्वा दृशिधातोरेव धावनकर्तृमृगकर्मकदर्शने लक्षणा निरुक्तवा
क्यतात्पर्यग्राहकं नैव निरुक्तदर्शने दृशिधातोर्वा लक्षणा पदान्तरस्य वेसत्वे किं नियामक
मिति वाच्यं दृशिधातोर्निरुक्तादर्शने लक्षणायां तादृशस्य स्फुरा क्य संबंधस्य लघुत्वात् पदान्तरस्य ल
दृशि २ क्षणायां शक्यसंबंधस्य गुरुत्वात्। अथवा दृशिधातोर्मृगकर्तृकोत्कटधावनकर्मकदर्शने लक्षणा
मृगो धावतीति वाक्यं तात्पर्यग्राहकमिति दिक्॥ युज्यते चैतत् अन्यथा ज्ञानाभिसीता जनकप्रसूते सादौ वैय्या

न्या॰ को॰
१६६

॥ ईषदसमाप्तौ कल्पप्देश्यदेशीयरः ॥

करणानामप्यनिर्वाहात्तत्पचतुपचेति कल्पपुरुषा इत्यादिप्रयोगस्य सर्वे सिद्धत्वापात्त त्र आचार्यकल्पादि
(ल्पा २) जा इति वत्सं च तिकल्पौः पुरुषा इति प्रयोगप्रसंगः प्रकृत्यर्थस्येषदपरिसमाप्तावपाककर्तृलिंगसंख्या (त्य)
न्वयप्रयोग्यतया तिङुपात्ता[illegible]पाद्वे सुबुपात्ता याञ्च पि वकृत्व संख्यायाः सुबुपात्तलिंगस्य च तत्रान्वय
संभवादितिप्रथमांतार्थबोधोपगमो न समंजसः क्रियाविशेष्यकबोधोपगमे तु तस्या लिंगसंख्या
(रा) न्वयायोग्यत्वान्न दोष इति चेन्न स्यादयेकत्वसंख्या तात्पर्यतावादिनां दोषः भावनानुधानत्पात्तेव तिङु
पात्तापि लिंगसंख्यान्वययोग्येति साधुत्वार्थमेकवचनस्य सामान्येन पुंसकस्य च न्याय्यत्वात् यत्तु
भावप्रधानमाख्यातमिति निरुक्ते न भावशब्दस्यार्थक्रियाप्राधान्योक्त्या तद्विशेष्यकबोध एवोपयोन
तु प्रथमांतार्थविशेष्यकः उक्तनिरुक्तविरोधादिति तदपि न भावपदस्य भावयतीति व्युत्पत्त्या कर्तृ
रूपभावनापरतयोक्तनिरुक्ते नाख्यातार्थेषु संख्यावर्तमानत्वादिकेषु भावनारूपाख्यातार्थस्यैव धात्वर्थं (ता)
प्रतिप्राधान्यमिति प्रतिपादनात् । स इव प्रधानानिनामार्नैःस्तु तरवा अमगत प्रधानशब्दस्य वाचकपरत (१६६)

याभावे प्रधानमाख्यातमिति निरुक्तस्य द्रुतिवाचकमाख्यातमित्यर्थप्रतिपादकतया विरोधास्पर्शाच्चेत् केचि
त्तु भावप्रधानमाख्यातमिति निरुक्तेनाख्यातार्थस्य धात्वर्थरूपभावे विशेष्यत्वं बोध्यते सत्त्वप्रधानि नामा
नीत्यति निरुक्तेन च नामार्थस्य लिंगसंख्यारूपसत्त्वविशेष्यत्वं बोध्यत इत्याहुः । तस्मात्प्रथमांतार्थमुख्य
विशेष्यकबोधांगीकारेन कोपि दोषः । प्रस्तुतवैयाकरणाभिमतक्रियामुख्यविशेष्यकबोध एवासमं
जसः तथाहि क्रियाविशेष्यकबोधोपगमे चैत्रः पचतीत्यादौ चैत्रभावनयोरभेदेनासिद्धस्योद्देश्यवि
धेयभावस्य भंगापत्तिः एवं चैत्रः पाकभावनावान्नवेति संशयानुसारस्यानिर्वाहः एवं प्रकृतिप्रत्ययो
स्सर्गिकतेस्तयोः प्रत्ययार्थस्य प्राधान्यमिति उत्सर्गलभ्यस्य प्रत्ययार्थप्रकृत्यर्थविशेषणत्वस्य भंगापत्तिः
स सांहि गतो प्रत्ययार्थप्रकृत्यर्थविशेषणमिति सौत्रोत्सर्गस्याप्यनुग्रहस्यैव न्याय्यतया तत्परित्यागानौ
चित्यात् किंच क्रियाविशेष्यकबोधोपगमे कर्त्तृकर्मलकारयोर्बोधवैलक्षण्यानुपपत्तिः उभयत्रैव क्रि
याविशेष्यत्वात् यदि च कर्त्तृलकारे व्यापारविशेष्यकः कर्मलकारे च फलविशेष्यको बोधः पचकस्तंडुल

पा॰ १

अयंन्याय

न्या॰ कौ॰
१६७

इत्याद्यनुरोधेन विशेषणविशेष्यभावविपर्यासस्यावश्यकत्वात् फलानुकूलव्यापारस्य क्रियात्वेन
फलस्यापि क्रियात्वात् क्रियाविशेष्यकबोधनियमोऽपीति विभाव्यते तथापि क्रियाविशेष्यकबोधांगीका
रे क्रियायामाख्यातार्थाश्रयस्याधेयतासंबंधेनैवान्वयो वाच्यस्स च न संभवति चैत्रो न पचतीत्यादाव
नन्वयापत्तेः आधेयतासंबंधस्य वृत्त्यनियामकतयाऽभावप्रतियोगितावच्छेदकतासंभवेन तत्सं
बंधावच्छिन्नप्रतियोगिताकाभावबोधासंभवात् अपि च चैत्रः पचतीत्यादौ पाकत्वावच्छेदेन चैत्राश्र
यकत्वस्य बाधेन पाकत्वसामानाधिकरण्येनैव तदन्वयो वाच्यस्तथा च चैत्रादौ पक्तृत्वस्यापि चैत्रो न पच
तीत्यादेर्योग्यत्वप्रसंगः पाकत्वसामानाधिकरण्येन चैत्राश्रयकत्वाभावसत्त्वात् न च ■ समभिव्याहा
राभावे पाकत्वसामानाधिकरण्येन बोधोऽभ्युपेयः ■ तत्समभिव्याहारे तु पाकत्वावच्छेदेन बोधाभ्युप
गमान्नोक्तदोष इति वाच्यं प्रतियोग्यभावान्वयस्य ■ तुल्ययोगक्षेमतया व्याप्यवस्थापनेन नञ्सत्त्वासत्त्व
योः प्रकारभेदाश्रयणासंभवात् एतेन नञ्समभिव्याहारे चैत्राश्रयकः पाकाभावः चैत्राश्रयकपाकाभाव

नञ् ४

१६७

इतिवाबोधोपगमोपिनिरस्तः क्रियामुख्यविशेष्यकबोधनियमभंगापत्तेश्च। अंसे अधिकरणकोसा
पत्तेश्च अथभवन्मतेपिभूतलेनघटइत्यादौभूतलवृत्तिघटाभावइतिबोधांगीकारासत्तियोग्यभावा
न्वययोर्न्नतुल्ययोगक्षेमत्वं जातौनसत्तेत्यादौसत्तायामेकार्थसमवायेनजातिवृत्तितया। जातिसमवे
तत्वस्यचाप्रसिद्ध्याप्रथमांतमुख्यविशेष्यकबोधासंभवादितिचेन्नतत्रसमवेतत्वीयत्वरूपसंबंधरू
पस्याधिकरणसंबंधावच्छिन्नप्रतियोगिताकजातिवृत्तित्वाभावबोधोपगमेनास्मन्मतेदोषात्। मैथिला
स्तुक्रियाप्राधान्यमते क्रियायास्तु प्रयातिपुरुषस्तस्यचरणावभिवादयेत्यादावन्वयबोधानुपपत्तिः सर्वेना
मांप्रधानपरामर्शकत्वात्तच्छब्देनप्रधानीभूतप्रयाणादिक्रियापरामर्शात्। अस्मन्मतेतुप्रधानीभूत
पुरुषादिपरामर्शेनानुपपत्त्यभावादित्याहुः। नव्यास्तुकेचित्पाकरणोरपि अनभिहितेकर्त्तरितृतीयसत्त्वेशा
सनेस्यकर्तृविशेष्यतयातत्प्रातिपदिकार्थेविवक्षितेसतितत्प्रातिपदिकात्तृतीयस्यवापीवाच्यो। अन्यथा
चैत्रेणपच्यतइत्यादौकर्त्तुरनभिधानस्फुटत्वेचत्वापत्तेः तथाहि नतावदत्रचकत्वमनभिधानंल्लकार

सामान्यस्यैव कर्तृवाचकत्वेन कर्मलकारस्य तद्वाचकत्वासंभवात् कर्तरि प्रयोगः साधुत्वादयं चैत्रः प
च्यत इत्यादि प्रयोगवारणे प्रमाणाभावात् अनुत्तरत्वस्य कर्तृवाचकतावच्छेदकगौरवेणानिवेशात् तत्राप्यबोधकत्वे चै
त्रेण पच्यत इत्यादिवाक्यस्य कर्तृविषयकस्वजन्यबोधजनकत्वेन तद्घटकसकलपदानामेव न नेकत पो
ल्लकारस्यापि तद्बोधकत्वान्नापपात्त एवं क्रियाविशेष्यकबोधोपगमे चैत्रः पचतीत्यादौ चैत्रस्य कर्तृवि
शेष्यतया विवक्षितत्वे चैत्रपदोत्तरं तृतीयापत्तिः प्रथमानुपपत्तिश्च प्रथमान्तविशेष्यकबोधोपगमे
च चैत्रस्य कर्तृविशेष्यतया विवक्षिणान्तोक्तापत्तिरिति सएवाचितो न तु क्रियाविशेष्यकबोध इति प्राहुः
एतेन चैत्रः पचतीत्यादौ चैत्रनिष्ठपाकभावनेत्साधाकारकोभावनामुख्यविशेष्यको बोधः भावनाया
आख्यातार्थत्वादिति मीमांसकमतं प्रतिपरास्तं तन्मते प्युक्तदोषाचारणात् तस्मात् प्रथमान्तार्थस्यैव वि
शेषत्वाव लत्कत्तस्त्वौ नैयायिकमते सर्वत्र प्रथमान्तार्थविशेष्यक एव बोध इति न नियमः केचित्त्वि पुत्तै
स्तथाः लिखनादस्तिर्वाहात्वद्धिंतु यथासंभवं न तद्विशेष्यकः अतएव पचतीत्यादौ प्रथमान्तपदासमभिव्या

हारे भावनाविशेष्यको भावो वाक्यस्थले क्रियाविशेष्यक एव बोधो नैयायिकानां लीलावतीप्रकाशे कविवरणा
दीधितिकृतां यद्यप्येतत्संभवे नैमित्रेणैव पच्यते ततेमनमित्यादिना तेन नकर्मक एतत्तद्ग्रहाधीकरणकपा
लकत्वावच्छेदेन मैत्रान्यकर्तृकत्वाभाव एवकारेण बोधयितुमशक्यः शब्दात्तादृशपाकस्यानुपस्थिते
रिति संकोचः संगच्छते एवं न कलंजं भक्षयेदित्यादौ कलंजभक्षणं बलवदनिष्टाननुबंधित्वाभाववदित्यादि
बोधांगीकरणमपि कृतां संगच्छते यत्तु न कलंजं भक्षयेदित्यादौ बलवदनिष्टाननुबंधित्वाभाववत्कलंजभक्ष
णानुकूलकृतिमानिति प्रथमांतार्थविशेष्यकबोध लिखनेन तदसत्तत्र प्रथमांतपदस्यैवाभावात् अ
ध्याहारे प्रमाणाभावात् किंच न कलंजं भक्षणे बलवदनिष्टानुबंधित्वबोधद्वारा निवर्तकस्य सर्व
सिद्धस्यानुपपत्तिः भवन्मते कलंजभक्षणकर्तुः पुनर्निवर्तकत्वोपपत्तावपि कदापि येन कलंजभ
क्षणं न कृतं तं प्रति निवर्तकत्वासंभवात् तस्य कलंजभक्षणानुकूलकृतेरप्रसिद्धेः अत एव बाधआकारं
न पश्यति इत्यादिप्रयोगाणामप्युपपत्तिः अंधवृत्तित्वाकाशविषयकत्वाभावप्रकारकदर्शनविशे

ष्यकबोधसंभवात् आकाशविषयकदर्शनाभाववानंध इति प्रथमांतार्थविशेष्यकबोधस्याप्रसिद्ध्या
संभवात्। इत्थं च चैत्रः पचतीत्यादौ प्रथमांतार्थविशेष्यकबोधेपि पश्य मृगो धावतीत्यादौ मृगक
र्तृकधावनस्य विषयतया दर्शनान्वयेन क्रियाविशेष्यकबोधांगीकारेपि बाधकाभावः। विशेषण
विशेष्यभावस्य तात्पर्यग्रहमात्राधीनतया क्वचिद्यस्वर्थेपि विशेष्यकान्वयबोधांगीकारे क्षतिविरहात्
अत एव पचति भवतीत्यादिप्रयोगानुपपत्तिरिति निरस्ता हिता तत्र पाकानुकूलकृतिर्भवतीत्यादिभा
वेनाविशेष्यकबोधांगीकारादिति सारः एतेन प्रथमांतार्थविशेष्यकबोधनियमे भवद्भिः स्तूयते तत्र के
ति प्रश्ने स्तोत्रेमे मे तत् क्रियते रसुत्तरस्य स्तोत्रविशेष्यकबोधजनकस्य प्रश्ननिवर्तकत्वानुपपत्तिः
समानविशेष्यकबोधजनकोत्तरस्यैव प्रश्ननिवर्तकत्वात्। एवं ब्राह्मो विवाह आहूय यत्कन्या प्रदीयते
स्वयमिति स्मृतिवाक्यात्। आह्वानपूर्वकं स्वयं कन्यादानं ब्राह्मो विवाह इत्यर्थलाभानुपपत्तिः क्रियावि
शेष्यकबोधनियमेऽुक्तस्थलेनुपपत्तेभावेपि प्रमातिपुरुषस्य पादयोरभिवादयसादौ तच्छब्दस्य पुरुषप

रामर्षकत्वानुपपत्तिः तच्छब्दे गुणीभूतार्थपरामर्षकत्वस्यौत्सर्गिकत्वात् । अन्यथा दृष्टौ ते राजमत्तंगा
स्तस्य स्वामी तुरंगमाः चैत्रो ग्रामं गतस्तत्र मैत्रः किं कुरुतेधुना चैत्रः प्रजावतीयं मत्वं तस्मै देहि केवलमित्यादे
तच्छब्दस्य यथाक्रमं राजग्रामं भात्तपरामर्षकत्वापत्तेः । अत एवानुमानं निरूप्यतत्र सुपक्ष्यतत्रानुमिति रि
तितच्छब्देन निरूपणपरामर्षासंभवात् । तत्र निरूपणीयेनुमान इति व्याख्यातमभियुक्तैरिति तटस्थानोरी
कापि निरस्ता । यथासंभवमुक्तरीत्या क्वापि प्रथमोत्तार्थविशेषकबोधयोरुपगमेनोक्तानुपपत्त्यभावात् ।
अथवा प्रथमसंतपदासमभिव्याहारे उक्तरीतिरेव तत्समभिहारे च सर्वत्र प्रथमांतार्थविशेष्यकबोधनियम
मएवेत्युक्तदोषः कः कुलीन इति प्रश्ने यस्य धनमित्यभिन्नविशेष्यकबोधजनकादप्युत्तरात्प्रश्नानि
वृत्त्या समानविशेष्यकबोधजनकोत्तरस्यैव प्रश्ननिवर्त्तकत्वे क्वापि विशेष्यकबोधनियमांगीकर्त्तृमतेप्याग
तिः एवं ब्राह्मो विवाह इत्यादिस्मृतिवाक्यस्य तादृशकन्यादानं ब्राह्मो विवाह इति नार्थः गांधर्वो हि विवाहस्या
धारण्यापत्तेर्वहेः प्रापणार्थधात्वनुसारेण च वरनिष्ठन्यामाप्यनुकूलवित्वक्षणव्यापारस्यैव विवाहतया कन्या

दानस्य विवाहत्वाभावात् अत एव स्मृतौ विवाहस्याष्टधा विभागः संगच्छते सामान्यधर्मोक्तानां विशेषरूपे
ण प्रतिपादनस्यैव विभागत्वात् किंतु यत्पदार्थयादृशविवाहात्मकव्यापाराश्रयः स्वयं दीयते कन्यास
व्यापारो ब्राह्मो विवाह इत्येवार्थ इति न कोपि दोषः इदं भवनं मैत्रेणैव तेमनं पश्यत इत्यादावपि एवकारा
र्थव्यवच्छेदस्य उभयपत्वावच्छिन्नप्रतियोगिताकतयाभानोपगमेन तद्भवनाधिकरणकपाककर्तृत्वमैत्रा
न्यकर्तृकत्वोभयाभाववत्तेमनमिति प्रथमांतार्थविशेष्यक एव बोधः अंध आकाशं न पश्यतीत्यादावपि
नञर्थस्य वारद्वयं भानोपगमेनाकाशविषयकत्वाभाववद्दर्शनाभाववानन्ध इति प्रथमांतार्थविशेष्यक
एव बोधः चैत्र आकाशं न पश्यतीत्यादौ चाकाशविषयकत्वाभाववद्दर्शनवान् चैत्र इत्याकारक एवान्व
यबोध इति न कोपि दोषः परंपरयोगोधावलिसादौ तु गतिरुक्तैवेति युक्तमुत्पश्यामः एवमुपमानादिनाश

तस्य २

क्तिग्रहो यद्यसति बाधके एवमत एव पचतीत्यादौ पाककर्तृति ~~[illegible]~~ कर्तृविवरणेपि नाख्यातस्य विवरण
त्कर्तरि शक्तिग्रहः तत्र यत्नरूपस्यैव बाधकसत्त्वात् प्रथमांतचैत्रादिपदादेव स्वाश्रयस्य चैत्रादेर्लाभात्

= वृत्तित्वं च शाब्दबोधोपयोगिन्युपस्थितिजनकतावच्छेदकसांसर्गिकविषयता= = श्रयत्वे सति पदपदार्थसंबंधत्वं =

उपमानादिना शक्तिग्रहप्रकारश्चान्यत्र विस्तरेणास्तीति तत्रैवानुसंधेय इति ग्रंथगौरवभिया नात्र प्रपंचितः शक्तिश्च मुख्या वृत्तिः लक्षणा वृत्त्यंतरं। तेन गंगायां घोष इत्यादौ गंगापदादेर्गंगातीरादौ शक्तिविरहेपि गंगातीरवृत्तिर्घोष इत्यादिशाब्दबोधस्यानुपपत्तिः लक्षणयैव गंगापदादिना गंगातीरादेरुपस्थित्या तादृशशाब्दबोधोपपत्तेः सा च स्वशक्यसंबंधः स्वपदं लाक्षणिकगंगापदादिपरं। अत्रेदं विचार्यते। गंगापदादेस्तीरादौ शक्तिरेवास्तां वृत्त्यंतरकल्पने गौरवात् शक्तिग्राहकव्यवहारस्य मुख्यलक्ष्यसाधारणत्वात् लाघवेन गंगापदादिनिरूपितशक्तिज्ञानजन्योपस्थितेरेव शाब्दधीहेतुत्वाच्च। यत्तु गंगादिपदस्य लक्षणीयतीरादिसहस्रार्थेषु प्रत्येकं शक्तिः कल्प्या तद्ग्राहकव्यवहारापेक्षा चेति लक्षणाकल्पनमेव युक्तं। न च लक्षणाग्रहाप मपि वृद्धव्यवहारापेक्षावश्यकीति वाच्यं। गंगायां घोष इत्याद्यनवाश्रुतत्वात्तस्याप्रामाण्योपपादनार्थमेव स्वार्थसंबंधेनोपस्थिततीरबोधकत्वस्य कल्पनात्। न च तीरादिसहस्रेषु संयोगसमवायादिनानासंबंधानां शाब्दबोधप्रयोजकत्वे गौरवमिति वाच्यं अतिरिक्तायाः शक्तेस्तन्नानात्वस्य तत्र शाब्दहेतुत्वस्य च कल्प

नापेक्षयाक्लृप्तानां संबंधानां क्लृप्तायास्तद्धीनस्य तेष्वशाब्दधीहेतुत्वकल्पने एव लाघवादिति तद्यत्र
गंगापदादेस्तीरादौ लक्षणांगीकर्तृमते गंगायां घोष इत्यादौ प्रत्यक्षे गंगातीरादिविषयभेदेनोपस्थितेः
कार्यकारणभावद्वयकल्पनापत्त्या महागौरवं तत्र तथाहि यत्र गंगायां घोष इत्यादौ गंगापदादेस्तीरादे
रा[illegible]शक्तिमात्रे शाब्दबोधस्तत्र तदनुरोधेन गंगापदादिजन्यतीरादिशाब्दबोधं प्रति तीरादिविशेष्य
कगंगादिशक्तिविषयकज्ञानजन्योपस्थितेरेकः कार्यकारणभावः एवं यत्र तादृशशक्ति[illegible]नाभाव
दशायां गंगादिपदादेस्तीरादौ लक्षणाज्ञानात् शाब्दबोधस्तत्र तादृशशाब्दबोधं प्रति तीरादिविशे
ष्यकगंगापदादिलक्षणाविषयकज्ञानजन्योपस्थितेरपरः कार्यकारणभाव इति तीरादिविषयभे
देन कार्यकारणभावद्वयकल्पने गौरवं गंगापदादेस्तीरादौ श[illegible]पगमस्य लक्षणानंगीकर्तृमते च प्रथ
मैकार्यकारणभावेनैव निर्वाह इति लाघवं स्फुटमेव अत्र केचित् लक्षणांगीकर्तृमतेपि प्रथमकार्य
कारणभावेनैव निर्वाह इति न तन्मते गौरवं लक्षणाया संबंधात्मकलक्षणाज्ञानस्याप्यधिकं स्थितिभावेन

ग २ शा ५

क्लिमेवो

= स्वरूपसंबंधेनप्रमेयत्ववत् =

शक्तिविषयकत्वयातज्जन्योपस्थितेरपि तादृशशक्तिविषयकज्ञानजन्योपस्थितित्वरूपकारणतावच्छेदकाक्रांत
त्वात् । अथयत्रगंगापदेशक्यःप्रवाहस्तीरंचप्रमेयमितिसाधाकारकसमूहालंबनात्मकज्ञानजन्यातीरा
द्युपस्थितिस्तत्रगंगापदजन्यतीरादिशाब्दबोधवारणायतीरत्वाद्यवच्छिन्नविशेष्यतानिरूपितगंगापदा
दिशक्तिप्रकारताशालिज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यताश्रयोपस्थितित्वेनैवकारणत्वंवाच्यं
तथाचगंगापदशक्यसंबंधितीरमितिसाधाकारकलक्षणाज्ञानस्यतीरत्वाद्यवच्छिन्नविशेष्यतानिरू
पितशक्तिप्रकारताशालित्वाभावेनतज्जन्योपस्थितेरुक्तकारणतावच्छेदकानाक्रांततयाकथमेककार
णतयालक्षणांगीकर्त्तृमतेनिर्वाहइतिचेन्नैवंशक्तिप्रकारतायांतीरत्वाद्यवच्छिन्नविशेष्यतानिरूपित
त्वमनिवेश्यज्ञानेतीरत्वाद्यवच्छिन्नविशेष्यकत्वेनिवेशेपिवोक्तकारणत्वांगीकारात् नचोक्तदोषः यत्रत्या
दृशोपस्थितेर्गंगापदादिजन्यतीरादिविषयकशाब्दबोधत्वेनकार्यतावच्छेदकमपितुतादृशोपस्थिति
विशिष्टशाब्दत्वमेवएवंचोक्तस्थलेउपदर्शितधर्माक्रांतःप्रवाहादिशाब्दबोधोजायतएवतीरादिशाब्द

बोधत्वावच्छिन्नस्य त्वापादकाभावः तस्य कार्यतावच्छेदकत्वादिसाकुस्तदसत्त्वात् तथापि गंगापदशक्त्यभाव
वति गंगापदशक्तिप्रकारकं गंगापदशक्यसंबंधाभाववति गंगापदशक्यसंबंधप्रकारकमिदं ज्ञानमित्या
द्याकारकाने काप्रामाण्यज्ञानाभाववन्निवेशानुरोधेन गंगापदशक्त्यभावाप्रकारकत्व गंगापदशक्यसंबंधा
भावाप्रकारकत्वादिरूपनिश्चयत्वनिवेशानुरोधेन च शक्तिज्ञानजन्योपस्थितिलक्षणज्ञानजन्योप
स्थि[illegible] सोः कार्यकारणभावद्वयस्यावश्यकत्वात् एतेन वृत्तिसंसर्गकपदप्रकारकार्थविशेष्यकज्ञान
जन्योपस्थितेरेव शाब्दबोधजनकत्वोपगमेनोपस्थितिद्वयस्याप्येकरूपेण कारणत्वसंभवस्ते वंत
था हि शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितगंगापदादिनिष्ठप्रकारतानिरूपिततीरादिवि
शेष्यताशालित्वग्रहत्वेन गंगापदादिज्यतीरादिविशेष्यकशाब्दबोधत्वावच्छिन्नं प्रतिहेतुत्वं कल्प्यते
शक्तिनिष्ठावच्छेदकतायाः पर्याप्तिः परं न निवेश्यते इत्येवं च शक्तिसंबंधेन पदप्रकारार्थविशेष्यका
ज्ञानस्येव शक्यसंबंधेन पदप्रकारकार्थविशेष्यकज्ञानस्यापि अधिकं वित्तिन्यायेन शक्तिसंसर्गकत्वा

जे३ ति२ क्र२ १७२

विशेषात् द्वयोरप्युक्तधर्मकत्वात्संग्रहः सुलभः संसर्गतावच्छेदकीयविषयतायामपि सांसर्गिकवि
षयतात्वस्य सत्वात् । ननु शाब्दसंबंधेन पदप्रकारकज्ञानस्य न शक्तित्वावच्छिन्नसांसर्गिकविषय
ताशालित्वं तथा सति शक्तिसंबंधावच्छिन्नपदप्रतियोगिताकाभाववानर्थ इति बाधनिश्चयोत्तरम
पि शाक्तसंबंधावच्छिन्नपदप्रकारकार्थविशेष्यकबोधस्यानुपपत्तेर्दुर्वारत्वात् । तत्संबंधावच्छिन्न
प्रतियोगिताकाभावनिश्चयस्य तत्संबंधनिष्ठसांसर्गिकविषयताशालितत्प्रकारताशालिज्ञाने
प्रतिप्रतिबंधकत्वादिति चेन्मैवं यादृशसंबंधावच्छिन्नप्रतियोगितासंबंधावच्छिन्नयत्पदप्रकार
तानिरूपितताभाववत्प्रकारतानिरूपितपदार्थनिष्ठविशेष्यताशालिग्रहत्तिष्ठेति तादृशसंबंधावच्छिन्न
तत्पदनिष्ठप्रकारतानिरूपिततदर्थनिष्ठविशेष्यतानिरूपिततादृशसंबंधनिष्ठसांसर्गिकविषय
ताशालिग्रहो न जायते इत्थं च तत्तदनुसारेण प्रतिबंधकस्य कल्पनीयतया पदनिष्ठप्रकारतानिरू
पितायाअर्थनिष्ठविशेष्यताया निरूपितायाशक्तिनिष्ठसांसर्गिकविषयता

२ = प्रतियोगितावच्छेदकतावच्छिन्नविरोधिता निरूपितशाब्दिकत्वनिष्ठाधेयतासंबंधावच्छिन्न ॥
पा॰ कौ॰ = प्रकारतायाः शाब्दिकत्वनिष्ठसंसर्गतावच्छेदकतायाश्चैक्यात् निरूढविरोध्यतानिरूपित
१७३

तच्छाब्दिकज्ञाने प्रतिशक्तिसंबंधावच्छिन्नप्रतियोगिताकपदाभावप्रकारतानिरूपितार्थनिष्ठविशे
ष्यताशाब्दिकनिश्चयस्य प्रतिबंधकतया शक्तिसंबंधावच्छिन्नप्रतियोगिताकपदाभावप्रकारताशाब्दि
निश्चयसत्त्वे शक्तिसंबंधावच्छिन्नपदप्रकारताशाब्दिकज्ञानस्यानुपपत्तेः तत्र शक्तिनिष्ठयासांस
र्गिकीविषयता तस्याः पदनिष्ठप्रकारतानिरूपितत्वे [illegible]
[illegible] ष्यर्थनिष्ठविशेष्यतानिरूपितत्वा
भावात् न चोक्तरीत्यैककार्यकारणभावकल्पनेन शक्त्यभावसंबंधेन पदप्रकारकार्थविशेष्यकज्ञान
जन्योपस्थितितः शक्तिसंबंधाभावसंबंधेन पदप्रकारकार्थविशेष्यकज्ञानजन्योपस्थितेश्च शा
ब्दबोधापत्तिर्दुर्वारेति वाच्यं। शक्तित्वावच्छिन्नसांसर्गिकविषयतायां प्रतियोगितावच्छेदकतानवच्छि
न्नत्वस्योपनिवेशेनोपस्थादिविपरासंगशक्तिकालीनवशक्तितादात्म्यादिसंसर्गकपदप्रकार
कज्ञानजन्योपस्थितिवारणाय पदप्रकारतार्थविशेष्यताभयनिरूपितत्वस्य शक्तित्वावच्छिन्नसांस

[illegible] ॥ १७३

र्गिकविषयतायां निवेशे स्वावच्छेदकतया लक्षणाज्ञानजन्योपस्थितेः संग्रहासंभवात् अत्रोच्यते।
तीरत्वावच्छिन्नविशेष्यतानिरूपितायाः सांसर्गिकविषयतायाः तन्निरूपितायाः निरूपितत्वं संबंधावच्छि
न्नाश्रयनिष्ठसांसर्गिकविषयतातद्भिन्नसांसर्गिकविषयतायाः अनिरूपितायाः शक्तित्वावच्छिन्नसांस
र्गिकविषयतातन्निरूपितायाः गंगादिपदनिष्ठप्रकारतातन्निरूपिततीरत्वावच्छिन्नविशेष्यता

शालिनिश्चयत्वेन शक्तिज्ञानत्वं संबंधात्मकलक्षणाज्ञानेनुगम्यतज्जन्योपस्थितित्वेन गंगादि

पदजन्यतीरत्वावच्छिन्नविषयकशाब्दबोधत्वावच्छिन्नं प्रत्येकविधएव शक्तिज्ञानलक्षणाज्ञानज
न्योपस्थित्योः कार्यकारणभावः कल्प्यत इति लक्षणांगीकर्तृमतेन गौरवावकाशः शक्तिकालीनत्व
कितादृशस्यादिसंसर्गकपदप्रकारकज्ञानीयशक्तित्वावच्छिन्नसांसर्गिकविषयतायां तादृशविषय
ताभिन्नकालीनत्वादिविषयतानिरूपितत्वेन तादृशज्ञानजन्योपदर्शितानुगमकरूपानाक्रांततया
तज्जन्योपस्थितेर्वारणं न चोपदर्शितरीत्या द्विविधा प्रामाण्यग्रहाभाववन्निवेशानुरोधेनोपस्थितेः कार

का॰कौ॰
१७४

णताद्रूपभावस्यकमिति वाच्यं। शक्तिसंबंधावच्छिन्नप्रतियोगिताकगंगादिपदाभाववद्विशेष्यता
निरूपितत्वप्रकारतानिरूपितशक्तिसंबंधावच्छिन्नगंगादिपदप्रकारतानिष्ठविशेष्यतासंबंधाव
च्छिन्नप्रतियोगिताकस्य लक्षणासंबंधावच्छिन्नप्रतियोगिताकगंगादिपदाभाववद्विशेष्यतानिरूपित
त्वप्रकारतानिरूपितलक्षणासंबंधावच्छिन्नगंगादिपदप्रकारतानिष्ठविशेष्यतासंबंधावच्छिन्नप्र
तियोगिताकस्य चाप्रामाण्यज्ञानाभावस्य गंगादिपदनिष्ठप्रकारतायां निवेशनानुपपत्तेरभावात्। न
च तथापि शक्तिसंबंधावच्छिन्नगंगादिपदप्रतियोगिताकाभावप्रकारकत्वलक्षणासंबंधावच्छिन्नगं
गादिपदप्रतियोगिताकाभावप्रकारकत्वरूपद्विविधनिश्चयत्वनिवेशानुरोधेन कारणताद्वयम
रयम २ वश्यमिति वाच्यं। संशयसमुच्चययोर्वैलक्षण्यानुरोधेन संशये उभय[illegible]प्रकारतानिरूपितै ता
कविशेष्यकतास्वीकारेणाभावप्रकारत्वानिरूपितायास्तन्निष्ठप्रकारतानिरूपितविशेष्यतायास्तत्कालि
त्वे स्वैव निश्चयत्वरूपतया तीरत्वाद्यवच्छिन्नविशेष्यतायामभावप्रकारत्वानिरूपितत्वनिवेशेनोक्तरू

पद्विविधनिश्चयस्यासंनिवेशात्। न चैवमपि शक्यनिरूपितपरंपरासंबंधरूपलक्षणासंबंधेन गंगादि
पदप्रकारकज्ञानस्यासंग्रहात्तज्जन्योपस्थितेरसंग्रह इति वाच्यं। तादृशज्ञानजन्योपस्थितेः स्वातंत्र्येणैव
कारणत्वोपगमात्। न चैवं लक्षणांगीकर्तृमते एतस्य युक्तं गौरवं दुर्वारमिति वाच्यं। अनंतविषयेषु अ
तिरिक्तशक्त्यादिकल्पनापेक्षया कतिपयैतादृशकारणताकल्पनेऽपि लाघवानपायात्। वस्तुतस्तु
मुख्यामुख्यार्थव्यवहारानुरोधेन लक्षणांगीकार आवश्यकः। शक्यत्वलक्ष्यत्वातिरिक्तयोर्मुख्यत्वामुख्यत्व
योर्दुर्वचत्वात्। किंच मुख्यार्थान्वयानुपपत्तिमनपेक्ष्य गंगादिपदात्तीरादिबोधस्तामपेक्ष्य च तस्मा
त्तीरादिबोध इति वैरूप्यनिर्वाहाय लक्षणांगीकार आवश्यकः। तदंगीकारे शक्यार्थबोधे उक्तानुपपत्तेरन
पेक्षा। लक्ष्यार्थबोधे तस्या अपेक्षेति सुवचत्वात्। अपि च तीरादौ नौ तीरादिशब्दैः प्रतिपादने न शैत्यपावन
त्वादिप्रतीतिः गंगादिशब्दैः प्रतिपादने तु भवतीति तत्प्रतीतिरिति सर्वजनसिद्धस्यानुभवस्य लक्षणानंगीका
रे न निर्वाहः तदंगीकारे तु स्वायत्ते शब्दप्रयोगे किमिति वाचकं प्रयुंजीत महर्षिरित्याशयेन तीरादिवाचकतीरादि
न

शब्दं विहाय वाचकगंगादिपदप्रयोगस्य किंप्रयोजनमिति प्रतिसंधानेन तादृशप्रयोगप्रयोजनानु
पपत्त्या गंगादिशब्दैस्तीरादिप्रतिपादने भवति शैत्यपावनत्वादिरूपस्तदुपपत्तिः इत्यस्य चानायसाक्षात्किंसा
नलक्षणाज्ञानजन्योपस्थितेः कारणताद्यमुपेयं प्रामाणिकगौरवस्यादोषत्वान्नैवं परस्परजन्य
बोधे परस्परस्य व्यभिचार इति वाच्यं त्वाव्यावहितोत्तरलक्षणोत्पत्तिकत्वस्य सामानाधिकरण्याभय
संबंधेन तत्तदुपस्थितित्वे शाब्दस्य तत्तदुपस्थितिजन्यतावच्छेदककोटौ निवेशेन व्यभिचाराभावा
दिति संक्षेपः। अत्र प्राचः लक्षितलक्षणापि वृत्त्यंतरं तथाहि द्विरेफादुं जनितो यो द्विरेफपदाद्भ्रमरबोधः
सर्वसिद्धः स च न द्विरेफपदशक्त्या तस्य बहुव्रीहिसमासात्मकतया शक्त्यभावात् अत एव न लक्षणयापि
तस्मात् तात्पर्यग्राहकद्विशब्दसमभिव्याहृतरेफशब्देन द्वौ रेफौ यत्रेति व्युत्पत्त्या रेफद्वयसंबंधित्वेन
भ्रमरपदं लक्ष्यते लक्षितेन च भ्रमरपदेन द्वौ तो त्मे रूपस्वशक्यसंबंधेन भ्रमररूपार्थो लक्ष्यत इति
द्विरेफपदस्य भ्रमरे लक्षितलक्षणारूपवृत्त्यंतरं अथ द्विरेफपदलक्ष्यभ्रमरपदेन शक्त्यैव भ्रमर

टी॥२

बोधसंभवे भ्रमरपदस्य न भ्रमरे लक्षणा न च रेफद्वयसंबंधित्वेन भ्रमरपदज्ञानेपि भ्रमोत्तरं तद्रूप भ्रमर २
पदत्वावच्छिन्नाज्ज्ञानात्स्कंधं शक्त्या बोधः शक्ततावच्छेदकप्रकारकज्ञानाभावादिति वाच्यं भ्रमरपदत्वा
वच्छिन्ने रेफद्वयसंबंधित्वग्रहे भ्रमरपदत्वावच्छिन्नज्ञानसत्त्वादिति चेन्न प्रत्ययानां प्रकृतस्यापि ते
स्वार्थबोधकत्वनियमेन भ्रमरस्य भ्रमरपदार्थतया द्विरेफपदार्थत्वाभावेन तत्र विभक्त्यर्थान्वया
नुपपत्तेः तन्मते च द्विरेफपदस्यैव लक्षितलक्षणा या वृत्ति तथा च भ्रमरस्य द्विरेफपदार्थत्वान्नानुपपत्तिः
न च शक्त्यादन्येन रूपेण ज्ञाते भवति लक्षणेति भ्रमरपदशक्यतावच्छेदकस्य भ्रमरत्वस्य रूपं भ्रमरप
दलक्ष्यतावच्छेदकत्वसंभवात्तेनैव तद्बोधसंभवादिति वाच्यं शक्येन रूपेण लक्षणानंगीकारे शक्त्यैव तद्बो
धसंभवे लक्षणात्वैयर्थ्यं न च फलमित्यस्यैव बीजत्वे तथा प्रकृते भ्रमरपदशक्त्या भ्रमरत्वविशिष्टस्य बोध
स्वीकारे भ्रमरस्य द्विरेफपदार्थत्वाभावेन विभक्त्यर्थान्वयानुपपत्त्या शक्यस्यापि लक्षणैव भानमु
पेयते एवं च लक्षितस्य द्विरेफपदेन लक्षितस्य भ्रमरपदस्य लक्षणा लक्षितलक्षणा सा च द्विरेफपदस्य

न्या॰ को॰
१७६

वृत्तिरितिवदंतितत्तदसत्। द्विरेफपदलक्ष्यभ्रमरपदेनशक्त्यैवभ्रमरबोधसंभवेतस्यलक्षणायाअसं
भवेनलक्षितशक्तेरेववृत्तित्वौचित्यात्। भवन्मतेलक्षितलक्षणायाइवमन्मतेलक्षितशक्तेरपिद्वि
रेफपदस्यैववृत्तितयाभ्रमरस्यद्विरेफपदार्थत्वसंभवेनतत्रविभक्त्यर्थान्वयानुपपत्तेरभावात्।
ग्रा५४ अन्येतुद्विरेफपदलक्ष्यभ्रमरपदेन भ्रमरबोधेपिलक्षितलक्षणावृत्तित्वंनिर्वहति। लक्षि
तेनलक्षणंबोधनेनतादात्म्येनयस्यामितिव्युत्पत्त्याद्विरेफपदलक्षितेनभ्रमरपदेनशक्त्याबोधनस्यै
वलक्षितलक्षणात्वादित्याहुः। मिश्रास्तुशक्यसंबंधोहिलक्षणा। नतुशक्यस्यसाक्षात्संबंधएवगौरवा
त्। एवंचपरंपरासंबंधेनलक्षणेवलक्षितलक्षणास्वलक्ष्यपदघटितलक्षणासेतितुयावत्तत्पाच्च
परंपरासंबंधेनलक्षणायाएवतथात्वेनद्विरेफपदस्यस्वलक्ष्यभ्रमरपदोपस्थाप्यत्वरूपेणस्वलक्ष्यभ्र
मरपदघटितपरंपरासंबंधेनभ्रमरत्वरूपार्थोपस्थापकत्वसंभवात्। द्विरेफपदलक्ष
णयैवोपपत्तेर्नातिरिक्तवृत्तिकल्पनेत्याहुः। यत्रद्विरेफपदस्यभ्रमरेउपदर्शितपरंपरासंबंधोनगृही

१७६

स्य ४

तः किंतु द्विरेफपदलक्षणयोपस्थितस्य भ्रमरपदस्यैव तादात्म्यरूपः स्वशक्यसंबंधो गृहीतस्तत्र द्विरेफ
पदलक्षणया भ्रमरस्य शाब्दबोधासंभवेन लक्षितलक्षणारूपवृत्त्यंतरमावश्यकमितिवाच्यं। तत्र द्विरेफ
पदलक्षणयोपस्थितस्य भ्रमरपदस्य भ्रमरेण तादात्म्यरूपस्वशक्यसंबंधग्रहे द्विरेफपदस्य भ्रमरेउपद
स्य ४ र्शितपरंपरारूपस्वशक्यसंबंधग्रहेपि बाधकाभावात्। न च यत्र भ्रमरे द्विरेफपदस्योपदर्शितपरंपरा
न ५ संबंधे बाधनिश्चयस्तत्र तादृशाग्रहो न भवतीतिवाच्यं। लक्षणासंबंधेन बाधनिश्चयस्य लक्षणाप्रका
रकज्ञानाविरोधित्वात्। न च यत्र लक्षणाया एव बाधनिश्चयस्तत्र लक्षणाप्रकारकज्ञानमपि न संभव न ५
तीतिवाच्यं। तत्रापि लक्षणाया बाधग्रहस्य लक्षणासंसर्गकज्ञानाविरोधितया लक्षणासंसर्गकज्ञाने बा
— धकाभावात् न च वृत्तिप्रकारकज्ञानस्यैव शाब्दबोधहेतुतया तदकिंचित्करमितिवाच्यं। वृत्तिप्रकार
कज्ञानस्येव वृत्तिसंसर्गकज्ञानस्यापि शाब्दबोधहेतुतोपगमादित्याहुः नवीनास्तु। द्विरेफपदादुपद ति २
र्शितपरंपरासंबंधेन भ्रमरत्ववर्वरत्व ~~[struck out]~~ प्रस्तरत्वघटत्वादिना निपतो स्थितो तस्य भ्रमरप

स्य १ प

को॰ १७७

योग्यत्वमनुपपन्नेति तस्मात्त्वरेफपदस्य ... तत्पदसंबंधित्वेन लक्षणा रेफे ... कदेशो द्विपदार्थस्याभे दाच्चयोस्त्वे वा द्विपस्यता तस्यर्थ ग्राह केतयोः रूढ लक्षणये व द्विरेफ संबंधी लक्ष्यः संचयोगार्थरति च यौगि कव्युत्पत्तिप्रयोज्यतात्तत्त्वसत्वप्रस्तरादाच तिप्रसक्त इति भ्रमरत्वविशिष्टे रूढिः तथा च द्विरेफपदं योग रूढमेव पंकजं लंब काणो दिपदं वदति प्राहुरिति द्विका लक्षणा चद्विविधा जहत्स्वार्था अजहत्स्वार्था च तत्र जहत्स्वार्थापामिति स्पुलास्वार्थविशेष्यकांन्वयबोधप्रयोजिका जहत्स्वार्था तदन्या च अजह त्स्वार्था गंगायां घोषः स्यादाद्या तत्र गंगातीरत्वेन तीरत्वेन वा गंगातीरे लक्षणा ... एतेन तत्र गंगां शाभाने युगपद्वृत्तिद्वयविरोधापत्तिरिति परास्तो गंगांशस्य लक्ष्यतावच्छेदकविधया तीरत्वेवं गंगा ना तृयुगपद्वृत्तिद्वयविरोधे माना भावाच्च अत्र लक्ष्यतावच्छेदके न लक्षणा गंगातीरत्वादि विशिष्टे गं गापद लक्षणाग्रहेण तद्रूपेण प्रकारकोपस्थितिः शाब्दबोधश्चेति संप्रदायः न च व्याप्तत्व लक्ष्यतावच्छेदके पि लक्षणा त्वे च अन्यथा शक्यतावच्छेदके पि शक्ति ... त्स्यात् लक्ष्यतावच्छेदकस्य वशात् किं चित्रापि भानसे

तस्य

म १   द २   टि १   द १   तद्दे १

अथ २   म २   ज ८   ज

भवात्। नचैवं तेन शक्यानुगमासंभव इति वाच्यं। अकार्येण [illegible] घटत्वादिना कार्यंतु गमकवदशक्येनापि
शक्यानुगमे बाधकाभावादिति प्राहुः। काकेभ्यो दधि रक्ष्यतामित्यादौ द्वितीया। लक्षणा पुनर्द्विविधा प्रयोजन
वती निरूढा च। आद्या गंगायां घोष इत्यादौ तत्र शैत्यपावनत्वविशेषादिबोधस्य प्रयोजनस्य सत्वात्।
नीलो घट इत्यादौ नीलरूपादिशक्तस्य नीलपदस्य नीलादिरूपवति द्वितीया। लक्षणाबीजं तु तात्पर्य
विषयान्वयानुपपत्तिरेव तु शक्यान्वयायोग्यत्वेवेष्टीः प्रवेशयेत्यादौ काकेभ्यो दधि र[illegible]तामित्यादौ चतद स्य५
स्यप५ भावात्तात्पर्यविषये[illegible]दधिरक्षाप्रवेशानन्वयस्य सर्वतो दधिरक्षणस्य चान्वयानुपपत्तिस्तत्वाप्य[illegible]स्यैवे
ति संप्रदायः। चिंतामणिकृतस्तु मुख्यार्थान्वयायोग्यत्वमेव लक्षणाबीजं तात्पर्यग्राहकं तु प्रवक्तृकेवा
ता। गंगायां घोष इत्यादौ वक्तृप्रामाण्योपपादनार्थमेव विनापि तात्पर्यग्रहं मुख्यार्थान्वयायोग्यत्व र्थ३
स्यैव लक्षणाकल्पनाच्च। यष्टीः प्रवेशयेत्यादौ चतात्पर्यस्यान्विषयभोक्तृप्रवेशानुपपत्त्याघन्व
यानुपपत्तिरस्त्येवेति प्राहुः। अत्रेदं बोध्यं गंगामुच्चारयेत्यादौ गंगापदादेः स्वपरत्वं लक्षणैव गंगापदादेः
यै१

नादावेव शक्यत्वेन गोपदादेस्तत्र मानतया शाब्दबोधविषयत्वासंभवात् । प्रत्युत गामुच्चारयेत्यादौ
र्थोच्चारणासंभवेन विना शब्दविषयकत्वे शाब्दबोधानुपपत्तेश्च गोपदादेर्गवादिपदमपि शक्यमेव
न च लक्षणया निर्वाहः । न च गङ्गादशमाहेत्यादौ स्वशक्याभावेन लक्षणयाऽसंभवात् लक्षणाग्रह
विनापि शाब्दबोधाच्चेति शाब्दिकैरुक्ते तदसत् वृद्धात्परइत्यादिसूत्रे नजादिप्रत्येकवर्णानामेव वृद्धि
तो पार्थक्ये न तेषां चैकाक्षरकोशेन स्वस्वार्थशक्तिसत्त्वे न तत्संबंधेन स्वत्वलिङ्गलक्षणासंभवात् ल
क्षणयाऽग्रहेऽपि च शक्तिभ्रमादेव स्वतः स्वस्योपस्थित्या शाब्दबोधसंभवात् यदपि पदानामौत्सर्गि
कमर्थपरत्वमेव तदभावे च स्वपरत्वं गामुच्चारयेत्यादौ वाच्यार्थबोधे न स्वपरत्वात् स्वपरत्वेन
स्वसापेक्षतादात्म्यसंबंधादेव स्वस्मात्स्वोपस्थितिसंभवादिति तैरुक्तं तदपि न प्रत्यक्षोपस्थितघटा
देरभ्रपतासंबंधेनोपस्थितगगनादेश्च शाब्दबोधवारणाय वृत्तिज्ञानजन्योपस्थितेरेव शाब्दबोधहे
तुत्वेन स्वसापेक्षायाभावस्यकत्वात् । एतेनाश्रोत्रप्रत्यक्षोपस्थितस्वपरत्वमेव पदानामुपस्थितापबोध

कत्वस्य वत्साद्यवेन क्लृप्तत्वान्न च से सस्य गोरवेणा भेनेत्यादि सपितेषां प्रलपितमपास्तं प्रसक्तानां प्र
कृतस्यार्थस्वितत्वार्थपरत्वस्तुत्यत्वागोपदादेर्गोपदार्थत्वाभावेन तत्रैभक्त्यार्थस्योच्चारणकर्मत्वादेरन्वया
स्य प्रसंगाच्चा अन्यथा कथं चित्वस्तत्तीरादेरन्वयसंभवेलक्षणोच्छेदापत्तेः किं च गामुच्चारयेत्यादौ
विरूतं गोपदमेवोच्चारणाकर्मस्यान्नेत्वैव विरूतं गोपदं । विरूतत्वस्य च श्रोत्रप्रत्यक्षोपस्थितत्वात् । अपि
च एकं पदमुच्चारयेत्यादौ पदांतरं नोच्चारणकर्म स्यात् किंतु श्रोत्रप्रत्यक्षोपस्थितं एकमित्यादिपद
मेव । यत्तु वृत्तिज्ञानजन्यपदार्थोपस्थितं शाब्दबोधहेतुस्तेपि न गामुच्चारयेत्यादौ गोपदादेः शाब्द नन्पु५
बोधत्वुपपत्तिः निरूपकतात्र यत्तान्यतरसंबंधेन वृत्तिज्ञानजन्यस्य स्वस्यैव पदार्थोपस्थितिना[illegible]पे पं४
न्ययोपप क्षितत्वेनों[illegible]पत्तिः निरूपकतासंबंधेन गोपदादिशास्मैव गोपदादेः पस्थिति संभवात् त्याग रू
३ वादौ वृत्तिसत्वेपि तात्पर्यविरहान्न शाब्दबोधः उच्चारयेत्यादि समभिव्याहारेण गोपदादौ स्वपर
त्वनिर्णयात् । एतेन गामुच्चारयेत्युक्ते विरूतत्वस्य चोच्चारणापत्तिः तात्पर्यस्य च श्रोत्रेणोपस्थितेः शाब्दस्या

प्रकृत्यर्थतया तत्र द्वितीयार्थान्वयापत्तिः त्वस्यैव प्रत्ययेन शीघ्रमुपस्थितेः सा गौरवात्तीस्यादावपि स्व
परत्वापत्तिश्चेत्स्यादिपरास्तत्तात्पर्यवशाद्धसाऽविरुद्धतस्यैव शाब्दादुपस्थितेः न चैवं तात्पर्यमात्रेणैव स
र्वत्र निर्वाहे वृत्तिमात्रोच्छेद इति वाच्यं तस्य शाब्दसामान्येऽहेतुतया कश्चिच्छाब्दबोधस्य प्रमात्वनियामक
त्वेन वृत्तिं विनाऽनिर्वाहादिति तदप्यसत् तथासति स्वरस्पर्शाश्रयत्वसंबंधेन पदमात्रात्स्मृतौ
शाब्दबोधप्रसंगात् तात्पर्यस्योपस्थितौ प्रमात्वे चानियामकत्वाच्च प्रमात्वे विषयाबाधस्यैव नियामक
त्वाच्च। नवीनशाब्दिकास्तु यथा संसर्गे वृत्तिविरहेप्याकांक्षादिवशात्संसर्गस्य शाब्दबोधे भानं तथा शा
सौन सामान्यस्याप्यन्वये च सर्वत्र शाब्दबोधे शाब्दभाने शाब्दसामान्यसामग्र्या एव शाब्दभासकत्वकल्प
नादिलिंगानुसारपेक्षाहौ वृत्तिं विनैव शाब्दभानं एवं च प्रकारत्वादिविशेष्यतान्यतरसंबंधेन पदभिन्न
विषयकशाब्दबोधं प्रत्येव वृत्त्यापदजन्योपहार्योपस्थितेः कारणत्वकल्पनेऽपरपदानां प्रकृत्यर्थान्वित
स्वार्थबोधकत्वमितिव्युत्पत्तौ प्रकृत्यर्थत्वेनैव प्रकृतेन नबोधविषयत्वमितिलिंगानुसारपेक्षाहौ नकेचित्

घन्वयानुपपत्तिः न च घटपदजन्यविधेसकल्पपर्यायाणांभानापत्तिर्विनिगमकाभावादिति वाच्यं। तत्पद
बोधे तत्तत्पदत्वेन घटादिशक्तिग्रहसामान्याहेतुत्वेनादोषादित्याहुस्तदसत्। शाब्दसामग्र्याः शाब्दमासकल
कल्पने मानाभावात् उपस्थितिजन्यतावच्छेदके पदभिन्नविषयकत्वनिवेशे गौरवात् शाब्दबोधप्रवृ
त्तित्वेनाजनकतया प्रवृत्तित्वेन प्रवृत्तिजन्यत्वविलक्षणासंभवेन प्रवृत्तिजन्यप्रवृत्तिजन्यबोधविषय
त्वस्यातिप्रसक्तत्वाच्च। वस्तुतस्तु सर्वत्र शाब्दबोधे शाब्दभानेन संभवति। यत्र भिन्नविषयकानुमितिसा
मग्रीकाले घटादिशाब्देच्छया शाब्दबोधः तत्र घटशाब्दादिसाध्वेच्छाविरहविशिष्टभिन्नविषयकानुमि-
तिसामग्रीरूपप्रतिबन्धकसत्वेन घटशाब्दादिशाब्दबोधानुपपत्तेः। न च तादृशसामग्रीप्रतिबन्धकता
यां घटशाब्दादिशाब्देच्छावद्घटादिशाब्देच्छाया अप्युत्तेजकत्वोपगमान्नोक्तानुपपत्तिरिति वाच्यं। तथा
सति तादृशानुमितिसामग्रीसत्वे घटादिशाब्देच्छासत्वे घटादिशाब्दसामग्र्यसत्वे घटशाब्दादिशाब्दबो
धापत्तेः तादृशेच्छाविषयसिद्ध्यसंभवेनोत्तेजकत्वासंभवात्। तत्तदिच्छाभावकूटस्यैकत्र निवेशोऽपि यो वि

शेष्यविशेषणभावे विनिगमनाविरहेणानेककार्यकारणभावकल्पनापत्तेश्चेति न किंचिदेतत् । ननु
शाब्दबोधे शब्दस्याभाने पर्यायादिप्रक्रमभंगस्य दोषत्वानुपपत्तिः भिन्नप्रकारकप्रतीतिजनकस्य तद्दूष
कताबीजत्वेन भग्नप्रक्रमते पर्यायादिस्थले तद्दोषसंभवादिति चेन्न शाब्दे नोपक्रमस्तत्किन्तु शाब्दे नोपसंहा
रस्यैव रसापकर्षकत्तयाचमत्काराभावप्रयोजकत्वतया तद्दूषकताबीजत्वात् अत एव नैकं पदं द्विः
प्रयोज्यं प्रायेणेति वामनसूत्रे प्रायेणेत्युक्तं उदेति सविता ताम्रस्ताम्र एवास्तमेति चेत्यादावुद्देश्य
प्रतिनिर्देश्यस्थले शब्दांतरोपादाने प्रकाराभावादिति तदाशयात् अधिकमन्यत्रानुसंधेयं । ननु शा
ब्दिकमते शाब्दबोधे शब्दभाने पिगमेन घटत्वादिरूपेण विशिष्यगृहीतशक्तिकेभ्यो घटादिपदे
भ्यः पदजन्यास्मुभयप्रकारको बोधः विशिष्याज्ञातार्थकेभ्यो नलरामादिपदेभ्यस्तु नलत्वादिधर्मानु
पस्थितौ विशिष्यशक्तिग्रहासंभवेन सामान्यरूपेणोपस्थितव्यक्तौ नलादिपदं शक्तं विशिष्टं साधुप
दत्वादिति सामान्यतो दृष्टानुमानेन नलादिपदवाच्यं कश्चिदर्थोस्तीत्याकारकशक्तिग्रहात् केवल

यत्तु विशेष्यकः केवलपदप्रकारको नत्वादिपदवाच्यः कश्चिदर्थस्तत्साकारको बोध इति वक्तुं शक्यते
ऽयमत्र उपदर्शितदोषदुष्टमिति नत्वरामादिपदेभ्यः कथं शाब्दबोधः यत्तु बुद्धिविषयतावच्छेदकत्वेनानु
गतधर्मेण निरुक्तधर्मविषयकसंस्कारस्य सामान्यप्रत्यासत्त्याधीनानुभवमूलकस्य सत्त्वेन
बुद्धिविषयतावच्छेदकत्वांशमादाय स्वरूपतो नत्वत्वादिप्रकारकं स्मरणं निराबाधमेवेति तन्मूल
कशाब्दिकग्रहमूलकमेव स्वरूपतो नत्वत्वादिप्रकारकशाब्दज्ञानं भविष्यतीति किमनुपपन्नं । न च स्व
रूपतस्तत्प्रकारकस्मरणे स्वरूपतः तत्प्रकारकारकं कदाचिद्दृष्टस्याकारकं कदाचिज्जातिमान्घटस्त
साकारकं विलक्षणस्मरणमिति नियमानुपपत्तिरिति वाच्यं । उद्बोधकवैचित्र्यादेव तदुपपत्तेः स्व
रूपतो घटत्वादिप्रकारकानुभवजनितसंस्कारवतो जातित्वादिना घटत्वादिप्रकारकसंस्कारात्क
दाचित्स्वरूपतो घटत्वाद्यप्रकारकस्य जातिमानित्याकारकस्मरणस्योदयेन स्वरूपतस्तत्प्रकारकोऽस्म
तौत्ता दृशानुभवसंस्कारयोर्विशेष्यहेतुत्वेपि उद्बोधकविशेषविरहदशायां तादृशास्मृतिविरहस्यैक

तायाआवश्यकत्वे स्वरूपतत्संततभाव्यतादृशहेतुताया अप्रामाणिकत्वात् अथैवमुद्बोधकवैचित्र्यस्य
नियामकत्वमुपेत्य तादृशहेतुताया अनुपगमे विशेष्यविशेषणभावोभयोप्युद्बोधकविशेषस्य निया
मकत्वमुपेत्य प्रकारत्वविशिष्टत्वानंतर्भावेण सामान्यतस्तद्विषयकस्मृतौ तद्विषयकत्वेन संस्कार
त्वेनैवपोर्हेतुतापत्तिरिति चेन्नानुगतोद्बोधकस्य तत्स्वरूपतस्तत्प्रकारकज्ञानाद्यसहेस्वरूपत
स्तत्प्रकारकस्मरणापत्त्या तादृशहेतुत्वस्यावश्यकत्वादिति केचित् कुर्वते तदसत् एवं हि व्यवहितचै
त्रेपि चैत्रत्वजातीयशक्तिग्रहसंभवेन तत्र मेयं चैत्रत्वेन परस्परस्मरणं तत्र चैत्रो नायमिति प्रमार नेत्रा
केन चैत्रभेदं न गृह्णीयात् तत्र तत्ताबाधात् चैत्रं दृष्ट्वा चैत्रशब्दं नियतः स्मरेत् तत्पदप्रवृत्तिनिमि
त्तविशिष्टपिंडमात्रस्यैव संज्ञासंस्कारनियतोद्बोधकत्वात् अतएव हरिणोक्तं। पदसंज्ञास्मरणं
तत्र न तद्व्याप्यहेतुकं। पिंडत्वहि दृष्टसन् संज्ञां स्मारयितुं क्षम इति। एतेन नरत्वादिसंसर्गकबोधा
नंतरमुपनीत नरत्वादिविशिष्टशक्तिग्रहशाब्दबोधोदयउपपादितः। यद्वा नरत्वादिविशिष्टगोचर

अनादपसंस्कारपरंपरास्तत्तद्बोधकवशादुद्बुध्यंत इति नत्वत्वादिविशिष्टे न शक्तिग्रहानुपपत्ति
रित्यपि परास्तमिति। चेदत्र केचित्तु नत्वादिपदेर्ष्वि द्वाच्यकं साधुपदत्वादिति सामान्यतो दृष्टानुमाने
न जायमानानुमितिः पक्षधर्मताबलान्नत्वादिवाचकत्वे विपर्यीकरोति विशिष्टपक्षस्य विरोषणता
नहेतुत्वेपि अनुमित्यादौ परामर्शादेरेव नियामकत्वोपगमादतो न नत्वादिरूपेण शाब्दबोधानुप
पत्तिरित्याहुः। अन्ये तु औत्सर्गिकत्वे ककारादीनां स्वाभाविके च सामान्येन सर्वेषामनुभूतेन च जातेः स्वरूपतो
नुभवस्य सर्वोनुभवस्य सांसर्गिकत्वादुपनयसंसर्गभित्तजातिप्रकारकमुपनीतभानं कश्चिदुपगम्यते
तथा नत्वादिपदादरवा साधबोधः संभवतीत्याहुः। वस्तुतस्तु ककारादिपदात्ककारादिपदापत्ती
दिप्रकारकं एव शाब्दबोधो लक्षणया संभवति न च नत्वादिविशिष्टे शक्त्यग्रहात्स्वशक्यसंबंधरूप
लक्षणाग्रहोपि न संभवतीति वाच्यं सामान्यरूपेण तत्रापि शक्तिग्रहसत्वात् वृत्तिसंसर्गकस्मरणस्यापि
हेतुतापाउत्वे न लक्षणासंसर्गकबोधे शक्तिग्रहस्यानपेक्षणीयत्वाच्च केचिद्विसारं एवं राजपुरुषस्या

४ = पदसंबंधी योयं विधिः समासादिरूः ४ = समुदायरूपस्या विशिष्टार्थो यस्य तत्त्वं = ४

सा. कौ. = पक्षांतरे अर्थसामर्थ्याश्रितपदस्यैवेति सूत्रार्थः = ४

१८२

दिसामासे पि राजादिपदत्वलक्षणये वशाद्बोधः राजपुरुष इत्यादौ राजकीयः पुरुष इत्यादिबोध
वारणाय नामर्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नतया राजपुरुष इत्यादिसमासे लक्षणां विना राजकी
यः पुरुष इत्यादिशाब्दबोधासंभवात् एवं च राजादिपदस्य राजसंबंध्यादौ लक्षणा तस्य चाभेदेन पुरुषा णा
दावन्वय इति पक्षे तु समर्थः पदविधिरिति सूत्रेण कीभावरूपसामर्थ्ये समासविधानेन राजपुरु
षादिसमुदायस्यैव राजकीयपुरुषादौ शक्तिरावश्यकीति समासशक्तिवादिभिः शाब्दिकैरुक्तं तदसत्।
५५ तेन सूत्रेण कांक्षादिवशात् परस्परान्वयबोधकत्वात्मकैकार्थीभावरूपसामर्थ्ये एव समासविधाने
न समुदाये शक्तौ मानाभावात् अत्र कार्थीभावरूपसामर्थ्यवादिनो न व्यपेक्षाकरणाः समासे एका
र्थीभावरूपसामर्थ्याभ्युपगमे राजपुरुष इत्यादिसमासैकदेशराजादिपदार्थविशेषणान्वयोद्
बोधः तथा च सुंदरस्य राजपुरुष इत्यादिप्रयोगप्रसंगः तथाहि राजपदोपस्थापितो राजा स्वस्वामिभाव
संसर्गेण भेदेनापि पुरुषे अन्वेति निपातस्य च समासावयवस्यापि भेदेन प्रातिपदिकार्थेन्वयेत्युत्पत्तिवैचि १८२

= अवयवैः ~~[illegible]~~ आकांक्षादिवशात् तादृशार्थो यस्य =
इत्या पक्षांतरं = ५

न्यात्। यद्वा लुप्तषष्ठीस्मरणजन्यपदार्थोपस्थितिसहकारेण विग्रहवाक्यादिव समासादपि कार्यबोध
इति हि व्यपेक्षावादिनां नैयायिकानां मते तथा च विग्रहे लुप्तविभक्तिकदध्यादिपदार्थस्य दध्यादेरिव समा
सघटकराजादिपदार्थस्यापि विशेषणयोगो ऽ[illegible]ष्टः अथ सविशेषणानां [illegible] वृत्तिर्न वृत्तस्य वा विशेषण
योगो नेति वार्त्तिकात् सुंदरस्य राजपुरुष इत्यादिप्रयोगो न साधुरिति चेत् पदार्थैकदेशपदार्थान्तरस्या
न्वयबोधकमसाधु यथा योगो नित्य इत्यादाविति न्यायस्यैव वार्त्तिकमनुवादकं न तु विधायकम् अत एव
चैत्रस्य नप्तेत्यादाविव देवदत्तस्य गुरुकुलमित्यादावपि पदार्थैकदेशान्वयेपि वाक्यमसाधुतो[illegible]प
सिद्धांतापत्तिर्भवति वैनित्यसापेक्षस्य समास इति वार्त्तिकमप्यनुवादकमेव यदाहुः बहूनां वृ
त्तिधर्माणां वचनैरेव साधने स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रित इति। संबंधिशब्दः सापेक्षो
नित्यः सर्वः समस्यते। वाक्यवत्सा व्यपेक्षास्य वृत्तावपि न हीयते इति च। यत्तु चैत्रस्य नप्तेत्यादावपि प्र
कारीभूततजन्यजन्यतादिसंबंधेन नप्तरि चैत्रादेरन्वयः न तु पदार्थैकदेशोपस्थितेः। यदाह हरिः समुदा

वा१
नां३
न्या५

येन संबंधायेषां गुरुकुलादिना संसृष्टस्याचपवांस्तेतु युज्यंते तत्द्धृता सहेति वर्णयंति तन्न तेदेवदत्त
स्य गुरुकुलमित्यादावपि कुलएवदेवदत्तादेरन्वयः नतु गुरावित्यत्रि सुवचां । नन्वेकार्थीभावास्तु
पगमेपि द्वंद्वोपात्तस्यैकदेशत्वाभावात्तत्र पदार्थेति न्वयो दुर्वारस्तथा चान्वाचयस्यत्वेपि द्वंद्वसंग
इति चेत् पुष्पवंतादिपदोपात्ते चंद्रमसि शोभान्वये न पुष्पवंतौ शोभितावित्यस्य साधुतावारणाय धर्म
द्वयावच्छिन्नकशक्तिमत्तः पदस्य स्वार्थैकदेशान्वयस्य साधुत्वावधारणात् । अथ राजपुरुष इ
त्यादौ राजपदं राजसंबंधिलाक्षणिकं अन्यथा राजपदार्थस्य पुरुषेभेदनान्वयो न स्यात् । नामार्थ
योर्भेदेनान्वयस्याव्युत्पन्नत्वात् । न च निपातस्य लइव समासेपि तादृशाव्युत्पत्तेः संकोचान्न दोष इति
वाच्यं । दृष्टांतासिद्धा संकोचे मानाभावात् । न चैवं घटोनपटः चंद्र इव मुखमित्यादौ नञुपमे देरथा
र्थे सादृश्ये च घटत्वं ज्ञादेर्भेदेनान्वयो न स्यात् न स्यादेव नञादेरर्थस्य पदादौ तथान्वयः प्रति वाच्योत
त्रापि घटपदादेर्घट प्रतियोगिकादौ निरूढलक्षणोपगमात् । नापि तु तत्पुरुषे स्मरणेनेति

र्वाहः षष्ठीलोपमज्ञानेनापि बोधात्। अत एव तत्पुरुषस्य पूर्वपदलाक्षणिकत्वात् कर्मधारयस्य त्वसर्व-
शक्तत्वात् तदभावेन तत्पुरुषात् कर्मधारयो लघीयानिति साशयेन निषादस्तपत्यधिकरणसिद्धान्तोऽपि सं-
गच्छते एवं च ममापि एकदेशान्वयाभिधेये वरसुंदरस्य राजपुरुष इति प्रयोग इति स विशेषानाम-
सादि वार्तिके विनैव निर्वाहः यत्तु राजपुरुष इत्यादौ पूर्वपदे राजसंबंधिनि लक्षणास्वीकारे तस्य क-
र्मधारयत्वापत्तिः समानाधिकरणतत्पुरुषस्यैव कर्मधारयत्वात् न च यत्र समासदशायामभे-
दान्वयस्तत्र कर्मधारयः यत्र च तद्दशायां भेदेनान्वयस्तत्र तत्पुरुष इति वाच्यं नित्यसमासे विग्रह-
स्यान्यत्वेन तादृशतत्पुरुषकर्मधारययोर्व्याप्तेः आलौकिकविग्रहस्य सत्वेऽपि तस्यान्वयबोधे स्वरूपा-
योग्यत्वात् न च समासात् पूर्वं यत्र तुल्यविभक्तिकत्वं तत्रैव कर्मधारयत्वमतो न तत्पुरुषस्य कर्मधारय-
त्वं तत्र समासात् पूर्वं विरुद्धविभक्तिकत्वादिति वाच्यं पूर्वं वस्थायाः समासार्थविवक्षानुसारेणैव कल्प-
नया तत्र समासवाक्ये बोधाविरोधेन तद्रूपलक्षणकल्पनायाम् अपि संभवादिति तदसत् यत्र समास

मा·कौ·
१८४

घटकपदार्थस्यविशेष्यत्वेसतितत्तद्घटकीभूतपदानांस्वोत्तरसुबन्तेयोग्यविभक्त्यर्थविदंतर्भावेनल
क्षणांविनासामानाधिकरण्यंतत्रकर्मधारयेतत्तदर्थाभावेनलक्षणयासामानाधिकरण्येतुतत्पुरुष
त्वमितिविभागसंभवात्सप्तंतेनचपंचमृत्तीसादिव्यावृत्तिरितिचेन्नतथापिसमासस्थलेसमु
दायशक्तिस्वीकारेतत्रैकार्थीभावस्वरूपार्थवत्त्वाभावेनप्रातिपदिकसंज्ञाप्राचीनविभक्तिलोप
विभक्त्युत्पत्त्यसादिकेवृत्तिकार्यंनस्यात्।नचसमासस्यविशिष्टैकार्थकत्वाभावेनार्थवदादिसूत्रेण
प्रातिपदिकसंज्ञायाअसंभवेपिकृत्तद्धितसमासाश्चेतिसूत्रांतरेणैवप्रातिपदिकसंज्ञायासंभवान्न
दोषइतिवाच्यंकृत्तादिसूत्रेप्यर्थवद्ग्रहणानुवृत्त्यातेनापिसूत्रेणतत्संज्ञायाअसंभवात्।अन्यथा
र्थवदादिसूत्रेर्थवतोधातुप्रत्ययादीनांपर्युदासवत्वादेवार्थवत्वेलब्धेऽर्थवद्ग्रहणस्यानर्थक्य
प्रसंगात्कृदादिसूत्रेतुवृत्त्यर्थमेवतङ्पादीनांतकृत्तद्धितांतस्याभायकृत्तद्धितयोरर्थवद्ग्रहणानुवृत्त्या
रावश्यकत्वाच्चवस्तुतस्तुकृदादिसूत्रंनविधायकंतथासतिकृद्ग्रहणेगतिकारकपूर्वकस्यापिग्रहण १८४

प्रत्ययग्रहणे यस्मात् स विहितस्तदा
दितदंतस्य ग्रहणं

मिति न्यायेन मूलके नोपदेशामिस्यंतवाक्यग्रहणापत्तिः तद्धितग्रहणेन तद्धितांतमात्रे प्रातिपदिके
संज्ञाविधौ बहुगुडइत्यादौ तदभावप्रसंगश्चान च तद्धितग्रहणेन तद्धितविशिष्टमेव गृह्यते न तद्धितांत
मिति वाच्यं तथा सति पचतकी इत्यादि मध्यस्थितेन तद्धितकेपि प्रातिपदिकसंज्ञापत्तेः इत्संचार्यवदादि
सूत्रमेव प्रातिपदिकसंज्ञाविधायकं कृदादिसूत्रं तु प्रपंचमात्रं अर्थे कार्याभावात् सुपगमप्रश्ने इति
मात्रस्योपासंग्रहात् सुवंततिङंतयोश्च व्यावर्त्तनात् प्रत्ययांतपर्युदासः कृदादिसूत्रप्रपंचश्चाप्युक्तः

५५

स्यात् अतोर्थवत्त्वे वर्थस्मारक इति मतमात्रे पे साधारणं निर्बोध्या इति मद् विषयकप्रतीत
विषयत्वस्वरूपं तद्धितपरेत्यादि नियमसूत्रं इति मदैवकेसमुदाये पोस्यर्थः प्रकृतिप्रत्ययार्थवत्त्तया
कृदंतादेरर्थवत्त्वासिद्धेः प्रातिपदिकसंज्ञासिद्धौ च सुवंततिङंतयोरर्थवत्वेन तयोर्वाक्यस्य च प्रा
तिपदिकसंज्ञावारणाय कृत्तद्धितेत्यादि नियमसूत्रं प्रकृतिप्रत्ययसमुदायस्यैव तत्र प्रातिपदिकसं
ज्ञा कृत्तद्धितांतयोरेव वाक्यस्य केसमासस्यैवेति प्रत्ययांतपर्युदासस्तु न कर्त्तव्य एव प्रयोजनाभावात्

नचधातुपर्युदासात् कथं तत्र धातोः प्रातिपदिकसंज्ञानुपपत्तेर्निरुक्ततद्धितेत्यादिसूत्रे विधायकक्र
मेवेति वाच्यं। कौल्पनीकविभक्त्यादिविशिष्टराजन्यसपुरुषसुरसालौकिकप्रक्रियावाक्यसमास
संसेवकाल्पनिककिंवादिविशिष्टप्रातिपदिकसंज्ञत्त सुपगमात्। अन्यथा कृत्तद्धितेति सूत्रेणा
पि तद्ग्रहणानुपपत्तेः। नचैवं धनं वनमित्यादौ प्रत्येकवर्णानां प्रातिपदिकसंज्ञात्तसमुक्तौनका
रलोपप्रसंगः स्यादिति वाच्यं। वर्णानां समुदायवृत्त्यार्थवत्त्वं प्रत्येकवर्णवृत्त्या वानाघः इति महदितत्त
स्वित्प्रत्यार्थवत्त्वस्य तदवयवेषु [illegible] भावात् नोत्यः शाब्दबोध[illegible] न कुपदार्थेऽपि स्थितिजनकेवस्त्यर
धिकरणं। यस्य समुदायस्तदविषयकप्रतीत्यविषयत्वमर्थवत्त्वं न हि समुदायावयवे प्रत्येकवर्णे
विद्यमानापि वृत्तिः पदार्थस्मारयतित्तज्जनिता वा स्मृतिः शाब्दबोधमर्जयतिः भवतु वाऽर्थवत्त्वेऽर
तिमत्समुदायावयवानामर्थकत्वमेव स्वीक्रियतां च पंकजादिपदे पंकजनिकर्तृपद्मत्वावच्छि
न्नेविशिष्टरूढिः नह्येतावता केवलयौगिकेसमासेतत्सिद्धिरितिचेन्नेन यापि बकु औलेरासिक

ल्पनं विना चित्रगुरित्यादौ चित्रगोस्वामिनो बोधोपपादनमशक्यमेवं । न च गोपदस्य गोस्वामिनि लक्षण
या तस्त्राभः पदार्थैकदेशे गविचित्रादेरन्वयप्रसंगात् । नापि गोपदस्यैव चित्रागोस्वामिनि लक्ष
णा चित्रापदं तात्पर्यग्राहकमिति युक्तं चित्रगोपदयोर्व्यपेक्षालक्षणसामर्थ्यस्याभावेन समासा
नुपपत्तेः न च गोपदाच्छक्त्या गोलक्षणया स्वामिन्युपस्थितौ तत्र स्वार्थविशेषणीभूतायां गवि चित्रा
यास्तादात्म्येनान्वयाच्चित्रगोस्वामीत्यन्वयबोधोपपत्तिः एकपदोपात्तयोरपि वृत्तिवर्तमानत्वयोः प
रस्परान्वयबोधदर्शनेन तत्र हेत्वनुपपत्त्यभावादिति वाच्यं । प्रातिप[illegible]कार्थयोर्गोस्वामिनोर्भेदे
नान्वयबोधस्याव्युत्पन्नत्वात् न च चित्रागोपदयोरुभयोरपि चित्राभिन्नगोस्वामिलक्षणः परस्परं
दोक्तोल्स्येनानन्वयाव्यपेक्षप्रसक्तेर्वजातएववृत्तसुरूपापेक्षयाधिकबहुव्रीहिर्जघन्य इति प्रवादः । बहु
व्रीहावुभयपदस्यैव लाक्षणिकत्वादिति वाच्यं । बहुव्रीहावेकशेषद्वन्द्वान्यतरप्रसंगात् समानरूपा
वच्छिन्नयोरभेदान्वयबोधस्याव्युत्पन्नत्वाच्च । यदि च क्वचिदेकदेशान्वयस्यापीष्टतया गोसंबंधित्वा

क्षणिकगोपदार्थैकदेशागविच्छिन्नापदार्थान्वयो नानुपपन्नः अन्याभ्यां प्रातिपदिकाभ्यामुपस्थितयो
रेव न भेदेनान्वयबोधः एकप्रातिपदिकोपस्थितयोस्तु भवत्येवेति गोपदलक्ष्यस्वामिनि गोपदशक्य
स्य भेदेनान्वयबोधोपगमेपि क्षतिविरहादिति विभाव्यते तथाप्यषष्ठ्यर्थबहुव्रीहौ प्राप्तोदको ग्राम
इत्यादौ व्यपेक्षारूपसामर्थ्योपगमेकपमपि नाभिमतान्वयबोधनिर्वाहः तथाहि प्राप्तेरुत्तरदेशो
पहिते कर्मत्वप्रत्ययस्य कर्तार्थः तेन प्रातिपदिकार्थकर्तृत्वमपदार्थः उदकपदं चेत्त्वन्मते जलसंबंधिनि ल
क्षणिकं तदेकदेशे जले प्राप्तस्य तादात्म्येनान्वयः न त्वेतावतापि उदककर्तृकप्राप्तिकर्मग्रामस्यान्व
यबोधनिर्वाहः अभिमतश्च तादृश एवान्वयबोधः तस्माद्व्यपेक्षारूपसामर्थ्योपगमे निर्वाहादेकार्थी
भावरूपसामर्थ्यमुपेयं तच्च समुदायशक्तिं विना न निर्वहतीति समासे शक्तिसिद्धिरिति वदन्ति अत्रान्
ते प्राप्तोदको ग्राम इत्यादावषष्ठ्यर्थबहुव्रीहौ समुदायशक्तिं विनाप्यभिमतबोधसंभवस्त्वेवं तथाहि
तत्र प्राप्तिप्रकृतिकत्वप्रत्ययस्य च कर्ता कर्म चार्थः उदकं तादात्म्येन कर्तरि स्वनिरूपकतया प्राप्तौ

चकर्मणीत्यत्र विशेषणविशेष्यभावे सासमात्रेण कर्मपदार्थैरेवाद ककर्तृकमाभिकर्मत्वमइत्यभि
मतबोधो निर्वाह इति तु शक्यते । न च विशेषणविशेष्यभावे सास कल्पन गौरवमिति वाच्यं । समुदा
येतिरिक्तशक्तिकल्पनामपेक्ष्य तत्कल्पन एव लाघवात् । किं च समासस्थले समुदायशक्तिकल्पने राज
पुरुषं गं नास्तीत्यादौ राजपुरुषंग पदे समासानुपपत्तिः तत्र राजपुरुषंग स्यात् लौकिकत्वाविशिष्टार्थे समुदाय
शक्तेरसंभवात् । न चास तत्र समासानुपपत्तिरिष्टैवेति तत्र शक्तिसंभवतीति वाच्यं । अलौकिकेसति कर्षोपस्थिसंभवे न
मस्सक्षादिप्रमाणत्वव्यापत्तेः सत्तेरव्यातेरसंभवात् । अपि च यदि समासस्याखंडस्य शक्तिस्तदा तत्स्या
गृहीताया नोपयोग इति गृहीताया एवोपयोगित्वं वाच्यं । न हि राजपुरुषं गादिशब्दानामपदार्थे
सह शक्तिरूपसंबंधग्रहसंभवति तथा हि परबुद्धिविषयतया विशेषणतउपस्थितेः लौकिके शक्तिग्र
हः सामान्यतउपस्थितेन च वा शक्तिग्रहः परबुद्धिविषयतया विशेषणतउपस्थितिरपि परबुद्धि
रूपकेन यापरबुद्धिविरूपणेनावश्यपेक्षत्वात् । व्यवहारविशेषणपरबुद्धाउन्नीयमानायां बुद्धि

शेषणत्वेनोपस्थितत्वात् तत्र नाद्यः परवृत्तेरुद्देश्यत्वाय दिम सत्त्वरूपः स्यात्तदा तस्मिन्नुद्देश्ये विषयोद्दे
श्यत्वेन स्वैवं परवृत्तेरनुद्देश्यत्वात् । न द्वितीयः नहि कश्चिदलौके व्यवहारोऽस्ति येनोन्नीयमानायां
वृत्तौ विशेषणतया विशेषतः शशशृंगादिर्भासेत । न च शशांतरोपस्थिते शशशृंगादौ शशशृंग
दिपदसंकेतग्रह इति वाच्यं । पदांतरस्याप्यगृहीतसंगतिकत्वेनाप्रतिपादकत्वात् तेन च शशशृंगादि
शब्दः उच्चारयितृतात्पर्यपूर्वकः वाक्यत्वात् शुकादिभिन्नोच्चरितशब्दत्वादित्यनुमाने न सिद्धे तात्पर्ये त
तात्पर्यसविषयकमित्यनुमित्सागृहीते तात्पर्ये विषये शशशृंगादिशब्दसंकेतग्रह इति सामान्य
तउपस्थितिप्रक्षायुक्तः इति वाच्यं । एतादृशसमयग्रहसंभवेपि तस्य शाब्दबोधानुपयोगित्वात् । नहि
तात्पर्यविषयत्वोपलक्षिते धर्मिणि शक्तिग्रहः शाब्दबोधोपयोगी किंतु गोत्वादिविशिष्टे अन्यथा
गां वधानेति वाक्यात् तात्पर्ये विषये सामान्यतो गृहीतसंकेतैः पदैरगृहीतविशेषसंगतिकानां शा
ब्दबुद्धिप्रसंगात् । ननु विशेषणतरीभूतप्रवृत्तिनिमित्तगोत्वादिधर्मविशिष्टे गवादौ गवादिपदशक्ति

ग्रहो गोत्वादिविशिष्टमेव बोधयति शशशृंगादिनो तु निर्धर्मकानां शब्दबोधो बुद्धिविषयत्वरूपयोपस्थ
क्षणाधर्ममात्रं पुरस्कृत्य शक्तिग्रहमपेक्षते तदुक्तं विशेषांतरविनाहृतः केवलनाममात्रविषयोस्य वाच्य
इतीति चेन्न एवं सति कूर्मरोमशशशृंगविकल्पयोरविशेषप्रसंगात् । नहि प्रवृत्तिनिमित्तस्याभावे कू
र्मरोमन शशशृंग पदार्थ इति वक्तुं शक्यं किमपरं घटोपि भवतां मते अलीक इति सर्वोपि शब्दस्तत्कल्प
मेव विकल्पं जनयेयुः यत्तु सर्वेपि प्रतिपत्तारः स्वस्ववासनानोगृहीतशशशृंगशब्दादिसंगतिकार
ति सदसत्त्वअतिप्रसंगात् अनुभवं विना संस्कारापरपर्याय वासनाया असंभवाच्च एतेन तत्तदर्थे स
मासे विदधता व्याकरणेन तेषु तेष्वर्थेषु समासस्य शक्तिरेव प्रतिपाद्यते अन्यथा कथंचिदपि व्याकर
णोक्तिर्निर्णया संभवः तथा च शशशृंगाद्यखंडशब्दप्रतिपाद्यं किंचिद्वक्तव्यमेषितव्ये यत्र व्याकरणे
न तत्तत्सामासानां साधुत्वानुशासनं मिथ्याविपरातत्वं । उक्तरीत्या शशशृंगादिशब्दे शक्तिग्रहासंभवात् ।
अत एव पंडितो ब्राह्मणः पाचकः पाठक इति वत् पंडित ब्राह्मणपाचकपाठकइत्यादावुद्देश्यविधेयभावे

व्या.कौ
१८८

नान्वयवारणाय समुदायशक्तिमूलकैकार्थीभाव आवश्यकः सति हि तस्मिन् घटपदाद् घटत्वयो
र्विवेतरसंसृष्टस्वार्थस्य वसमासादुपस्थितेरुद्देश्यविधेयभावेनान्वयनियामिकायाः दृष्ट्युपस्थितेर
भावान्न दोषः अत एव चैत्रकर्तृकः प्रथमभक्ष इत्यत्र चैत्रकर्तृविशिष्टभक्षानुवादेन प्राथम्यविधानाप
त्तिमाशंक्य प्रथमभक्ष इति समस्तमेकपदं तत्रैकपसरत्वान्नैकदेशेन चैत्रकर्तृविशिष्टभक्षणबुद्धि
स्यापरोक्षेणानुवादेन प्राथम्यविधानं युक्तं तथा सति प्रसरभेदात् सामर्थ्यविघाते न समासो न स्यात् एतेनैके
वल भक्षानुवादेन प्राथम्यं विधीयते तत्र स्यपपास्तं न च स विशेषणत्वाद् इति नैस्यात् प्रधानस्य तत्त्वे
क्षत्स्वभावात् तस्मात् प्राथम्यविशिष्टभक्षान्तरविधिरिति मीमांसकाः तस्मात् पान्वयबोधे उद्देश्यवा
चैकपदसमभिव्याहृततदसंसृष्टार्थकबोधकविधेयवाचकपदमन्योपस्थितिरेव तन्त्रं । अन्वत
था शाब्दबोधं प्रति उद्देश्यविधेयवाचकपदं ते केसमस्तपदाभिन्नपदजन्योपस्थितिहेतुरिति गौ
रवे पीतवासा इत्यत्रतु न इत्यादौ च न दोष इति वाच्यं ~~अव्ययपदार्थे नोद्देश्यो विधेयमात्रमविवक्षित~~ सकलह

१८८

त्तिभेदघटितगुरुतरकार्यकारणभावकल्पनापेक्षया एककार्यभावस्वीकारे लाघवात् नन्वेवं सप्तदशा
रत्निर्वाजपेयस्य यूपो भवति लोहितोष्णीषा ऋत्विजः प्रचरंति यद्यपि चतुरवत्ती यजमानः पंचावत्तैव
वपा कार्येत्यादौ वाजपेये यूपारत्निम्लोषिमवत्तनानुपसंदशात्वलोहित्यपंचत्वानां विधानेन स्या
दिति वाच्यं। अत्र यूपारत्न्युष्णीषावत्तानामतिदेशप्राप्तत्वादतिदेशादुपदेशस्य बलवत्वेन तेषु रत्नेः(
पूर्वमेवैतद्विशिष्टविध्यंगीकारणासत्तेः तत्सप्तदशत्वानां तु सप्तदशत्वलोहित्यपंचत्वमात्रेषु तात्पर्यंग
म्यते इति तावन्मात्रविधिस्वरूपरेशः नन्वेवमनपारीत्याभपमभशरस्वत्वापि साप्यव्यविशिष्टभसां
तरविधिर्न स्यादिति वाच्यं। तत्रोभयोरप्युपदेशेन तथात्वे कुमशाक्रमत्वादि साधुनि कत्वाद्विकोक्तिरपि
परास्तां। पैष्टिकब्राह्मणरस्यादावुद्देश्यविधेयभावे नान्वयबोधाभावस्यानुभविकत्वे विवादे संभवेन
मादृशान्वयबोधे बाधकाभावेन तद्धारणाय निरुक्तैककार्यभावस्यानावश्यकत्वात्। घटपदे घटं घटत्वयो
र्घटशुपस्थितिस्वभावेन तथान्वयबोधाभावेपि पैष्टिकब्राह्मणरसादौ समुदायशक्तिकल्पनाविशिष्टोपस्थिते

रूपत्वग्रहपत्वेपि समासघटकपंडितपदवाच्यलक्षणपदजन्योपस्थितेः पृथगुपस्थितपातपान्वयबोधस्वभाव
तामपि द्रुवीरत्वाच्च। अत एव सादिकमपि मंदमीमांसकैः सादृशो कार्यीभावानभ्युपगमेन तेषां तन्म
ल्कमसांतरविधुपगमस्यासंगतत्वात्। न च तदेकदेशे भिन्नतादृशो कार्यीभावोऽस्तु पपत इति वाच्यं
तदनभ्युपगंतृणां मीमांसकानामपि भसांतरविधुपगमेनतदुपपादनवलेनैव सर्वेषांभसांतरवि
धुपगमसंभवात्। किंच भवतां समासे समुदायशक्तोऽपि त एव निषादस्थपतिं याजयेदित्यत्र
निषादस्थपतिपदे कर्मधारयएव न तु तत्पुरुषः तत्पुरुषात्कर्मधारयस्य लघुत्वादिति निषादस्थपत्य
धिकरणीयमीमांसासिद्धांतविरोधो दुष्परिहरः सर्वत्र समासे एकार्थीभावानुरोधेन समुदायशक्तेराव
श्यकत्वेन कर्मधारयतत्पुरुषयोर्विशेषणत्वाद्यभावात्। अथोक्तसिद्धांतो नोक्तलाघवमूलकोऽ
पेनोक्तानुपपत्तिः स्यात् किंतु वैदिकसमासस्य कर्मधारयतत्पुरुषान्यतरत्वसंदेहे कर्मधारयत्वमेव न
तु तत्पुरुषत्वमित्यनादितात्पर्यमूलकनियममूलक एवेति न तद्विरोधः पदसमासस्य विशिष्टोपस्थि

क्तो निषादरूपः स्थपतिः समासार्थो निषादानां स्थपतिरेव वर्णिको निषादभिन्नस्य समासार्थपर्यवसितसंदेहे निषा
दभिन्नोपस्थिते केस्य न प्रयुक्तलाघवेन निषादरूपस्थपतिरेव समासार्थ इति लाघवमूलक एवोक्त
सिद्धांत इति न तद्विरोध इति चेन्न तु त्वन्मतेऽपि तथा हि वषट्कर्तुः प्रथमभक्ष इत्यत्र विशिष्टोद्देश्यकत्वे
विशिष्टविधायकत्वं वेति संदेहे वैदिकवाक्यस्य विशिष्टविधायकत्वमेव न तु विशिष्टोद्देश्यके
त्वमित्यनादितात्पर्यमूलक नियममूलक एव विशिष्टविधिरिति न भक्षांतरविधिसिद्धांतवि
रोधः यद्वा विशिष्टोद्देश्यकत्वे भक्षानुवादेन प्राथम्यवषट्कर्त्रोर्विधायकत्वं वा प्राप्तस्य वानुवादेन
वचनांतरप्राप्तत्वसंधानप्रयुक्तगौरवेण वाक्यभेदप्रयुक्तगौरवेण च न विशिष्टोद्देश्यकत्वं न वा भ
क्षानुवादेन प्राथम्यवषट्कर्त्रोर्विधायकत्वं किंतु विशिष्टविधायकत्वं लाघवमूलक एव भक्षांतर
विधिरिति न तत्सिद्धांतविरोधः नचैवमेकवाक्यत्वापन्नभक्षांतरविधिरिति पर्यवसितं तत्पाचागतं ता
दृशो कार्यीभावेन तिवान्यतादृशैकार्थीभावानुपपत्तिरिति मीमांसकैरन्यैश्च समासादित्सौलङ्

न्नैवाक्ये चैकवाक्यतापा अभ्युपगमे नैकवाक्यत्वस्यैतादृशैकार्थीभावस्वरूपत्वाभावात् । न चैता
दृशैकार्थीभावस्वरूपमेकवाक्यत्वे समासादिवृत्तिमात्रस्थलीयमभ्युपेत्य वाक्याभिरूपगम्यत इति वाच्यं
वृत्तिभिन्नस्थलीयस्य वृत्तेकवाक्यतयैव निर्वाहे वृत्तिमात्रस्थलीयार्थीत्येकवाक्यत्वकल्पने प्रमा
भावात् । न च समर्थः पदविधिरित्यनुशासनेनैव न तच्छ्रमाणमिति वाच्यं । तत्र सामर्थ्यस्य व्यपेक्षा
रूपस्यैवोपगमेऽपि निर्वाहात् तस्मादुपकुर्वन्तीरित्यादौ भक्षोद्देश्यकसामर्थ्यविधेयकबोधे सति वष
ट्कर्तृदेश्यकसामर्थ्यविशिष्टभक्ष्यान्तरविधेयकशाब्दबोधबाधकाभावेन समासेनोद्देश्यविधेय
भावेनान्वय इति स्ववासनामात्रविजृम्भितमेव । प्रत्युत चैतत्समस्तवाक्यार्थबोधे वाक्यान्तरवाक्यार्थबो
धस्य हेतुत्वे भक्षोद्देश्यकसामर्थ्यबोधविनावषट्कर्तृदेश्यकसामर्थ्यविशिष्टभक्ष्यान्तरविधे
यकबोधस्यानुपपत्तेरिति मा स्म यमित्यपल्लवधीभिराल्लोन्नेनीयम् । यत्तु समासे विधेयभावेनान्वय
बोधे नीलघटो घटो नील इति समासव्यासयोरविशेषेण बोधापत्तेः कारिणामविमृष्टविधेयांशस्य

समासे दोषत्वोक्तिरसंगता स्यादिति चेन्नीकरस्यैव नीलविधेयकबोधो न समासे शाब्दः निर्दिष्टस्यैवो
द्देश्यत्वं चरमनिर्दिष्टस्यैव विधेयत्वमिति नियमादिति तदसत्। तन्नियमस्य समासे नैरपेक्ष्येन सु
पगमात् अन्यथा विधेयस्यान्यत्रानुपसर्जनत्वेऽसति उद्देश्यानंतरं निर्देश्याभावो दोषताप्रयोजकः स
मासे विधेयस्योपसर्जनता तदापत्तेर्वाक्ये तदुद्देश्यानंतरमभिधानात् तत्त्वमिति मितदुक्तेरसंगतत्वम् उद्देश्यानंत
र निर्देशाभावस्यैव दोषताप्रयोजकत्वोक्तेरनुचितत्वात्। एवं चाविमृष्टविधेयांशोऽस्य उद्देश्यविधेयभा
वेन बोधाजनकत्वं न तु दूषकताबीजं किंतु पूर्वपदेनस्यार्थसिद्धत्वस्योत्तरपदेन साध्यत्वस्याभिव्य
क्त्यापकर्षोद्दिप्रतीतिः मिथ्यामहिम्नामित्यादौ मिथ्यात्वस्योपसर्जनत्वेन सिद्धत्वबुध्या मृषात्वमपक
र्षाभिव्यक्तेः न्यक्कारो ह्ययमित्यादावपि न्यक्कारस्य सिद्धत्वाभिव्यक्त्या अभिमानिनो रावणस्यापकर्षप्रती
तेस्तस्य समासे वाक्ये च दोषत्वं। वस्तुतस्तूक्तस्य दोषताप्रयोजकत्वेऽपसर्जनत्वं समासे उद्देश्यानंत
राभिधानं वाक्ये तत्प्रयोजकः एवं च समासे विधेयस्य पश्चान्न्यासोपसर्जनत्वं तत्र यथा तथा वाक्ये पश्च तुल्य

स्यनान्योन्योपसर्जनत्वात्तत्रसमासेउद्देश्यविधेयभावेनान्वयेनकिमपिबाधकंपश्यामः किंवाविमृष्ट
विधेयांशत्वेऽपिउद्देश्यविधेयभावेनान्वयबोधानुपगमेतस्याविमृष्टविधेयांशत्वमेवानुपपन्नं विधे
यांशस्यैवाभावात्। अपि च रसापकर्षेण चमत्काराभावस्यैव काव्यदोषाणां दोषताप्रयोजकत्वे नरस
वत्काव्येऽविमृष्टविधेयांशस्थलेउद्देश्यविधेयभावेनबोधाभावेप्यन्यत्रसमासेतदंगीकारेबाध
काभावादित्याद्यन्यत्रसुव्यक्तमितिदिक्। वस्तुतस्तु समासे एकार्थीभावाभ्युपगमेऽपि न समुदाय
शक्तिसिद्धिः तथाहि। एकार्थीभावो न विशिष्टैकार्थप्रतिपादकत्वं विशिष्टस्य विशेष्यविशेषणभा
वानतिरिक्तत्वेनैकार्थ्यासंभवात् किंतु विशिष्टविषयताकबोधप्रयोजकत्वरूपमेकार्थ्यमतेमेव
तच्च समुदायशक्तिं विनाप्याकांक्षादिसाविध्यात्तादृशविषयतानिरूपितबोधजनकत्वादेवोपपन्नं
नचैवं धवखदिराविति साहित्ये समासानुपपत्तिः तत्र धवत्वावच्छिन्ननानाविषयताकबोधजनक
त्वादिति वाच्यं। तत्र योन्यविषयतापासासारं परपावानिरूपितनाधाविधेयतात्वस्यैवप्रयोजकत्वस्य

तदेकवाक्यतास्यैव निरूक्तप्रयोजकत्वरूपत्वात् धवखदिराविस्यादौ च धवत्वावच्छिन्नानाविशेष्यतानि
रूपितैकद्वित्वादिप्रकारताशालिबोधोदयान्नानुपपत्तिः । इत्थं चायमेति यमेति पुत्रा रासः पुरुषोपसर्ज
तामित्यादौ राजपुरुषपदादीनां समासवारणाय समर्थपदयोरेव समासानुशासने तत्र सामर्थ्यं निरूक्तै
कवाक्यतारूपमेव । तदेव चैकार्थीभावशब्देनाप्यपेक्षापि निरूक्तैकवाक्यतापर्यवसितैवेति व्यपेक्षैका
र्थीभावयोरपि नार्थतो भेदः किंतु शब्दभेदमात्रमेवेति व्यपेक्षैकार्थीभावयोर्भेदाभिमानं वक्तां परस्परं केचि
द्दोष्यप्रसंगो न मूलक एवेति प्रयुक्तमुपलक्षणमः एतेन समासे समुदायशक्त्यंगीकारे समासघटकपदार्थो
पस्थितिः इत्यादि राजपुरुष इत्यादिशाब्दसामग्र्याः अनंतघटपदादिप्रत्यक्षपत्तिवंधकतायां सामग्रीघ
घटकतया विशिष्टविषयकोपस्थितिरेकैव निवेश्यते इति लाघवं तदनंगीकारे तु समासघटकपद
र्थोपस्थिति इत्यादिकं निवेशनीयमिति गौरवमिति समुदायशक्तिस्वीकार एवोचित इत्यपि निरस्तो उक्त
रीत्या समुदायशक्त्यंगीकारासंभवेन प्रामाणिकगौरवस्यादोषत्वात् । वस्तुतस्तु । एकार्थीभावांगीकर्तृवैया

न्या॰ कौ॰
१८२

करणमते एकार्थीभावो नाम समासादिरूपसमुदायशक्तिः राजपुरुषादिसमुदायस्य राजसंबंधिपुरु
षादिरूपाविशिष्टार्थशक्तिरिति नार्थः तथा सति राजादिपदैः सर्वथा स्वार्थस्य राजादेस्त्यागे ननन्नानुपप
त्तेः पुरुषमात्रस्यानयने च स्यात् किंच राजपदार्थः पुरुषे विशेषणमिति व्यवहारो न स्यात्। यदि च स
मुदायेनैव राजसंबंधिपुरुषोपस्थापनेन राजादिमानोपपत्तावायदोषो न संभवति किंचे सादिद्वितीय
दोषोपि न संभजसः निष्कीणस्वियिसुमनइसुजानो दान्वयमात्रेणाचं यकपुरुष इत्यादिव्यवहारवत्।
तत्सदृशार्थान्वयमात्रेण तदारोपेण तथा व्यवहारोपपत्तेरिति विभाव्यते तथापि समुदायस्य विशिष्टा
र्थशक्तिर्नेयुक्ता अवयवानां कृतार्थत्वलक्षणत्यागेनारोपिततत्त्वीकारेणाचयोरयापत्तेः किंच एकार्थीभा
वो नामैकार्थत्वं तच्च एकोपस्थितिविषयार्थकत्वं तथा चायमाशयः यथा वाक्ये पृथक् पदैः पदार्थाना
मुपस्थितावाकांक्षादिवशाद्विशेष्यविशेषणभावापन्नविशिष्टप्रतीतिर्नैवं समासादिरूपवृत्तौ किं
त्ववयवशक्तिभ्यां समुदायशक्तिसहकृताभ्यामायमानापदार्थोपस्थितिरेव विशेष्यविशेषणभावाप

१८२

पन्नविशिष्टार्थविषयिण्येव सर्वैश्च भवति। अन्वयं वैयाकरणैः राजपुरुषादिपदं राजसंबंधवत्पुरुषे शक्तं
मित्याद्याकारक एव समुदायस्य शक्तिग्रहस्तत्र च प्रामाणाभावविवेकेन विशिष्टशक्तिः संबंधांश एव पर्यवस्य
तीति संसर्गांशसमुदायशक्तिस्वीकारेण वा कहसोः को विशेष इति वाच्यं। वाक्ये हि फलबलात्पदार्थोप
स्थितिसमये नियमतः संसर्गांशोद्बोधकासमवधानकल्पनेन दृष्टयुपस्थितयोः पदार्थयोः पश्चात्सं
सर्गबोधः वृत्तौ च पदार्थोपस्थितिसमय एव नियमतः संसर्गांशोपबोधककल्पनेन विशिष्टोपस्थि
तिरिति विशेषात्। अत एव घटामोदकरसादौ विशेष्यविशेषणभाववैपरीत्येन बोधः तत्र प्रत्युत्पमा
नषष्ठ्याद्यर्थः संसर्गश्चेत्सुभयमेव समुदायशक्तिसाध्यं अन्यथा लभ्यत्वात् वृत्तशक्तौ वराजादेरुपस्थि
तिसंभवे तत्र समुदायस्यापि शक्तिकल्पने गौरवाच्च नामार्थयोरभेदान्वयादिव्युत्पत्तिस्वरूपं पयुप
स्थितनामार्थादिविषयाः अत एव राजपुरुषैकदेशराज्ञि वा सर्वत्र ऋद्धस्येत्यादिविशेषणान्वयो न तत्स्य
पदार्थैकदेशत्वादिति इत्थं मते वैयाकरणनैयायिकार्थीभावसमुदायशक्तिरित्यस्य निष्कर्षः

तऽएवं चैनैयायिकमते प्रत्येकं राजपदपुरुषपदजन्योपस्थितिद्वयघटिताशाब्दसामग्री वैयाकरणमते
च राजपदपुरुषपदसमुदाये तत्त्रितयाजन्यैकविशिष्टोपस्थितिघटिताशाब्दसामग्रीति एकत्र त्रित
यजन्यत्वनिवेशो विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताद्वैरवच्छेदकं गौरवं चैवं वै
याकरणमते: नैयायिकमते च लाघवमिति स्पष्टमेव। तस्माद्राजपुरुष इत्यादिसमासे राजादिपदल
क्षणयैव शाब्दबोध इति सिद्धं नवीनास्तु राजपुरुष इत्यादिसमासे न राजादिपदस्य राजसंबन्ध्यादौ ल
क्षणा न वा समुदायशक्तिः किंतु स्वत्वसंबन्धेन राजादेः पुरुषादावन्वये न राजकीयः पुरुष इत्यादिरेवा
न्वयबोधः न च नामार्थयोर्भेदान्वयस्याव्युत्पन्नतया कथमुक्तरीत्यान्वयबोध इति वाच्यं। घटपदेन
साधुत्वानुरोधेन च समासानुरोधेनापि तादृशाव्युत्पत्तेस्संकोचकल्पनात् वस्तुतस्तु तादृशाव्युत्पत्तेरंगी
कारे राजपुरुष इत्यादावपि पुरुषादिविशेष्यकराजादिप्रकारकस्वत्वसंसर्गकबोधापत्तिरिति वाच्यं।
तादृशबोधस्याप्रसिद्धेर्वाप्यसंभवात्। न च राज इत्यादौ यत्र षष्ठ्यादिविभक्तेरेव स्वारसिकलक्षण

पाशात्किंत्वमेव वा पुरुषाद्युपस्थितित्वं तत्तद्विशेष्यकराजादिपदार्थप्रकारकस्वत्वसंसर्गकान्वयबोध
स्यप्रसिद्धोक्तापत्तिसंभवतीति वाच्यं। तत्र तादृशप्रसक्तिमत्स्य पातु पूर्वविशेषरूपाकांक्षाज्ञानसहकृततत्
द्विभक्तिजन्यपुरुषाद्युपस्थितिघटितसामग्र्या एव तादृशबोधोत्पत्तिनियामकत्वात्तदभावादेव नोक्ता
स्य संभवात्। अत एव स्वत्वसंबंधेन राजादिविशिष्टपुरुषादितात्पर्यकत्वे राजादिपदघटितवाक्ये सुंदर
इत्यादिवाक्यात्पुरुषादिविशेष्यकस्वत्वसंसर्गकराजादिप्रकारकबोधस्यप्रसिद्धौ राजपुरुषः सुंदर
इत्यादौ तादृशबोधापत्तिसंभवतीति तादृशासु सत्तिकत्वेन मावक्ष्यके मिलितपिपरास्तं स सुंदर इत्या
दिवाक्याधीनशाब्दबोधसामग्र्यास्तत्पदत्वाद्यवच्छिन्नविशेष्यकसुंदरादिपदसमभिव्याहारज्ञानसह
कृतराजादिपदजन्यतादृशविशिष्टार्थोपस्थितिघटितत्वात्तदभावादेव राजपुरुषः सुंदर इत्यादौ तादृ
शान्वयबोधापत्तिवारणसंभवात्। समासघटकपदार्थस्यापि वेनसमासाघटकपदार्थस्य च नान्वयः। आ
कांक्षाविरहात्। अत एव ऋद्धस्य राजमातंग इत्यादौ ऋद्धादिपदार्थस्य राजादौ योग्यतासत्त्वेऽपि नान्वयः। एव

पि समभिव्याहाररूपाकांक्षासंभवति न त्वपि समभिव्याहारमात्रेणाकांक्षा अपि त्वन्वयबोधविशेष
पदविशेषयोः समभिव्याहारः नामार्थयोरभेदान्वयबोधे च समानविभक्तिकपदयोः समभिव्या
हाररूपाकांक्षा उक्तस्थले च राजपदस्य निर्विभक्तिकतया न तत्समभिव्याहारः कोऽप्युक्तयोरभेदान्वयबो
धौपयिकाकांक्षा राजपदोत्तरं यदि लुप्तषष्ठीप्रतिसंधीयते तदा शोभनेन दधीत्साहा विवक्षितापि
तादृशाकांक्षा वर्त्तत एव अन्वयबोधौपयिका भवति पदं त्वसाधुतया न तत्प्रयुज्यते अत एव
शोभनेन चैन रइत्यादौ विरूपोपस्थापकस्य पुत्र इत्यादौ च तदास्यादौ शोभनविरूपाद्यभेदान्वयबो
धोपपत्तिप्रयोजिकाकांक्षासत्त्वेनान्वयबोधसंभवेपि न तत्प्रयुज्यते असाधुना च तत्रासामर्थ्यमिति दि
ङ्गातः सापेक्षमसमर्थवद्भवतीति स्मृतेः सापेक्षत्वे च प्रवृत्तसमासानि विग्रहपदार्थान्वितस्वार्थपर
त्वे प्रधानार्थनिघ्नकपदस्य सापेक्षत्वेपि समासः साधुः राजपुरुषो दर्शनीय इत्यादौ उत्तरपदस्य दर्श
नीयादिसापेक्षत्वेपि समासः साधुत्वात् प्रधानत्वे चार्थस्य समासेन बोधे मुख्यविशेषत्वे राजपुरुष

मानपेक्षसादौ पुरुषादेः कर्मत्वादिविशेषणतया भानेपि समासजन्यआवांतरवाक्यार्थबोधे मुख्यविशेष्य
तयादर्शनीयं राजपुरुषमानपेक्षादौ समासः साधुः नन्वेवं चित्रगुरित्यत्र गोपदस्य तल्लक्षणया गोस्वामि
बोधकत्तया समासजन्यबोधे चैत्रस्य विशेष्यतया गोपदं प्रधानार्थकमेव तदुपस्थाप्यायां गविसमा
सानिष्टशोभनादिपदार्थान्वयविवक्षायामपि समाससाधुतास्यादिति वाच्यं। प्रधानार्थे इतरान्वय ए
व समासस्य धातुत्वात्तदुक्तं स्यत्वे च स्वामिविशेषणतया गौरप्रधानत्वात्।। अपसापेक्षपदसमासत्वा
साधुत्वे चैत्रस्य दासभार्यायोरित्यत्रापि प्रेक्षत्वदसादौ दासनत्वातितादिपदस्य चैत्रशरादिपदसा
पेक्षतया समासो न साधुः स्यात्तदभेदेनेतरान्वयितायाः सापेक्षत्वाघटकत्वे चैत्रस्य गोरूपमित्यादे
रपि गवि चैत्रादिसंबंधान्वयविवक्षायामप्रयोगापत्तेः। एवं चैत्रस्य सखसुधनमित्यपि चैत्रसखिधनमिति
समासो न स्यात् पदत्रयस्य कत्वेन खुरूषाभावात्तत्र सखसुर्यने सखिधनमित्यादिसमासान्तरं चैत्रस्य स
खिधने चैत्रसखिधनमिति समासस्येवाद्युपरणीयत्वात्तत्र चैत्रसंबंधिन एव समस्तसमासानिविष्टस्यै

त्र पदस्य मुख्यार्थस्याभेदेन सखिपदार्थान्वयित्वात् चैत्रस्य सखा चैत्रसखा तस्य धनं चैत्रसखिधनमि
ति समासादेरेव सखिपदोत्तरं समासान्ताच्प्रत्ययप्रसंगेन चैत्रसखधनमिति प्रयोगस्यापत्तेः । एतेन
कारकप्रतियोगिपदातिरिक्तपदसापेक्षपदेनैव समासः तदुक्तं कातंत्रपरिशिष्टे सत्त्वं कारकप्रतियो
गिभ्यामित्यादि चैत्रस्य दासभार्यादित्यादौ दासत्वसंप्रतियोगिकत्वमिति चैत्रपदस्य दासपदार्थप्रतियोगि
बोधकत्वात्तथा शाब्दैः ज्ञातित्वपुत्रत्वादौ नादिपदस्य ज्ञातनादिक्रियायां कारकबोधकत्वात् समासः ।
साधुरित्यपि परास्तं । चैत्रसखिधनमित्यादौ चैत्रादिसंबंध्यर्थकचैत्रादिपदस्य प्रतियोगिपदत्वाभा
वात् । चैत्रसंबंधिनः सखित्वप्रतियोगित्वात् तमेवं । यत्र हि समस्यमानपदार्थे विशेषणरूपे इतरा
न्वयविवक्षा तत्रैः समासो न भवति यत्र तादृशपदार्थतावच्छेदके इतरान्वयस्तत्र भवत्येव चैत्रस्य
दासभार्यादिस्थले दासत्वे चैत्रादिसंबंधस्यान्वयो न तु दासपदार्थे दासे शाब्दैः ज्ञातित्वपुत्रत्वादौ ज्ञात
नेशारकरणकत्वादेरन्वयः न तु ज्ञातित्वपदार्थे ज्ञातनकर्मणि जनेऽतो भवत्येव समासः चैत्रसखिधन

मिस्य चापि सखित्व एवं चैत्रसंबंधिनोन्वयः न तु सखिपदार्थसख्याविति नानुपपत्तिः नन्वेवं दासत्वादे
प्रमेयादिपदार्थान्वयविवक्षणे प्रमेयं दासभार्येति प्रयोगापत्तिरिति चान्यं प्रमेयो दासस्यात्वपिपदा
र्थैकदेशे दासत्वादौ प्रमेयपदप्रमेयत्वेन्वयविरहात् तत्रैकदेशान्वयस्यास्युत्पन्नतया तत्प्रयोगविरहात्
षष्ठ्याद्युपस्थितप्रतियोगित्वस्यैकदेशेन यासमस्यमानपदोपस्थाप्यत्वे सति यौगिकत्वावच्छिन्न
स्य च भेदाभेदाभ्यां समसमेधिकदासत्वादावन्वयो व्युत्पत्तिविरुद्ध एवं चैत्रस्य दासश्चैत्रदासः स्यादे
तादृशान्वयबोधदयात् इति चैत्रस्य दासभार्यादिसाधनिर्वाहः अपि चैवं पितुः स्वर्गकामः इत्यादिप्रामा
णिकानां दानादिवाक्ये न साधुः स्यात् तत्र समस्यमानस्वर्गादिपदार्थस्वर्गादावपि पित्रादिसंबंधान्वया
त् इति चैत्रः कामनायामेव पित्रादिसंबंधस्य स्वर्गाभागित्वेन विषयताविशेषरूपस्यान्वयो न तु स्वर्ग
दाविस्तु पगमे न सामंजस्यात् अतो मुक्तं पितरमुद्दिश्य दानादिस्थले पितुः स्वर्गस्य बाधेपि न ताद
शवाक्यस्यायोग्यतर नैवैवमपि कामना बोधकपदस्यैव समासघटकपदसापेक्षत्वान समासः स्या

तु तत्पदस्य प्रधानार्थकत्वेपि प्रधानार्थकपदस्यापि प्रधानार्थे मुख्यविशेष्ये इतरान्वयनसापेक्षत्वेन मा
समासाविरहात् अन्यथा राजपुरुषादिप्रयोगप्रसंगात् पूर्वोक्तदोषापत्तिरिति वाच्यं क्रियाभि
न्नप्रधानार्थकपदोपस्थाप्यविशेषणान्तरेतरान्वयनैव प्रधानार्थकपदस्य सापेक्षत्वात् प्रकृते च
कामनायाः क्रियात्वात् चैत्रस्य रूपतोपकारो पमिसादिप्रयोगापाप्यत एवं क्रियाभिन्नत्वेसप्रति
योगिकान्यत्वमपि अर्थविशेषणं देयं अत एव चैत्रस्य सुंदरपुत्रो पमिसा दोषपुत्रत्वादौ चैत्रस्य बधा
न्वयेपि न समासानुपपत्तिः न चैवं चैत्रस्य दृष्टपुत्रो मैत्र इत्यपि स्यादिति वाच्यं इष्टत्वादिति दि
क् इति प्राहुः अथ गंगायां घोष इत्यादौ कथं तीरे घोषसत्त्वे ■ यावत्तत्वादिविशेषस्य बोधस्तत्र
गंगापदशक्तिलक्षणयोरभावादिति चेन्न व्यंजनयैव तस्य बोधात् व्यंजना च रसंतर मित्यालंका
रिकाः तन्न वा च गंगायां घोष इत्यादौ शैत्यपावनत्वादि विशेषविशिष्टस्य लक्षणयैव प्रतीतिसंभवे
न व्यंजनापां मायाभावात् न च शैत्यविशेषादिविशिष्टस्य व्यंग्यस्य पूर्वमनुपस्थितौ तत्र शाब्दसंवे

धाग्रहाच्च लक्षणया निर्वाह इति वाच्यं। विशिष्टस्यानुपस्थितौ व्यंजनाया अपि तद्दीपत्वे नात्र हादबोधक
त्वापत्तेः नैव सा स्वरूपसती तेद्बोधिकाः तर्हि अर्थान्तराणामपि बोधापत्तेः गंगापदेन कदाचिदर्थान्तराणामप
पि व्यंजनया अपि तद्दीपत्वे बोधनात्। तत्र व्यंजनासत्वात्। अथ गंगापदेन लक्षणया गंगात्वेन तीर
प्रतीतौ तत्सहितेन गंगापदेन शैत्यपावनत्वादिविशेषविशिष्टस्य स्मृतिस्तदा तद्दीपत्वेन व्यंजनाग्र
हात्तद्धर्मविशिष्टशाब्दधीः यदि च तद्धर्मविशिष्टलक्षणाग्रहादेव स्तदा तत्र लक्षणया गंगात्वेन त
टप्रतीतौ तेन नितेत्वाच्च तत्याप्नुनेर्बोधजननमिति चेन्न संधवे नस्थीयते रस्यादोउभयपरत्वे शक्त्या एक
बोधे जनितेपि आद्स्या शक्त्यैव बोधान्तरजननवत्तद्धर्मविशिष्टशाब्दधियउपपत्तेः अथ स्वतात्पर्यसं
बंध एव व्यंजनापत्र शक्तेः शक्यसंबंधस्य मानप तात्पर्याः संबंधमपर्यादयाभाने किंतु स्वतात्पर्यसंबंध
स्यैव संसर्गता तत्र व्यंजनमयैव शाब्दधीः अत एवापभ्रंशादावपि वृत्तिं नर्ना स्वतात्पर्यसंबंधस्य सत्वादिति
चेन्न शक्तेः शक्यसंबंधस्य वाऽभाने शाब्दप्रतीतेरसिद्धेः अथ गो बाहीक इति पदादस्ति भायविशेषविशि

धं

ष्टप्रतीतिरानुभविकी सा च न शक्याधीः जडोयं जडतमोपमित्यादित्त्वादृशप्रतीतेरनुसक्तेः न वा लक्षण
यालक्ष्यीः पदांतरेण लक्षणयापि तथाप्रतीतेरनुदपादत्वे व्यंजनाधीनैव सा प्रतीतिः लक्षणया ताटस्थ्येप्र
तीतौ चेल्लक्षणाधीनत्वात् लाक्षणिकप्रतीतौ लाक्षणिकप्रतीतेर्हेतुत्वापातादिति चेन्न लाक्षणिकप्रतीतिमा
मान्येः हेतुत्वेपि लक्षणयागे पदाधीनायां ज्ञापकविशेषविशिष्टस्य प्रतीतौ लक्षणयागोसेनवाहीकप्र
तीतेर्हेतुत्वस्वीकारात् तत्रत्येतरकल्पनापेक्षया ईदृशहेतुत्वकल्पनाया एव लघीयस्त्वात् अप्यसत्त्वपि बा
धग्रहकविदर्पविशेषाणां प्रतीतिरस्ति सा च व्यंजनयैव न तु लक्षणया लाक्षणिकबोधे बाधग्रहस्य वि
रोधित्वात् व्यंजनिकबोधे तु न तस्य विरोधित्वं दोषविशेषाजन्यत्वस्यैव व्यंजनाऽजन्यत्वस्यापि प्रत
बध्यतावच्छेदककोटौ प्रवेशादिति चेन्न लक्षणाविशेषाजन्यत्वस्यैव दोषविशेषाजन्यत्वोपसत्तिवध्ये
प्रवेशापि तु मुन्चित्तत्वाद् स्वेतरकल्पने गौरवादिति संक्षेपः इति नैयायिकसिद्धांतानुसारिणोस इतिः अ
त्रालंकारिकधुरंधराः काव्यप्रकाशे प्रकृते व्यवहारविदर्शी वेतरक्षतये सपदः परनिर्वृतये कोत्तासंमित

ध्वन वि:

सा

तथापदेशायजेति काव्यप्रकाशकारोऽस्माज्जदोषं गुणवत्काव्यमलङ्कारैरलङ्कृतं रसान्वितं कुर्वन्स्की
र्त्तिप्रीतिं च विंदतीति व्यासोक्तोवानेकप्रयोजनेन सत्वेपि निरसो हि लिवेधापः सोपशब्दो महाकवेः
सतेनाकविरेव स्यादस्मेनास्य तल्लक्षणमिति निकारोऽस्मास्वादुपाकेप्य नास्वादं भोज्यं निर्लवणंप
पानपेवनीरसं काव्यं स्यान्नोरसिकतुष्टपरतिचोऽस्मारसमनीति मुख्यं प्रयोजनं दोषाभावगुणालं
कारवच्छदायभिपत्परस्य काव्यस्य सवगम्यतेरसध्वरसो वैसरसादिश्च तिप्रतिपादितोविभावानु
भावादिसंवलितं तस्या नंदांशे भग्नावरणमनोवृत्तिविनेद्यफलपद घवलितचैतस्य तस्य तिपत्ति
स्वब्रह्मप्रतिपत्तिवदवस्थाप्रपेलितासहृदयानां साचकाव्यादिति काव्यस्य तस्य चेदप्रवेधमेतरा
तिप्रसंगसंभवेन यादवरूपमेयिति व्याव्यापारः कश्चित्स च शक्तिलक्षणातिरिक्त एवेति व्यंजनाख्य
एव भवतीति महामुनिभरतराद्धांतः अत्र केचिदाहुः शक्त्यैव तत्प्रतिपत्तिसंभवे व्यंजनाख्यव्यापारस्वीकर
कल्पनमयुक्तमिति तन्न। अस्माच्छब्दादयमर्थोबोद्धव्य इति श्वरेच्छारूपसंकेतः शक्तिरिति ता किं किमेते

श्री

ईश्वरेच्छायाः सर्वविषयकत्वेन सर्वशब्दानामेकैव शक्तिः स्यात् उपाधिभेदादिदमिति युक्तिं तदा प्रति
शक्त्यैक्ये शक्तिभेदापत्तिः शक्यतावच्छेदकैक्यादनुगमेऽपि पदशब्दानां शक्यतावच्छेदकैक्येऽपि शक्तता
वच्छेदकभेदाच्छक्तिभेदस्वीकारे न सामंजस्यमावहेत् किंचेश्वरेच्छापा शब्दावृत्तित्वाच्छक्तेः शब्दनि
ष्ठत्वेन स्यात् विषयत्वरूपसंबंधस्य तु अपरिहार्यत्वेन प्रसक्तत्वात् लाक्षणिके शब्दस्यापीश्वरेच्छाविष
यत्वेन शक्तत्वसंभवेन लक्षणोच्छेदप्रसंगात् भवति औत्पत्तिकस्तु शब्देनार्थस्य संबंध इति पादमसू
त्रानुरोधेन स्वाभाविक एव अर्थप्रतीतिजननसामर्थ्यरूपः शब्दसंबंधः शक्तिः घटेनेच पदेनाहीनं
तादृशशक्तिकस्य केवलशापदस्य वर्णोत्तरमर्थबोधः स्यात् शक्तेरेकत्वादिति वाच्यं केवलशापदनिष्ठ
त्वेनाग्रहात् न चैतादृशसंबंधरूपशक्तेर्लाक्षणिकेऽपि सत्त्वानुरोधेन स्वाभाविक एव अर्थप्रतीतिज
ननसामर्थ्यरूपः शब्दसंबंधः सत्वात् लक्षणोच्छेद इति वाच्यं अन्वितशक्तिवादे लाक्षणिके अन्विता
भवजननसामर्थ्यानंगीकारात् अन्विताभवजननसामर्थ्यरूपशक्तेस्तत्रासत्वात् लक्षणापास्तरूपदाप

स्मरणमात्रहेतुत्वात्। अत एव लाक्षणिकेनानुभवकमिति प्रसिद्धिः अभिहितान्वयवादे तु पदशक्त्योपस्थि-
तेषु पदार्थेष्वन्वयायोग्यताप्रतिसंधाने तात्पर्यानुपपत्तिप्रतिसंधानेन वा पदार्थेनैव स्वसंबंधिपदार्थांतरं
वाक्यार्थान्वययोग्यमुपस्थाप्यते तत्र पदार्थनिष्ठैव लक्षणा न पदनिष्ठा पदार्थैरेव च वाक्यार्थो लक्ष्यते न तु
पदैरिति न लाक्षणिके शक्तत्वप्रसंगः पदे लाक्षणिकत्वव्यवहारस्तु पर-
परयेति स्थिते विभावानुभावादिपदानां विभावाद्यर्थेष्वेव शक्तेः सत्वात्पदांतराश्रुतेश्च न रसस्य वाच्यत्वं'
नेच विभावादिशक्तिरेव तच्छक्तिरेव तच्छक्तिरिति वाच्यं रसस्य विभावादिमात्ररूपत्वाभावात्। अत एवाभि-
रत्नेनाभिहितस्य व्यक्तेः सत्वे विभावाद्यैः स्थायिभावो रसः स्मृत इत्यस्य साहाय्यार्थे तृतीयया विभावादिसहिते
स्ते व्यक्तः स्थायी रस इत्यर्थोभिहितोभियुक्तैः अन्यथा तैरेतावतैव विभावाद्यर्थत्वाभे विभावादेरित्यस्य
वैयर्थ्यापत्तेः विभावत्वादिरूपेण शक्तिविरहाच्च। अथा यथा बलवता प्रयमायोधाण एकेनैव वेगाख्य
व्यापारेणारेर्वर्म भेदमुरोभेदं प्राणापहरणं च करोति तथैक एव शब्द एकेनैव शक्त्याख्यव्यापारेण पदार्थ-

स्मृतिंवाकार्थानुभवेरसादिप्रतीतिंचकुर्यादितिचेन्नातर्हिशब्दस्फुटस्यनेतरंप्रतीयमानोयावानयस्तित्रशाब्द
शक्तिस्तथात्वेब्राह्मणपुत्रस्तेजातःकन्यातेगर्भिणीत्यादिवचःश्रवणानन्तरंप्रतीयमानेहर्षशोकादिकमपि
तद्वचसोवाच्यंस्यात्॰ यदिचतद्वचःप्रतिपाद्यसर्वत्रशक्तिरेवहर्षशोकादिकंतुवदनप्रसादमालिन्या
दिप्रत्याप्यमितितत्रहालक्षणीयमप्यर्थशक्तितएवप्रतीयतामितिलक्षणोच्छेदः। किंचस्फुटितलिंगवाच्यप्र
कारणस्यानसमाख्यानांपारदौर्बल्यमर्थविप्रकर्षादितिसूत्रोक्तरीत्यापूर्वपूर्वबलीयस्त्वाभिधानमनव
कमेवभवेत्सर्वत्रवस्तुस्वरूपतःप्रसंगेनोत्तरोत्तरदौर्बल्यबीजाभावात्विषमश्चायमित्युदाहृतः। तत्रचे
गाख्यव्यापारस्यस्वरूपसतएवजनकत्वेनदीर्घदीर्घत्वप्रसंगभावात्। शक्तेस्तुज्ञातायाएवोपयोगित्वात्
व्यंग्यनिष्ठत्वेनततुज्ञानमपेक्षितंनचैतत्। संकेतग्रहाभावात्यदिपिसंसर्गमर्यादयैवरसबोधोभवति
प्रतीतिरित्तदर्तिमंदः। संसर्गमर्यादायाचस्यान्ततत्पदापस्थापितानांविभावादीनांपरस्परसंसर्गमात्रबोध
कत्वेनहेतुरसस्यतुतस्यासंसर्गरूपत्वात्। किंचाभिनिताभिधानवादिनयेऽन्वयमात्रेशक्तावप्यन्वयविशेषे

वश्यमेषितव्यं व्यापारांतरं न च ननिर्विशेषं सामान्यमिति सामान्यरूपेण विशेष एव शक्तिरिति वाच्यं । एवं स
त्यपि विशेषरूपेणाशक्यत्वात् तद्रूपेण तद्बोधे व्यंजनमेव व्यापारः विशेषरूपेण च शक्तत्वे मानाभावे सत्त्वा
वान्वितानयत्वरूपेणानयनपदस्य शक्तत्वे अध्यमानेयेतत्र तद्वाक्यत्वेनार्थभेदात्पदभेद इति न्यायेः पदभेदा
त्पदभेदे तत्तद्वेदमानयनपदमिति पर्यभिन्नानन्वितानस्यात्तस्यान्वयवाच्यत्वन्वितानयनस्योपस्थापकांतराभावे
न तस्मात् शब्दादेवोपस्थितिर्वाच्या सा च संकेतग्रहसाध्या सति च तस्मिन्नु शब्दात्तदुपस्थितिः तादृक्तत्तदु
पस्थितौ च संकेतग्रहस्य योग्यत्वात्पथ्यः । अत एव शब्दश्रवणानंतरं प्रावानर्थः प्रतीपते तत्र सर्वत्र शब्द ए
व निमित्तं पत्तौ नैमित्तिकानुसारेण निमित्तानि कल्पंत इत्युक्ते पत्तलिरस्तं प्रायं । तत्र शब्दस्य कारकत्वरू
पं निमित्तत्वमसंभवेवार्थस्य शब्दाजन्यत्वात् ज्ञापकत्वं वाच्यं । तच्च संकेतत्वेनैव तेन ज्ञाते स्वेज्ञातत्वस्य
रूपमात्रेणस्तास्य वाज्ञापकत्वेऽतिप्रसंगात् । न च गम्यः स्वप्नविशेषे च संकेतः तत्रापि संकेतग्रह इति पदं
तदाहृवीन्यान्यात्वाश्रयरसादिदोषात् पर्यवसितेत परः शब्दः स शब्दार्थ इति तदपि न । तद्वा अव्यापदोपस्था

सा॰ कौ॰
२००

पित्तएव विधेयेत्तस्यतात्पर्यं न तु प्रतीतमात्रस्य पर्किवात्तस्या यथा सिद्धसाध्यसमभिव्याहारे सिद्धंसाध्या
योपदिश्यतइति न्यायेन रथ्याज्जुहोतीत्यादिवाक्ये न हवनस्यान्यवाक्यात्सिद्धौ रथ्य विधीयते तस्याप्यन्यतः
सिद्धौ करणत्वमात्रं विधीयते तस्यैतत्तीयोपस्थापितत्वात् यथा तद्वाक्यमेव निपदोपस्थापितत्वं तस्य तत्पा
नर्व्यंग्यार्थस्य तदस्ति तद्वाक्यार्थानभिज्ञत्वात्तन्नेवपद्वाक्यमेव निपुदोपस्थापितएवार्पितास्य यमितिन निय
मः। विषंभुस्वमान्वास्य गृहेभुंक्ष्वा इस्य त्र विषंभुंक्ष्वेत्यस्य मान्वेत्याय पर्यन्तार्थ यादिति चोध्यं। एकवाक्य
तास्त्वकेवकारसत्वादिरूमेकमेव वाक्यं एवं च गुणानां च परार्थत्वादसंबंधः समत्वात्स्यादिति न्याया
दाख्यातवाक्यस्य क्रिययोः परस्परमन्वयाभावेन विषंभुंक्ष्वेत्यस्य सुहृदाकातया विषभोजनोपदेशासंभवे
नान्वयसिद्ध्यर्थं विषभक्षणादप्येतद्गृहभोजनमनिष्टसाधनमतः सर्वथास्य गृहे मा भुंक्ष्वा इति वाक्या
र्थतद्वाक्यस्यशक्त्योपस्थापितएव तात्पर्यसिद्धेः एतेन लक्षणामङ्गीकृत्य व्यंजनास्यत्त्वे तात्पर्यवशादेवरीस्यपा
वतत्वादिप्रतीतिरिति परास्तं तत्प्रतीतिरूपो पोद्धारितत्वस्वरूपतात्पर्यग्रहस्य तत्प्रतीतिघटितत्वेन तत्प्रतीति

गतीतोत्तात्पर्यप्रतीतेर्हेतुत्वे तात्पर्यप्रतीतेर्हेतुत्वे सिद्धे तत्प्रतीतिरित्यन्योन्याश्रयापत्तावपर्यवसानस्य हेतु-
त्वमेवेनेत्यपव्यवधेयं तेनैव लक्षार्थबाधोऽसंभवे लक्षणोच्छेदस्यापि नैवस्तत हि लक्षणायैव भवदभि-
मतव्यंग्यप्रतीतिः किं व्यंजनयेति चेन्न। मुख्यार्थबाधाद्यभावात्तान्नेव काकेभ्यो दधि रक्ष्यतामित्यादावि-
वेतात्पर्यानुपपत्त्यासेति वाच्यं। लक्षणायालक्षि प्रयोजनान्यतरत्वनियमेनव्यंग्यार्थप्रयोगप्राप्तेनुपा-
भावान्नेतद्धिः किंतु प्रयोजनवती वाच्यात तत्र वाच्यस्य प्रयोजनस्यासंभवात्। न च लक्ष्यप्रतीतिरेव प्रयो-
जनं लक्षणायास्तत्प्रयोजनवत्वनियमो न तु लक्ष्यप्रतीतेरतिरिक्तप्रयोजनवती वाच्या तत्र वाच्यस्य प्रयो-
जनस्यासंभवत्वनियमो गौरवात्त्वप्रयोजकत्वाच्चेति वाच्यं। लक्ष्यप्रतीत्यतिरिक्तप्रयोजनवत्त्वस्यैव का-
दुष्टलक्षणात्वे तदतिरिक्ताया स्तत्वदुष्टत्वेऽपि लिविभागाभावप्रसंगात्। लक्ष्यप्रतीतिरूपप्रयोजनस्य
सर्वत्रसंभवात्। यद्यप्येवं किंचित्प्रयोजनमुच्यतत्तदा तदपि लक्षणायैव सापि प्रयोजनवतीसनव-
स्यात्स्यात्। अत एव विशिष्टे लक्षणेत्ययास्त। तथाहि सानस्य विषयोत्स्यन्यः फलमन्यदुदाहृतमित्युक्तौ दिशा

ज्ञानजनकविषयस्य यथा ज्ञानादन्यत्वे तथा फलस्यापि ततोन्यत्वे वाच्ये कारणस्येव कार्यस्यापि भिन्नकाल
त्वेन भिन्नत्वात्। लक्ष्यज्ञानमेव यदि व्यंग्यज्ञानं प्रयोजनं न स्यात्। किंच गंगापदार्थस्य तीरसंयोगसंबं
धस्य सत्वाच्छैत्यपावनत्वादौ च तदन्यस्य सत्वाच्छक्यसंबंधरूपा लक्षणैका न स्यात्। एवं चानेकविधश
क्यसंबंधानां प्रयोजकत्वमपेक्ष्यैकस्या व्यंजनाया अतिरिक्ताया एव प्रयोजकत्वमुचितं। न च तेषां त
त्वं सिद्धमिति वाच्यं। तदुक्तेः प्राप्तिनामेव प्रयोजनान्तरसहितानां लक्षणासंज्ञा प्रयोजनान्तररहिता
नां व्यंजनेति संज्ञा स्फुरद्भूरिप्रयोगाभावीय लक्षणायाः प्रयोजनवत्त्वस्योक्तत्वात्। किंच विशिष्टं लक्ष्यत
दोसाधादिलक्ष्यतावच्छेदकं विशिष्टत्वेष्टुर्वेप्रतीतं स्यात्। न च तत्तथा। पावनत्वादिविशेषवैशिष्ट्यस्य
प्रमाणान्तरेण तटे विषयीकरणात् तत्र तदसत्वात्। न च पावनत्वादिसामान्यवैशिष्ट्यमेव लक्ष्यतावच
छेदकमस्तु पूर्वं प्रतीतत्वात् तत्र सत्वात् अपि वाच्यं। विवक्षितपावनत्वविशेषप्रतीतेरनापत्तेः तट
निष्ठशैत्यपावनत्वादेर्गंगातटे घोष इत्यतोपि सिद्धिसंभवात्। गंगायां घोष इति प्रयोगानापत्तेश्च। किंच

शक्तिलक्षणे ज्ञाते प्रयोजके व्यंजनातुल्यरूपसत्ति। न चातिप्रसंगः वक्त्रादेः क्रियज्ञानस्य सहकारित्वात्सु
पगमात्। न चैवं मलत्वं व्यंजनेयेति वाच्यं। संस्पृष्टो विलक्षणे वीरवाक्ये निष्टसाधुयोदि घटनात्मोनः प्रम
तेः विरक्ते नाके स्थकमलादिपदात्कदाप्यसौरभादेरव्यक्तेः। अन्यथा प्रतिकूलवर्णस्यादेर दोषत्वापत्तेन च
संबंधाज्ञानाभावे कथं संबंध्यंतरस्मृतिस्तदभावे च कथं तस्य शाब्दबोधविषयत्वमिति वाच्यं। व्यंजनाभि
न्नस्थले एवैतादृशनियमाभिमानात्। प्रकारांतरेणोपस्थितार्थेऽपि व्यंजनायाः शाब्दबोधनियामकत्वा
न्नु अस्तु वा शक्यसंबंधो लक्षणा बोध्यसंबंधो व्यंजनेति। न च बोध्यसंबंध एव लक्षणेति वाच्यं। अपभ्रं
शस्यापि साधुत्वं स्यात् तस्य शक्तिलक्षणान्यतरवत्त्वप्रयोज्यत्वनियमात्। अथवा साधुशब्दमात्र
निष्ठो बोधकत्वविशेषः शक्तिर्मुख्यार्थबाधप्रयोज्य एवतादृशबोधकत्वविशेषो लक्षणा। व्यंजनातु अ
पभ्रंशपदतदेकदेशार्थवेष्टादिसाधारणो बोधकत्वविशेषः इत्यवाक्त। न चापभ्रंशे लक्षणात्र मेणे
वनिर्वाहः व्यंजनाकल्पनागौरवमिति वाच्यं। लक्षणाभ्रमस्य शक्तिभ्रमस्य साधुशब्दस्मरणस्य वा कल्

न्या·को·
२०२

नमित्तिचिरगमनाविरहात्तु वस्तुतो शक्तिभ्रमाद्यपभ्रंशादौ शाब्दबोधांगीकारे तत एव बोधापाद्यधिकरण
ताबोधोपपत्तेर्लक्षणोच्छेदापत्तिः न च पदार्थादीनां न व्यंजकत्वं किंतु पदस्यैवेति वाच्यं तत्तदर्थादि
प्रतीत्यनंतरमपि व्यंग्यप्रतीतेः न च पदावृत्तिरुचितागौरवात् व्यंजनानां लक्षणान्यथासिद्धिप्रसंगाच्च
वस्तुतस्तु इदं पदमेतदर्थस्य न वाचकं न वा लाक्षणिकं किंतु व्यंजकमिति शाब्दिकानां व्यवहारादेव व्यं
जनासिद्धिः अन्यथाभिधायाः सिद्धौ लक्षणापि विलीयेत किंच शक्तिलक्षणज्ञानविधुराणामपि
पामराणामपि चेष्टातः परार्थज्ञानस्य सकलसंमततया व्यंजनमवश्यमेषितव्यं न च चेष्टैवोपज्ञान
हेतुरस्त्विति वाच्यं अतिप्रसंगभंगाय संवेधविधया चेष्टानिष्ठव्यंजनांगीकारस्यावश्यकत्वात् ननु
विभावादिप्रतीतेः रस्यादिप्रतीतिकारणत्वाच्चेत् तुः । पटवान्तंतुसंयोगादितिवत्तज्जायरसादिज्ञाने
रूपरसवान् विभावादिज्ञानवत्वादित्यनुमित्या रसप्रतीतिः तथा मम धम्मिअ वीसद्धो सो सुणओ अज्ज
मारिओ देण गोदाणइकच्छकुडंगवासी नादरिअसिंहेण सा दोसकेतनिकेतनो भ्रत गोदावरी परिसर · २०२

निकुंजे पुष्पाद्यवचयार्थं परिभ्रमतो धार्मिकस्य तद्गमनेन निवारणापादितप्रवेशासत्त्वं तदुक्तौ निकुंजनिवासि
सिंहसंपादितया सदननिवासिसारमेयनिवृत्त्या स्वपदनपरिभ्रमणविधिर्बोध्यः स एव गोदावरीतीरनिकुं
जे भ्रमणायोग्यतामनुमापयति। इदं गोदावरीतीरनिकुंजं भीरुभ्रमणायोग्यं सिंहवत्त्वात् एवं तन्नैवं
यथा गृहमित्येवमाद्यनुमानेनैव व्यंग्यार्थबोधसंभवे तिरिक्तव्यंजनांगीकरणमयुक्तमिति चेन्न। शब्द
समर्पितविभावादिप्रतीत्यनुमितरामादिरत्यादिज्ञानस्य रसत्वाभावात्। किंतु शब्दादिसमर्पितविभावा
दिभावनया भावकैर्भाव्यमानस्य स्वानंदांशोभग्नावरणकरसाद्यवच्छिन्नस्वप्रकाशानंदस्य रसरू
पत्वात्। तत्र च व्याप्तिग्रहासंभवात्। न च यत्र विभावादिप्रतीतिस्तत्र तत्र रस इति व्याप्तिग्रहः सु
लभ इति वाच्यं। एवंविधव्याप्तिज्ञानजन्यप्रतीते रसास्वादजनकत्वाभावात्। पर्वतो वह्निमान् धूमा
दित्याद्यनुमानजन्यवह्निप्रतीतिवत्। किंतु स्वप्रकाशमात्रविश्रांतसांद्रानंदप्रतीतेस्तथात्वे तादृश
सिसाधयिषितार्थातिरिक्तार्थसाधने हेतोराभासत्वात्। भम धम्मिअ विसद्ध इत्यत्रानुमानं तु वीर

स्य भीरुभ्रमणायोग्यत्वं साध्यमुक्तं वीरस्य ह्यस्वविद्विषो दासीन्यं न तत्सामान्यस्येव नाआ पयभोगुरो
र्वा निदेशेन प्रियानुरागेण निषिद्धस्थानगमनाकवाधानाद्दृशस्यापि पुंसः सिंहवन्निकुंजभ्रमणदर्शनेन
व्यभिचारात् । न च प्रभुनिदेशाद्यनुपाधिकस्य भ्रमणविशेषणत्वान्न स इति वाच्यं । एतादृशस्या
ध्यस्य पापाद्यनुपस्थितत्वात् तदुपस्थितस्य च व्यभिचारित्वात् । अत एव नासिद्धः न मध्यमस्य स्य शौंडि
र्यांके यापुरुषार्थाभावत्त यावसारे मे पाद्विपन्तापि मृगया हरणवीरता यावासिंहवति प्रदेशे वीरस्य
भ्रमणाव्यभिचारः । किं च निकुंजे सिंहसद्भावो न भ्रमानिवारादवधृतः । किंतु असतीवचनान्नेव तन्निश्चा
येकं अयथेनसमं संदेहानियमादनिश्चय तत्पासिद्धिश्च एतेन दृष्टं हेतुतिवेशिनिसणमिहाप्यस
न्देहादास्यसिद्धायणास्वशिरोधाः स्थितानाभेवीरसाः कोपापेक्षः पास्यतिपुकाकिस्यपिवामिहरमपि तेत्स्यात
स्तीमाव्याकुर्वंतोरत्नापात्वनमुत्थितखंजुजरस्येनदानत्ठग्रंथपदस्यवनत्वग्रंथपिसत्वनत्थिसनादित्थिंगेन
परकामुकोपभोगानुमितिरितिपरास्त्यपतिस्नेहेनापि न संभवेव्यभिचारात् । एवं निःशेषच्युतचंदनं

स्तनतटं निर्मृष्टरागोधरो नेत्रे दूरमनंजने पुलकिता तन्वी तवेयं तनुः मिथ्यावादिनि दूति बांधवजन
स्याज्ञातपीडागमा वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यांतिकमित्यत्र निषेधो वाच्यः विधिर्व्यंग्य
इत्यत्र चेदं न व्यंजनादिभिर्विधिरनुमीयत इति यत्तदपि तत्पांसाने कार्यत्वसंभवाद्व्यभिचारादसमंजसं॥
न च व्यंजनावादिमते पुनः केन नाम नैकांत्यात्कथं व्यंजनयापि न स्यात्तोतिरिति वाच्यं। अधमपदसाहचर्या
त्तदधमत्वं मास्तु कर्मणा वा नत्रोत्तमनायिकानायकस्य जातस्य कर्षतः पंनवक्ति किंतु कर्मणा तत्रैव न
पूर्वं न तदभावः स्वयं दूतीप्रेषणान्यथानुपपत्त्या सिद्धः तस्माद्दूतीसंभोगकारित्वमेव तदिति तत्सहा
य्यासंभोगव्यंजनायां बोधकाभावात्तन्न्यायात्तु मितिवादिमते पितेत्सा हि साक्षात्तथात्वमिति वाच्यं। अधमत्व
स्य प्रमाणांतरानवधृतत्वात्संदिग्धासिद्धेः न चैतद्व्यंजनांगीकारेपि समानमिति वाच्यं। व्यंजनावादिमते बो
ध्यादिनिश्चयपादरमपेक्षणतया संभावितार्थमात्रोदयबोधकत्वस्वीकारात्। किंच कश्चित्प्रेक्षते साते
निष्पन्ने काव्यादेः प्रामाण्यानावश्यकतया संदिग्धासिद्ध्या तु मानासंभवेनावश्यं व्यंजनास्वीकारापत्तिः

यानुमानेन व्यंजनान्यथासिद्धौ शाब्दान्यथासिद्धिरपि स्यात् तथा हि घटमानयेत्यत्र कर्मत्वेन व्युत्पत्ति
तन्निरूपिताकांक्षायोग्यतासत्तित्वादिसाधनानुमानेन शाब्दबोधसमानज्ञानसंभवात्। ज्ञाने च योग्य
ताज्ञानस्य ज्ञानत्वेन शाब्दबोधहेतुत्वादनुमितौ तु लिंगनिश्चयत्वेन हेतुता योग्यताज्ञाने लिंगविशे
षणमिति वाच्यं। हेतुत्वस्यैकस्याभावादनुमितित्वावच्छिन्नं प्रति लिंगनिश्चयत्वेनाकारणत्वात् किं
तु धूमादिनिश्चयत्वेन कारणतायामपि योग्यताज्ञानस्य ज्ञानत्वेनैव कारणतायां दोषाभावात्। यदि
शाब्दस्थले व्याप्त्यादिप्रतिसंधानं विनाप्यन्वयबोधदर्शनान्नानुमानेन शाब्दान्यथासिद्धिरपि तदा प्र
वृत्तेऽपि तुल्यं। वस्तुतस्तु। तत्तद्धीजनकत्वमेव संजना सैव सर्वत्र वृत्तिर्वै शक्तिर्लक्षणा वा शक्तिघटके
तपेतस्यानैरर्थक्यीकरणीयत्वादेवं शक्तिलक्षणाभिधाने तांत्रिकाणां कथमिति वाच्यं। यदा तत्तद्
वैयाकरणादिभिरनुशिष्यते तत्तदाभिप्रायो व्यवहारः यदा च बाधतात्पर्यानुपपत्तिप्रतिसंधानोत्तरमन्या
र्थबोधकं तदा लक्षणेति व्यवहारः यदा चैतद्बाधितार्थादिबोधकं तदा व्यंजनाव्यवहारस्त्वेक एव व्यापा

र: ननु तद्धि जनकत्वं फलोपहितत्वं स्वरूपयोग्यत्वं वा नाद्यः तस्य प्रवैशद्यानुभवशक्यत्वात् न द्वितीयः तथासति
स्वरूपयोग्यतावच्छेदकस्य विभक्तत्वेनात्मादिरंगीकारणीय एवं वेति चेन्न जनकत्वस्य पदार्थांतरस्ये
कांगीकारात् तज्जातिनवीनास्ति व्यंजनयैवानुमानान्यथासिद्धिः युज्यते च एवं हित्वा एवमपि भवति
हेतुज्ञानादीनां ज्ञानत्वेनैव हेतुत्वांगीकारात्॥ व्यंजनापास्त्येव यथाकथंचित्संभावनामात्रादेव व्यंजन
कत्वादिति चेदेतिः एवमर्थापत्तिरपि परास्ता तस्या अपि प्राक्सिद्धव्याप्तिछायोपजीवनेन प्रसक्त
तात् अन्यत्तु वर्णितं कृतं सौकुमार्यादिविशेषरचनाविशेषचेष्टादीनामर्थविशेषबोधकत्वस्य सक
त्वसंहृदयसिद्धतया पत्ता प्रमाणहेतुत्वेन तत्र शक्तिलक्षणापारसंभवेनातिरिक्तव्यंजनारब्धव्यापार
स्यावश्यमंगीकरणीयतयात्रादेव्यर्थविशेषबोधं प्रतिभाहेतुत्वेन काचित्क्षतिः किंच कदाचिद्विरुद्धस्य
णादिकमपि चेन्मतं तदा कापि नः क्षतिरिति साकूतः किंच काव्यशोभासापि भवरसानोद्रुरधिरोहत्तनोर्विरा
त्वे श्रोतृणां शृंगारसंग्रहस्य पयस्यानुपपत्तेः परदारस्पर्शानां कुसेकस्तु भगः सततं केरोम

त्ता। असौउदयमारूढः कांतिमान्रक्तमंडलः राजाहरतिलोकस्यहृदयंमृदुभिः करैरित्यादौप्रकरणादीनांहि
तीयार्थाभिधायाः प्रतिबंधकत्वेनान्यतरमात्रार्थस्मृतिहेतुत्वस्याभिहिततयाप्राकरणिकबोधोत्तरंजायमा
नो द्वितीयार्थबोधो न शक्त्या कुंठेनातत्स्मात् तस्मात्तन्मूलकंव्यंजनयास जायतइतिव्यंजनासिद्धिः। नच द्विती
यार्थबोधोत्लक्षणयैवास्यमुख्यार्थबोधकत्वात्ग्रहकयोरभावात् न चाभिधानियंत्रणवैयर्थ्यमनेनि
यंत्रणमपि न कृतमिति वाच्यं अनुभवविरोधात् अन्यथासुगंधिमांसभोजनप्रकरणेसुरभिमांसमेवा
न भुंक्त इत्यभिधानेगोमांसाशनेच्छुरस्यजुगुप्सानापत्तेर्व्यंजनापात्तुप्रकरणादिलिंगेस्यापिबोधक
त्वस्यधर्मिग्राहकमानसिद्धत्वात् अत एव काव्यान्तर्गतस्यप्राकरणिकैकार्थनियंत्राभिधावतः पदस्या
संभ्यार्थांतरमप्रकारकस्यहेयत्वंअप्रयापत्त्यानतेयोनिरुदारवाचोपोनिरोधोमयारब्धः ज्ञयमिति ना
पमलंघनेरसनीयामयंहि अरस्यादेरर्थाहृत्वंनस्यात् न च नानार्थस्यैकाभिधाप्रसरणमेवैकत्वंनतुध्वं
जनाधर्मेकल्पनाधर्मिकल्पनापालघीयसीतिवाच्यंतन्निरोधकस्याप्यनुपायात् अपि चैतादृशस्यैक

विति बहुना नार्थश्रीशब्दघटनानुरोधाच्छन्तोभपार्थप्रतीतावपि वर्णनीयार्थस्योत्कटत्वाभावेन कस्यचित्प्रयासा
नर्थमनचार्थद्वयस्यांगांगिभावार्थमुपमानोपमेयभावः स्वीकार्यः स च न कदापि व्यंजनां विनेति तत्स्वीका
रस्यावश्यकत्वे व्याप्त्यादिप्रतिसंधाननियमाभ्युपगमीकारस्यानौचित्यात्। एवं सरदुष्करितंपदं सरदुष्प्रसा
पकमिति नियमः शब्दस्य विरम्यव्यापारकत्वाभावादिकमपि साधु संगच्छते। अस्य च व्यंजनानंगीकारे
कष्टत्वादीनां मतिसुदोषत्वमसाधुत्वादीनां नित्यदोषत्वमिति विभागो न स्यात्। श्रुतकामार्थशीके रूपते पाक
ष्टत्वादीनां सर्वत्र दुष्टत्वे वा स्यात्। तदस्तु परमेतु व्यंजनापापत्तिवकुविधत्तपारोज्जादिव्यंग्यपदेदुष्ट
त्वेस्तेषामादौ तु दुष्टत्वमिति घटते विभागः एवं पर्यायेऽपि कृतेविदेवकस्य विदेवकाव्यानुगुणत्वे
मिति व्यवस्था न स्यात्। वाच्यार्थस्योत्कर्षात्। ध्वयंगतं समविशान्वनीपतां समागमशायनपाकपाठि
नरसादोऽनुगुप्साव्यंजकत्वेन काव्यत्वादिपदस्यैतानुगुण्यं नतरां पोदिव्यंजके पिनामादिपदस्वत पाश्च
कयात्वपिनाकमात्रेरात्कवात्। किंचेगमोत्तमके स्तु दासीनवामस्त्र वेणोत्तरमरपोहटेनावसर्दनोपाः

साध्यो विधिरूपाख्यः संज्ञातोयमभिसारसमयः कर्मकरणान्निवर्तध्वं नातिदूरं गमनमनुच्चितेन गावो बंध
नीयाः संतापोयुनानिष्टनइत्यनेकार्थप्रत्ययो जायते स बोद्धुभवसिद्धः स च शाब्दो न च व्यतिरेकानुविधा
नाच्छाब्द एव तत्र च शक्तिलक्षणयोरभावाद्व्यंजनाख्यवृत्त्यंतरमवश्यमेषितव्यं। न चैवं वाक्यभेद इति
वाच्यं शक्यलक्ष्यप्रभिन्नत्वेन तदंगीकारात्। अत एव नाप्ययमनुमाने अन्वयव्यतिरेकाभ्यां शाब्दत्वेवात्र
कारणत्वावधारणात् व्याप्तिसापेक्षप्रतिसंधानाच्च। इदमत्रावधेयं गमजज्ञानोत्तराधोरणज्ञानवत्तद्गतोऽस्तम
र्क इति वाक्यात्सूर्यास्तित्वज्ञानोत्तरं सूर्यास्तसंबंधिसंध्यावंदनादिकरणपदार्थबोधतुल्यकदाचिज्ज्ञानोपप
त्तौ किमर्थं तदर्थबोधे व्यंजनास्वीकारः। न च सर्वार्थस्य स्वसमयासंबंधित्वादेकस्य पुंसो न चतुः सर्वेसान
मिति वाच्यं गमसंबंधिपदार्थबोधतुल्यकदाचित्कस्यचिदेवोद्बुद्धादृष्टवशात्तत्तत्स्मृतिवदुपपत्तेः
न चैकसंबंधिप्रत्यक्षमेवापरसंबंधिस्मारकमिति वाच्यं। एवंविधनियमे प्रमाणाभावात्। अनुभववि
रोधाच्चेति अपि च व्यंग्यो नातिकोऽर्थः शक्यार्थभिन्नत्वात्पादिभेदात् तथा हि निःशेषच्युतचंदनमित्यादौ निष

धो वाच्यः विधिर्व्यंग्यः एवं मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरंतु सेव्या नितंबाः किमु भूधराणा
मुत स्मरस्मेरविलासिनीनामित्यत्र वाच्यार्थः संशयरूपः व्यंग्यस्तु शांतशृंगारिणोर्यथायथमन्यतरनिश्चयरू
पः कथमवनिपदर्पो यन्निशातासिधारादलनगलितमूर्द्धा विद्विषां स्वीकृता श्रीः ननु तव निहतारेरप्यसौ
किं न नीता त्रिदिवमपगतांगैर्वल्लभा कीर्तिरेभिः इत्यादौ वाच्यो निंदारूपः व्यंग्यस्तु स्तुतिरूप इति स्वरूप
भेदः वाच्यार्थस्य प्रथमं प्रतीतिरनंतरं व्यंग्यस्येति कालभेदः वाच्यस्य शब्द एव प्रतिपादकत्वात् व्यंग्यस्य व्यं
ग्यस्य तु शब्दतदेकदेशतदर्थवर्णघटनाचेष्टाद्याश्रयत्वमित्याश्रयभेदः वाच्यस्य शब्दानुशासनज्ञानं निमि
त्तं व्यंग्यस्य तु प्रतिभाविशेष इति निमित्तभेदः कस्य वा न भवेद्रोषो दृष्ट्वा प्रियायाः सव्रणमधरं सभ्र
मरपद्माघ्राणशीले वारितवामे सहस्वेदानीमित्यत्र वाच्यार्थस्य नापि का विषयः व्यंग्यस्य तु भ्रमरेणा
स्या अधरो दष्टो न जारेणेति तत्सखीतिरस्कृतिं तन्मे तन्मायाकथं विसमाहितं दंतक्षतादंतः परं त्वयैवं नवि
धेयमित्युपपत्तिः प्रियायाः एवं हि एवंविधदर्शनेऽपि यस्य कोपो नाभिप्रियायामिति सपत्नीसखीजनमेवं समाधा

न निपुणाः तामेष्वेव विश्वसन्तीति प्रतिवेशिनीति विषयभेदः गतोस्तमर्क इत्यत्र दर्शितनयेन संख्या
भेदः एवं सत्यपि शाब्दव्यङ्ग्ययोरभेदनीत्यपीतादेरपि भेदो न स्यादिति तस्मादुपदर्शितरीत्या काव्यादसादि
प्रतिपत्तव्यं न नास्य रसान्तरमावश्यकं तत्प्रतिपत्तिश्चेत्यं काव्यादौ दर्शनश्रवणमहिम्ना सीतात्वादि
विशेषत्यागेन साधारण्येन स्त्रीत्वादिना प्रतीते विभावादौ व्यंजिततरत्ति रूपरस्यापरवच्छिन्नैव तन्नांस्त्वप्र
काशमानेन्दांशेन भग्नावरणं विभावादिसंभिन्नमभिव्यक्तं रसः सा चाभिव्यक्तिः काव्यादौ शब्देनाप्यपरोक्षरू
पैवयत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुतेरिति वदंति। अत्रैनैयायिकानुयायिनो वदंति। अस्यैव मापातनतः प्रक्रि
यात्तपापि चैतन्यस्यातिप्रसक्ततया वृत्तिरूपस्यान्यस्य वा रस्यादेरेव वरसत्वे पर्यवस्यति एवं चोक्तरीत्या
विभावाद्युपस्थितस्य रस्यादेर्मानसमेव रसाभिव्यक्तिरित्युक्तं किंच नन्वयं रसाभिव्यक्तौ काव्यादिजन्ये
न्यत्वप्रदोपि रसाद्युपस्थापकविभावाद्युपस्थितेः काव्यादिजन्यत्वेन काव्यादिप्रयोज्यत्वपरएव एवं रसा
भिव्यक्तिरक्तरूपाया आनंदजनकत्वादेवानंदविषयकत्वोपचारः एतेन काव्यनाट्ये च कविनानेटवन्नप्र

काशीलेषु विभावादिषु व्यंजनाव्यापारे दुष्यंता दोषाः कुंतलादिरत्नोगहितायामनंतरं च सहृदयत्तोल्लासित
स्वभावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यत्त्वसाक्षादित्तेस्यासम्यग्ज्ञानावच्छिन्नेषु कि कारके
ल इव रजतखंडः समुपमानोऽनिर्वचनीयः साक्षिभाष्यैः श्रीकुंतलादिविषयकरसादिरेव सः अयं च
कार्यो दोषविशेषस्य नाशश्च तन्नाशस्य स्वोत्तरभाविनाल्लोकोत्तरानंदेन भेदाग्रहादानंदपदव्यवहा
र्योऽभिव्यक्तिस्वरूपोपलब्धि तेन रसादिना तदग्रहात् इति वैनैकाध्यवसानाद्धाव्यंग्यो वर्णनीयश्चोच्यते
अवच्छादकेदुष्यंतत्वमप्यनिर्वचनीयमेव आवच्छादकत्वं च रसादिविशिष्टबोधे विशेष्यतावच्छे
दकत्वे अत एव दुष्यंतादिनिष्ठस्य रसादेरनास्वाद्यत्वान्नरसत्वेस्य निष्ठस्य तु तस्य शकुंतलादिभिर
तैः संबंधिभिः कथमभिव्यक्तिः स्वस्मिन् दुष्यंताद्यभेदबुद्धिस्तु बाधबुद्धिपराहतेत्यादिदोषकायास
प्यनेचकाशः रसादिकं परास्त्तः व्यंजनाव्यापरस्यानिर्वचनीयख्यातेश्चानुपगमेऽपि प्राक्तेषु दोषमहि
म्ना स्वात्मनि दुष्यंताद्यभेदावगाहिनो श्रीकुंतलादिविषयकरसादिमदभेदबोधस्य काव्यार्थचिंतनजन्यस

स्य विलक्षणविषयताशालिनोर् रसत्वाभ्युपगमे बाधकाभावात्। स्वाप्नादिज्ञानदृशबोधस्य काव्याप
र्पितताजन्यतया न रसत्वम् अत एव न तत्र तादृशानंदोऽपि अन्यथैवमपि स्वप्नेन विद्यमानस्य रत्यादेः
कथं स्वस्यानुभवः स्यादिति चेन्मैवं न ह्ययं लौकिकः साक्षात्कारो रत्यादेर्यल्लौकिकसाक्षात्कारविष
यस्य हेतुतयावश्यं विषयसत्तापेक्षा स्यात् अपि तु भ्रमात्मकोऽलौकिकः। तत्र च न विषयापेक्षा
आस्वादस्य रसविषयकत्वव्यवहारस्तु रत्यादिविषयतावच्छेदेव एव च एवं चेदृशादिस्थलेऽपि चेदृशाद्युप
स्थापिततत्तद्विधानो मानस एव बोधः पुंमते चैतत् अन्यथा वृत्तेः पदव्यापारत्वनियमेन व्यंजनायाः
पारिभाषिकवृत्तित्वोपगमापत्तेः तदुपगमे प्रमाणाभावाच्च अत एव तात्पर्यविषयीभूतस्याप्यर्थस्य
काव्यादितो बोध उपपद्यमाने मानसबोधे तात्पर्यज्ञानस्याहेतुत्वात्। न च बाधितार्थस्य कथं मानसो
बोधः आहार्यस्याबोधापाक्रमे पस्सन्नासंभवः व्यंजनायास्तु तद्बाधकत्वेन धर्मिग्राहकमानसिद्धत्वापा
नदोषः इति वाच्यं तत्र चोक्तदोषमहिम्ना बाधात् प्रतिसंधानात् धर्मिकल्पनातः इति न्यायेन व्यंजनाकल्पनम्

पेक्षत्वाद् दृढादेशाजन्यस्यैतस्य वैबाधप्रतिबध्यत्वाद्वेत्थं कत्व कल्प्यतो नियमश्चेति संक्षेपः केचित्तु पुनः
कालेकारिकास्थयोगरूढिस्थले रूढिशक्तेरवयवशक्तिप्रतिबंधकत्वस्य सर्वतांत्रिकसंप्रतिपन्नत्वात्पा
रूप्यविषयस्य योगाल्लिंगितत्वांतरस्य विनाव्यंजनानुपपत्तीतिर्दुरुपपादत्वात् पाहि च बलाकां स्त्रियं हत्वा वारि
वाहैः सह विश्रामतिष्ठंति चपला यत्र स कालः समुपागतः अत्राशक्त्या नाद्यमपहत्य जलवाहकैः
पुरुषैः सह पुंश्चल्योरमेतरस्यांतरेण तावदबला वारिवाहे च पलत्वात् वैयाकरणाश्शब्दो बोधयितुं
विधुत्वा घयप्रहितस्येवतस्यार्थस्य प्रतीतेः अन्यथा चमत्कारो न स्यात् एतादृशार्थप्रतीतिरेव नास्तीति
तु वक्तुमशक्यं शब्दार्थयुक्तिमद्भिः सद्भिः नापि केवलपाश्चात्याः योगरूढिस्थले पंकजादिपदे शुपप
लप्रकारकबोधविषयएव पंकजनिकर्तृत्वान्वयस्य सर्वसंमतत्वात् चपलादिपदानुपुंश्चल्यादिबो
धस्य योगादसंभवाच्च । तदपंसंग्रहश्लोकः योगरूढस्य शब्दस्य योगे रूढ्या नियंत्रिते धियं योगस्पृशोऽर्थ
स्य प्राप्तस्तेनैव नैवेसे साहसदैतदालोचनीयेषु अन्यनामिसादिपद तथाविधकविदृष्टप्रयोगादकूक

विसंरंभैः पंकजादिपदे तत्तन्नीतके विताल्पर्यसंहितपोगशक्त्यैव तादृशबोधोदयांगीकारस्य उक्तमु
चितत्वात् तत्र अन्यथा तादृशाक विसंरंभैवैयर्थ्यापत्तेः एवंच यत्र नत्त्पाक विसंरंभः पंकजादिपदे तत्र प्राचां
रूढिर्योगमपहरतीत्युक्तिः वस्तुतस्तु समुदायावयवशक्त्योर्यत्र विरोधोस्ति नाप्यवाल्मंडपगजकर्णा
दिपदं तु समुदायशक्तिर्योगशक्तिप्रतिबंधिका तत्र अन्यथा चंद्रोदयो मपदादावस हेतुमपा
वतीत्त इति योगात्सदाशिवस्य विशिष्टतया विधास्तुरूपोत्तमपदात्पुरुषविशेषस्य प्रतिपत्तिर्नैस्या
त्सवे संमताच यल्लापदासुंब्यत्वात्त्वबोधस्यासंभवाच युक्तिस्त्वबोधस्यासंभवाद्वेयुक्तिरपि तु परव्यो
पधाया इति सूत्रे चोपपत्तिमंदं गच्छतिनाराच्नू प्रतीतिश्च यत्ल्लेख्यनुक्ताचेयत्नाक रक्ताविपुलंयुव्यत्वोपिप्पली
युचेति विश्वमेदिनीकोशादुदाहरकिरूणाद्विवृत्तिरूढिः प्रसाद्योतापचाप्यधापिरूढिशक्त्यैरवयव
शक्तिप्रतिबंधकत्वस्य सर्वतांत्रिकसंमतिपन्नत्वयत्नितद्यपि पंकजादिपदेष समुदायशक्तिमामाभावा
त्पंकजनिकर्तृत्वाश्रयत्वेन न बोधः न तु पद्मत्वेन न तु न हि कुमुदादौ प्रयोगापत्तिरिति चेन्मा इष्टत्वात्।

पपत्वस्यतस्सदप्रयोगोपाधित्वादेतिमीमांसकलिखनादर्शनेनिर्वेधनमेवेसाक्तंविस्तरः नतु यदि शक्तिल
क्षणे एववृत्तिस्तदाप्रजयतीत्यादौकथंप्रकृष्टजयादिप्रतीतिर्नहिप्रकृष्टजयादेः प्राद्युपसर्गवाच्यतयातथा
प्रतीतिसंभवति। तथासतितस्यापरकृष्टस्यार्थत्वेनतस्याख्यातार्थेनान्वयापत्तेः प्रकृष्टगोप्रकृष्टस्यर्थान्वितस्वाप
बोधकत्वस्युत्तेप्रकृष्टैकदेशार्थस्यप्रकृष्टस्यार्थान्वयवराजपुरुषमान्यपत्वादेराजानायमानेपेसादिवोधा
पत्तेः नापिप्रकृष्टजयादेर्व्यादिधात्वर्थतया तथाप्रतीतिः तथासतिजयतीत्यादौ प्राद्युपसर्गविनापिप्रकृ
ष्टजयादिप्रतीतिसंभवेननानर्थक्यवदेवंतरमवश्यमंगीकार्यमितिचेन्न। व्यादिधातूनांप्रकृष्टजयादौल
क्षणयैवतादृशप्रतीतिसंभवात्प्राद्युपसर्गाणांवधात्तुतादृशार्थतात्पर्यग्राहकतयैवोपयोगः अत
एवप्राद्युपसर्गाणांद्योतकत्वमप्रवादोपिधातोर्विशिष्टार्थतात्पर्यग्राहकत्वस्यैवद्योतकत्वात् नच प्राद्यु
पसर्गाणांप्रकर्षादौशक्तिरेवास्त्विति वाच्यं। अनन्तस्त्वस्यैवशक्त्यापत्तेर्धातोपसर्गाणांधात्वन्तरेण
प्रयोगाभावेनधातूनामेवतेष्वर्थेषुपसर्गाणांशक्तिकल्पनानौचित्यात् नतु प्राद्युपसर्गाणांप्रकर्षा

दशक्तिरबोधिता यद्युपसर्गप्रतिनियमः तत्प्रकर्षोद्देऽपस्थापनात्तु तस्य च धात्वर्थे अपादावाश्रय
तयान्वये नैव विशिष्टज्ञानादिलाभसंभवात् अन्वे नामार्थे धात्वर्थे वा भेदान्वयासंभवान्नैवमिति
वाच्यं अव्ययनिपातातिरिक्तनामार्थयोरभेदान्वयस्याव्युत्पन्नत्वात् एवं दानेस्वादावन्वयानुरोधेन
तादृशार्थस्य तत्तत्संकोचस्याचर्यकत्वात्तु युज्यते चैतत्तदन्यथा यस्यापस्थितिपमेनोपस्थितिरिस्तत्स्य
तदृशक्तेरेव विभक्तेरपि संख्यादिशक्तत्वेन स्याच्चत्राचिप्रस्तुतिं विना प्रत्ययप्रयोगाभावे न प्रा । स्तुतिस
एवं संख्यादिविशिष्टार्थबोधसंभवादिति चेन्न प्रतिष्ठतेरस्यापत्नुरोधेनोपसर्गाणां शक्त्युपगमासंभ
वात् तथाहि प्रतिष्ठतेरस्यादौ गमनेऽशक्तत्वमास्याधात्वर्थेनावबोधयितुं न शक्यते स्थाधातोर्गतिनिवृत्तिरूप
स्थितिमात्रशक्तत्वात् गतिनिवृत्ताविष्टगुणा सना तन्नापि प्रोपसर्गेण गमनं बोधयितुं शक्यते स
ध्यातित्तस्या रव्याता प्यान्वयानुपपत्तेः प्रत्ययानामिस्यादिस्मुत्पन्नैः किंतु स्याधातुरेव लक्षणया गमनबोधकः
सोपसर्गस्तु तात्पर्यग्राहक इत्युपपत्तिः स्वरसमुपेयेन च स्थाधातुना गतिविच्छित्तिरूच्यते प्रहेन चाभाव इति ग

स्वभावो नास्तीति प्रतीतौ गमनबोधस्तु सुलभ एव तद्भावाभावस्य तद्रूपत्वादिति वाच्यं। तावता गमना
भावाभावत्वेन गमनबोधेपि गमनत्वेन गमनबोधस्यानुभवसिद्धस्यानुपपत्तेस्तादवस्थ्यात्। तस्मा
दतिष्ठतरसादावुपसर्गस्योत्कर्षे द्योतकत्वावश्यकत्वे एकत्र निर्णीतः शास्त्रार्थोन्यत्रापि भवतीति
न्यायेन सर्वत्र प्रादुपसर्गाणां धातोर्विशिष्टार्थप्रतीतौ स्वयं ग्राहकत्वाप्रयोगानुपपत्त्या द्योतकत्वमेवोपपादि
स्तूपसर्गाणां द्योतकत्वमेव न तु वाचकत्वं। ननु प्रतिष्ठत इत्यत्रोपसर्गस्योत्कर्षमात्रद्योतकत्वेपि प्रग
पतिसादेर्वाचकत्वमेवास्तूत्कर्षस्य तु द्योतकत्वे एकत्र द्योतकत्वेन्येव सर्वत्र द्योतकत्वांगीकारे विभक्तेरपि
संख्यावाचकत्वानुपपत्तेः तत्रापि प्रकृतिलक्षणयैव संख्याविशिष्टार्थबोधसंभवात्। किंच उत्तानते
वेवादिनिपातानामपि वाचकत्वविलोपप्रसंगः तेषामपि स्यात्तेन्येन प्रयोगाभावात् समभिव्याहृतमाति
पदिकेर्लक्षणया घटाभावादिबोधसंभवादिति चेन्मैवं। विभक्तेः संख्याद्यवाचकत्वे चैत्र इत्यादिशब्दा
नोपमानत्वे कत्वादिप्रकारकचैत्रादिविशेष्यकशाब्दबोधस्य सकलानुभवसिद्धस्यापलापप्रसंगः एक

पदार्थस्य शाब्दबोधासंभवात् । एवं नञादिनिपातानामभावाद्यवाचकत्वे घटइव नेत्यादिशाब्दान्वयस्तु स
विभक्त्युपस्थितस्य भावदन्यायामुक्तयुक्त्या शाब्दबोधापत्त्याय प्रसंग इति विभक्तौ नञादिनिपातानां च संख्या
भावादिवाचकत्वे घटइव नेत्यादिशाब्दात् । मा वक्तव्यं उपसर्गाणामवाचकत्वे तु न कस्याप्यनुभवस्याप
लाप इति प्राञ्चुपसर्गाणां द्योतकत्वमेव न तु वाचकत्वं किं चोपसर्गाणां वाचकत्वे उपास्यते गुरुरनुभूय
ते सुखमित्यादेस्तु बोधादिकर्मणोभिधानं न स्यात् तत्पत्त्योर्थो कर्मताविरहात् उपासनादेरुपसर्गार्थत्वात्
तस्मात् त्रे कर्मणि त्यकारानुपपत्त्या उपसर्गाणां द्योतकत्वमेव युक्तं एवोपदर्शितानुभवस्य विवादस्य
त्तत्वात् तत्प्रापत्त्याये बाधकाभावे न विभक्तौ निपातानां च संख्याऽभावादिवाचकत्वे न स्यादिति प्रतिबं
धोपसंसर्गाणामपि वाचकत्वमेव अन्यलभ्यस्य तु तत्रैव तत्रार्थत्वं यत्र तदन्येनाकारेन प्रतिबन्धा
दिदोषइति केंद्रस्थीकारमतात्तु पाणिनीयमतापुष्टोपि निरस्तः उक्तयुक्त्योपसर्गाणां द्योतकत्वस्य व्यवस्थापक
त्वात् एते नञ्चद्योतनिपाता द्योतकाः निपातत्वादुपसर्गवदित्यनुमानेन निपातानामपि द्योतकत्वसिद्धौ

चादिनिपातानां वाचकत्वमुपसर्गाणां द्योतकत्वमित्यर्धतीर्थीयं नैयायिकोक्तमनादेयं वैषम्यबीजाभावे
न विनिगमकाभावेन च निपातमात्रस्यैव द्योतकतायां वाचकतायां वा उपसर्गस्यापीति न्यायादिकोक्तं परास्तं।
उक्तयुक्तेरेव वैषम्यबीजत्वात् विनिगमकत्वाच्चाडकारानुमानेनापि योगकं अन्यथा व्यपदेशहेतुत्वाद्यमात्र
स्यैव द्योतकतापत्तेः स्वरादेरव्ययानामपि द्योतकतापत्तेः। अथ निपातानां वाचकत्वे साक्षात्क्रियते। त्व
क्रियते गुरुरित्यादौ साक्षात्कारादेर्निपातार्थतया धात्वर्थताविरहेण तत्कर्मते गुर्वादेस्तत्कारेणाभिधा
नानुपपत्तिः कर्मणि लकारासंभवादिति चेन्न तत्र साक्षात्शब्दादेः प्रत्यक्षादिरूपानुकूलवाचकत्वोपगम
न धातोश्च तदनुकूलव्यापारवाचकत्वोपगमेनादोषात् शिष्यादिनिष्ठव्यापारजन्यप्रत्यक्षविषयो गु
रुरिति शाब्दबोधसंभवात्। अत एव साक्षात्शब्दस्तुल्ययोरिति कोषोपि संगच्छते। न चैवमपि गुर्वादेः
कर्मत्वानुपपत्तिरेव धात्वर्थतावच्छेदकफलशालित्वाभावादिति वाच्यं धातुत्वसमतावच्छेदकत्वरूपधात्वर्थ
तावच्छेदकत्वस्य फलेऽभावेपि धात्वर्थव्यापारानुकूलतासंबंधेन विशेषणतयान्वयित्वरूपस्य धात्वर्थतावे

द्योतकत्वस्य तत्र सत्वात्तान्न च चादिनिपातानां वाचकत्वे कीदृशसमुच्चयप्रतीतिः केकोदृशाश्चेत्सस्यापत्तिरेवं
सोभनस्समुच्चयो दृष्टयोरिति वच्छोभनत्वस्य दृष्टत्वस्य रस्यस्य प्रयोगस्याप्यापत्तिरिति वाच्यं चादिनिपातानां
स्वार्थस्य परविशेषणतये ववोधकत्वस्य व्युत्पत्तिसिद्धतया विशेषणान्वयप्रसंगाभावेनेत्यापत्तिविर
हात् । यत्तु निपातानां वाचकत्वे घटोरेरुस्ते इत्यादौ चानुद्दरिष्टत्वसानिवेस्यादेरस्य सदृशौः शौरैसे रेस दृष्टणा
नुदीत्यानुद्दरिस्यन्नित्यर्थकत्तयात्त्रोत्वप्रदार्थस्याकरणत्वपोत्त्वप्रदोत्तरत्ततीयापाने रर्थकाप्रसंगः नि
पातानां द्योतकत्वे तु न दोषः उत्तरपदार्थस्यात्मसदृशास्य करणत्वसंभवेनोत्तरपदोत्तरतृतीयायाः सार्थक
त्वादिति तदसत् । उपमानोपपेयवाचकपदयोः समानविभक्तिकत्व एवोपमानोपमेयभावस्य साधुत
योत्तरपदोत्तरतृतीयायाः साधुतासंपादकत्वेन नैरर्थक्याप्रसंगाभावात् । यदपि निपातानां वाचकत्वे घटस्यैव सा
दौ विना षष्ठीमनन्वयापत्तिः प्रातिपदिकार्थयोर्विभक्त्यर्थमद्वारिकस्य भेदेनान्वयायोगात् अन्यथा राजो
पुरुष इत्यत्रापि राजः पुरुष इतिवदन्वयापत्तेरिति तन्न उपसर्गभिन्नप्रातिपदिकार्थनिपातातिरिक्तत्वविशेषणेना

दोषात्। किंच विदितानां समुच्चितानामभिधायकत्वान्नभेदनिबंधनाषष्ठीसमुच्चितोघटइत्यभेदेनैवान्वयः नेच
समुच्चितेधर्म्येरोगात्किकल्पनेगौरवमितिवाच्यं। प्रामाणिकगौरवस्यादोषत्वात्। एवं चसमुच्चयस्यैकदेश
त्वान्नतत्रसुंदरादिविशेषणान्वयोपि। एतेनघटश्चेत्यादौविरुद्धविभक्त्यानवरुद्धप्रातिपदिकार्थत्वादभे
दान्वयापत्तिर्घटसमुच्चययोरित्यपिनिरस्तं। घटपदस्यघटप्रातिपदिकेलक्षणयाभेदान्वयेइष्टापत्ते
श्च। ननुव्यतिसेरस्यात्रोपसर्गस्यवाचकत्वमावश्यकंतत्रयाताऽर्थेपेनतत्रलक्षणायाअसंभवात्।
तथाहिविहरतीतिहरतीसधातोर्लङ्गात्मनेपदस्यप्रथमपुरुषैकवचनेवचनांतंव्यतिसेरतिअत्रेअसभुवि
धात्तुरयंधात्तुरदादिगणमध्यस्थः परस्मैपदीकर्तरिकर्मव्यतिहारे इतिसूत्रेणात्मनेपदंसत्वाचार्थस्य
धातोःकर्तव्यात्मनेपदंस्यात्क्रियाविनिमयेव्यतिअसत्थासइतिस्थितेथासःसेइतिसूत्रेणथासःसेस्यात्
व्यतिअससेइतिजातेकर्तरिशपअदिप्रभृतिभ्यःशपोलुक्श्नसोरल्लोपःइतिसूत्रेणाकारलोपस्ततःसाम
स्यार्धधातुकइतिसूत्रेणसलोपः सत्वार्थश्च। तासस्त्योःसस्यलोपःस्यात्सादौप्रत्ययपरेव्यतिसइतिसिद्धंइत्संचात्र

मा॰को॰
२१३

धातोस्तु सत्त्वात् तेन भेदस्य बोधासंभवादुपसर्गस्यैवात्र द्योतकत्वमुपेयमिति चेन्न तु यथा नोस्मरणादे
वात्र शाब्दबोधायोगात् । न च वैपरीत्यमस्तु तथा च नोस्मरणं तस्य शाब्दबोधो न स्यादिति वाच्यं ।
इष्टापत्तिरिति संप्रदायः अत्र वदंति कर्तरि कर्मव्यतिहारेऽनुशासनात् व्यतिसेरसादेवेस्यप्रजा
ल्लनेपदस्यैवार्थः स्वरान्त्याल्लक्षणया वेत्यन्यदेतत् उभयथापि उपसर्गस्य द्योतकत्वमभ्याहतमेवेच
तत्रैधातुत्वोपमज्ञानेनापि शाब्दबोधाभवस्य वेदिनेत्तत्रानुभवापत्त्यापरतिदिक् । अथ प्रसंगान्न
ञो यथार्थो निरूप्यते अत्र शाब्दिकाः नञर्थोनाभावः तथा च स्यघटस्तादेघटभिन्नइति बोधे तत्तुपस्योत
रपदार्थप्रधान्यभंगापत्तेः किं च असत्वादो सर्वनामकार्यभावप्रसंगः अतिसर्वायेत्यादिवत् अभावे
प्रतियोगिनो विशेषणत्वस्य सर्वसिद्धत्वेनोपसर्जनत्वात् इतरपदार्थविशेषणत्वेनोपसर्जनत्वात्
तस्मादारोपविषयत्वेनञर्थः आरोप एव वा विषयत्वं तु संसर्गः एवं चाघटइत्यादौ आरोपितो घट इत्यादि
बोधः असत्यादौ च तत्पदार्थस्य विशेष्यत्वान्न दोषः घटो नास्तीत्यादावपि आरोपितं घटनास्तित्वमित्यादिबोधः

एवं च घटो नास्तीत्यादावार्थिकमभावत्वं नामादाय नञर्थविशेष्यकबोध इति व्यवहारः प्रतियोगिज्ञानप्रति
बन्धकत्वादिकं च संगमनीयमित्याहुः। शाब्दिकनव्यास्तु समास एवारोपितत्वं नञर्थः असमासे घटो नास्ती
त्यादौ त्वभाव एव नञर्थः अनुभवसिद्धाभावबुद्धेरपलापमानाभावादित्याहुः। तन्न प्रथमपक्षे तत्र सर्वत्रा
भावबोधस्यानुभविकत्वात् आरोपत्वस्याननुगमस्य प्रवेशेऽपि उद्देश्ये च तस्य नारोपस्य नञर्थस्य गौरवाच्च न
चोक्तदोषः अर्थे पिप्पल्यादिवत्तत्पुरुषस्यापूर्वपदार्थप्राधान्येन तत्पुरुषस्योत्तरपदार्थप्राधान्यनियम
स्येव सिद्धेः नाप्यसर्वस्यादौ सर्वनामकार्याभावप्रसंगरूपो दोषः तत्र तत्पुरुषस्य सर्वनामसंज्ञाया एतद
दोः सुलोपाकोरनञ्समासे हल्लीति ज्ञापकादेव संभवात् अन्यथाऽसः शिव इत्यादौ प्राप्तेरेवाभावात्
अकोरित्सकच्सहितस्यादेस्तस्य सर्वनाम्न एव प्राप्तेः तस्मात्सर्वत्र नञर्थोऽभाव एव तेन तत्सादृश्यमभाव
श्च तदन्यत्वं तदल्पता अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिता इत्यपि परास्तं सादृश्यादिबोधस्य
लक्षणयैवोपपत्तावभावमात्रस्यैव नञर्थत्वात्। तदुक्तं दीधितिकृता संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थ इति

अथ किमिदं संसर्गाभावत्वमन्योन्याभावत्वं तद्धर्मिविशेष्यके च अत्रके चित्ताभेदसंसर्गारोपजन्य
प्रतीतिविषयाभावत्वं संसर्गाभावत्वं। अभेदसंसर्गारोपजन्यप्रतीतिविषयाभावत्वमन्योन्याभावत्वं
तद्धर्मिविशेष्यकतत्संबंधावच्छिन्नतद्रूपावच्छिन्नप्रतियोगिताकाभावप्रसक्तेस्तद्धर्मिकतत्संसर्गकत
द्रूपावच्छिन्नप्रकारकज्ञानस्य हेतुत्वाल्लक्षणसमन्वयः। न चाधिकरणज्ञानप्रतियोगिज्ञानयोरभावबुद्धिहे
तुतया तत्र एवोपपत्तावुपदर्शितानातिरिक्तकार्यकारणभावे मानाभावः। न च प्रतियोग्यधिकरणयोः स्वतं
त्रेसान सत्वे अधिकरणे प्रतियोगिमत्ताज्ञानाभावदशायामभावे प्रत्यक्षवारणाय तत्कार्यकारणभाव
भावस्यकत्वेति वाच्यं तदानिमभावप्रत्यक्षसामग्र्याकारे बाधकाभावात् अधिकरणानुपरक्तस्य प्रतियोग्य
नुपरक्तस्याभावस्य लौकिकप्रत्यक्षस्तु उद्भवविरहत्वात् अधिकरणप्रतियोगिज्ञानयोरन्यतरदशायामेवाभाव
लौकिकप्रत्यक्षसामग्रीकारात्। यत्वधिकरणप्रतियोगिज्ञानयोः एककारणतारणताद्रूपकल्पनापेक्षया प्रति
योगिविशिष्टाधिकरणज्ञानस्यैककारणताकल्पनमेवोचितमिति सुन्नेकार्यकारणभावसिद्धिरिति तदसत्

प्रतियोगिप्रकारतानिरूपिताधिकरणविशेष्यताशालित्वेनाधिकरणविशेष्यतानिरूपितप्रतियोगि
प्रकारताशालित्वेन वा हेतुत्वे विनिगमनाविरहेण तथापि कारणताद्वयस्यावश्यकत्वात् प्रतियोगिसहस्र
स्यैकैकनिवेशेनाधिकरणसहस्रभेदेन सहस्रकार्यकारणभावाभावतामिति यत्र सहस्रगुणितसहस्र
कार्यकारणभावकल्पनेतत्रास्माकं सहस्रद्वयमात्रकल्पनमिति लाघवात् एवं प्रतियोगिताव
च्छेदकसंबंधभेदेनापि कारणतावाहुल्यं भयतो द्वयोरपीति चेन्मैवं प्रतियोग्यारोपस्याहेतुत्वेनैका
धिकरणसंनिकर्षदशायां तत्तान्नसत्वेपि कस्यचिदेवाधिकरणे उपस्थितानां प्रतियोगिनां कस्यचिदेवाभावं
प्रतीयते न तु सर्वत्र सर्वेषामित्यत्र नियामकाभावः एवं महत्वादावधिकरणे कदाचिद्रूपादेरत्यन्ता
भावः कदाचित्तदन्योन्याभावः अत्यन्ताभावोपि कदाचित्तत्संयोगसंबंधावच्छिन्नप्रतियोगिताकः क
दाचित्समवायादिसंबंधावच्छिन्नप्रतियोगिताकः प्रतीयत इत्यत्रापि नियामकाभावः अनियमे च
सर्वे एवाभावाः सर्वत्र प्रतीयेरन्निति सत्त्वनुभवविरोधः प्रतियोग्यारोपस्य हेतुत्वे च यत्राधिकरणे यस्य येन

संबंधेनैव यदारोपस्तत्र तस्य तत्संबंधावच्छिन्नाभावप्रत्यक्षं तदेति नियमउपपद्यते अन्यथानाधि
करणसंनिकर्षेनन्त्तानदशायामुपपत्स्येतानोप्रतियोगिनां कस्यचिदेव प्रतियोगिनः केनचित्संबंधेन
कुत्रचित्कदाचिदारोपस्य च नियामकाभावः तन्नियामकस्यानुगतस्य तत्तद्विशेषणतानां हेतुकारण
स्य कल्पनेच प्रतियोगितानन्यक्तिविशेषाणामेव तत्तदधिकरणधर्मिकतत्तासंबंधावच्छिन्नतत्तद्रूपा
वच्छिन्नाभावप्रत्यक्षहेतुत्वमालोकिमेतत्तगौदुनाप्रतियोग्यारोपेणैतिव्यन्तेऽभावेतुद्भवानुगतनियामक
संभवेऽननुगतनियामककल्पनागौरवस्याप्याप्ततान्नलाघवेन तत्तदनुगतप्रतियोग्यारोपस्य हेतुत्व
सिद्धौ तत्रानुगतनियामककल्पनागौरवस्य च फलमुखत्वेनादोषत्वात्। अन्यथा प्रवृत्तौ विशिष्टज्ञानो
देहेतुतया अन्यथाख्यातिवसिद्धिप्रसंगात् अन्यथाख्यातिहेतुदोषासंसर्गाग्रहादेरेव प्रवृत्तिहेतुताकल्पने
नोपपत्तिसंभवात्। न तु प्रतियोग्यारोपस्य समानधर्मिकस्याभावबुद्धौ विपरीतज्ञानत्वेन प्रतिबंधकत्वया
नेहेतुत्वसंभवः। न चाहार्य एव प्रतियोग्यारोपो हेतुः स च न प्रतिबंधकः स्यादोपरतिवाच्यं। आहार्यज्ञानस्य

पूर्वं बाधबुद्धिमन्तरेणासंभवात् । प्रतियोग्यारोपस्याहार्यतानिर्वाहाय तत्पूर्वं भावबुद्ध्यंशे आरोपगर्भे तत्त्वा
पि प्रतियोग्यारोपस्य हेतुतयानवस्थाप्रसंगात् तन्न्यारोपात्पूर्वं प्रतेक्षरूपाभावबुद्धिरवश्यं कायेति तत्र च नारोपां
तरापेक्षेति नानवस्थेति वाच्यं । लिंगपरामर्शशब्दज्ञानादिघटितपरोक्षधीसामग्र्या अपि प्रतीत्वादिति तदसत् ।
अभावलौकिकप्रत्यक्षस्य एव प्रतियोग्यारोपस्य हेतुतया नाहार्यारोपस्य चोपनीतभानात्मकत्वात् लौकिकप्र
त्यक्षाविरोधित्वेन तद्धेतुतायामुक्तबाधकासंभवात् । अथाभावबुद्धौ प्रतियोग्यारोपस्य हेतुत्वे प्रतियो
गिज्ञानत्वस्यैव तत्र हेतुतावच्छेदकत्वापत्तिः न च प्रतियोग्यारोपस्य हेतुत्वे प्रतियोगितावच्छेदकविशेषणो
निवेशस्य तेन गौरवादिति घटत्वादिनिर्विकल्पकानंतरं घटत्वाद्यवच्छिन्नाभावप्रत्यक्षवारणाय प्रतियोगिता
वच्छेदकप्रकारकप्रतियोगिज्ञानस्य स्वतंत्रहेतुतावश्यकत्वमेवास्यकमिति वाच्यं । घटत्वतद्व्यक्त्यादिनानाधर्म
प्रकारेणाप्येकव्यक्तिप्रतियोगिताकत्वे रूपैकत्वादिति चेन्न इदं हि रक्तो न वेति संशयानंतरं रक्तो ऽयं नास्तीत्यभावप्र
त्यक्षवारणाय तादृशाभावबुद्धौ दण्डादिधर्मिकरक्तत्वादिप्रकारकनिश्चयत्वेन कारणत्वस्यावश्यकत्वात्तरकोत्था

दिविशेषितदंशे आरोपहेतुतायां रक्तत्वांशे निश्चयत्वानिवेशेनाप्रामाण्यज्ञानाभाववद्दर्शिवेशाप्युक्ते दि
शानेतस्येत्वे हेतुतावच्छेदकगौरवापत्तिवैरूप्यप्रतियोगितावच्छेदकप्रकारकज्ञानत्वेके हेतुतावत्त्वे न
त्वाघवात् एवं घटः साद्विविकल्पकत्तरां विशेष्ये विशेषणमिसाद्दृशीसा घटो नास्तीत्याद्युपनीतभानेनार
णापादितत्तद्धर्मविशेषितप्रतियोगिविशेषिताभाववद्बुद्धौ तत्तद्धर्मप्रकारकज्ञानहेतुत्वकल्पनेनाव
च्छेदकदर्शितयुक्त्यालौकिकप्रत्यक्ष एव प्रतियोग्यारोपस्य हेतुतया तत्प्रत्यक्षापत्तिवारणासंभवादित्या
हुस्तदसत् अन्योन्यसंसर्गाभावान्योन्याभावयोरभ्युपगमात् न तादृशप्रतीतिविषयत्वस्वभावविभागको
पाधिमत्वविवक्षणान्योन्याभावातिरिक्तत्यार्थः। तथाप्यभावाधिकरणकाभावस्यानतिरिक्ततया संसर्गाभावे
वैसान्योन्याभावस्यासंसर्गाभावे तन्योन्याभाववत्त्वसंसर्गाभावस्यासंसर्गाभावत्तया संसर्गाभावत्वलक्षणस्यान्यो
न्याभावे ऽन्योन्याभावलक्षणस्यासंसर्गाभावे ऽतिव्याप्तेर्दुर्वारत्वात् अन्ये तु भेदसंसर्गावच्छिन्नप्रतियोगिताका
भावसंसर्गाभावत्वं समभेदसंसर्गावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वमित्याहुस्तदप्यसत्।

ध्वंसप्रागभावयोरन्योन्याभावस्य च प्रतियोगितावच्छेदकसंबंधे मानाभावेनाद्यलक्षणे ध्वंसप्रागभावयोर
व्याप्तेरसंगतलक्षणे चासंभवात्। यत्तु अत्यंताभावप्रतियोगितावच्छेदकसंबंधेऽपि मानाभावात् द्वितीयलक्षणे
प्यसंभवः न च तेन संबंधेन तत्प्रकारकबुद्धौ तत्संबंधावच्छिन्नतन्निष्ठप्रतियोगिताकाभाववत्तानिर्णयस्य
प्रतिबंधकतया अत्यंताभावप्रतियोगितावच्छेदकसंबंधसिद्धिरिति वाच्यं। वक्ष्यमाणरीत्या तदसिद्धेः
तथा हि विषयितया प्रमेयं नास्तीति प्रतीतौ यथा विषयितायाः स्वनिरूपकत्वेन तत्संबंधावच्छिन्नप्र
मेयत्वावच्छिन्नप्रतियोगिताया अप्रसिद्ध्या प्रतियोगितायाः विषयितावच्छिन्नत्वादेर्भ्रमः तथा तेन संबं
धेन तत्प्रकारकबुद्धौ तत्संबंधावच्छिन्नतन्निष्ठप्रतियोगिताकाभाववत्तानिर्णयत्वेन प्रतिबंधकतायां
तत्संबंधावच्छिन्नत्वनिष्ठसांसर्गिकविषयतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानि
रूपिताभावप्रकारतायाः निवेशनीयेन तथा प्रतियोगितावच्छेदकत्वे बाधकाभावेन दृष्टांते यां संबंधा
(वच्छिन्नत्वनिष्ठसांसर्गिकविषयतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरूपिताभावप्रका)

यासंबंधावच्छिन्नत्वादन्नेमस्वीकारेणाभावस्यप्रतियोगितावच्छेदकसंबंधासिद्धिरिति तदसत्। वृत्ति
नियामकसंबंधस्याप्यभावप्रतियोगितावच्छेदकत्वेबाधकाभावेनदृष्टांतासिद्धिरिति चेन्न विशेषणे
ताविशेषसंबंधेनवृत्तिमत्त्वस्यैवसंसर्गाभावत्वान्योन्याभावस्वरूपत्वात्। अतिरिक्तत्वेउपाधीसंसर्गा
भावत्वेन्योन्याभावत्वेरस्यसुवचत्वाच्च इदंतु बोध्यं प्राचांमतेध्वंसप्रागभावयोरत्यंताभावविरोधित्व
याध्वंसप्रागभाववत्यत्यंताभावाभावेनतत्रघटो नास्तीत्यादिप्रतीतेरत्यंताभावविषयकत्वासंभवे
नध्वंसप्रागभावविषयकत्वमातयोरपि नञ्पदवाच्यत्वमावश्यकं एतदभिप्रायेणैवात्यंताभावत्व
तुपेक्ष्यदीधितिकृतासंसर्गाभावत्वस्यैकत्वस्वीकृतेस्तेनात्रविरोधेनाभावेनध्वंसप्रागभाववतिघटे
नास्तीत्यादिप्रतीतेरत्यंताभावविषयकत्वेबाधकाभावेनात्यंताभावोन्योन्याभावश्चनञोपदस्य
युक्तं। तत्रघटोनास्तीत्यादौयघटभावत्वेमेवबोध्यत्वत्वभावत्वमेवनञ्शक्यतावच्छेदकंयद्दिघ्यात्यंता
भावत्वादिनाबोधस्तदात्यंताभावत्वमन्योन्याभावत्वंचनञ्शक्यतावच्छेदकंनचैवमपियत्किंचिद्धट

वस्यपि घटांतराभावसत्त्वात् घटो नास्तीत्यादिप्रतीत्यापत्तिरिति वाच्यं तत्समभिव्याहारे अन्वयितावच्छेद
कावच्छिन्नप्रतियोगिताकत्वनिरूपितानुयोगितासंबंधेनैवाभावांशे प्रतियोगिनो भानस्य व्युत्पत्तिसि
द्धत्वात् ऽतोऽघात् न च कंबुग्रीवादिमान्नास्तीति प्रमेयघटो नास्तीत्यादौ कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिता
प्रसिद्ध्या नोक्तव्युत्पत्तिसंभव इति वाच्यं गुरुधर्मस्याप्यनुभवबलेन प्रतियोगितावच्छेदकत्वांगीकारात् न
च पीतशंखो नास्तीत्यादावगतिः पीतशंखत्वादेरन्वयितावच्छेदकस्याप्रसिद्धत्वादिति वाच्यं तत्रापीत
त्वप्रकारकज्ञानविषयत्वाश्रयणिकतया ऽप्रसिद्ध्यभावात् एवमन्यत्रापि एतेन पुष्करिण्यां जलं नास्तीत्ये
तस्य ज्ञानं नास्ति तस्मात् घटे वधोऽवध इत्यादावुक्तव्युत्पत्तिभंगापत्तिः परास्तः तत्र अस्मादिपदस्य प्रकृते अन्व
त्वाद्यवच्छिन्नेन चसमभिव्याहृतत्वे धटशब्दस्य पापसाधने वधत्वावच्छिन्ने लाक्षणिकत्वोपगमात् केचित्तु अन
न्वसमभिव्याहारभेदेन व्युत्पत्तिभेदात् पीतः शंखो नास्तीत्यादावुक्तस्थले उक्तव्युत्पत्त्यनंगीकारेण प्रतियोगि
तानिरूपितानुयोगितासंबंधेनैव प्रतियोगिनोऽभावान्वयो न लक्षणां विनैव निर्बाह इत्याहुः अपरे तु लघुधर्मे

नास्तीत्यादावस्तित्वाभावबोधो भूतले न घट इत्यादौ चान्योन्याभावबोध इत्यत्र किं नियामकं चेत् परेषु नापि
बोधे बाधकाभावादिति चेन्न नञ् विनिर्मोके यत्र भेदसंबंधेनान्वयबोधस्तत्रैव नात्यन्ताभावो बोध्यते
यत्र च न हि निर्मोकेऽभेदेनान्वयस्तत्र नान्योन्याभावो बोध्यत इत्युपगमात्। नन्वेवं नञ् विनिर्मोके
क्वचिद्भेदेनान्वयबोधः क्वचिच्चाभेदेनेत्यत्रैव किं नियामकमिति वाच्यं तत्तदाकांक्षाज्ञानादेरनु
गतस्यैव तत्र नियामकत्वात्। यत्तु अभेदेनान्वयबोधे विशेषणवाचकपदसमानविभक्तिकवि
शेष्यवाचकपदमनुगतमेव नियामकं दधि सुंदरमित्यादौ चेत्युभयविभक्तेरनुसंधानादेव बोधः प
टिर्वस्तोकं पचतीत्यादौ पाकादौ स्तोकाद्यभेदान्वयबोधस्य व्यभिचारेण नोक्तस्याभेदेनान्वये नियाम
कत्वसंभवः तत्र विशेष्यवाचकपदोत्तरं सुप्विभक्तेरभावात् एवं वैयाकरणमतेऽपि चैत्रः पचती
त्यादौ चैत्रपाककर्तृत्वरभेदेनान्वयबोधे विधव्यभिचारः तत्र विशेषणवाचकत्वाख्यातपदोत्तरं विभ
क्तेरभावादिति विभाव्यते तदा विरुद्धविभक्तिराहित्यमेवाभेदेनान्वयबोधे नियामकं न चाव्याप्त्युक्ते

स्थलेव्यभिचारोस्त्येवेतिवाच्यं।क्वचिद्विशेष्यबोधोपदोत्तरविभक्तिवृत्तिप्रथमात्वाद्यभावविशिष्टत्वाभाव
विशिष्टविशेषणबोधकपदं क्वचिच्चविशेषणबोधकपदोत्तरविभक्तिवृत्तिप्रथमात्वाद्यभावसुविभा
त्वाभावविशिष्टविशेष्यबोधकपदंनियामकमित्यवस्थयाविरुद्धविभक्तिराहित्यस्याभेदेनान्वयबो
धेनियामकत्वोपगमेनदोषाभावादितितदसत्। वस्तुतोविरुद्धविभक्तिराहित्यस्यतादृशबोधनिया
मकत्वेनीलादिपदस्यविरुद्धविभक्तिमत्त्वभ्रमकालेपिनीलघटमानयेत्यादावभेदान्वयबोधाप
त्तेः तज्ज्ञानस्यतथात्वेचविरुद्धविभक्तेरनुपस्थितिकालेऽनुक्तस्थलेविद्यमानस्यापिविरुद्धविभक्ति
राहित्यस्याज्ञानासंभवेनशाब्दबोधानुपपत्तेः नचविरुद्धविभक्तिमत्त्वेनाज्ञायमानत्वंतादृशबोधे
नियामकमितिवाच्यंउक्तस्थलेमैत्रस्यविरुद्धविभक्तिमत्तयाज्ञानेचैत्रस्यापितादृशबोधानुपपत्तेः
नचचैत्रीयतादृशबोधेविरुद्धविभक्तिमत्त्वेनचैत्रेणाज्ञातत्वंनियामकमितिवाच्यं। तथासतिपुरुष
भेदेनानंतहेतुतापत्तेः किंचविरुद्धविभक्तिमत्त्वेनाज्ञायमानत्वंनामवस्तुगत्याविरुद्धयाविभक्तित्व

द्धत्वेनाज्ञायमानत्वं विरुद्धविभक्तित्वावच्छिन्नप्रकारकत्वाना विशेष्यत्वेनाद्यः नीलो घट इत्यादौ नीला
दिपदोत्तरविभक्तेरमूपदत्वादिग्रहदशायामप्यभेदान्वयबोधापत्तेः नान्त्यः नीलो घटोऽस्तीत्यादावभा
देर्विशेषणवाचकपदानुत्तरत्वेरूपविरुद्धत्वे विभक्तित्वेनाज्ञानदशायामभेदान्वयबोधप्रसंगादित्यादि
कमन्यत्र। इदं तु बोध्यं पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् विधेयत्वाप्रधानत्वं प्रतिषेधाप्रधाने
ताप्रसज्यप्रतिषेधोसौ क्रियया सह यत्र नञ् इति तल्लक्षणलक्षितपर्युदासः प्रसज्यप्रतिषेधश्च न
ञोऽर्थ इति यः प्रवादस्तस्यापि अन्योन्याभावोत्यन्ताभावश्च नञोऽर्थ इत्यत्रैव पर्यवसानं। तथा हि पर्यु
दासस्तावत् यजतिषु ये यजामहं करोति नानुयाजेष्वित्यादौ अत्र नञो निषेधार्थकत्वे वाक्यभेद
स्य ये यजामहं करोतीत्यनुषंगस्य च कल्पने गौरवान्नञोऽभेदार्थकत्वमुपेत्यानुयाजभिन्नेषु यागे
षु ये यजामह इत्यादिवाक्यमंत्रपाठं करोतीत्येकवाक्यतयान्वयबोधः न तु रक्तिपा धातुनिर्देशा
इत्यनुशासनविहितत्वस्ति यो धातुस्वरूपार्थकत्वाय यजतिपदाकर्षणागल्लाभः न चात्र यजतिपदेन

स्तिवं तर्हि किं तु क्तिर् प्रत्ययान्तमेवेति वाच्यं। तथा सति क्तिन्प्रत्ययपरे संप्रसारणस्यावश्यकत्वादिष्टिधि
सस्यैव साधुत्वापायजतिधिसस्यासाधुत्वापत्तेरिति चेदत्र प्राञ्चो नानुपायिनः शवादिविकरणवदिक्
स्तियोर्निरर्थकत्वमेव पचसादिपदे च पचादिधातुनैव लक्षणया स्वात्मकधातुः प्रसाप्यतेऽस्मिन्पक्षे ता
त्पर्यमात्रग्राहकत्वेनोपयोगः उक्तानुशासनेऽपि धातुनिर्देशः स्वस्वप्रकृतिस्वरूपस्यार्थः प्रकृतिपदस्य
तात्पर्यग्राहकावितिचेद्दोषः इत्थं च यजतिधिसत्त्वे स्तिपः समभिव्याहृतत्वयजधातुना लक्षणया स्वरू
पोपस्थितावप्यत्र क्तेस्त्रशक्तिकेन यजधातुस्वरूपेणायागल्लाभः न चैवं यजतीतिप्रकृत्यर्थस्याप्रसिद्ध्या
तत्र सत्यप्यर्थान्वयासंभव इति वाच्यं इष्टापत्तेः निरर्थकोणादिभावेऽहं तपाकादिपदोत्तरविभक्तेरि
व निरर्थकोणादिप्रत्ययोत्तरपदोत्तरविभक्तेरपि प्रकृत्यर्थान्वितस्वार्थबोधकत्वानंगीकारात्। न चैवं
प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिभंग इति वाच्यं तत्र स्वप्रत्ययपदस्यावसर
तिकप्रत्ययपरत्वात् प्रकृतित्वस्य प्रत्ययत्वेऽप्यननुगतानतिप्रसक्तस्याभावेन एव प्रकृतिप्रत्ययांतेभ्यो

वैनतादृशव्युत्पत्त्यकल्पनाच्च किंतु तादृशप्रत्ययप्रकृतिभ्यां तथा तावेव लक्षणया धात्वर्थस्यापि
तेते दर्शान्वयस्तत्र तथैव व्युत्पत्तेः यत्तु तथा सति तत्त्वान्वयप्रतियोग्युपस्थापकपदांतरविरहेण केव
लतिवं तपचसादिपदात्पाकादेरिवं केवलस्तिवं तपचसादिपदादपि पदार्थोपस्थितिमात्रसंभवे
पि शाब्दबोधासंभवात् न चेष्टापत्तिः तत्र पचादिधातोः शाब्दबोधस्यानुभवसिद्धत्वे नानुभवविरोधा
दिति तदसत् तिवं तपचसादिपदे प्रकृतिप्रत्ययरूपपदद्वयसत्त्वेन पाकानुकूलकृतिशाब्दबोधो
दये न दृष्टांतासिद्धेः केवलप्रकृतितः शाब्दानुदयेनेष्टापत्तावनुभवविरोधाभावाच्चेति वदंति तत्त्व
तः क्रियाधातुत्वलक्षणधातुरेवार्थः समभिव्याहृतपचादिधातोरपि न स्वरूपे लक्षणा किंतु पाकादि
रेवार्थस्तस्य च प्रतिपादकत्वासंबंधेन क्रियाद्यर्थे विशेषणतयान्वयः एवं चैपेसादिपदात्पाकप्रतिपा
दको धातुरित्यादिरेव शाब्दबोधः न चैवं पाकादिप्रतिपादकधात्वंतरस्यापि बोधापत्तिरिति वाच्यं तस
वै नास्ति बुद्धिस्थत्ववदत्रापि स्वप्रकृतित्वस्य नियामकत्वात् तृयजति युयजाम हं करोतीत्यादौ च धात्वर्थे

यागादौ प्रतिपाद्यतासंबंधेन स्त्री वाद्यर्थे विशेषणतयान्वयः एवं च पचत्यादि धातुप्रतिपाद्येषु यागा
दिष्विस्वर्थः यद्वास्ति यो धातुस्वरूपेणाकाचपि अत्र यागादिस्वरूपेः र्थैल्लक्षणाय जादिधातुळे लक्षण
या स्वपरः तस्य च प्रतिपाद्यतासंबंधेन स्ति वर्थे यागादौ विशेषणतयान्वयः तथा च यज प्रतिपाद्य
षु यागेष्विस्यादिरेव तत्र बोधः इत्संच यपस्य पानां प्रकृत्यर्थे स्यादिषु सत्त्वेपि गापि नास्तीति न च स्तिपो
र्थान्तरे साधुत्वात्कथमेव दिनिवाच्योऽस्व प्रकृत्यर्थातिरिक्तार्थान्तर एव तस्या साधुत्वात्तत्तस्यार्थान्तरा
साधुत्वे मानाभावाच्च अनयैव रीत्या ईक्षते नाशब्दमिति विदांतसूत्रे आज्यं द्रव्यमनो देशाय जतिषु
विधीयत इति कात्यायनसूत्रे ईक्षण यागयोरन्वयबोधविषयत्वापपादनीया एतेन ईक्षतेर्नाशब्द
मिति सूत्रे ईक्षतिशब्दस्य लक्षणा वाचकत्वव्यञ्जनिष्विसादाव पियजतिशब्दस्य यागवाचकत्वमिति न
वीनोक्तिः परास्ता इक्श्तिपौ धातुनिर्देशा इत्यनुशासनविरोधात् अनयोः धातुत्वविशिष्टशक्तौ

पचतिधातोरिस्यादिपौनरुक्त्यप्रसंग इति वाच्यं। दंडेरक्तदंड इतिवत्पौनरुक्त्यविरहात् न च तथा
पि पचतिपदार्थविशेष्यकधातु[illegible]दार्थप्रकारकप्रतीतिश्योर्वारितस्य पचतिधातुरीत्यादिवाक्य
स्य रक्तदंडो दंड इत्यादिवाक्यवन्निराकांक्षत्वापत्तिर्दुर्वारेति वाच्यं तत्र धातुपदस्य धातुपदवाच्यल
क्षणापरमात्। केचित्तु क्रियोधातुत्वे शक्तिः एकक्रिया इत्यनुशासनेऽपि धातुनिर्देशः इत्यस्य धातु
इत्यर्थः धातुत्वे च संकेतविशेषसंबंधेन धातुपदवत्त्वमेव। तच्च विध्यर्थेष्टसाधनेष्टसाधनता
दिवत्समभिव्याहृतधात्वर्थविशेषणतयान्वेति समभिव्याहृतधातोश्च स्वरूपे लक्षणा। तथा च
स्तिर्वर्तपचत्यादिपदाद्धातुत्ववान्पचेत्यादिरेव बोधः तदुत्तरं सुऽर्थोऽपि धात्वर्थ एवान्वेति
प्रकृत्यर्थगतत्यादिव्युत्पत्तेरकल्पनात् न च सार्थकस्य यांतसमभिव्याहृतसुवर्थस्य प्रकृत्यर्थ
एवान्वयो व्युत्पन्न इति वाच्यं। सर्वत्र तादृशव्युत्पत्तौ मानाभावात् इष्टसाधनत्वादिशक्ततव्याद्यंतस
मभिव्याहृतसुवर्थस्य तव्याद्यंतप्रकृत्यर्थेऽन्वयादर्शनेन व्यभिचाराच्च येन तिसृयेय आमहं करो

तीत्यादौ चक्तिपो धातुत्वमर्थः यजादिधातोश्च यजनप्रतिपाद्ययागादौ लक्षणा तदेकदेशे यजादौ च धातु-
त्वस्य विशेषणतयान्वयो व्युत्पत्तिवैचित्र्यात्। इत्थं च धातुयत्नप्रतिपाद्ययागे ष्णिस्यादिरेव तत्र बोधक-
स्याकुः अन्ये तु श्तिपो धातुत्वेन धातावेव शक्तिः तन्नेच मरतिलक्ष्यार्थस्य प्रकृतिस्वरूपस्य तादात्म्य-
नान्वयः तथा च श्तिवं तप्रचत्यादिपदात्तत्पचाभिन्नो धातुरित्याकारको बोधः यजतिर्युथे यजाम-
हे करोतीत्यादौ च यजनप्रतिपाद्ययागादेर्धात्वर्थतया तदेकदेशे यजादौ श्तिवर्थस्य धातुत्वावच्छिन्न-
स्याभेदेनान्वयः इत्याकुत्तन्दसत् एकदेशेन समं भेदेनान्वयेप्यभेदेनान्वयानुपगमात् प्रकृतप्रत्य-
प्रत्ययार्थयोरभेदान्वयस्य कात्यायनदृष्टत्वाच्चानन्वयागसायकादृष्टोपिता इत्यन्वयः स्वीक्रियत इति वाच्यं।
गतेरुक्तत्वात्। अत एव श्तिपो धातुत्वेन धातौ शक्तिः यजधातुः स्वपरः तेन यजाभिन्नधातुरिति बोधः
एवमसत्यपि एवं च यजधातुर्बोधयति तेन यागं उपस्थाप्यत इत्यपि निरस्तो धर्मगानो पाधा-
धातुपाधिनो मेयिलास्क। इकु श्तिपो धातुनिर्देश इति सूत्रेण सिद्धस्य यजतिशब्दस्याह्विरेकशब्दस्य

वत्ववाच्यवाच्यलक्षणावृत्त्या यागलाभः अथात्र नक्लिष्टस्य यस्य यागत्वस्य केवले तस्य प्रवृत्ति भागस्वरू
पतात्पर्यग्राहकेतयोपसर्गवत् द्योतकत्वात् तत्र न्यायात्तत्त्वानुसंधानेनानेतरशक्तिकल्पनागौरवप्र
संगात् प्रवृत्तिरूपेण यजधातुनायो न स्त्मार्थ। न च यजधातोरेव यागलक्षणेति वाच्यं तस्य तत्तेश
क्तत्वात् न च धातुत्वविशिष्टशब्दत्वविशिष्टे वास्तिय शक्तिः तत्र प्रवृत्तस्तु यस्यापि तस्य धातुस्वरूप
स्यतादात्म्येनान्वयाय नामिन्नशक्त इति स्वाभाविको बाधः यजति प्रविसादेस्तु य नाभिन्नधातुवाच्य
यागे त्याप्यसेवधादिरूपात्तियोलक्षणात्तेन यागत्वाभ इति वाच्यं पर्यपरतापत्ति यो साधुत्वात्।इ
कृत्स्नियो धातुनिर्देश इत्यनुशासनेन धातुनिर्देश एवत्तिपः साधुत्वनियमनात् अन्यथाऽपादा
नाद्यनुशिष्टायाः पंचम्यादेः कर्मकरणादावपि गौणप्रयोगप्रसंगात् क्रियाधातुत्वविशिष्टशब्द
त्वविशिष्टवाशक्तो यजतिर्धातुर्भेवत्तिः शब्दरसादावनन्वयप्रसंगाच्चेति चेन्मैवं अनुशासनं नाति
प्रमायलोपिइ कृत्तियावेव धातुनिर्देशे साभूत्त न क्विन्नादिरित्येव नियम्यते न तु क्रियायां यत्रा साधुत्वम

555

ने नानुशिष्यते एवं कर्मणि द्वितीयैवेसे वनियमो न तु द्वितीया कर्मण्येवेति मतएव घटं जानासीत्या
नवेतीत्यादौ विषयतामात्रे लक्षणया द्वितीयाप्रयोगः क्रियश्च धातुस्वरूपे स्वरूपसंबंधावच्छिन्नावृत्तित्वरूप
मुपपाद्यते न च स्तिवं तय जतिपदोपजस्वरूपमित्तित्स्याभाति कोबोधः स्वरूपत्वे तु गगनाभावादिरखंडो
धर्मः सचानवच्छिन्नोभावो प्रत्ययादेनाप्र इतित्तिमत्तंय मथापजतिमधुर रसादो मधुरतादात्म्य
स्यपयजस्वरूपमत्र पानुरूपपत्तेः न च धात्वर्थ एवतद्वत्व पर इति वाच्यं धातुसमानाधिकरणविशेष्य
नि प्रस्य नपुंसकत्वापत्तेः संचारोरत्तिमंदिरावधीतिवत्। तेन स्वरूपार्थके प्रत्ययसामानाधिकरण्य
तल्लिंगसंख्याग्राहकत्वे धातुसामानाधिकरण्य नपुंसकैकवचनत्वे विशेष्यत्ति प्रयदानामि सर्व
स्यमभ्युपगछंतिच धातुनिर्दिष्टस्याप्यर्थस्यभाव प्रत्यया वाच्यत्वमभियुक्ताः क्रियायाः साध्यतावस्था
धातुरूपनिर्वेधनालिङ्भावस्तकयस्तस्याः सत्व आदिनिर्वेधन इति साध्यता लिंगसंख्यानान्वयः सिद्ध
भावस्तदन्वयरस्माद्भुः नेयमे पिकास्करपजतिपदमिदस्वरूपार्थकमेवयजतिपितिस ममप्यपात्तमपि

करणत्वमर्थधर्मोपि शब्दप्रपञ्चयते यथा गमिकर्मत्वं तेनकेनोध्दते तत्र एवमेवानुपाजभिन्नता
मागमत्पार्थनिष्ठापि शब्दस्यार्थसंबंधादुपचर्यते ह्यसाकुरित्संलग्नसंगागतेन । प्रसज्यप्रतिषेधस्तु
रात्रौ श्राद्धं न कुर्वीतेत्यादौ अत्र नञः प्रसज्यप्रतिषेधार्थः तत्र वा संताभावस्य वा संताभावः
लिङ्‌ । एवं साधनताभावपीतपा च रात्रौ श्राद्धकरणं इष्टसाधनताभाववदित्यन्वयबोधः न चात्र
नञः पर्युदासात्सकर्मेदार्थकतामुपेत्य रात्रौ तरकालिश्राद्धकरणाविधायकत्वमेवास्तु किं निषेधा
र्थकत्तयेति वाच्यं तथा सति अमावास्यायां पितृभ्यो दद्यादिति वाक्येन रात्रौ श्राद्धप्रसक्तेन करणाप
त्तेर्दुर्वारत्वात् । निषेधार्थकत्वे तु विशेषनिषेधस्य तु सामान्यविधेर्विशेषेतरपरतया शास्त्रेणाभ्या
दर्थिदर्यं नकौण्डिन्याप दातव्यमित्यादौ तुल्यत्वसिद्धत्वयामावास्यायामित्यादिविधेरात्रौ तरामावा
स्यायां श्राद्धविधायकत्वयान रात्रौ श्राद्धकरणापत्तिः तेषाप केवचनाभावात् । अमावास्यायामित्या
दिविधेरात्रौपरत्वापपादकतया च नञो निषेधैवपर्यवसन्नत्वपापिप्रसक्तं हि प्रतिषिध्यत इति नियमेन

रात्रिश्राद्धस्याप्रसक्त्या निषेधासंभव इति वाच्यं। यदि निषेधो न स्यात्तदामावस्यायामिसा दिवामेस्य रात्रौ
तत्परता न स्यात्तदा रात्रिश्राद्धं प्रसज्येत सायादिनप्रसक्तेस्सत्वात्। न तृप्तिर्यां नोतरिक्षेहिरण्यपेभि
श्चेत्तव्य इत्यादावेव तरिक्षे निश्चय न स्याप्रसक्तावपि प्रतिषेधे नतादृशनियमे मानाभावोस्ति। वस्तु
तस्तादृशनियमसत्वेपि न क्षतिः यद्गुर्मेमन्वयितावच्छेदकीरस्य शास्त्रतो लोकतो वा रष्टसाध
नेमवगत्ते तद्गुर्मोप्युपयएवधात्वर्थे रष्टसाधनत्वास्यं नाभावसेसर्गो विधिसमभिव्याहृतनञा
प्रसाप्यते न तु तदनाश्रये धात्वर्थे इष्टसाधनत्वादृशनियमार्थः इत्येवामावास्याश्राद्धस्य रात्रि
श्राद्धपि सत्वान्नतादृशनियमभंग इति सारं अत्र वदंति सामन्यशास्त्रविरोधिविषयेवबाध
जेनकनञः पर्युदासपरत्वनियमेन रात्रौ श्राद्धं न कुर्वीतेत्यत्रापि नञः पर्युदासपरत्वेन तु
निषेधपरता अत्र न कलंजं भक्षयेदित्यादिवाक्यस्य न तिव्यभिचारकारणापजनकोतेनरवि
शेषणं अतिरात्रे षोडशीनं गृह्णाति नातिरात्रे षोडशीनं गृह्णातीत्यादिविधिवाक्यस्ता न जिव्यभि

म्या· कौ
२२५

चारवारणायसामान्येत्तिशास्त्रविशेषणेसामान्यशास्त्रेचात्रस्वघटितशास्त्रान्वयितावच्छेदक
मापकीभूतधर्मावच्छिन्ननिष्टेष्टसाधनत्ताबोधकत्वेस्वपदेनजपरं इत्यस्यचैत्रोश्राद्धंचेकुवि
तेसत्रनञोलक्षणयाभेदश्चेत्परत्तयाशत्रिभिन्नेश्राद्धकरणमिष्टसाधनमित्यन्वयबोधःभेद
वद्बोधकत्वेपिबोधकत्वानपायासमुदायपरत्वमव्याहतंघटादन्योघटइतिरइत्यादाविवय
दार्थैकदेशेपिभेदऽपरपदार्थान्वयोत्पत्तिवैचित्र्यात्।अथभेदएवनञर्थआस्तांतस्यचामा
वास्यायांपित्र्योदघ्यादितिविधिवाक्यस्यामावास्यादिपदार्थेविशेषणतयान्वयोस्तुएवंचैत्रा
त्रिभिन्नायाममावास्यायांपित्र्योदघ्यादित्याद्याकारकएवान्वयबोधइत्येकवाक्यत्वेवनभि
न्नवाक्यत्वमितिचेन्न।तयासतिशत्रिकृतस्याप्यष्टकाःकार्याइत्यादिविधिबोधितेऽष्टकादिश्रा
द्धस्यसफलतापत्तेः।तत्रविधेयसमभिव्याहृतकालवाचकपदेनशत्रिभिन्नकालकर्त्तव्यत्वस्यालाभा
त्।किंचामावास्यायांपित्र्योदघ्यादित्यादौदघ्यादितिक्रियापदस्याशत्रोश्राद्धंनकुर्वीतेसत्रकुर्वीत

तिक्रियापदस्य च वैयर्थ्यप्रसंगः अत एव वा कर्मभेदोपगमोऽपि न दोषाय । न च यथा चैत्र पचतौ सादे
संभेदनान्यतरवैयर्थ्यमिति न्यायेन खलु बाख्यातान्यामेककर्मवैकत्वादिकं बोध्यते तद्वदत्रापि द्वाभ्यामे
व क्रियापदाभ्यामेकैव क्रिया बोध्यत इति वाच्यं रुध्धातुराधातोः समानार्थकत्वाभावात् यथा कथंचि
त्समानार्थकत्वोपगमेन वैयर्थ्यपरिहारेऽपि निष्प्रयोजनकत्वस्य दुर्वारत्वात् । चैत्रः पचतीत्यादौ च सा
धुत्वस्यैवैकवचनद्वयोपादानप्रयोजनत्वात् परन्तु रात्रिभिश्राद्धं कुर्वीतेति भिन्नवाक्यतयोश्च पर्वो
थेऽप्यमावास्यायां पितृभ्यो दद्यादिति विधिबलात् रात्रिश्राद्धस्याप्यमावास्यादिश्राद्धस्य फलजनकता
पत्तिर्दुर्वारा अमावास्यादेः षष्टिदंडव्यवच्छिन्नतयाऽमावास्यादिश्राद्धत्वेन रात्रिश्राद्धस्यापि फलत्वरूप
योग्यत्वादिति तदसत् । रात्रिश्राद्धं न कुर्वीतेत्यस्य खलु चिन्ताकर्म कर्तव्यमिति वदधिकारविधिरूप
तया कर्मसामान्ये कर्तृविशेषणत्वेन श्रुतिवत्स्याधिकारत्तयाऽश्रुतविहितकर्मणः फलत्वरूपयोग्यत्वे
ऽपि फलानुपधायकत्ववत् विशेषरात्रिश्राद्धातिरिक्तश्राद्धसामान्येऽपि कालविशेषणतया रात्रिभेदस्या

धिकारतया रात्रिकृतामावस्यादिश्राद्धादेः फलस्वरूपयोग्यत्वेपि फलानुपधायकत्वात्। न च तत्र माना
भाव इति वाच्यं कर्मसामान्ये शुचित्वस्यामावास्यादिश्राद्धजन्यतावच्छेदकपुण्यत्वावांतरनिखिलमो
ति व्यापकजातिविशेषावच्छिन्नं प्रति रात्रिभिन्नकालत्वस्य तच्छ्राद्धस्यापि सामान्यतः कारणत्वात्। न चैव
मपि रात्रिश्राद्धस्य रात्रिभिन्नमहाकालत्वेन तत्पातत्तः फलापत्तिर्दुर्वारैवेति वाच्यं रात्र्यवृत्तिश्राद्ध
त्वेन तस्य कारणत्वात् न हि येन रूपेण वेदादवगम्यते तेनैव रूपेण कारणतेति नियमो मानाभावा
दिति जपरत्नु नतो भेद एवार्थः तस्य चामावास्यायामपि तत्र्योदश्यादिस्यत्रामावास्यादिपदार्थैक्यपः
यथा च रात्रिभिन्नामावास्यायामपि तन्त्र्योदश्यादिनिवाक्ये कवाक्यतयान्वयः संभवे वैकवाक्यत्वे वाक्य
भेदो हि नेष्यत इति न्यायात् एवं सति लक्षणाविरहेण लाघवमपि। असंताभावत्वान्योन्याभावत्वयो
रुभयोरेवाखंडोपाधिरूपयोः समशरीरतया विनिगमकाभावेन शक्यतावच्छेदकत्वेपि लक्षणाविरहा
त्। ततोऽसंताभावत्वेन प्रत्यक्षवदन्योन्याभावत्वेनापि प्रत्ययस्य स्वारसिकत्वात्तत्सकलप्रामाणिकसिद्ध

२२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वाच्च। न चैतथापि दर्घात्तु कुर्वीतेति क्रियापदद्वयोरन्यतरवैयर्थ्यापत्तिर्दुर्वारैव दाधात्तुहेंधात्वोः स
मानार्थकत्वाभावेन संभेनान्यतरवैयर्थ्यमिति न्यायापाविषयत्वादिति वाच्यं तथा सति क्रियापदवैय
र्थ्यमियाभिन्नेवाक्ये त्वनुपाजेयेयजामहमंत्रपाठनिषेधकवाक्येपि नञो निषेधपरत्वापत्तेः तत्र पर्यु
दासपरत्वस्यैव पर्युदासाधिकरणसिद्धत्वात् तत्र पर्युदासपरत्वाभावे पर्युदासस्थलस्यैव दुर्लभ
त्वापत्तेः। न च यजतिषु येयजामहं करोति नानुपाजेष्विस्यैव तत्र निषेधविधित्वात् क्रियापद
द्वयाभावेन तद्वैयर्थ्याभावात्। येयजामहमित्यस्याप्यनुषंगप्रसंगापत्तेश्च नैकवाक्यत्वस्यागर इति वाच्यं
यजतिषु येयजामहं करोति नानुयाजेष्वित्याकारकस्य वाक्यस्य श्रौतत्वाभावेन तत्तद्वाक्यस्य श्रौतवाक्य
द्वयतात्पर्यविषयार्थकपृथक्संग्रहरूपत्वात् तथा हि एवं वैससदर्थापनापत्तिर्यसंप्रत्यमत्वादि
तरस्यैकवाक्ये नानुयाजेषु येयजामहं करोतीति द्वितीयस्यात्र प्रजापत्तिरिस्येतेन प्रथमवाक्यैकदेशान
आश्रावयेति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं येयजामह इति पंचाक्षरं द्व्यक्षरो वषट्का

रएषैवसप्तदशाक्षरोमंत्रगणः प्रजापतित्वेनस्तूयते प्रजापतेरपिसप्तदशाकलिंगशरीरसमष्टिरू
पत्वात् । यतश्चायंतोनुगतस्तस्मान्नारभ्याधीतेनवाक्येनैकदेशेनसर्वयज्ञेषुमंत्रगणोविनियुक्तः ना
नुयाजेष्वित्यादिद्वितीयवाक्यंचमंत्रगणविधेरेववाक्यशेषोभूत्तेसनुयाजातिरिक्तयागेषुपेयज्ञा
महविधिरूपपर्युदासपरमिति । नचैवंमतिरात्रेषोडशिनंगृह्णातिनातिरात्रेषोडशिनंगृह्णातीत्यत्रा
पिपर्युदासपरत्वापत्तिरितिवाच्यंषोडशिपात्रग्रहणेतदभावेनान्ययागस्यागौरवग्रस्तापिवि
कल्पआस्थीयतइतिपर्युदासाधिकरणएवसिद्धांतितत्वात् । अथरात्रौश्राद्धंनकुर्वीतेत्यस्यपर्यु
दासपरत्वेनसंभवतिपर्युदासस्यभेदरूपत्वात्तदनुयोगिकालवाचकपदाभावात् । नचैवसप्तम्या
तेकालस्यपक्ष्याहारान्नहीपरइतिवाच्यंतथासतिगौरवापत्त्याप्रसज्यप्रतिषेधपरत्वांगीकारस्यैवौ
चित्यादितिचेन्नतद्वाक्यस्यप्रतिषेधपरत्वेविरोधनिषेधेसामान्यविधेस्तदितरपरत्वस्याभासने
न्योदधिदातव्यंनकौण्डिन्यायेत्यादौपर्युदासत्वसिद्धत्वात्अमावास्यायांपितृभ्योदद्यादित्यादिसाधनेनैकश्राद्धविधि

दुआमावास्यादिपदानां रात्रौ तरामावास्यापरत्वे लक्षणापत्तिरूपगौरवप्रसंगेन तद्दोषे सत्यापत्युद
संपरत्वमुपेत्य समस्यं तेककाल्पदाध्याहारकल्पनेलाघवेन पर्युदासपरत्वस्यैव युक्तिसहत्वात्
शेषं पूर्ववदिति प्राहुः केचित्तु आमावास्यापामिस्यादिवाक्येन दिवाश्राद्धरात्रिश्राद्धयोरुभयोरेव
प्राप्तत्वात्तरात्रौ श्राद्धं तकुर्वीतेति वाक्यं दिवाश्राद्धप्राशस्त्यपरं तथा च रात्रौतरकालीनश्राद्धकरणं
प्रशस्तमित्यन्वयबोधेन दिवाश्राद्धस्य प्राशस्त्ये ज्ञाते ततः अर्थतस्त्वरात्रौश्राद्धस्याप्राशस्त्यं लभ्यते प्रा
शस्त्याप्राशस्त्ये उत्कृष्टाप्रकृष्टादृष्टजनकत्वे उत्कर्षापकर्षौ चादृष्टगतौ फललौकर्षादिकर्षप्रयोजकौ जाति
विशेषरूपौ एवं च दिवाश्राद्धजन्यतावच्छेदकपुण्यत्वावांतरजातिविशेषावच्छिन्नं प्रति दिवाश्राद्धं
स्य कारणत्वमेवं रात्रिश्राद्धजन्यतावच्छेदकपुण्यत्वावांतरजातिविशेषावच्छिन्नं प्रति रात्रिश्राद्धस्य
चापरं अथैवं दिवाश्राद्धजन्यतावच्छेदकवैजात्यस्य दिवाश्राद्धरात्रिश्राद्धजन्यादृष्टसाधारणेनामावा
स्यादिश्राद्धजन्यतावच्छेदकेन पुण्यत्वावांतरजातिविशेषेण सममामावास्यादिवाश्राद्धजन्यादृष्टसंक

योपपत्तिः अदृष्टकादिदिवाश्राद्धजन्यादृष्टाभावात्स्यादि रात्रिश्राद्धजन्यादृष्टयोः परस्परं व्यभिचारात् एवं रा
त्रिश्राद्धजन्यतावच्छेदकवैजात्यस्यापि तेन सममभावात्स्यादि रात्रिश्राद्धजन्यादृष्टे सौकर्योपपत्तिः अ
दृष्टकादि रात्रिश्राद्धजन्यादृष्टाभावे स्यादिति दिवाश्राद्धजन्यादृष्टयोः परस्परं व्यभिचारादिति चेत् तस्याद
वेममावात्स्यादि श्राद्धजन्यतावच्छेदकवैजात्यस्य दिवाश्राद्धजन्यादृष्टरात्रिश्राद्धजन्यादृष्टसाधारण
त्वे तदेव नञ्जामाविस्याश्राद्धवैजात्यं हि दिवाश्राद्धरात्रिश्राद्धजन्यादृष्टसाधारणं नैकं किंतु एकं दि
वाश्राद्धजन्यादृष्टमात्रवृत्तिं अपरं च रात्रिश्राद्धजन्यादृष्टमात्रवृत्ति कारणतापि प्रत्येकं दिवाश्राद्ध
त्वे रात्रिश्राद्धत्वाभ्यामित्युपगमात् । अथ रात्रौ श्राद्धमिति वाक्यस्य प्राप्तस्य परत्वे यस्मिन्न हेतुमपदि
न एव च मध्याह्ने मरणतिथ्यभावः तस्मिन्नब्दे एकोद्दिष्टविलोपप्रसंगः प्रत्यब्दं कुर्यादिति वीप्साभंग
प्रसंगश्च एवं पक्षिमासे दिनद्वय एव मरणतिथ्यभावस्तस्मिन्मासे प्रेतपारामासिकैकोद्दिष्टविलो
पप्रसङ्गो वोऽङ्गश्राद्धाभावेन प्रेतत्वापरिहारापत्तिः र्वा न्हेमान्तकं श्राद्धमपराह्णे च पेत्त कं । एकोद्दिष्टं तु

मध्यान्हे प्राप्तत्वेऽपि निमित्तकमिति वृद्धपुराणवचनेन ऐकोद्दिष्टकरणस्य मध्यान्हमात्रकर्तव्य
ताबोधनात् कालांतरविधायकवचनाभावेन प्राशस्त्यपरमिदं वचनमिति वक्तुमशक्यत्वात्। रात्रा
विसादिवाकस्य रात्रिभिन्ने श्राद्धं कुर्वीतेति पर्युदासपरत्वे तु तस्यैव कालांतरप्रापकतया मध्यान्ह
विधेः प्राशस्त्यपरत्वस्य वक्तुं शक्यत्वादिति चेन्न कालांतरस्य विधितोऽप्राप्तावपि प्रसक्तमिति योऽप्राप्य
र्थानुपपत्त्यैव मध्यान्हविधेः प्राशस्त्यपरत्वसंभवादित्याकूतं तदसत्। रात्रौ विसादिवाकस्य प्राश
स्त्यपरत्वे सकलप्रामाणिकसंमतविधित्वानुपपत्तेः अनेकवेजासकारणतादिकल्पनादिप्रयुक्त
गौरवापत्तेश्च। एतेन रात्रौ विसादिवाक्यं न नञ्प्राशस्त्ये लक्षणया रात्रिश्राद्धस्याप्राशस्त्यं बोधयतीति वा
च्यं रात्रिश्राद्धकरणमप्रशस्तमिति बोधः। शेषं पूर्ववदित्यपि परास्तं। नञः प्राशस्त्ये लक्षणाकल्पनप्र
युक्तगौरवापत्तेश्चेति दिक्। निरस्तैतेन तद्द्वीपवर्तिरविरश्मिजालः कालविशेषः त्रयासि निरस्तमेतत्
द्वीपवर्तिरविरश्मिजालं पदे त्रिष्वपि साहित्ये द्वीपवर्तिरविरश्मिजालाभाववत्त्वात् कालविशेषत्वे द्वीपोरा

व्या॰कौ॰
२२८

त्रिरित्यर्थः। रात्रिसामान्यस्य स्थलसत्त्वेऽप्येतत्द्वीपवर्त्तिरविरश्मिसत्त्वकालीनद्वीपान्तरीयरात्राव्व्याप्ति
प्रसंगात्। अत्र द्वीपवृत्तिलक्षघटके दिवसेपि कतिपयरश्मीनामभावसत्त्वादिति व्याप्तिवारणाय नाल
पदं। सामान्याभावत्वाभावात्। तथा चैतत्द्वीपवर्त्तिरविरश्मिसामान्याभावाधिकरणीभूतः कालविशेषो
ऽत्र द्वीपे रात्रिरिति फलितं। एतेनात्र निरासो न प्रागभावः। अतीतरविरश्मीनामालोकांतर्गतानां प्रागभाववि
हिणा संभवापत्तेः। नापि ध्वंसः। अनागतरविरश्मीनां जालांतर्गतानां ध्वंसविरहेणासंभवापत्तेरिति
निरस्तं। न च दिवसेपि द्वीपांतरावच्छेदेन तादृशसामान्याभावसत्त्वादतिव्याप्तिरिति वाच्यं। निरवच्छि
न्नतादृशसामान्याभावाधिकरणत्वस्य विवक्षितत्वात्। अन्योन्याभावो यदि नाव्याप्यवृत्तिस्तदा तादृ
शरश्मिमत्सामान्यभिन्नत्वमेव वा विवक्षणीयं। रात्रावपि द्वीपांतरवर्त्तिरविरश्मिसत्त्वेनासंभववारणा
य एतत्। द्वीपवर्त्तितिरश्मिविशेषणं द्वीपोऽत्र भारतवर्षादिरूपो भूखंडविशेषः तद्वृत्तित्वं च तत्संयुक्त
त्वं तेन रात्रावपि जंबूद्वीपांतर्गतस्य सुमेरोरुत्तरदिशि रविरश्मिसत्त्वेपि नाव्याप्तिः। न च भारतवर्षादिप

र त्वेपि पुष्कलदेशीयदार्दंडद्वयं राजित्वलदाकामरूपादौ रविरश्मिसत्त्वादव्याप्तिर्दुर्वारेति वाच्यं । तदानीं
कामरूपादौ रविरश्मिसत्त्वेमानाभावात् । अस्तु वा यावद्देशावच्छेदेन रविरश्मिसंबंधाभावे प्रमाणं का
नां रात्रिव्यवहारस्तत्सरमेव द्वीपपदं स च गौडमैथिलादिरूपभूखंडविशेष एव । रात्रावपि चंद्रादीनां
रश्मिसत्त्वादसंभववारणाय स्वीति । अथैतत् द्वीपवर्त्तिरविसामान्याभाववान् कालविशेष इत्येवास्तु
किं रश्मिपदेनेति चेत् रात्रावप्येतत् द्वीपवर्त्तिरवेर्द्वीपांतरावच्छेदेन सत्त्वादसंभववारणाय रश्मिपदं
तादृशरश्मेर्यत्किंचिद्द्वीपांतरावच्छेदेन रात्रौ एतत् द्वीपसंबद्धरविरश्मीनां द्वीपांतरगमने मानाभावा
दिति वाच्यं एतद्द्वीपवर्त्तित्वविशिष्टरव्यभाववति वस पेवत्त द्वारणसंभवात् रात्रावपि सायमेत
तत् द्वीपसंबद्धरविरश्मीनां द्वीपांतरे द्वित्रिक्षणावस्थानस्य प्रामाणिकत्वेन तादृशविवक्षाया रश्मि
त्वेप्येवैशेष्यावश्यकत्वात् । इति चेन्न । अखंडाभावे तपावैयर्थ्याभावात् द्वीपस्य भूखंडविशेषस्य सक
तया तद्घटितत्वस्य रवावभावाद् प्रसिद्धिवारणाय रश्मिपदस्यावश्यकत्वात् । न च रात्रावपि सौरतेजो

भिस्तत्तस्य वालुकादिना रविरश्मिसत्त्वात्तत्र त्रसरेणुसत्त्वाच्चासंभव इति चान्ये रविरश्मिपदस्य महत्त्वम
हत्त्वोद्भूतरूपवत्तेजःपरत्वात् । वस्तुतस्तु रविरश्मिपदं चेद्रप्रभादिव्यावृत्तसौरप्रभावृत्तिप्रभात्वव्या
प्यानुभवसिद्धजातिविशेषविशिष्टपरं प्रभात्वं च साक्षात्पजनकतावच्छेदकतया सिद्धो महदुद्भूतान
भिभूतरूपवत्तेजोमात्रवृत्तिः त्रसरेणुव्यावृत्तो जातिविशेषः अन्यथा रविरश्मित्वस्यैवदुर्वचत्वात् ।
तद्भिन्नरविसंयुक्तरश्मित्वे तारकादिरश्मिसाधारणत्वात् । तादृशरविरश्मीनां तत्संयोगानां कालिक
संबंधावच्छिन्नप्रतियोगिताकाभावस्य गगनादावपि सत्त्वात्तत्राव्याप्तिवारणाय कालपदं सत्त्व
येतिः अव्याप्तिवारणाय विशेष्यपदं नाहोरात्रिरित्यागमात्तस्य रात्रिभिन्नत्वावधारणात् विशेषत्वं च स
यो धारत्वं मतकालादेश्च निरवच्छिन्नतादृशाभावाधिकरणत्वविरहान्नातिव्याप्तिः केचित्तु निरस्तोपाद
रेतत्क्षेपावच्छेदेन रविरश्मिसामान्याभावाधिकरणत्वमर्थः एवं च निरवच्छिन्नाधिकरणत्वेन विस
णीयं दिवसक्षेपान्तरावच्छेदेन रविरश्म्यभावसत्त्वेऽप्येतत्क्षेपावच्छेदेन रविरश्मिभावसत्त्वादेवातिव्याप्ति

विरहात् अतएव साध्याभावविशिष्टमेतद्द्वीपसंयुक्तानां रविरश्मीनां द्वीपांतरे द्वित्रिक्षणावस्थित्वेपि तत्रस्था
नेपि नासंभवो ऽव्याप्तिर्वा द्वीपांतरे तत्सत्वेपि एतत्तद्द्वीपावच्छेदेन तदभावसत्वात्. तादृशरूपे ऽतिव्याप्तिः
तदानीमेतत् द्वीपाभावेन तदवच्छेदेन रविरश्म्यभावसत्वात्रासंभवात् तन्महाकाले ऽतिव्याप्तिवारणा
य च विशेषपदे विशेषत्वं लक्षणात्मकत्वे ऽन्यस्य सर्वस्य पूर्ववदित्याकुः प्राचस्तु निरासो ऽनध्वंसः तथा
चैतत् द्वीपवर्त्तियावद्रविरश्मिध्वंसविशिष्टः कालविशेषो ऽत्रद्वीपे रात्रिरित्यर्थः अन्यथा ऽसंताभाव
परत्वे ध्वंसप्रागभावयोरसंताभावविरोधित्वादसंभवापत्तेः न च रात्रेरप्यनागतरविरश्मीनां
ध्वंसविरहादसंभव इति वाच्यं स्ववृत्तिध्वंसप्रतियोग्युत्पत्तिकत्वेन रविरश्मिविशेषणात्. स्वप
दं तल्लक्ष्यपरं नाभिमतपरं न च ध्वंसस्य सामान्याभावत्वानंगीकारात्तादृशयावद्रविरश्मिप्रतियोगिको
ध्वंसो ऽप्रसिद्ध इति वाच्यं तथाविधयावत्तो रविरश्मीयत्तत्संसर्गकध्वंसविशिष्टत्वस्य तथाविधरविर
विरश्मीनां यावत्तो ध्वंसात् दृष्टत्वस्य वा विवक्षितत्वात्. न च तथापि रात्रिशेषद्वीपांतरोपपत्तानांप्रातरेत

तद्द्वीपसंबंधानां नानात्वस्य तत्राभावाद् व्याप्तिः एतत्द्वीपवर्त्तित्वपदेन एतत्द्वीपोत्पन्नत्वविवक्षणे
पि सापमेतत्द्वीपोत्पत्त्यनंतररविरश्मीनां रात्रौ द्वीपांतरे द्वित्रिक्षणावस्थानसंभवाद् व्याप्तिरिति वाच्यं ॥
द्वीपोत्पन्नरविरश्मीनां एतत्द्वीपागमने एतत्द्वीपवर्त्तिरविरश्मीनां द्वीपांतरगमने च मानाभावा
त् एतत्द्वीपवर्त्तिरविरश्मिपदेन एतत्द्वीपनिष्ठरविरश्मिसंयोगस्यैवाविवक्षितत्वात् भावीय
त्वयेमहाकाले चातिव्याप्तिवारणाय विशेषपदं विशेषणत्वप्रत्ययादेव्यक्तं । यद्वा निरासपदं प्रागभा
वपरं तथा चैतत्द्वीपवर्त्तियावद्रविरश्मिप्रागभाववद्विशिष्टः कालो विशेषोत्र द्वितीयरात्रिरित्यर्थः ।
स्वदृष्टत्वेन ध्वंसाप्रतियोगित्वे नरश्मिर्विशेषणीयः स्वपदं त्वरूपत्वे नाभिमतपरं तेन रात्रावतीतरवि
रश्मीनां प्रागभावविरहेपि नासंभवः वृत्तिप्रकल्पे तु अतिव्याप्तिवारणाय च विशेषपदं विशेषतो च तत्पा
ध्यारत्वेन सर्वमन्यत्पूर्ववदित्याहुः तदसत्तत्प्रकल्पाप्यवहिते तत्तद्द्वीपापायकालस्य रात्रितासंदेहात् ।
ध्वंसघटितलक्षणस्यासंदिग्धाव्याप्तेः एतत्द्वीपीयप्रलयोत्तरकालस्य रात्र्यव्यवहितोत्तरभावित्वात्

देहात् प्रागभावघटितस्यापि संदिग्धाव्याप्तिकत्वाच्च तस्मात् ध्वंसप्रागभावयोरसंत्ताभावविरोधित्वमाना
भावादसंत्ताभावगर्भतत्त्वं ज्यायसीत्यलं विस्तरेण क्त्वाप्रत्ययस्य प्रधानक्रियापूर्वकालीनत्वमर्थः न च
भुक्त्वा व्रजति रंगते चैत्रे चैत्रो भुक्त्वा व्रजतीति प्रयोगवारणाय प्रधानक्रियाऽव्यवहितपूर्वकालीनत्वमेव
क्त्वाप्रत्ययार्थः किं न स्यादिति वाच्यं। भोजनानंतरं घटिकादिविलंबेन गते चैत्रे चैत्रो भुक्त्वा व्रजती
ति प्रयोगानुपपत्तेः तथा वक्तुमशक्यत्वात् न चैवं भुक्त्वा व्रजति रंगते चैत्रे चैत्रो भुक्त्वा व्रजतीति प्रयो
गापत्तिर्दुर्वारैवेति वाच्यं। यतः प्रधानक्रियापूर्वकालत्वस्य प्रधानक्रियाप्रागभावाधिकरणघटिका
मुहूर्तादिनानाविधकालवृत्तित्वरूपस्य नानात्वेनाव्ययानामनेकार्थकतया क्त्वाप्रत्ययस्याव्यवपर
त्वस्य पस्याव्ययपूर्वतप्रत्ययत्वेन चनानार्थतया भुक्त्वा व्रजतीत्यादौ व्यर्थात्तत्कल्पकालघटितप्रधा
नक्रियापूर्वकालवृत्तित्वेन क्त्वाप्रत्ययार्थः किंतु प्रधानक्रियाप्रागभावाधिकरणघटिकादिरूपपूर्व
कालवृत्तित्वं तथैस्तु प्रागमेनोक्त्वाप्रत्ययाभावात् अत्र पूर्वकालीनत्वमात्रे क्त्वाप्रत्ययपरत्वं प्रधानक्रिया

याः तिङादिप्रकृतित एव लाभः एवं समानकर्तृकत्वमपि क्त्वाप्रत्ययस्यार्थः अन्यथा मैत्रभोजनानंत
रं चैत्रे चैत्रो भुक्त्वा व्रजतीति प्रयोगापत्तेः एवं च चैत्रो भुक्त्वा व्रजतीत्यादौ गमनक्रियापूर्वकालीनभो
जनसमानकर्तृकं यद्गमनं तदनुकूलकृतिमांश्चैत्र इत्याकारकोऽन्वयबोधः अथ मुखं व्यादाय स्वपिती
त्यादौ कृणात्हस्त्वापतितः केस इत्यादौ च क्त्वाप्रत्ययार्थपूर्वकालीनत्वा ऽन्वयानुपपत्तेः मुखव्यादानस्य
स्वापजन्यत्वेन कृणात्कारस्य केसपतनजन्यत्वेन च मुखव्यादानकृणात्कारयोः स्वापकेसपतनपूर्वका
लीनत्वासंभवादिति चेन्न मुखं व्यादाय स्वपितीत्यादौ सुप्त्वा मुखं व्याददातीति वैपरीत्येनान्वयात् एवं स
रणात्हस्त्वापतितः केस इत्याद्यपि केसः पतित्वा सरत्कारोतीति व्यत्ययेनान्वयानुपपत्तिः वस्तुतः क्त्वाप्रत्य
यस्य नानार्थकतया मुखं व्यादाय स्वपितीत्यादौ क्त्वाप्रत्ययेन जनकत्वस्य बोधनात् मुखव्यादानजनकः स्वाप
इत्याद्यन्वयबोधोपगमान्न कोऽपि दोषः न चैवमनास्तिमां यस्माद्दस्त्तेन भविष्यत्रिमत्ससत्तिमनारा
ध्यप्रजेति वांशत्रापसेस्य च क्त्वाप्रत्ययार्थसमानकर्तृकत्वान्वयानुपपत्तिः प्रजाकर्तृकोत्पत्तिरूपप्रधान

प्रधानक्रियाकर्त्तृकसमानत्वस्य द्वितीयकर्त्तृकाराधनक्रियायामभावादिति वाच्यं तत्राराधनानं
तरं स्थितस्य स्वाधारेण स्थितिरूपप्रधानक्रियायामपि तत्र समानकर्तृकत्वान्वयबोधसंभवादित्या
चार्योपाध्यैः चिन्तामणिकारानुधावनापि नत्कर्तृककालीनत्वं न क्त्वाप्रत्ययार्थः किंत्वानन्तर्यं भुक्त्वाव्र
जतीत्यादौ गमनक्रियायां भोजनानन्तर्यबोधस्यानुभविकत्वात् एवं समानकर्त्तृकत्वमपि क्त्वाप्रत्यया
र्थः अतो न मैत्रभोजनानन्तरं गन्ते चैत्रे चैत्रो भुक्त्वा गच्छतीति प्रयोगापत्तिः एवं च चैत्रो भुक्त्वा व्रजतीत्या
दौ भोजनसमानकर्त्तृकं यद्भोजनानन्तरं गमनं तदनुकूलकृतिमांश्चैत्र इत्यन्वयबोधः तदानींतनत्वं च
तद्ध्वंसाधिकरणक्षणवृत्तित्वरूपं बोध्यं न तु तदधिकरणक्षणध्वंसाधिकरणक्षणवृत्तित्वं तेन तत्
पाककाले भुंजाने पुरुषे पक्त्वा भुंक्ते इत्यादिप्रयोगापत्तेः पाकाधिकरणक्षणध्वंसाधिकरणक्षणवृत्ति
त्वस्य तत्र भोजने सत्त्वात् अथैवमपि चैत्रभोजनानन्तरं गते चैत्रे चैत्रो भुक्त्वा गच्छतीति प्रयोगो दुर्वारः
मैत्रभोजनानन्तर्यस्य गमनोत्तरचैत्रकर्त्तृकभोजनमादाय समानकर्त्तृकत्वस्यापि संभवादिति चेन्न

यच्छ्रोजनानंतर्यं तत्क्रमेण प्रतीयते तेन न समानकर्तृकत्वस्यैव तत्रान्वयनियमेनानुपपत्त्यभावा
त् न्वेवं ‌: स्थित्वापश्यतीत्यादौ तु दर्शननिष्ठं यत्तच्चैत्रस्थित्यधिकरणकालवृत्तित्वरूपं चैत्रस्थितिसामा
नाधिकरण्यं तत्रैकाप्रत्ययस्य लक्षणास्थितिसमानकालीनदर्शनबोधकतासर्वनैव तत्प्रयोगात् एवं
मुखं व्यादाय स्वपितीत्यादौ मुखव्यादानजनके रुणा लक्षणापत्तिः किं च इत्यादौ तरुणा कारजनके क्त्वाप्रत्य
यस्य लक्षणेति वदंति वैयाकरणानुपायितस्तु क्त्वाप्रत्ययस्याभाव एवार्थः समानकर्तृकत्वादिकं च क्त्वा
प्रत्ययस्य धात्वर्थे बोधातकत्वेनार्थयोस्संसर्गतात्पर्यग्राहकत्वं तथा हि अत्र भवसाध्यावस्य एवस
चेष्टा तु नाम्नस्य क्त्वाप्रत्ययस्यार्थे तत्र क्रियाकर्तृपदान्तरे विशेषणं धातुसंबंधादिकर्तातत्तयोः संबंधस्य
समानकर्तृकत्वमानंतर्यादिकं च तत्र संबंधतात्पर्यग्राहकाः क्त्वादयः समानकर्तृकयोः पूर्वकाले क्त्वेति
सूत्रमपि धातृकर्तृत्वाभिप्रायेणैवोपपन्नं समानकर्तृकत्वादिप्रकारकबोधस्तु विवादास्पदत्वं एवं च मुं
क्त्वा व्रजतीत्यादौ गमने भोजनस्य समानकर्तृकत्वानंतर्याभिप्रायसंबंधेन मुखं व्यादाय स्वपितीत्यत्र स्वापमुख

व्यादानस्य समानकर्तृकत्वसमानकालीनत्वाभावप्रसंबंधेनाधीत्य तिष्ठतीत्यादावव्याप्तेः ध्ययनस्य स
मानकर्तृकत्वाव्याप्यत्वाभावप्रसंबंधेन तत्रैव विदित्वादिमत्सु मेतीत्यादावतिमत्त्वपनेतद्दिनस्य समानक
र्तृकत्वजन्यत्वाभावप्रसंबंधेनाच्चपः एवमन्यत्रापिप्रपातुभवमृत्युंमित्याहुः तद्दसत्तुस्का येन तिन्नतुत्वा
त्वेतत्त्वग मनेत्स्यान समानकर्तृकत्वानेतत्पयोर्मुत्वव्याद्यपस्त्वपि तिन्नतुसंदृश्ये लत्त्वत्स्वापेक्षुरवसंबंरण
समानकर्तृकत्वसमानकालीनत्वपोरपि स्पत्तिष्ठतिनतुशापित्वेस्यत्रावस्यानेशपनकर्तृकत्वव्याप्य
त्वेपामुक्तेवाहंतत्सानतुपीत्वेस्यादौतत्सोपान समानकर्तृकत्वजन्यत्वाभपोरभावेनेमाबोध्यतइतिप
पापपेसमानकर्तृकत्वानेतयोर्दोत्काप्रत्ययार्थत्वस्यावश्यकत्वान्नेचतत्रसमानकर्तृकत्वान्नेतयोर्दि
संबंधावच्छिन्नप्रतियोगिताकाभावस्यैवनञाबोधनान्नतेषांकाभेस्यार्थः त्वमितिवाच्यं। समानकर्तृ
कत्वादेर्वृत्तिनियामकत्वपानजानतत्संबंधावच्छिन्नप्रतियोगिताकाभावस्यबोधयितुमशक्यत्वान्नवक्तत
त्कसमानकर्तृकत्वादेक्काप्रत्ययार्थत्वोपगमेभुक्त्वाव्रजतीत्यादिशाब्दसामग्र्याः गनञ्नेभोज नसमानकर्तृके

त्वाभावव्यदिसाधनेकविधमानसादौ प्रतिबंधकत्वकल्पनेन लाघवात् समानकर्तृकत्वादेः कार्यप्र
योजकत्वमेवोचितं अन्यथा तादृशशाब्दसामग्रीकाले तादृशमानसादिवारणाय नैकप्रतिबंधकता
यां गौरवापत्तेः मन्मते तु तादृशशाब्दसामग्रीकाले योग्यताज्ञानविधया गमनादौ भोजनसमानकर्तृ
कत्वादिनिर्णयस्यावश्यकतया बाधनिर्णयविधया तत्प्रतिबंधकतयैव तद्वारणात् न च संशयप्र
तिबंधकसाधारणयोग्यताज्ञानस्य शाब्दबोधहेतुतया योग्यतासंशयस्थले तद्वारणाय तत्प्रतिबं
धकताकल्पनमावश्यकं बाधसंशयस्याप्रतिबंधकत्वादिति वाच्यं समसंशयोत्तरप्रत्यक्षनिर्णये
विशेषदर्शनत्वस्य हेतुतया तत्र तन्निर्णयाभावादेव तद्वारणसंभवात् विशेषदर्शनसत्वे च मानसस्यैवो
त्पत्त्या शाब्दबोधस्य चानुत्पादात् नचैतादृशनिर्णये विशेषदर्शनस्य हेतुत्वमेव नास्तीति वाच्यं तत्सा
मान्यत्वेऽपि तस्यावश्यकत्वात् एतेन हलि रवकाशस्यापार्थः इति लक्ष्यानाति रूपत्वादित्यस्य शाब्दतावच्छेदके लाघ
घवात् न तु समानकर्तृकत्वाज्ञानेन यदा द्योतकाप्रत्ययस्य शक्तिः समानकर्तृकत्वज्ञानेन पत्वादेर्गुरुत्वापातेनेत

च्छेदकतावच्छेदकत्वकल्पने गौरवप्रसंगात् एवं चानंतर्यादौ स्मा प्रसज्येतालाक्षणिकत्वतावेवशक्तेः ता
दृशस्थितिश्च योगेन क्रियाया विशेष्यत्वेन प्रधानक्रियायाश्च विशेषणत्वेनान्वेति एवं चैवं च नुकृतावज
तो साहोभोजनानुकूलकृतिजन्यपाकजनानंतरगमनेत्तदनुकूलकृतिमांश्चैत्र इत्याद्यन्वयबोधः
अत्रानुकूलत्वं जन्यत्वं च संसर्गमर्यादया भासते एवं मत्वनापि पर्यायेण मत्वमित्येके नवीनमतमिति
परास्तमिति संक्षेपः एवकारस्यासंतायोगव्यवच्छेदः योगव्यवच्छेदोन्ययोगव्यवच्छेदश्चार्थः असंता
योगव्यवच्छेदपदार्थश्चैव उद्देश्यतात्पर्याभ्यामन्वयितावच्छेदकव्यापकत्वाभाववैशिष्ट्येयोगाभावः प्रति
योगितासंबंधेन तद्विशिष्टव्यवच्छेदः तत्रास्यैतत्पदजन्यपदयोगपदस्य वच्छेदपदे व्यापकत्वाभाववै
शिष्ट्यव्यवच्छेदानां लाभः इतरांशस्यतत्तात्पर्यविशात्लाभः एतादृशासंतायोगव्यवच्छेदबोधकत्वे नीलं
सरोजं भवत्येवेत्यादिक्रियासमभिव्याहृतैवकारस्थले भवतितदर्थविधबोधतादृशुरवैसिान्नस्य हेतु
त्वात् तदर्थश्च नीलं सरोजं भवत्येवेत्यादौ सरोजत्वव्यापकत्वाभावविशिष्टाभावव्यवच्छेदवन्नीलं भवना

अथ त्वावत्सरोजमित्याद्याकारकः शाब्दबोधः भवतमंचाभेदः तत्संबंधाभावोऽवच्छेदप्रतियोगि
तयान्वेति तादात्म्याभावेभावव्यवच्छेदएवायोगव्यवच्छेदः तस्यच शंखः पांडुर एवेत्यादिविशेषण
संगतैवकारस्थले बोधः तादृशायोगव्यवच्छेदबोधतादृशानुपूर्वीज्ञानस्य हेतुत्वात् इत्संच शंखः पांडु
र एवेत्यादौ पांडुरतादात्म्याभावव्यवच्छेदवान्शंखइत्याद्याकारकोऽन्वयबोधः अन्ययोगव्यवच्छेदकश्चा
स्य तादात्म्यादिव्यवच्छेदः एतद्बोधश्च विशेष्यसंगतैवकारस्थले पार्थएवधनुर्धरइत्यादौ बोध्यः तादृश
बोधतादृशानुपूर्वीज्ञानस्य हेतुत्वात् एवंच पार्थएवधनुर्धरइत्यादौ पार्थान्यतादात्म्याभाववद्धनुर्ध
राभिन्नः पार्थ इत्याद्याकारकोऽन्वयबोधः ननु किंपासमभिव्याहारे एवकारस्यायोगव्यवच्छेद
बोधकत्वे ज्ञानमपंगिलास्येवब्राह्मणोवेदानधीतएवेत्यादिवत्ज्ञानेरमतेगण्हासेवनरोवेदानधी
तएवेत्यादिप्रयोगप्रसंगः तत्रज्ञानत्वादिव्यापकत्वाभावाविशिष्टरजतनिष्ठवितर्कविशेषणत्वस्याभा
वादिव्यवच्छेदस्य ज्ञानत्वादिसामानाधिकरण्येन बोधसंभवात् नचान्वयितावच्छेदकावच्छेदेनैवासंतायो

गव्यवच्छेदबोधांगीकारान्नदोष इति वाच्यं। नीलं सरोजं भवत्येवेत्यादौ सरोजत्वावच्छेदेन नीलभवनाश्रय
त्वायोगव्यवच्छेदासंभवेनान्वयानुपपत्तेरिति चेन्न तत्राध्याहृतप्रकृतिधातुसमभिव्याहृताख्यात
समभिव्याहृतैवकारस्याप्यतावच्छेदकावच्छेदेनैवासत्तायोगव्यवच्छेदकबोधकत्वांगीकारेणोक्ता
पत्तेरभावात् ज्ञानमर्यादगणात्सत्येवेत्यादौ चैत्रान्वयादिव्यापकत्वाभावविशिष्टार्थविषयिताश्रयत्वाभाव
व्यवच्छेदस्य तत्रैतावच्छेदेन सत्वान्नदोषः। अत्रेदं बोध्यं उक्तरीत्याक्रेपादिसंगतैवकारस्यासत्तायोगादि
व्यवच्छेदबोधकत्वमिति न सर्वेषां नियमः किंतु सर्गः तात्पर्यवशात्तु भवानुसारेण क्वचिदन्यस्यापि बो
धात एवं चैत्र पचत्यनुभवेतादृशबोधतादृशानुपूर्वीज्ञानस्य हेतुत्वे बोध्यं अत एव चैत्रस्यैव दंडधनं ट
पिप्यामैव गंधरस्यादवैवकारस्य विशेषणसंगतत्वेपि चैत्रान्यत्वत्वव्यवच्छेददृष्टिविषयसमवेतत्वव्य
वच्छेदरूपान्ययोगव्यवच्छेदबोधकत्वमुपपद्यते। एवं क्रतोत्वद्वारान्यावच्छेदेवसावैवकारस्य क्रियासंगत
त्वेप्ययोगव्यवच्छेदबोधकत्वे तत्र क्रतुकालावच्छिन्नत्वद्वारनिष्ठकर्मतानिरूपकगमनाभावाभावः प्रसक्तावभा

वेरूपेष्टसाधनमित्याद्याकारक एवकारार्थविषयको बोधः नन्वेवं तादृशवाक्येन ऋतुकालीनस्वदारक
र्मकगमनाभावस्य प्रत्यवायहेतुत्वालाभेन ऋतुकालीनस्वदारकर्मकगमनाभावात्प्रत्यवायापत्ता दोन
स्यादिति वाच्यं। तादृशबोधोत्तरं यदभावो यदभावरूपेष्टसाधनं तत्साधनमिति व्याप्तिबलात्तदुपद
र्शितगमनाभावे प्रत्यवायहेतुत्वस्यानुमितिसंभवेन तादृशगमनाभावस्य प्रत्यवायहेतुत्वलाभे नोक्त
दोषाभावात्। ननु ऋतुकालीनस्वदारकर्मकगमनाभावे प्रत्यवायहेतुत्वं यदुक्तं तदसम्यक् तथा च कामप्रवृत्तिव्यक्ति
त्वे एकशरीरावच्छेदेन स्वदारकर्मकगमनसत्त्वे शरीरान्तरावच्छेदेन प्रत्यवायो न स्यात् तादृशगमनाभा
वाभावरूपहेतुत्वाभावात्। न च प्रत्यवायेतरशरीरावच्छिन्न ऋतुकालीनस्वदारकर्मकत्वरहितजन्यगमनाभाव
स्य हेतुत्वे कल्प्ये नान्यदोष इति वाच्यं। तथापि सत्तियस्य पुरुषस्य ऋतुकालीनस्वदाराकर्मकगमनमप्रसि
द्धं तस्यैतदभावाप्रसिद्ध्या प्रत्यवायो न स्यादिति चेन्न स्वदारनिष्ठस्य ऋतुकालावच्छिन्नतत्तच्छरीरावच्छिन्न
स्वीयरतिजन्याभिगमनसंबंधावच्छिन्नतत्तद्दारत्वाभावकूटस्यैव प्रत्यवायोत्पत्तिहेतुत्वे नोक्तदोषाभावात्.

तस्य तादृशाभिगमनमप्रसिद्धं तस्य तादृशसंबंधस्य व्यधिकरणतया तत्संबंधावच्छिन्नप्रतियोगिताकत्व
दभावस्य स्वदारेपि सत्वात्। वस्तुतस्तु स्वदारकर्मकसत्वकर्तृत्वोभयाभावविशिष्टतत्तच्छरीरावच्छिन्न
त्वे तु कालावच्छिन्नगमनाभावानांप्रसवाये हेतुत्वानुपपत्तिः नचैतस्य तादृशागमनमेवाप्रसिद्धं
तस्य कारणाभावात्समवायोत्पत्त्यादिति वाच्यं तस्यापि त्वेतु कालावच्छेदेन तत्तच्छरीरावच्छेदेन च देशांतरे
ग्रामांतरे वा गमनसंभवेनाप्रसिद्ध्यभावादिति संक्षेपः नव्यास्तु सर्वत्रैवकारस्यान्ययोगव्यवच्छेद एवार्थः
अन्ययोगश्चान्यसंबंधमात्रं एवं च नीलं सरोजं भवत्येवेत्यादावपि तस्याश्चापि धर्मिणि लक्षणया
नीलभवनवदन्यत्वव्यवच्छेदः सरोजत्वसामानाधिकरण्यप्रतीयते श्वेतः पांडुर एवेत्यादौ श्वेतत्वावच्छे
देन पांडुरान्यत्वव्यवच्छेदबोधः पार्थ एव धनुर्धर इत्यादौ धनुर्धरत्वावच्छेदेन पार्थान्यत्वव्यवच्छेदबोधः
पृथिव्यामेव गंधरित्यादौ च पृथिव्यन्यसमवेतत्वाव्यवच्छेदो गंधादौ प्रतीयते वन्हिमत्येव धूम इत्यादौ धूमे
वन्हिमद्भिन्नसंयुक्तत्वव्यवच्छेदः घटत्वाभाववत्येव द्रव्यत्वाभाव इत्यादौ द्रव्यत्वाभावे घटत्वाभाववदन्यवृ

शेषणत्वे भावः अतो स्वदारानवच्छेदे चैत्रस्य तादृशागमनत्ववदन्यत्वस्य व्यवच्छेदप्रसक्तावायपरिहाररूपे प्रसा
धनत्वे प्रतीयत इत्यादि बोध्यं न चेहापि व्यामेवेगं धरस्यादेरपि प्रमाः समभ्यर्थविशेषणतयोपस्थित्या
कत्वमेवकरणार्थत्वयैवेन्वयः एकविशेषणत्वेनोपस्थितस्यान्यत्रान्वयस्याव्युत्पन्नत्वादिति वाच्यं ॥
एवकारस्थले तादृशाव्युत्पत्तिसंकोचात् एवमन्यदृशाव्युत्पत्तिविरोधापित तत्तद्व्युत्पत्तितरेवकारस्थले
संकोचमंगीकृत्य परिहरणीय इति वदंति अयं चैत्रस्यैवापत्यं मैत्रस्येत्यत्र कीदृशान्वयबोध इति चेदत्र के
चित् चैत्रान्यभ्रातृकत्वाभाववानयं मैत्र इति बोधः अत्र चैत्रान्यभिन्नत्वे सति भ्रातृत्वेन चैत्रासमजन
कजन्यत्वे चैत्रान्यभ्राता । कत्वे चैत्रान्यपत्वं किंचित्प्रतियोगिकभेदस्यापि तत्वस्मिन्नसत्वात् । चैत्रान्यत्वावच्छिन्न
भेदविशिष्टस्य तज्जनकजन्यत्वस्य चैत्र एव सत्वेन चैत्रमैत्रोभयभ्रातृकेपि चैत्रस्यैवापत्यं भ्रातेत्यत्र की
दृशान्वयबोध इति चेदत्र केचित् चैत्रान्यभ्रातृकत्वाभाववानयं मैत्र इति बोधः अत्र चैत्राल्यभ्रातृक
त्वेन चैत्रासमजनकजन्यत्वे चैत्राकारस्य स्वस्यैव पतत्त्वे तन्निरूपितजन्यत्वस्य तत्र सत्वे तद्व्यवच्छेद

बोधासंभवात् नापि चैत्रान्याभिन्नत्वतज्जनकजन्यत्वं चैत्रान्यभ्रातृकत्वं चैत्रान्यप्रतियोगिकभेदस्या
पि स्वस्मिन्सत्त्वात् चैत्रान्यत्वावच्छिन्नभेदविशिष्टसतज्जनकजन्यत्वस्यैव सत्त्वेन चैत्रमैत्रोभयभ्रातृके
पि चैत्रस्यैवायं भ्रातेत्यादिप्रयोगाप्रसंगात् चैत्रान्यतत्तद्व्यक्तीनां प्रातिस्विकरूपेण भेदघटितस्य चैत्रा
न्यभ्रातृकत्वस्य चैत्रयुगसहस्रेणापि दुर्ज्ञेयत्वात् किंतु तद्व्यक्तित्वावच्छिन्नस्वरूपसंबंधेन तज्जनकजन्य
तावत्त्वे तद्भ्रातृकत्वं चैत्रभेद एव च जनकजन्यत्वस्यैव संबंधेनान्यस्येति वक्तव्यं चैत्रे चैत्रत्वावच्छिन्न
स्वरूपसंबंधेन चैत्रजनकजन्यत्वस्यासत्त्वेन चैत्राचैत्रभ्रातृकत्वेन न चैत्र[illegible]संगः तद्भेदस्यैककाल
तदुभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकोबाध्यः तत्त्वेकमात्रावृत्तिधर्मावच्छिन्नप्रतियोगिताकः तेन चै
त्रीयशिष्यशालभिन्नत्वपितृदायपुत्रादेस्तत्तद्भ्रातृकत्वप्रसंगः तदुभयत्वावच्छिन्नभेदमादाय
तत्र तद्भ्रातृकत्वप्रसंग इत्याकुत्सत्वदसत् चैत्रभेदावच्छिन्नस्वरूपसंबंधेन चैत्रजनकजन्यत्वस्यैव संबंधेना
न्यस्येति नियमः किंतु यस्य स्वरूपसंबंधेनाभेदोपि तस्यैव सत्त्वनियमात् यत्तु चैत्रासावधीकरणकाश्च

यत्वसत्तिचैत्राद्यजनकजन्यत्वमेवचैत्रान्यत्वात्कत्वेतस्यचमेत्रेव्यवच्छेदः चैत्रीयपूर्वशरीरस्यतदी
यत्रिमुशरीरावधिकतृपक्षाश्रयत्वेपिनतस्यतदूतकत्वतज्जनकजन्यत्वात्प्रथमशरीरस्यैवतज्जन्य
त्वात्प्रथमशरीरस्यैवतज्जन्यत्वात् एवंचपूर्वशरीरेप्यात् तन्व्यवहारस्तादृशात्रिमुशरीरावधिकतृ
त्वात्तत्तिचैत्रादिजातिनिवेधरत्तितदसत् प्रमुकेवान्निसंनिपातादिपरंपरोपधराप्रथमशरीरपूर्वश
रीरेपितुत्तेनकत्वात् अन्यथाप्रथमशरीरेपिपितुर्जनकत्वेनस्यात् नहि रेतःसेकेनाहसैवप्रथमशरीर
मुत्पाद्यते दन्नचतदवधिकतृपक्षेतज्जनकजन्यत्वेचप्रातिस्विकरूपेणभानत्वेप्रतियोगिनांप्रवेशान्न
दोषइतिवाच्यं तथासत्यनंतशरीरोडजेयत्वापत्तेः केचित्तुत्वाश्रयसमानाधिकरणवृत्तिएककालीन
ध्वंसवृत्तिधर्मावच्छिन्नचैत्रान्यवृत्तिप्रतियोगिताकान्योन्याभावावच्छिन्नस्वरूपसंबंधेनचैत्रान्यजन
कजन्यत्वस्यावच्छेदाम्येचैभासतेसामानाधिकरण्यंचफलोपधानारभ्यजनकतासंबंधेनवोध्यमिति
प्राहुः अपरेतुअवच्छिन्नमनोनिष्ठान्योन्याभावप्रतियोगितावच्छेदकाजनकजन्य एवेत्यालपदार्थत्वात्पद

स्य शक्तिरेकैव न तु चैत्रमैत्रवाधेतमभावेनानेन शक्तिः अवच्छिन्नत्वेन जनकत्वे च समभिव्याहृतपदार्थस्याभा
त्वप्रतियोगिनश्चैत्रादेरन्वयः मैत्रस्य भ्राता मैत्र इत्यादिप्रयोगवारणायावच्छेदकांतस्य शक्यतावच्छेदकं चैत्रस्य
भ्राता मैत्र इत्यस्य चैत्रशरीरावच्छिन्नमनोनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य चैत्रजनकजन्यत्वस्य
मैत्रे सत्त्वात्तथात्वबोधः अथैवमपि मैत्रस्य भ्राता मैत्रश्चैत्र सुंदर इत्यादिप्रयोगापत्तिः मैत्रशरीरा
वच्छिन्नमनोनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य चैत्रे मैत्रशरीरजनकजन्यत्वस्य मैत्रे सत्वादि
ति चेन्न यत्र विशेष्यविधया भ्रातृपदार्थान्वयस्तत्रैव तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वबोधो
नान्यत्रेति व्युत्पत्तेः मैत्रस्य भ्राता चैत्र इत्यत्र तु मैत्रशरीरावच्छिन्नमनोनिष्ठान्योन्याभावप्रतियोगिता
वच्छेदकत्वे सति मैत्रजनकजन्यश्चैत्र इत्येवान्वयबोधः इत्थं च मैत्रस्य भ्राता मैत्र इत्यादिप्रयोगे न संभ
वति अत्र हि भ्रातृपदार्थस्य विशेष्यविधयान्वयो भविष्यति मैत्रे स च न मैत्रशरीरावच्छिन्नमनोनिष्ठा
न्योन्याभावप्रतियोगितावच्छेदकः मैत्रशरीरावच्छिन्नमनसि मैत्रावच्छिन्नभेदसत्वात् नन्वेवमपि कपि

ग्रहस्थलेऽप्यस्याभावत्तेतिप्रयोगापत्तिरिति वाच्यं दृष्टापत्तेः एकस्यैव मनसो नानाशरीरावच्छिन्नत्वाभ्यु
पगमेनोक्तापत्त्यसंभवात् यत्तु विशेष्यविधया यत्र जनकजन्यत्वरूपभावत्वपदार्थान्वयस्तत्र विशेषणता
विशेषसंबंधेन भावत्वपदार्थप्रतियोगितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावस्वत्वरूपतः
सत्त्वमपेक्षितमिति नैमैत्रस्य भावता मैत्र इति प्रयोगापत्तिः इत्थं च चैत्रान्यत्वावच्छेदकांतर्निवेशनीयमि
ति तदसत् तथासति मैत्र एव मैत्रान्यत्वाभावो मैत्रस्य भावतापत्तिमिति प्रयोगानापत्तेः तत्र भावत्वपदार्थ
विशेष्ये मैत्रे स्वरूपतो मैत्रान्योन्याभावस्यासत्त्वात् एवं च चैत्रस्य भावता मैत्र इत्यादौ चैत्रावच्छिन्नमनो
निष्ठान्योन्याभावप्रतियोगितावच्छेदकवैसत्त्वे चैत्रजनकजन्यतावान्मैत्र इत्याकारकोन्वयबोधः
चैत्रस्य वा पंभावता मैत्र इत्यत्र च चैत्रान्यशरीरावच्छिन्नमनोनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्व
विशिष्टचैत्रान्यजनकजन्यत्वाभाववानित्याकारकोन्वयबोधः तत्र चैत्रमात्रभावत्वेपि चैत्रस्य वा पंभावते
ति प्रयोगस्याप्रमाणत्वापत्तिः चैत्रान्यदेवदत्तशरीरावच्छिन्नमनोनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्व

स्य चैत्रान्यमैत्रजनकजन्यत्वस्य च मैत्रे सत्त्वेन तत्त्ववच्छेदबोधस्याप्रमात्वादिति वाच्यं । अवच्छिन्नभान
त्वप्रतियोगितयैकत्रैवान्वयस्तत्रैकैकत्रैव जनकत्वे नान्वये परं दृश्युत्पत्तिस्वीकारेण दोषादित्याहुः । अस्मात्तु स्वा
श्रयीभूततत्तच्छरीरजनकत्वसंबंधेन चैत्रान्यत्वविशिष्टोपस्तस्य तत्तत्प्रतियोगिकभिन्नत्वविशिष्टजन्यतावच्छे
दकप्रतियोगिताकाभाववत्त्वरूपत्वेष्वेतदवच्छिन्नप्रतीयंते चैत्रमैत्रोभयपर्याप्तकत्वाश्रयमैत्रजनकत्वसंबंधे
न चैत्रान्यत्वविशिष्टोपस्तस्योपदर्शितजन्यतासंबंधेन सहैकत्रावस्थानकृतासत्वात् । तथाविधबोधासं
भवेनेन्नत्वादृश्यप्रयोगापत्तिः । न च चैत्रमात्रभान्तकेऽपि मैत्रस्याश्रयीभूतमैत्रपत्वबालकशरीरजनकत्व
संबंधेन चैत्रान्यत्वविशिष्टस्योपदर्शितसंबंधेन मैत्रीयपुत्रशरीरे सत्वात् तथाविधबोधासंभवेन तादृ
शप्रयोगानुपपत्तिरिति वाच्यं । तत्तद्व्यक्तिशरीरमात्रवृत्तिजातिमत्त्वविशिष्टजन्यतासंबंधावच्छिन्नप्रति
योगिताकतादृशाभावकूटस्यात्र बोधोपगमेनानुपपत्त्यभावादित्याहुः । अत्र वदंति स्वावच्छिन्नभिन्नत्व
स्वाश्रयोत्पादजनकजन्यत्वोभयसंबंधेन तद्वृत्तिजातिमत्त्वमेव भात्तपदे शक्तिनिमित्तं चैत्रादौ तन्निरूपित

त्वान्वयः चैत्रादिभिन्नतरीतादृशोभयसंवेधेन चैत्रत्वादिजातिसत्त्वे चैत्रादिभिन्नात्मव्यवहारः चैत्रमैत्राभ
यादिभिन्नात्मरितादृशोभयसंवेधेन चैत्रत्वस्य चैत्रवृत्तिमैत्रत्वादिजातिसत्त्वात्तु चैत्रमैत्राद्यादिभिन्नात्मव्यव
हारः तन्मुक्तित्वावच्छिन्ने मेदवत्तिस्वीयशरीरं तदभिन्नत्वकारणमधर्मस्य जातित्वेन निवेशः न चैक
मात्रशरीरकस्य भिन्नात्मत्वे तस्यात्मभिन्नशरीरावृत्तित्वमित्तिजातेरप्रसिद्धत्वादिति वाच्यं तादृशापुरु
षप्रमाणाभावात् एककालीनोभयावृत्तिजातिमून्नत्वस्य धर्मविशिष्टत्वमेव नावच्छेदकत्वं तादृशधर्म
श्च दर्शितस्यव्यतादृशशरीरनिष्ठत्वमुक्तित्वमपीति नो त्केदोषः तन्मुक्तित्वमादाय तत्स्मिन्नत्वभावत्वे
कारणतावच्छेदकधर्मविशेषणं तस्य तादृशचैत्रत्वादिन्यूनवृत्तित्वान्न दोषः चैत्रत्वादिव्याप्यत्वादिजातिन्यू
नवृत्तित्वादसंभवे कारणतावच्छेदकतेद्व्यत्वादेरेककालीनोभयघटपटादिवृत्तित्वान्न दोषः तन्मुक्ति
त्वे कारणतावच्छेदकजातित्वनिवेशः इत्यपि च चैत्रस्यैवापेभावेस्य वर्त्तित्वं चैत्रत्वस्य ट्वेधिन्नभिन्नात्मत्वस्यदेव
एतावतो प्रसिद्धस्य व्यवच्छेदो मैत्रादेरपि पुरस्तात्तु न कारणमुपपत्तिरिति अत्रेदं बोध्यं चैत्रस्यैवेदं धनं ट्वेधि भामे

वगंधइत्यादौ पदद्वये चैत्रान्यस्वत्वपृथिव्यन्यसमवेतत्वमवच्छेदबोधः स्वोक्तिपत्ते तदा स्वत्वे चैत्रान्यस्वत्वनक
स्यापि पृथिव्यन्यस्मिन्न किंचित्समवेतिभोजनेन नत्लाभस्य कस्यचित्त्वभातान चैत्रान्यस्वकस्य विहिंसादि
भ्रमदशायामुक्तस्य लेशाद्बोधोनुपपत्तिः स्वत्वादौ चैत्रामीयत्वाद्यभाव निर्णयेन चैत्रीयस्वत्वादिमवच्छे
दबोधासंभवात् एवं प्रतियोगिन्येव धनं भातिमस्व वसत्ता इत्यमेव भूते प्रतियोगिन्येव भातेस्यादावपि शाब्दबो
धानुपपत्तिः प्रतियोगिन्न स्वत्वाद्यप्रसिद्धात्तस्य वच्छेदबोधासंभवादिति अन्यमोग प्रतियोगिकत्वावच्छेदस्त्वा
मानुयोगिकायोगव्यवच्छेदाप्य वकारार्थः अन्यानुयोगिकायोगव्यवच्छेद एव वा सर्वत्र वकारार्थ इत्यनुपपं
इत्येव चैत्रस्यैव धनमित्यादौ चैत्रान्यस्मिन् धनस्वामित्वाद्यभावः पृथिव्यामेव गंधइत्यादौ पृथिव्यन्यस्मि
न्गंधसमवायाद्यभावः चैत्रो जलमेव भुंक्त इत्यादौ जलान्यस्मिन् चैत्रकर्तृकभोजनकर्मत्वाद्यभावः चैत्र
स्यैवायं भ्राता इत्यादौ चैत्रान्यस्मिन्नेतन्निष्ठभ्रातृत्वप्रतियोगित्वाद्यभावः प्रतीयते तत्र च नानुपपत्तिलेशो
पि न च धनस्वामित्वाद्यवच्छिन्नानुयोगितापन्नतद्व्यवच्छेदबोधासंभव इति वाच्यं धनादिपदस्य धनस्वामित्वला

घावच्छिन्नेळक्षणात्वो कारणादोषात् । वस्तुतस्तु अन्यानुयोगिकोप्यवच्छेद एवं सद्वैत्रेवकारार्थः न तु योगंशास्या
पियव्यवच्छेदप्रतियोगितापाविशेषमानाभावात्स्यवच्छेदस्य द्विविधः अन्योन्याभावो संसर्गाभावश्चपार्थ एव
धनुर्धर इत्यत्रपार्थान्यस्मिन् धनुर्द्धरत्वावच्छिन्नभेदः शंखःपांडर एवेत्यत्रपांडुरान्यस्मिन्नचैत्रकर्तृकभोजने
शंखत्वावच्छिन्नभेदः नीलंसरोजंभवतीत्यत्रनीलभवनान्यपायत्वसामानाधिकरण्यतस्सरोजत्वावच्छिन्न
भेदः प्रतीयते चैत्रस्य वधनमित्यादौ चैत्रान्यस्मिन् स्वामित्वादिसंबंधावच्छिन्नप्रतियोगिताकोधनाद्यभावः
पृथिव्यामेवगंध इत्यादौ पृथिव्यान्यस्मिन् समवायादिसंबंधावच्छिन्नप्रतियोगिताकोगंधाद्यभावः चैत्रो
जलेमेवभुंक्ते इत्यादौ जलान्यस्मिन् कर्मतादिसंबंधावच्छिन्नप्रतियोगिताकोभोजनाद्यभावः चैत्रस्यैवापे
क्षाता इत्यादौ चैत्रान्यस्मिन् प्रतियोगितादिसंबंधावच्छिन्नप्रतियोगिताक एतन्निरूपिताद्यभावः एवं प्रतीयत
इति न च स्वामित्वादिसंबंधस्य वृत्तिनियामकत्वाभावात्प्रतियोगितावच्छेदकत्वाभावेन गोळ्हरीतिसंभवतीति
वाच्यं वृत्तिनियामकसंबंधस्याप्यभावप्रतियोगितावच्छेदकत्वे बाधकाभावात् । एवमन्यत्राप्यूह्यं अत्रेके चिन्त

पार्थ एव धनुर्द्धर इत्यादौ पार्थान्यत्वव्यवच्छेदादिसंबंधेन धनुर्द्धरादौ पार्थादिन्वयबोधसंभवात्तत्र मेवकारस्य
मवच्छेदादौ शक्त्यादिकमभ्युपेत्य तदर्थविषयकबोधाभ्युपगमेन । न चैवं पार्थ एव धनुर्धर इत्यादिवत् पार्थो
धनुर्धर इत्यादावप्युपदर्शितसंबंधेन धनुर्धरादौ पार्थादिन्वयबोधापत्तिरिति वाच्यं । एवकारस्य तेन संबं
धेन तदर्थविषयकबोधे नासत्यग्राहकतया पार्थो धनुर्धर इत्यादौ तादृशबोधतात्पर्यग्रहाभावेन तादृश
बोधतात्पर्यग्रहाभावेन तादृशशाब्दबोधापादनासंभवात् । न च नामार्थयोरिति व्युत्पत्तिसंकोचेन तद्वि
ध इत्याकुत्सितदसत्त्वनामार्थयोरिति व्युत्पत्तिसंकोचेन निर्वाहितत्कौ संबंधे मानाभावात् पार्थ एव धनुर्धर इ
त्यादौ पार्थान्यत्वव्यवच्छेदादिसंबंधेन धनुर्धरादौ पार्थादिन्वयबोधाभ्युपगमे भूतलेन घट इत्यादावपि
स्वाभाववत्तादिसंबंधेन भूतलवृत्तित्वादेर्घटादावन्वयसंभवेन तन्नादेरप्यभावार्थकत्वविलोपप्रसंग
गात्स्य च सर्वानुभवसिद्धस्य धनुर्द्धरादौ पार्थान्यत्वव्यवच्छेदादिप्रकारकबोधस्यापलापप्रसंगाच्चैन तादृ
शानुभव एवासिद्ध इति वाच्यं तत्पापि तादृशान्यव्यवच्छेदादिसंबंधस्य वृत्त्यनियामकतया प्रामाणिकमान्व

मा॰ कौ॰
२८७

छेदकत्वेन तत्संबंधावच्छिन्नप्रतियोगिताकबोधोपगमासंभवात् तेन च रूपेण तथाभकसंबंधस्य प्रतियोगि
तावच्छेदकत्वे बाधकाभावान्न दोष इति वाच्यं। तथापि पार्थो धनुर्द्धर इत्यादौ व्यवच्छेदप्रकारबोधां
गीकारे तादृशशाब्दसामग्र्याः पार्थान्यत्वव्यवच्छेदाभाववान् धनुर्धर इत्यादिसंप्रतिसत्त्वात् तेन प्रतिबंधकत्वं
न कल्प्यते तादृशशाब्दसामग्रीकाले तादृशमानसप्रतिबंधकस्य पार्थान्यत्वव्यवच्छेदप्रकारकबोधस्य
सत्त्वेन बाधप्रतिबंधकतयैवोपपत्तेरिति लाघवेनैवकारस्य व्यवच्छेदार्थत्वमुपेत्य व्यवच्छेदप्रका
रकबोधांगीकारस्यैवोचितत्वात् अयोगव्यवच्छेदकेपि दर्शितरीत्या बोध्यं। एतेन पार्थान्यत्वव्यवच्छेदविशिष्टा
भेदादिसंबंधेन पार्थादेर्धनुर्धरादावन्वयेन नामार्थयोरभेदान्वयव्युत्पत्तिविरोधान्नवात्रानुपपत्तिरि
त्यपि परास्तं। मिलितमंदबुद्धीनां तामिताप्रादकविचारेण। चैत्र एव सुखमित्यादौ एवार्थः सादृश्यं सुखे
चैत्रसादृश्याबाधस्यानुभवसिद्धत्वात् तत्र कीदृशः शाब्दबोधः नामार्थयोर्भेदान्वयाभावेन चैत्रसादृ
श्यवत् सुखमित्यादिशाब्दबोधासंभवादिति चेन्न प्राचीनानुयायिनः चैत्रस्येदं धनमित्यादौ यथा स्वामित्वैत्री

यंधन्नमित्याद्याकारकोन्वयतथात्रापि सदृशश्चैत्रीयंमुखमित्याद्याकारकोन्वयबोधः नामार्थयोर्भेदेनान्वय
बोधे प्रकारीभूतविभक्त्यर्थनिपातार्थान्यतरोपस्थितेर्हेतुत्वात् फलानुरोधेन तथैव कल्पनादित्याहुः नव्या
स्तु निपातातिरिक्तनामार्थयोरेव भेदेनान्वयाभावेन चैत्रसादृश्यवन्मुखमित्याद्याकारक एव शाब्दबोध
इति वदन्ति अथ किमिदं सादृश्यमिति वाच्यंपरत्वे चैत्रेन्द्रविशिष्टजविधर्मवत्त्वरूपं तदिति गृहाण तत्र भेद च
चैत्रादेरवयं द्रव्यत्वावच्छिन्नप्रतियोगितासंसर्गेण धर्मेयाधेयतासंसर्गेण तस्यान्वयः तयोश्चैत्रवृत्ति चैत्रभि
न्नत्वविशिष्टधर्मवत्त्ववन्मुखमित्याद्यन्वयबोधः स च धर्मोऽवयं द्रव्यवृत्तिविलक्षणरूपादिमत्त्वमेव यथा
कथंचिद्धर्मस्यातिप्रसक्तत्वात् नन्वेवं चैत्रवृत्तिरूपादिः समवायेन मुखे सत्त्वात् कथमन्वय इति वाच्यं
तत्प्रकारकज्ञानविशेष्यत्वसंबंधेन तद्वत्त्वस्य मुखे सत्त्वात् चैत्रभेदविशिष्टत्वमपि धर्मस्य प्रकारकज्ञा
नविशेष्यत्वरूपसंबंधघटितसामानाधिकरण्यसंबंधेन बोध्यं न च चैत्रभेदविशिष्टभेदस्य चैत्रवृत्ति
त्वं न संभवतीति वाच्यं गुणाद्यन्यत्वविशिष्टसत्तापागुणादिवृत्तित्ववत् तस्य संभवात् यद्वा चैत्रभेदविशिष्ट

धर्मत्वावच्छिन्ने चेदं इति तु खस्य समानान्वयः किंतु धर्मे सावच्छिन्ने तथा च चंद्रभिन्नत्वविशिष्टं चंद्रवृत्तिधर्मवि
मुखमिति सादृश्यान्वयबोधः अत्र चोपमानोपमेययोः समानविभक्तिकत्वे तत्र तेन चंद्रस्येव मुखमिति तत्र तन्मु
खे चंद्रसादृश्यबोधः कान्तिदासस्येव यशः इत्यादौ च परं पदार्थाहारेण कान्तिदासस्य यशः इव यश
इत्यन्वयः न च सादृश्यस्य भेदघटितत्वे रामरावणयोर्युद्धं रामरावणयोरिवेत्यप्रयोगो न स्यादिति वा
च्यं तत्र विशिष्टवाचकवशाद् तस्य तत्तद्धर्मवत्त्वरूपकेवलविशेष्य लाक्षणिकत्वात् यद्वा एवकारवत्
इवशब्दस्यापि खंडशो भेदधर्मे च शक्तिः तथा च रामरावणयोर्युद्धमित्यादौ भेदांशमपहाय शक्त्यैव केव
लतद्गतधर्मवत्त्वबोध इति संप्रदायः केचित्तु भेदो वृत्तिसजातीयधर्मश्च सादृश्यं सा जातसंबंधस्तु भवं
तत्तद्रूपेण एवं च नानार्थत्वेऽपि शक्तिग्रहः सर्वनामवद्दृष्ट्या चंद्र इव मुखमित्यत्र भेदश्चान्यपि तावच्छेदका
वच्छिन्नप्रतियोगितया चंद्रे दरन्वयस्तेन मुखं तिवेलनान्वयबोधः इति लेचनिरूपकतया मुखेच भेद
तादृशधर्मयोरधिकरणतया सामानाधिकरण्येनान्वयस्तासपक्षेपरात् । आह्लादकत्वरूपस्यौपम्यसंबन्धस्य विशेषादिति

धर्मेण एवं च चंद्रभिन्नत्वे सति चंद्रवृत्तिसाह्लादकत्वसजातीयाह्लादकत्ववन्मुखमिति शाब्दबोधः कालिदा
सस्येव यशोऽस्यत्र तु यशः सजातीयसंबंधित्वेनैतस्य कस्या वस्याध्याहारादेतद्भिन्नत्वं वाच्यं एवं च कालि
दासभिन्नत्वे सति कालिदासनिष्ठयशःसजातीययशस्वित्वमेतस्य यश इति शाब्दबोधः सामान्यं च बहु
पुरुषवेषत्वादिना उत्तमकाव्यश्रमत्वादिना वा नियमेन तादृशसामान्यबोधार्थं यशःपदं प्रकारमे
दान्वयानयोः त्वं गगनं गगनाकारं राम रावणयोर्युद्धमित्यादौ चोपमेयवाचकपदोत्तरमेव कारोध्या
हर्तव्यः द्वितीयचोपमानवाचके युद्धमितिवत्पाने गगनभिन्नं गगनसादृश्यं राम रावणयुद्धाति
रिक्तरामरावणयुद्धसादृश्यं नास्तीति शाब्दबोधः अत्र भावान्वयेन विवक्षितः बाधात् यत्त्वत्र भेदाप्र
तित्तसादृश्यमात्रस्यान्वयबोध इति सप्रदायमतं तत् तिप्रसंगाद् तुभन्नविरोधाद्योपसर्गोपमितिप्रा
दुः अधिकस्य स्मरणात् सादृश्यविचारे नु संघे यं विस्तारभियानोक्तं अत्र केचित् चंद्र इव मुखं इत्यत्र चं
द्रप्रतियोगिकसादृश्यमेवार्थः पदेघटानेत्यत्र घटप्रतियोगिकाभाववार्थतायाः क्लृप्तत्वात् तेन लाघवा

त्सादृश्यमेवार्थ इति वाच्यं। तथा सति चंद्रस्य सादृश्यमिति वक्तव्ये चंद्रस्येव मुखमित्यादेरापत्तेः घटस्याभा
व इतिवत् घटस्यास्यादेरप्यापत्तेः इवशब्दस्य सादृश्यमात्रवाचकत्वे तत्तः षष्ठ्यर्थसंबंधालाभेन
तद्बोधार्थषष्ठीप्रयोगस्यावश्यकता तन्मतेऽस्य मते तु सादृश्यप्रतियोगितायाः इवादिपदार्थतया षष्ठ्य
णपेक्षणान्नोक्तापत्तिरिति तदसत् तथा सति अव्ययस्थलेऽन्विताभिधानोपगमेन मीमांसकमतानु
प्रवेशात् असमस्तनञोऽभावमात्रपरत्वेन प्रतियोगितांशस्य संसर्गमर्यादयाभानसंभवाच्च। न च
घटस्याभाव इतिवत् घटस्येव नेति प्रयोगापत्तिरिति वाच्यं नञ्पदजन्याभावोपस्थितिप्रतियोगितां
शस्य संसर्गतयैवभाने अभावपदजन्यार्थांतु प्रकारतयैवेति नियमाभ्युपगमेनादोषात्। न चैवं
गौरवमिति वाच्यं तथापि घटो नास्तीत्यत्र पदाभावबोधवारणाय समभिव्याहृतपदार्थप्रतियोगिकए
बोधाभावो भासत इति नियमस्यावश्यकत्वात् तदा तद्रूपस्याभावमात्रनञर्थप्रतियोगिसंसर्गतया भासते इ
ति नियमस्यास्येव युक्तत्वात् स्वमते घटपदस्येव घटप्रतियोगिताभावपरत्वेन नञ्परत्वं तात्पर्यग्राहक

मित्वस्यापि विनिगमनाविरहेण वक्तुं शक्यत्वात् एवं च प्रतियोगितांशस्य संसर्गमर्यादया भानसंभवेन
तत्रैतन्नादेर्न शक्तिरस्य लभ्यत्वात् न चैवं घटाभाववत्यत्रापि प्रतियोगित्वस्य संसर्गतया भानसंभवे
न षष्ठ्यपेक्षा न स्यादिति वाच्यं संसर्गान विभक्तिकनामार्थयोरभेदान्वयनियमेन तत्र प्रतियोगित्वस्य
संसर्गतया भानासंभवात् अन्यथा स्वमतेऽपि तत्राभावपदस्य घटप्रतियोगिताभाववद्बोधकत्वसंभवे
न तत्र षष्ठ्यपेक्षा नापत्तेः इत्थं च चन्द्र इव मुखमित्यत्र प्रतियोगित्वस्य संसर्गतयैव लाभान्न षष्ठी चन्द्र
स्य सादृश्यमित्यत्र तु संसर्गतया तल्लाभासंभवात् षष्ठ्येति न चन्द्रप्रतियोगिकसादृश्यमिवार्थो
न वा घटप्रतियोगिकाभावो नञर्थ इत्युक्तरीतिके साम्भीयत्तु चन्द्र इव मुखमित्यत्र मुखसदृशपदे
न्द्रः चन्द्रसदृशं मुखमित्युभयविशेष्यको बोधः यथा चन्द्रत्वमुखमित्यत्र यादृशधर्मावच्छिन्ना
दृशधर्मवन्मुखमित्युपमानोपमेययोरुभयविशेष्यकबोधे मानाभाव रतिस्यकृत्सवात् न च तत्र मुका
रायकपालम्बत्वयेत्यतच्छद्याभ्यो वा अभेदावगमेन चोभयविशेष्यकबोधोपगमे प्रयोजनमभयविशे

ष्यकबोधे मानाभाव इति वाच्यं। तथा हंसी हंसीव धवलश्च इत्यादौ हंसी सदृशश्चेत्यादावुपमेयविशेष्य
कबोधे न मात्रेण विशेष्यकबोधे बाधकाभावेन लिंगभेदस्योपमादोषतानुपपत्तेः मन्मते तु तत्र भा
वत्वं चेति हंसीधावत्त्वाश्चेत्यादौ तु भयविशेष्यकबोधे पुल्लिंगधवलशब्दस्य हंसामन्वयासं
भवाल्लिंगभेदस्य दोषत्वोपपत्तेः न च तादृशान्वयासंभव एव कुत इति वाच्यं अनियतत्वे लिं
गवचनकनामार्थप्रकारकतेमोस्य संसर्गकशाब्दबोधे समानलिंगवचनकनामजन्योपस्थिते
र्हेतुत्वेन तादृशान्वयासंभवात्। न च तादृशहेतुतायां मानाभाव इति वाच्यं। नीलं घट इत्यादावभे
दान्वयबोधवारणाय तदावश्यकत्वात्। अजहल्लिंगस्य तु लिंगभेदेप्यभेदेनान्वयादनियतत्वविशेषः
अत एव भिन्नतात्पुंसकं भिन्नविभक्तिकयोरिव भिन्नलिंगयोरपि सामानाधिकरण्यं न विशेषणविशेष्य
भावाभावात् अजहल्लिंगे तु लिंगनियमानुशासनात् पतित्तिपुंस्त्वेनैव तत्र अन्वयाच्चेदं इदं च मुखमिवेत्यादा
उपमानोपमेययोरेकविभक्तिकत्वेनाभवत्र तादृशस्य शाब्दत्वात् श्रौतस्योपमाचंद्रेणात्रल्यं मुखमित्यादौ

विभक्तिभेदासादृश्यात्तथात्वेनालुप्तोपमाप्रमुखं च तुल्यमित्यादौ विभक्तिसाम्यस्योपमानोपमेयभाव
स्य प्रसिद्धिवत्सादेकत्वाभेदसादृश्योपमेति श्रौत्यार्थीविभागानुपपत्तेरिति तदसत् तत्रास्तूभयविशेष्यक
बोधांगीकारेपि चेदिव मुखं वरमणीयमित्यादावप्युपमाया दुष्टत्वापत्तेः तत्राप्युपमानोपमेययोर्भिन्नलिं
गतया रमणीयत्वस्य मुखवान्वितत्वे चेदेन च पासंभवात् नचतत्र चरमणीयं चरमणीयं प्रतीतिर्द्वेद्वे नपुंसकम
नपुंसकेनैकशेषे एतत् वज्ञावे च पुंल्लिंगरमणीयशब्दस्य चेद् नपुंसकस्य च मुखेन चयान्न दोष इति वाच्यं।
(मा)नाभावात् दृष्टः पुंनपुंसकयोः प्रायेणेति वामनोक्तेः तथापि कुवलयमिव श्यामः करसःध्योतमिवके
शोनील इत्यादावुपमाया दुष्टत्वप्रसंगस्य दुर्वारत्वात्। नच तत्र दुष्टत्वमिष्टमेवेति वाच्यं मानाभावात्॥
दृष्टः पुंनपुंसकयोः प्रायेणेति वामनोक्तेरत्र असाम्यात्। नच तत्रैकशेषाश्रयणान्न दोष इति वाच्यं।
पुंल्लिंगोपमानमेयमयकल्वोपमानस्थले साधारणधर्मस्योपमेयसमानलिंगत्वेन तत्रापि नपुंसकत्वे
कस्यावर्णापत्तेः एवं सर्वत्राप्यदुष्टत्वे वामनोक्तप्रायशस्त्वविरोधाच्च किंच प्रागारवप्रियोपविघाधनमिवा

सा॰ को॰
२४५

र्जितेत्यस्यापि दंड्यादिभिरालंकारिकाचार्यैरदुष्टत्वेनांगीकृतस्य दुष्टत्वप्रसंगाच्च। अपि च हंसीव धव
लश्चंद्र इत्यादेः कथं दुष्टत्वं उपमेयमात्रविशेष्यकबोधे लिंगभेदस्याप्रतिकूलत्वादिति मेव। न हि शाब्द
बोधप्रतिकूलतयैव दोषत्वं उभयविशेष्यकबोधांगीकारे प्रतिप्रसंगस्योक्तत्वात् हीनत्वादिदोषाणां तत्प्र
तिकूलतायाः संभावयितुमप्यशक्यत्वाच्च अत एव यत्र पुल्लिंगे सुपमेये स्त्रीलिंगस्योपमानस्य नपुंलिं
गतासंभवः यत्र चैकवचनांते सुपमेये नित्यबहुवचनांतस्योपमानस्यैकवचनांतत्वसंभवस्तत्र
न लिंगवचनभेदेपि दोषः तदुक्तमाचार्यदंडिना न लिंगवचने भिन्ने न न्यूनाधिकतापि वा उपमादूषणा
यालं यत्रोद्वेगो न धीमतां स्त्रीव गच्छति षंढोयं वक्तीयं स्त्री पुमानिव प्राणा इव प्रियोयं मे विद्या धनमिवा
र्जितेति सहृदयोद्वेगबीजं तु उत्कटरीत्या प्रकृतानुपयुक्तलिंगवचनविशेषोपादानमेवेति तथा च निपतल्लिं
गवचने स्थिते न तत्रोद्वेगः निपतद्वचनत्वं तु स्वरसात्प्राथमिकाभिधानाविषयत्वं एकत्वं तदनेनानुशासनतास
पविषयत्वमिति यावत् प्राणा इत्यादेश्च न लिंगविपर्ययोगेन बहुत्वाभिधानाविषयत्वात्तेन प्राणशब्द

स्यकोशादावेकवचनांतत्वेनानुशासनेपिपुंसिभूम्नेसवः प्राणा इति बहुवचनांतत्वेनाप्यनुशासनमस्ये
वेति न दोषः सेभवइति अत्रेदं बोध्यं यत्रसाधारणधर्मस्यशाब्दत्वं तत्रतद्रूपेणैव सरवार्थः अन्यत्रतुधर्मस्ये
नैवरस्येचंद्र इव मुखंरमणीयमित्यत्रचंद्रवृत्तियोगिकेभेदसमानाधिकरणंयच्चंद्रवृत्तिरमणीयत्वे
तदाश्रयोमुखमितिबोधः चंद्रइवमुखमित्यत्रतुतादृशचंद्रवृत्तिधर्मवन्मुखमितिबोधः अतएवात्रश्रौती
त्वंसाधारणधर्मस्योपमानोपमेयोभयनिष्ठतायाइवशब्देनप्रतिपादनात्तत्रसमानाधिकरणांतेनोप
मेयइतिलेखेस्तेनोपमानइतित्वं प्रतिपाद्यते न च चंद्रान्यवृत्तित्वस्य ततो लाभेपि मुखवृत्तित्वस्यालाभा
त्कथमेतदिति वाच्यं उपमेयस्यापिचंद्रान्यतयासामान्यमतद्वृत्तित्वलाभात्तत्तावृत्तेश्चोपपत्तेः न च साधार
णधर्मप्रयोगस्थलेमस्येवेवशब्देनरमणीयादिशब्देनचबोधनेन्यतरस्यव्यर्थत्वमितिवाच्यं उभाभ्यामेक
स्यैवोपस्थापनादितिदिक्। ननु गजेरवं गच्छतिपिकरवरोतिसा दोकंपे बोधः गजसादृश्यस्यगमनेपिक
सादृश्यस्यचरावात्मकरवणेवाधादितिचेन्नगजपदस्यगजगमनेलक्षणेति कृतयापिकशब्दस्यापिकरण

त्वाक्षुषिकत्वयोगजगमनसदृशागमनत्ववृत्तिमान्नुपिकरवणसहशारवपहत्तिमानिस्याघाकारकान्न
पबोधांगीकारात् पद्मातत्वस्य वृत्तिगमनसजातीयत्वस्यसवृत्तिरवणसजातीयत्वस्य चसादृश्यस्यवा
पतियोगजवृत्तिगमनसजातीयगमनेकदापिकवृत्तिरवणसजातीयरवणकेत्वेतिशाब्दबोधइति।
ननुयदोनपरस्पतोत्पत्रघटान्वितताभावस्य दर्शनेकर्मतासंसर्गेणान्वयबोधवारणाय धात्वर्थनिष्ठवि
शेष्यतानिरूपितप्रकारतासंबंधेनशाब्दबोधंप्रतिविशेष्यतयाविभक्तिजन्योपस्थितेः कारणत्वमवश्य
मुपेयं एवं चगगनरवणाछत्तिपिकेइवैशेतोत्पादाविवाधार्थस्यसादृश्यस्य धात्वर्थगमनादावन्वयासंभवः
नचैवंपाकोनयागरत्नात्सेनअर्थभेदस्यपाकादावन्वयेपानस्यात् पाकस्यधात्वर्थतयातन्निष्ठविशेष्यता
निरूपितप्रकारतासंबंधेनभेदस्यान्वयबोधासंभवादितिवाच्यंनामार्थतिरिक्तत्वेनधात्वर्थस्यविशेषणात्
उक्तस्थलेच पाकादेर्धात्वर्थत्वेपिनामार्थत्वेनादोषादितिचेन्नस्तोकंपचतीत्यादौ व्यभिचारवारणायप्र
कारतायांभेदसंबंधावच्छिन्नत्वस्यावश्यकत्वेनोक्तस्थलेइवशब्दस्य सादृश्याद्यपलाक्षणिकतयातस्य

चाभेदसंबंधेनैव धात्वर्थगमनादौ प्रकारतयान्वयसंभवात् केचित्तु । उक्तानुपपत्त्या स्वगमनादिसादृश्य
स्यगमनादिकर्तृत्वेर्थे वान्वयः कर्तरि गजादिसादृश्यं च स्वगमनादिसदृशगमनादिकर्तृत्वमेवेत्याहुः अ
न्ये तु एतन्मतमयुक्तं तथा सति वने गमनं रवगमहं देवदत्तो गच्छतीत्यादौ वनादेः सर्वथैवान्वयानुपपत्तेः तस्मात्
जनिरूपितसादृश्यप्रयोजकगमनाश्रयत्वस्यैव बोधः वने गजवेत्यादौ तु गजादिपदात् गजादिकर्तृकग
गमनादौ लक्षणैवेत्याहुः नचैवमपि धात्वर्थनिष्ठत्वादेः प्रागुक्तकार्यकारणभावस्य व्यभिचारो दुरुद्धार
एवेति वाच्यं तादृशकार्यकारणभावस्यैवानंगीकारात् । तदंगीकारे च तन्मीमारातटस्थ क गच्छतीत्यादौ तट
स्य पदार्थैकदेशगमनादावन्वये तत्व्यभिचारापत्तेः न चैतदनंगीकारे घटो न पश्यतीत्यादौ घटाभावे पश्यती
त्यादिशाब्दबोधवारणासंभव इति वाच्यं धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेन शाब्दबोधं
प्रति नञ्जन्योपस्थितेर्विषयतया प्रतिबंधकत्वकल्पनेन तद्वारणादित्याहुः अत्रेदमवधेयं एतन्मत
युक्तमित्ययुक्तं उक्तप्रतिबध्यप्रतिबंधकभावकल्पनेन कलंजं न भक्षयेदित्यादौ कलंजभक्षणादौ किम्

र्थवत्त्ववदिति चेन्न ननु एवं धियो बाधाभावबोधो न स्यादिति चेत् लौकिककार्यकारणभावएवावश्यक इति अन्येतु
वादिमतस्यवापुष्टत्वात् न च तदुक्तरीत्या सा प्रवृत्तेरनुपपन्नत्वं जभावेस्य विभक्त्यर्थत्वाभावादिति वाच्यं।
तत्र विशिष्य धात्वर्थविशेषसमभिव्याहृतनञ्जस्यापसिद्धित्वेन कारणतान्तरकल्पनात् । न च मम
प्येवमेव निस्तार इति वाच्यं। प्रतिबंधकसत्वे हेत्वंतरेणापि कार्योत्पादात् वस्तुतस्तु नकेवलं नञ्समभिसत्र
लिङो निष्ठसाधनत्वेष्टलक्षणानन्वयस्तात्सर्वग्राहकत्वेतिमतावलंबनेनोक्तव्यभिचाराभावेनउक्तकारण
त्वांतरं न कल्प्यते एवं नेगतत्वेरहं देवदत्तो गच्छतीत्यत्र च वचनत्वाव्यर्थवेन सदृशगृहपोरभेदान्वयः देव
दत्तो गजसादृश्यवच्च वनसंयोगानुकूलगमनं सह शृंगहस्सेयोगानुकूलगमनकर्तृत्वं तत्पाचोक्तधर्म
णगजसदृशः पुरुषो वनसदृशाभिन्नगृहकर्मकगमनकर्त्ता साप्याकारेक शाब्दबोध इति उक्तरीत्या प
र्वमतदूषणमसम्यक् । यदपि पूर्वमते देवमिव मन्वे तत्परस्पामी सादृश्यसंगतिः तत्र भवत्कर्मकदर्शनेद
वकर्मकसादृश्यं प्रतीयते नतु भवेतो देववसादृश्यं तत्पासत्ति देवपदोत्तरं द्वितीयावैयर्थ्यापत्तेः संभवस्य

साधुत्वेपदत्साधुत्वस्याविद्यर्थत्वापरपर्यायत्वात् नचदेवेनेवार्थस्यतत्रचदृष्टतोपार्थस्यान्वयरत्तिवा
त्त्यां।तथानुभवात्प्रस्यानोपत्रसर्थान्वितत्तपार्थविसायकत्वभंगप्रसंगाच्चेतिदूषणंकेचिदुक्तं।तद
प्यसत्।उपमानोपमेययोस्समानविभक्तिकत्वस्योत्सर्गिकतयानैयत्याभावात्।परंतुपूर्वमतेकर्त्तसाच
कपदाभावेनुपपत्तिः।तत्रकर्तरिसादृश्यान्वयासंभवात्।एवंसादृश्यस्यविधेयतयाप्रतीतिरनुभवसि
द्धेनसिद्धत्।गजइवगवयः।पुरुषःसिंहइतिपुरुषोपमःसिंहइवगतौतीतिवाक्याभ्यांभिन्नविधेयकप्रतीति
जननात्।किंचत्वःप्रत्ययतोसादृश्योविभक्तिजन्योपस्थितेर्हेतुतायांव्यभिचारवारणायत्वःपदस्यत्वःकेम
केल्लक्षणाश्रयणस्यावश्यकतयागजइवेसादावपिरवश्यकत्वस्यसादृश्याश्रयेलक्षणामाश्रित्यगम
नादावेन्वयएवोचितइतिपूर्वमतेमप्यसंगवन्नपात्।चपदाभावेप्रत्ययतोसादृश्यबोधेघटोनपटइतो
सादृश्यःस्वरूपापोन्यानचतत्तेदानुपूर्व्योरूपाकांक्षाज्ञानाभावात्तथादृशानुपूर्व्याप्तिबोधाहानरसाद
बोधइतिधात्वर्थनिष्ठसादृश्यस्याविभक्तिजन्योपस्थितेर्हेतुत्वमेवनास्तीतिगजइवेसादाविवार्थसाद

रूपस्यागमनादावन्वयनकोपि दोष इति प्राहुरित्तिदिक्॥ अत्र चंद्र इव मुखमित्यादावुपमानोपमेययोर्वि
शेषणविशेष्यभावाभावेपि एकैव विभक्तिः लिंगसंख्याविभेदेपि उपमानोपमेयता विभक्तिः पुनरेकै
वउपमानोपमेययोरित्यनुशासनेनोपमानोपमेयपदयोस्समानविभक्तिकत्वनियमावगमात् तेनैवं
द्रस्येव मुखमित्यादयो न प्रयोगाः लिंगसंख्याविभेदेपि स्वस्य च लिंगवचनभेदेनोपमायां शाब्दबोध
प्रतिकूलत्वे न दोषः किंतु सहृदयोद्वेगजनकत्वेनैवेत्यादिः प्रागुक्त एवाशयः एतेन चंद्र इव मुख
मित्यादौ चंद्रपदं चंद्रसदृशलक्षकं इवशब्दस्तात्पर्यग्राहकतया द्योतक एवेति उपमानोपमेयपदा
र्थयोर्विशेषणविशेष्यभावेनैवान्वयः न च निपातानां वाचकत्वे कथमिवशब्दस्य द्योतकत्वमिति
वाच्यं। न जादिनिपातानां वाचकत्वेप्युपगतस्येवशब्दस्य द्योतकत्वोपगमे बाधकाभावात्। तथा हि चंद्र
मिव मुखं पश्यामीत्यादौ चंद्रपदोत्तरं द्वितीया सर्वसिद्धा सा च इवशब्दस्य द्योतकत्व एवोपपद्यते तथा
सत्येव चंद्रपदस्य चंद्रसदृशे लक्षणायां तस्य मुखेभेदान्वयात् अभेदान्वये च विशेषणविशेष्यवाचक

पदयोस्समानविभक्तिकत्वस्य नियामकतया विशेषणवाचकत्वे इष्टपदोत्तरद्वितीयाया आवश्यकत्वात् ।
इष्टवत्त्वस्य साध्यत्ववाचकत्वे तु तस्य वाच्यतया मुख्यत्वेनान्वयेन त्वं इष्टपदार्थमुख्यत्वयोरभेदान्वयाभावात् ।
त्वं इष्टपदोत्तरद्वितीयानुपपत्तेरेव तस्या अनावश्यकत्वात् त्वं इष्टत्वमुख्यत्वप्रकारकमीमांसादिमतोपि तादृशबोधो-
पपत्तेः । अथ त्वं इष्टपदस्य त्वं इष्टप्रातिपदिकमर्थः साध्यत्वशक्तत्वस्य चेव शास्त्रस्य साध्यत्वस्य लक्षणात्
स्यत्वेन मुख्यत्वभेदेनान्वय इति शिक्षा त्वं इष्टमिव मुख्यत्वप्रकारकमीमांसादौ समानविभक्तिकत्वोपपत्तिः संभवस-
वेति चेन्न केवलं त्वं इष्ट इत्येवं इति प्रयोगाभावेन तदात्मा रवप दसादरूप विशेष्यकबोधाभावादिष्टादेः सा-
ध्यत्वपरत्वेकेवाकल्पनात् तेषां निरर्थकतया तत्र शक्तिसंबंधलक्षणायाः संभवात् तावतापि तत्त्वशाब्दबोध-
स्य वाभेदेन मुख्यत्वेनान्वयमुख्यशाब्दबोधस्य समानविभक्तिकत्वाभावेपि त्वं इष्टपदसमानविभक्तिकता-
या अनुपपादनात्स्वत एवं भिन्नशाब्दस्य घोतकत्वे हंसो धवलत्वात् इत्यादौ संततो विभक्तितादवस्थ्यात् कुलव-
धूरिव साधो लिङ्गभेदवचनभेदयोरुपमादोषत्वस्योपपत्तेस्तत्र हंसीपदस्य हंसीसदृशी कुलवधूरूप

दस्यकुलत्ववधूसदृशोल्लक्षणायां तस्य च चंद्रसदृशमुखं चामेदनान्वयात् अभेदान्वये च विशेषणविशेष्य
पदयोस्समानलिंगकत्वस्य समानवचनकत्वस्य च तंत्रत्वात् तदृश्वराद्रस्यपतादृशीवाचकत्वेतु हंसीसादृश
स्यकुलत्ववधूसादृश्यस्यैव वार्थत्वे वान्वयतया चंद्रसदृशमुखं चान्वयेन हंस्यादिपदार्थाभेदान्वयाभावेन
लिंगभेदवचनभेदयोरप्रमादोषत्वानुपपत्तेः ननु समानलिंगकत्वसमानवचनत्वयोरभेदान्वय
नियामकत्वे वेदाः प्रमाणमित्यादिप्रयोगानुपपत्तिः तत्र लिंगभेदाद्वचनभेदाच्चान्वयानियततलिंग
स्थले समानलिंगकत्वस्य नियामकतया प्रमाणशब्दस्य नित्यक्लीबतया नियतलिंगत्वात्र दोष इति
वाच्यं तथापि समानवचनत्वस्य नियामकत्वासंभवस्य दुरुद्धरत्वात् प्रमाणशब्दस्यानियतवचनत्वे
नानियते वचनस्थले समानवचनत्वस्य नियामकत्वोपगमेप्यनिस्तारादिति चेन्न यत्र विशेष्यक
वाचकपदान्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्यायां न विवक्षा तत्राभेदान्वये विशेष्यविशेषण
पदयोस्समानवचनकत्वस्य नियामकत्वाभ्युपगमात् वेदाः प्रमाणमित्यादौ च प्रमाणपदोत्तरप्रथमाद्वि

भत्त्वावदपदोत्तरविभक्तितात्पर्यविषयबहुत्वविरहेऽमेकत्वे विवक्षितत्वमिति न दोषः न च प्रामाणानां
बहुतया तत्रैकत्वान्वयासंभवात् कथं तत्रैकत्वविवक्षेति वाच्यं। तत्र प्रकारस्य घटितावच्छेदकप्रमाकरण
तायामेवैकत्वान्वयात्। वेदनिष्ठप्रमाकरणतायाः स्वाच्छत्वावच्छिन्नाया एकत्वान्न दोषः न च सेस्यापाः
प्रकारस्य घटितावच्छेदकान्वयस्याहष्टत्वात् कथं तस्यान्वयान्वय इति वाच्यं। अनेकव्रीहितात्पर्यके सेपनो
व्रीहिरिति वाक्ये व्रीहित्वे एकत्वान्वयदर्शनात् व्रीहीनामनेकत्वेन तत्रैकत्वान्वयासंभवात् तत्र च
तत्रैकवचनोपस्थितत्वानेकत्वानां प्रत्ययकेनानाहिर्त्वन्वयसंभवस्येवेति वाच्यं। एकत्वमात्रस्य वल
मात्रसारण्यनाव्यावर्त्तकत्वयास्व सजातीयनिष्ठभेदप्रतियोगित्वानवच्छेदकैकत्वस्वरूपसजातीयद्विती
परहितत्वस्यैकवचनार्थस्यान्तरीत्या व्रीहिष्वन्वयासंभवात् न च यथाकथंचित्सजातीयस्याव्यावर्त
कतयाप्रकारस्य घटितावच्छेदकरूपेणैव तद्वाच्ये तथाचान्वयदोस्तीसाद्धे घटनिष्ठभेदप्रतियोगितानवच्छे
दकैकत्वाप्रसिद्ध्या तद्बोधासंभव इति वाच्यं। समभिव्याहृतपदार्थतासमभिव्यविशिष्टप्रकारस्य घटितावच्छेदक

रूपेण साध्यासत्त्वविवक्षणे न एतद्धेत्वविद्यमानघटत्वनिष्ठभेदप्रतियोगितावच्छेदकैतया यागकरणत्वस्यैके
केवलस्याप्रसिद्धा तथोक्तसंदेहवातत्त्वापेक्षे प्रसुनायमे तेसा हेतोः कैवमान्वस्य यागकरणपर्यवसितरनिष्ठ
भेदप्रतियोगितावच्छेदकेतया यागकरणप्रसुनिष्ठभेदप्रतियोगितानवच्छेदकत्वे केवलाप्रसिद्धा
तद्द्वयासंभवेन संयोगरूपे केवलान्वये वस्यादत्त्वेन्वयो वाच्यं तथा चानेकप्रसुकरणकेयागाद्दृष्ट
सिद्धौ बाधकाभावेन तत्र केतु वैगुण्यानुपपत्तिः न च यस्यां यागव्यक्तौ यस्य ज्ञाः करणत्वेनान्वेय
तत्रैव पशोस्तद्यागव्यक्तिकरणत्वनिष्ठभेदप्रतियोगितानवच्छेदकैकेलान्वयो विवक्षित इति नोक्त
दोषः इति वाच्यं तेन रूपेण पदाद्नुपस्थितत्वात् तद्यागव्यक्तिकरणत्वस्य सम्भिभ्याहृतपदार्थत्वा
भावेन तथान्वयक्रमसंभवादिति चेन्न प्रसुनायमे हेतुतासर्वचरणात्स्याश्रयनिष्ठयोगप्रति
योगिपश्यकरणकत्वस्याश्रयकरणकत्वपतद्भयसंबंधेन तत्तद्यागव्यक्तिकरणप्रसुत्वव्यापकैके
केवलव्यक्तिनिरूपितसमवायसंबंधेन वा संख्यारूपे केवलस्य यागेपकारकन्वयापगेनादबोधप्रथम

कल्मे समवायेन प्रकृत्यर्थवशाच्च विलक्षणयोपगमान्न प्रकृत्यर्थान्विते स्वादिसुप्तिमेगः वस्तुतो
स्तु यजिपदस्य स्वभिन्नपशुकरणकसंसर्गे वेधेन पशुविशिष्टान्यायोगलक्षणा तेनैव पशुकर
णकतास्यतत्तीयांतार्थस्यान्वयः करणतासंबंधेन पशौरेववान्वयः तत्तीयार्थमजिपदस्य वि
शिष्टयोगलक्षणायां तात्पर्यग्राहिकेति सारमिस्यपिपरास्तउक्तौ सैवेवशब्दस्य वाच्यकैव
वेदमिचमुखपसामीसादौ वेदपदान्तरेद्वितीयापपत्तेः हंसी वेत्यादौ लिंगभेदादरूपमादोपचौ
पपत्तेश्च परपिञ्ज नुमोर्गिर्वाच कमुखादिपदसमभिव्याहाराभावे वेदमिचपरूपसादौ वेदश
दः वेदसदृशालक्षकः इववशाब्दस्य तात्पर्यग्राहकः इववशाब्दस्य सादृश्यवाचित्वे वेदस्य तत्र भेद
न्वयो न स्यात्तद्द्वितीयार्थान्वयानुपपत्तेश्च कर्मण्येव द्वि तीया विधानादिति त
दप्यसत् निपातार्थभेदेनान्वयबाधकाभावात् निपातस्य समभिव्याहृतपदान्तरवृत्तिमत्त्वस्य निपा
तार्थान्वयप्रयोजकत्वात् द्वितीयार्थान्वयः न चैवं प्रकृत्यर्थान्विते स्वादिसुप्तेतिमेगः इति वाच्यं ना

मृदस्य तरोस्त्वेनैः नानुपमृघ्यमाकुर्भावादिसादौ तथान्वयदर्शिनेनाप्रकृस्यपान्वितेत्यादिमुक्ते
निपातासमभिव्याहारस्थल एवोपगमात् इन्दुरिवेन्दुरिव पद्मस्यसादोदर्शने
कमलं तथैवार्थसादृश्यस्यैवान्वयेन चेन्दुसादृश्यपद्यस्यसोपा चैवैबोधः चेन्दुरिव मुखं पद्मस्यसादो
तु सादृश्यस्य मुखे एवान्वयः नचोपमानोपमेयपदयोः समानविभक्तिकत्वनियमेन गजरवग
छनीसादृश्यमपि चारइति वाच्यं नामार्थयोरुपमानोपमेयभावे तथानियमात् नचैवमपि चे
न्दुरस्येव शोभा कामिनीमुखे इत्यादिप्रयोगानां चेन्दुशोभयोरुपमानोपमेयभावपरतापकेण
पुपपत्तिरिति वाच्यं तादृशप्रयोगानामसाधुत्वस्यैवोपगमात् चेन्दुस्येव शोभा कामिनीमुखस्य
सत्तेतु चेन्दुमुखयोरेवोपमानोपमेयभावानेतु चेन्दुशोभयोरित्युपगमात् पत्तु उपमान
पदस्यापि यत्र लिंगतास्यात्तत्र एव तादृशनियमः अत एव राजनह गते कौमुद्यामाते वहितका
रिणीमिव चापिनिर्वाह्यः मातरो चस्य नियतलिंगत्वात् एवं च चेन्दुस्येव शोभा कामिनीमुखेरस्यादयः

प्रयोगाः शोभायां चेद् इति न पि तत्सादृश्यान्वयपरता या मन्विभुघटाइलितं दसतपि कन्दवरोतीसा शेन
थाप्यगते अत्र वदंति उपमानोपमेयपमेयभावेनान्वयस्य पल्लवोक्तेर्विपर्ययः गमेइवेगच्छतीसादौ चेग
जेसादृश्यानुयोगित्वपानेमनान्वयः बाधात् किं तु दवसादृश्यलक्षणपागमनेसजातीयसार्पकतया
तदनुयोगित्वमेव गमनान्वये इति न दोषः एवं च चेदृश्ये शोभामुखरसाद योपि प्रयोगाः इवशब्दस्य
लक्षणया शोभा शालीयत्वपरतैव बसुघटाः अपत्तया पिरामेन हरीत कींमुखमाते वहितकारिणीमि
त्यादावगतिरेव तत्रमातृहरितक्यारुपमानोपमेयभावेनान्वयसंबादित्वेन तत्रेवशब्दस्य सदृशं
लक्षणया मातेव चासौ हितकारिणी चेति कर्मसाधारयसमासानंतरं हितीयोपगमे तमातसदृश
स्य हितकारिण्याभेदेनान्वये नमातृहरितक्यारुपमानोपमेयभावेनान्वयप्रामावात्‌ वस्तुतस्तु अत्र
मातृशब्देन स्त्रीलिंगेनाउनेनोवाचकः किं तु सातृपर्यायः पुल्लिंग एव तत्पाता मातृहरीतक्योरुपमेयभा
वेनान्वयः किं तु सातृसंबोध्यराज्ञोरेव रक्षेचयथा हरितक्याहितकारित्वमातोपुरुषोहरीतकीं तु किं विंसे

दिग्धतयातथात्वमपिहरीतेकोऽनुरूपेतिफलितार्थः एवं चात्र मात्रशोतोल्पमानोपमेयभावेनान्वय
नतद्वाचकमात्रशाब्दत्वात्तंत्रशाब्दबोधः सधाम्नारूपसमानविभक्तिकत्वसत्वान्नकोपिदोषइतिस्तेयत्नु
वितेनाः सधात्तथापि न्वेद्देस्यानुत्स सुखमित्सादौ चेंद्रमुखयोरुपमानोपमेयभावेनान्वयात्समान
विभक्तिकत्वाभावाच्चकयमुक्तनियम इति चेन्न असत्ति विशेषानुशासन एवतादृशनियमोपगमे
नीलश्च तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यामिति विशेषानुशासनसहेनोक्तनियमबाधकाभा
वात्तन्नेवमप्युपपविशेषणानां क्लीबत्वं भवतीत्यनुशासनसत्वाच्चंद्र इव मुखमित्सादौ इवार्थवि
शेषणस्य चंद्रादेः क्लीवतापत्तिर्दुर्वारैवेति चेन्न तत्रशास्त्रीवस्यामात्राश्रीस्यामप्रगीवच्चपत्नामप्रगच्चपत्ने
सादिभाष्यकारादिप्रयोगसामर्थ्यात्तादृशानुशासनस्यानियतलिंगविशेषणशब्दपरत्वेनादोषात्।
अत एव पार्थ एव धनुर्धर इत्यादावपि नानुपपत्तिरिति दिक् शाब्दबोधनामनेत्तत्वात्तत्स्वत्स्वालात्संविदो
मम्मामयानोक्तं प्रमेयं तत्त्वबोध्यव्यंतसुधीवरैः॥१॥ ॥ ॥ नानानिबंधानालोक्य विभाव्य

च पुनः पुनः मयात्र लिखितं तत्पते न तुष्यंतु तार्किकाः १ महाक्लेशतो भावनातश्च समुपकृ
मया संगृहीतप्रमेयं हि यत्तत् अवश्यं सुधीभिस्तदालोचनीयं प्रमादस्तु लक्ष्यो हि संशोधनीयं ३
यथाश्रुतानां मणिगोचराणां निष्कर्षबोधाय बहुकृतिपुत्तः अयं महादेवबुधेन यत्नाच्छंभोर्दयातो
रचितो निबंधः ४ ॥ ॥ इति श्रीमत्सदवाक्प्रमाणपारावारीणश्रीमन्मुकुंदपंडितात्मजपु
णतामकरोपनामकमहादेवपंडितविरचिते न्यायकौस्तुभे शब्दपरिच्छेदः समाप्तः ॥ समा
प्तं च प्रमाणपदार्थनिरूपणं ॥ ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ शुभं भवतु ॥

[OrderDescription]
,CREATED=27.12.19 14:12
,TRANSFERRED=2019/12/27 at 15:16:19
,PAGES=506
,TYPE=STD
,NAME=S0002403
,Book Name=M-2405-NYAY KOUSTUBH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF

FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF

FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF

FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF

FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF

FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF

FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF

FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF

FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF

FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF

FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF

FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF

FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF

FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF

FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF

FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF

FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF

FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF

FILE382=00000382.TIF
,FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF

FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF

FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF

FILE427=00000427.TIF
,FILE428=00000428.TIF
,FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF
,FILE432=00000432.TIF
,FILE433=00000433.TIF
,FILE434=00000434.TIF
,FILE435=00000435.TIF
,FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF
,FILE440=00000440.TIF
,FILE441=00000441.TIF

FILE442=00000442.TIF
,FILE443=00000443.TIF
,FILE444=00000444.TIF
,FILE445=00000445.TIF
,FILE446=00000446.TIF
,FILE447=00000447.TIF
,FILE448=00000448.TIF
,FILE449=00000449.TIF
,FILE450=00000450.TIF
,FILE451=00000451.TIF
,FILE452=00000452.TIF
,FILE453=00000453.TIF
,FILE454=00000454.TIF
,FILE455=00000455.TIF
,FILE456=00000456.TIF

FILE457=00000457.TIF
,FILE458=00000458.TIF
,FILE459=00000459.TIF
,FILE460=00000460.TIF
,FILE461=00000461.TIF
,FILE462=00000462.TIF
,FILE463=00000463.TIF
,FILE464=00000464.TIF
,FILE465=00000465.TIF
,FILE466=00000466.TIF
,FILE467=00000467.TIF
,FILE468=00000468.TIF
,FILE469=00000469.TIF
,FILE470=00000470.TIF
,FILE471=00000471.TIF

FILE472=00000472.TIF
,FILE473=00000473.TIF
,FILE474=00000474.TIF
,FILE475=00000475.TIF
,FILE476=00000476.TIF
,FILE477=00000477.TIF
,FILE478=00000478.TIF
,FILE479=00000479.TIF
,FILE480=00000480.TIF
,FILE481=00000481.TIF
,FILE482=00000482.TIF
,FILE483=00000483.TIF
,FILE484=00000484.TIF
,FILE485=00000485.TIF
,FILE486=00000486.TIF

FILE487=00000487.TIF
,FILE488=00000488.TIF
,FILE489=00000489.TIF
,FILE490=00000490.TIF
,FILE491=00000491.TIF
,FILE492=00000492.TIF
,FILE493=00000493.TIF
,FILE494=00000494.TIF
,FILE495=00000495.TIF
,FILE496=00000496.TIF
,FILE497=00000497.TIF
,FILE498=00000498.TIF
,FILE499=00000499.TIF
,FILE500=00000500.TIF
,FILE501=00000501.TIF

FILE502=00000502.TIF
,FILE503=00000503.TIF
,FILE504=00000504.TIF
,FILE505=00000505.TIF
,FILE506=00000506.TIF
,